कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

m-2495 ६

दाखल क्र ______ विषय ______.

नांव शांति कमलाकर

लेखक/लिपीकार ______.

पृष्ठ 332

काळ ______ पूर्ण/अपूर्ण पूर्ण.

॥अथ शांतिकमलाकरे अनुक्रमणिकाप्रारंभः॥

॥श्रीगणेशाय नमः॥

॥इतिश्रांतिकमलाकरेअनुक्रमणिकासमाप्तः॥

॥ शांतिकमलाकरप्रारंभः ॥

॥श्रीगणेशायनमः॥ ॥नारायणात्मजश्रीमद्रामकृष्णस्यसूनुना।कमलाकरसंज्ञेनप्रोच्यं
तेशांतयःक्रमात्॥तत्रएवंविनायकंपूज्यग्रहांश्चैवविधानतः।कर्मणांफलमाप्नोतिश्रियं
चाप्नोत्यनुत्तमामितियाज्ञवल्क्येनसर्वकर्मांगत्वोक्तेर्विनायकशांतिरुच्यते।तत्राधिका
रिणमाहयाज्ञवल्क्यः।विनायकःकर्मविघ्नसिद्ध्यर्थंविनियोजितः।गणानामाधिपत्येच
रुद्रेणब्रह्मणातथा।तेनोपसृष्टोयस्तस्यलक्षणानिनिबोधत।स्वप्नेवगाहतेत्यर्थंजलंमुंडां
श्चपश्यति।काषायवाससश्चैवक्रव्यादांश्चाधिरोहति।अंत्यजैर्गर्दभैरुष्ट्रैःसहैकत्रावतिष्ठ
ते।व्रजन्नपितथात्मानंमन्यतेनुगतंपरैः।भविष्येपि।तैलार्द्रगात्रंविधुरंकरवीरविभूषितं॥
एवंस्वप्नानुक्त्वाप्रत्यक्षदर्शनान्याहयाज्ञवल्क्यः।विमनाविफलारंभःसंसीदत्यनिमित्ततः। राम
तेनोपसृष्टोलभतेनराज्यंराजनंदनः।कुमारीनचभर्तारमपत्यंगर्भमंगना।अंगनागर्भंन

५

लभते गर्भिणी चापत्यं न लभते न जीवतीत्यर्थः॥ आचार्यत्वं श्रोत्रियश्च न शिष्योध्यायनं तथा। वणिग्लाभं न चाप्नोति कृषिं चापि कृषीवलः॥ स्नपनं तस्य कर्त्तव्यं पुण्येह्नि विधिपूर्वकं। तस्योपसृष्टस्य तेनोपसृष्ट एवाधिकारी स च शूद्रोपीति तस्याप्यधिकारः। ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च सिद्धिकामुकैः॥ कर्मनिर्विघ्नसिध्यर्थं सुपूज्यस्त्वं गजानने ति लैंगात्। अत एव महार्णवे यजमानस्तु शूद्रश्चेद्द्विजैस्तानि योजयेदित्युक्तं। एवं स्त्रीणामप्यधिकारः॥ अत एव बृहत्पराशरेण तेनोपहतपुंसां तु कर्मस्यान्निःफलं कृतं। स्त्रीणामपि तथा सर्वं क्रियमाणं तु निःफलमित्युपसृष्टत्वं स्त्रीणामधिकारार्थमुक्तं। अत्रापि कुमारीन च भर्त्तारमित्यादि। अत्र पुण्येह्नीत्युक्तेपि। हस्तपुष्याश्वयुक्सौम्यवैष्णवान्यतमे शुभे नक्षत्रे च मुहूर्त्ते च मैत्रे वा ब्रह्मदैवते। इति विष्णुधर्मे। विनायकशांतौ विशिष्योक्तानि नक्षत्राणि। शु

क्लपक्षेचतुर्थ्यांतुवारेणाधिषणस्यच।तिष्येचवीरनक्षत्रेतस्यैवपुरतोनृपेति।भविष्यत्पु
राणोक्तायोगविशेषाश्चज्ञेयाः।विवाहादिकर्मांगमुपसर्गनाशार्थंचोत्तरायणेक्वचिद्देवन
क्षत्रेकृत्तिकादिविशाखांतेयत्तुएव्यंनक्षत्रमित्युक्तेकार्यंपुण्याहएवकुर्वीतेत्युक्तेः।बृहत्परा
शरोपि।चतुर्थ्यांशुक्लपक्षेतुअयनेचोत्तरेतथा।क्वचित्तुश्रवणेचोत्तरेतथेतिपाठः।पुण्या
र्थंसर्वसिध्यर्थंकुर्याच्छांतिंविनायकीं।द्रव्याभावश्चांदसः।याज्ञवल्क्यः।गौरसर्षपकल्केन
साज्येनोत्सादितस्यच।सर्वौषधैःसर्वगंधैर्विलिप्तशिरसस्तथा।भद्रासनोपविष्टस्यस्व
स्तिवाच्याद्विजाःशुभाः।उत्सादितस्यउद्वर्तितस्य।सर्वौषधानिच।मुरामांसीवचाकुष्ठंशैले
यंरजनीद्वयं।सटीचंपकमुस्ताचसर्वौषधिगणःस्मृतः।इतिमहार्णवोक्तानि।कुष्ठंमांसीहरि
द्रेद्वेमुराशैलेयचंदनं।वचाचंपकमुस्ताचसर्वौषध्योदशस्मृताइतिछंदोगपरिशिष्टोक्तानिच

तिथ्य

ग्राख्याणि। तत्रैव रुद्रेः। सुरामहाराष्ट्राणां मोहिरी इति प्रसिद्धा। शैलेयं शिलाजं। सर्वगंधा
उक्ताः हेमाद्रौ मदनरत्ने च गारुडे। कर्पूरं चंदनं दर्पः कुंकुमं च समांशकं। सर्वगंधमिति प्रो
७२ क्तं समस्तसुरवल्लभमिति। मदनरत्ने तु चंदनकुंकुमागुरुकर्पूरकस्तूरिकाजातीफलानि सर्व
गंधा उक्ताः। तत्र मूलं चिंत्यं। अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्। मृत्तिकां रोचनां
गंधान् गुग्गुलं चाप्सु निक्षिपेत्। आहृताद्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात्। गंधान्सर्वगि पं
धान्। अत्र विशेषमाह। अपरार्के बैजवापः। चतुः प्रस्रवणेभ्यश्चतुरः कुंभानाहृत्य तेषु सर्वौ
षधीः सर्वगंधान् हिरण्यं व्रीहियवौ गुग्गुलं मदमारवल्करमिति निक्षिपेदिति विशेषः।
महार्णवे। अथोच्यते तत्र संभारा रोचना पंचमृत्तिकाः। अश्वस्थानाद्गजस्थानाद्वल्मीकात्संग
माद्ध्रदात्। चंदनागुरुकस्तूरीकर्पूराद्याः सुगंधयः। श्रीपर्णिका छपीठं च सहकारस्य पल्लवाः।

स्रजः शोभन गंधाश्चविचित्रकुसुमानिच। कलशावेष्टनार्थंतुनववस्त्रचतुष्टयं। पीठस्या
च्छादनार्थायशुक्लंवस्त्रमथापरं। गणेशांबिकयोरर्थेवस्त्रयुग्मंसुशोभनं। आचार्यदक्षिणार्थं
तुमहार्हंवसनद्वयं। गणेशप्रतिमाचैवग्रहेर्यश्चप्रतिमातथेति॥ किंच। चर्मण्यानडुहे
रक्तेस्थाप्यंभद्रासनंततः। इदंपूर्वंस्थाप्यंपूर्वंविनियोगोक्तेः। तत्रैकहस्ताद्विहस्तावाचतुरंगुलोच्चा
वेदीकार्येतिकेचित्। तच्चिंत्यं। विधायकमानाभावात्। करणेप्येकहस्तायुक्ता। यत्रहोमोत्तरमभिषे
कस्तत्रोत्तरतःपूर्वतोवाकार्यः। अत्रत्वभिषेकोत्तरंहोमः अतःपूर्वतोहोमःपश्चाद्भद्रासनंका
र्यं। प्रांशुदंचिवा। कर्माणीतिकात्यायनोक्तेः। तेनोत्तरतःस्नानपीठंतद्दक्षिणेहोमश्चमूरवाणी
हेयः। दक्षिणसंस्थतापत्तेः। अत्रमध्येस्वस्तिकंकृत्वातत्ररक्तमानडुहंचर्मप्राचीनग्रीवमुत्त
रलोमास्तीर्यतत्रश्रीपर्णीपीठंतदुपरिश्वेतवस्त्रमितिभद्रासनंकृत्वातस्यपूर्वादिचतुर्दिक्षु

चतुरः कलशान्संस्थाप्य तेषु वरुणं संपूज्य ऐशान्यां वेद्यां पीठे वा रक्तवस्त्रे प्रतिमयोर्गणेशांबिके तत्र स्थापयित्वा ताभ्यामावाहयेत्॥ अपरार्के भविष्ये त्वन्या अपि देवता उक्ताः॥ व्योमकेशं तु संपूज्य पार्वतीं भीमजं तथा॥ रुद्रस्य पितरं तातमर्कमारं सितं तथा॥ धिषणं क्रूरपुत्रं च कोणं लक्ष्मं च भारत॥ विधुंतुदं बाहुलेयं नंदकस्य च धारिणं॥ व्योमकेशः शिवः॥ भीमजो गणेशः॥ आरो भौमः॥ सितः शुक्रः॥ धिषणो गुरुः॥ क्रूरपुत्रो बुधः॥ कोणः शनिः॥ लक्ष्म चंद्रः॥ बाहुलेयः स्कंदः॥ नंदकधारी विष्णुः॥ सहस्राक्षं शतधारमृषिभिः पावनं कृतं॥ तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः॥ भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि॥ ललाटे केशयो रक्षणोरापस्तद्घ्नंतु सर्वदा॥ एकैकोमंत्रः कुंभत्रये॥ त्रिभिश्चतुर्थकुंभः सर्वैर्मंत्रैश्चतुर्थमिति चोल्लेदर्शनादिति विज्ञानेश्वरः॥ त्रिभिः

रेकैकः कुंभ इत्यपरार्कः। स्नातस्य सार्षपं तैलं स्रुवेणोदुंबरेण तु। जुहुयान्मूर्ध्नि कुशान्सव्ये
न पाणिना धृत्य च। मितश्च संमितश्चैव तथा शालकटंकटो। कूष्मांडो राजपुत्रश्चेत्येतैः स्वाहासमन्वि
तैः। नामभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः। यजमानमस्तके मितादिनामभिस्तैलं हुत्वा
तेनैव चरुं न हुत्वा तच्छेषेणैं द्रादिदशदिक्पालेभ्यो नामभिर्बलिं दद्यादिति विज्ञानेश्वरम
हार्णवौ। पूर्वोक्तनामभिस्तैलं हुत्वा तेनैव कृताकृतादि बलिदानं। न तु चरुहोमः। मानाभा
वात् इत्यपरार्कः। बहवस्तु परापरारोपि। नामभिश्च बलिं दद्यान्नमस्कारसमन्वितैरिति मिता
दिनामभिर्बलिमाह। दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः। कृताकृतांस्तंडुलांश्च पललौ
दनमेव च। मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव तु। कृताकृता अवहता अनवहताश्चापि
ललं तिलपिष्टं मांसमित्यन्ये। तन्मिश्र ओदनः। एतावत्सकमामं च। पुष्पं चित्रं सुगंधं च सुरां

ना२

चत्रिविधामपि। त्रिविधा गौडी माध्वी पैष्टी च। एतत्कूद्रपरं। क्षत्रवैश्ययोः पैष्टी विप्रेण तु सर्वा
पि वर्ज्येति महार्णवः। तत्र मात्राभावात्। चतुर्वर्णाधिकाराच्च। न च नराश्वमेधो मद्यं च कलौ वर्ज्यं
द्विजातिभिरिति निषेधः। तस्य सौत्रामण्यामपि सुराग्रहणस्य च संहैग्ये इत्यनेनोपसंहारात्।
हेमाद्रिस्तु निषेधस्य निवृत्तिमात्रार्थत्वेन विशेषानपेक्षणेनोपसंहारः। विशेषनिषेधस्तु
दोषाधिक्यार्थ इत्याह। अतस्तदभावे शूद्रैर्द्विजैश्च पयो ग्राह्यं। सौत्रामण्यां पयोग्रहावास्यु
रिति आपस्तंबेन विकल्पाभिधानात्। तत्र सैंधवमिश्रं महार्णवादयः शिष्टाः। मूलकं पूरिका मि ति
पूपांस्तथैवोंडेरकस्रजः। दध्यन्नं पायसं चैव गुडपिष्टं समोदकं। मूलकं प्रसिद्धमिति महार्ण
वः। तत्राकारः पिष्टविकार इति मदनरत्ने विज्ञानेश्वरौ। महार्णवेपि। प्रत्यक्षं मूलकं वा स्या
दुत भक्ष्यस्तथाकृतिरिति। अपूपः स्नेहपक्वो गोधूमविकारः। उंडेरकस्रजः क्षुद्रापूपा इत्य

शां॰ क॰

पराकैः। वर्तुलैश्चतुरस्रैश्चदीर्घैः पिष्टविकारकैः। मिश्रिताः स्रजउच्यंते ओंडेरकसमाख्ययेति
महार्णवे मदनरत्ने च। गुडपिष्टं गुडमिश्रं पिष्टमित्यर्थः। मोदकाः पैष्टा इत्यपराकैः। लड्डुका इति
मदनरत्ने। बृहत्पराशरेण कुल्माषाः फलानि चाधिकान्युक्तानि। बलिमंत्राः प्रयोगे वक्ष्यंते॥
एतान्सर्वानुपाहृत्य भूमौ कृत्वा ततः शिरः। शूर्पे निधाय निवेद्येत्यर्थः। विनायकजननीं उपतिष्ठे
स्य
त् ततोंबिकां। दूर्वासर्षपपुष्पाणां दत्वार्घ्यं पूर्णमंजलिं दूर्वादिपूर्णमंजलिसंज्ञं विनायकां
देहि
बिकायै चार्घ्यं दत्वोपतिष्ठेतेत्यर्थः। रूपं यशो देहि भगं भगवति देहि मे। पुत्रान्देहि धनं देहि स
र्वकामांश्च देहि मे। पुत्रान्त्रक्षे देहि धनं सर्वकामांश्च देहि मे। विनायकोपस्थाने भगवन्नित्यु
हुत्तिर्विज्ञानेश्वरः। सत्तुसमानविधानत्वात्प्रकृतिविकाराभावे कथं स्यादिति चिंत्यं। अत ए
राम
वांबिकामित्यर्थः। ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः। ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयु
॥५॥

र्मगुरोरपि। एवं विनायकं पूज्य ग्रहांश्चैव विधानतः। कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमां। यजमानाभिषेकवस्त्रं आचार्याय दद्यात्। आत्मनो वासः आचार्याय दद्याती इति मदनरत्ने बैजवापोक्तेः॥ ॥ अथ बौधायनसूत्रे विशेषः। अथातो विनायककल्पं व्याख्यास्यामो मासि मासि चतुर्थ्यां शुक्लपक्षस्य पंचम्यां वाऽभ्युदयादौ सिद्धिकाम ऋद्धिकामः प शुकामो वा विनायकस्य बलिं हरेत् पूर्वेद्युः कृतैकभक्तोपआचम्य देवयजनोल्लेखनाद्यग्निमुखान्तं कृत्वा दक्षिणाभिमुखं हस्तिमुखं दैवतमावाहयामि। विघ्नं विघ्नेश्वरागच्छ विघ्नेत्येवं नमस्कृत। अविघ्नाय भव त्वं स्माकं सदास्माकं भवोद्भवेत्यथ हवींषि तासु मनोमि श्रमर्घ्यं दद्याती माः आपः शिवतमाः पूताः पूततमा मेध्यामेध्यतमा अमृता अमृतरसाः पाद्या अर्घ्या अर्हणीया अभिषेचनीया आचमनीया मार्जनीयाश्च प्रतिगृह्यतां भगवान्विनायको मित्यथ हृत्लौं गंधपुष्पे धूपदीपैरभ्यर्च्य पितिष्ठतेन

मोभूतपतयेनमोभुवनपतयेनमोभूतानांपतयेनमइत्यथतिस्रो विनायकाहुतीर्जुहोति विना
यकायभूपतयेनमो विनायकायस्वाहा।एवं विनायकायभुवनपतयेनमो विनायकायस्वाहा।
एवं विनायकायभूतानांपतयेनमो विनायकायस्वाहा।अथप्रभृतिसिद्धमाधेनुवरप्रदानादपू
पंकरंभोदकसक्तून्पायसमित्यथास्मा उपकिरतिविघ्नेभ्यस्वाहा।एवं विनायकायवीराय०सु
राय०उग्राय०भीमाय०हस्तिमुखाय०वरदाय०विघ्नपार्षदेभ्यः स्वाहेत्यथभूतेभ्योबलिमुपह
रेद्येभूताःप्रचरंतीत्यथपंचसूत्रंकंकणंहस्तेबध्नातिविनायकंमहाबाहोविघ्नमेतत्त्ववाज्ञया। कं
मि कामायेसाधिताःसर्वेइदंव्याहृतिरावध्नामिकंकणमित्यथाग्निंप्रदक्षिणंकृत्वाप्रणम्याभि
भिवाद्यविनायकंविसर्जयति।कृतंयदिमयाप्रायसिमहाभागगणेश्वर।अजितेश्वसगणःसाधु राम
याहिसद्रंप्रसीदतामितिदधिमधुपयआज्यंविसर्जनंकल्पयति।। ।।अथप्रयोगः।। ७।।

पूर्वोक्तशुभदिनेकर्त्तादिशाकालौस्मृत्वाविनायकोपसर्गशांत्यर्थममुककर्मणिनिर्विघ्नता
सिध्यर्थममुकफलसिध्यर्थंलक्ष्मीप्राप्त्यर्थंवाविनायकशांतिंकरिष्यइतिसंकल्प्यगणेशपू
जनपुण्याहवाचनवृद्धिश्राद्धानिकृत्वाचार्यंवृत्वाचतुरःपराशरमतेष्टौवाऋत्विजोवृणुयात्।
तेषुचत्वारःस्वस्तिवाचकाइतिमदनरत्ने।अथाचार्यःपंचवर्णैःशुक्लैर्वापिष्टैर्मध्येस्वस्तिकंकृत्वा
तदुपरिरक्तमानडुहंचर्मप्राचीनग्रीवमुत्तरलोममास्तीर्यतत्राश्वपर्ण्युरुकाष्ठजंपीठंसंस्थाप्यत
त्रश्वेतंवस्त्रमाच्छाद्यचतुर्दिक्षुचत्वारिस्वस्तिकानिकृत्वातेषुप्रागादितःमहीद्यौरित्यादिनाकां
डानुसमयेनएकवर्णान्चतुरःकुंभान्धान्यराशौनिधायह्रदोदकेननदीसंगमोदकेनवापूर्य।
उद्धृतासिवराहेणकृष्णेनशतबाहुना।मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतमितिमंत्रेणतेषुपं
चमृदःक्षिप्त्वा।गंधद्वारामितिचंदनागुरुकेसरकस्तूरीकर्पूरादीन्गंधान्गोरोचनांगुग्गुलंनिक्षिप्या

श्च॒त्थेवइतिपंचपल्लवान्निक्षिप्यवंदनमालाभूषितान्कृत्वायाःफलिनीरितिफलंसहिरत्नानीतिपंच
रत्नानिहिरण्यरूपइतिहेमंक्षिप्त्वायुवासुवासाइतिवस्त्रेणावेष्ट्यपूर्णादर्वीतिपूर्णपात्रंनिधाये
वंचतुर्दिक्षुकृत्वाप्रतिदिशंकलशस्यमुखेवेदेवदानसंवादेत्यादिपठेत्।ततश्चतुर्दिक्षुचत्वारऋत्विजः
त्वन्नोअग्नेइतिवरुणमावाह्यषोडशोपचारैःसंपूज्यानोभद्राःशन्नोवातःपवतामित्यादिस्वशा
खास्थशांतिंपठेयुः।ततआचार्योभिद्रासनस्यपूर्वतोहोमार्थंस्थंडिलंकृत्वाततईशान्यांहस्तमात्र
वेदिकायांपीठेवस्त्रादौतत्पुरुषायविद्महेवक्रतुंडायधीमहि।तंनोदंतिःप्रचोदयात्इतिविनायकं।
सुभगायैविद्महेकाममालिन्यैधीमहि।तन्नोगौरीप्रचोदयादित्यांबिकांचहेमप्रतिमायामावाह
येत्।तत्परितोयथावकाशंप्रतिमास्वक्षतपुंजेषुवाव्योमकेशं।पार्वतीं।भीमजं।वसुदेवं।अर्कं।मं
गलं।शुक्रं।बृहस्पतिं।बुधं।शनैश्चरं।चंद्रं।राहुं।

राम
॥७॥

पद्य।आरंसितं।धिषणं।कोरपुत्रं।कोणं।लक्ष्मवंतं।विधुंतुदं।बाहुलेयं।नंदकधारिणं।२

।बाऊलेयं।विष्णुरिंद्रादिलोकपालांश्चावाह्यासनादिभिर्वे एतान्२
धांतैरुपचारैः संपूज्य भद्रासनस्य पूर्वतः स्थंडिले गृह्योक्तविधिनाग्निं प्रतिष्ठाप्यान्वादध्यात्। केचि
त्तु ग्रहमखवमेतत्समानतंत्रं कुर्वंति। तत्र विनायकादुत्तरे ग्रहावाहनं कुर्यात्। तत्रान्वाधानचक्षुष्यं
तमुक्त्वात्र प्रधानं ग्रहान् समिदाज्यचरुभिः मितं संमितं शालं कटंकटं कूष्मांडं राजपुत्रं चैकैकया चर्वा
हुत्वाथो मकेशादीनेकैकया चर्वाहुत्वा शेषेण स्विष्टकृतमित्यादि चरुं श्रपयित्वा बर्हिष्यासाद्य
गव्याज्यलोलितेन गौरसर्षपकल्केनोद्वर्तितसर्वांगं पूर्वोक्तैः सर्वौषधैः सर्वगंधैश्च विलिप्तशि
रसं यजमानमाचार्यो मंगलवेदघोषैर्भद्रासन उपवेशयेदिति विज्ञानेश्वरमहार्णवादयः। बृह
स्पतिपराशरोप्येवमाह। उपवेश्योद्वर्त्तयेदिति तु मदनरत्ने उक्तं। ततो यजमानः पूर्ववदन्नेश्चतुर्भिर्ब्रा
ह्मणैः सह स्वस्तिवाचनं कुर्यात्। ततः जीवत्पतिपुत्रादिभिः सुवेषाभिस्त्रीभिर्नीराजनं कार्यं। ता

भ्यश्चयजमानःवस्त्राणिकंचुकानिचदद्यादित्याचारः।ततआचार्यःपूर्वदेशस्थंकलशमादायसह
स्त्राक्षंशतधारमृषिभिःपावनंकृतं।तेनत्वामभिषिंचामिपावमान्यःपुनंतुतेइतिमंत्रेणयजमान
मभिषिंचेत्।भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः।भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुरिति
दक्षिणकुंभेन।ततःयत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि।ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुस
र्वदाइतिपश्चिमकुंभेन।ततउत्तरस्थकलशमादायसहस्राक्षमित्याद्यैस्त्रिभिर्मंत्रैरभिषिंचेत्।
अपरार्कमतेतुत्रिभिरेकैककुंभेनाभिषेकः।ततश्चतुर्भिर्मिलितैःकुंभैर्वक्ष्यमाणश्लोकैरभिषि
चेत्।एतद्वैपावनंस्नानंसहस्राक्षंऋषिस्मृतं।तेनत्वाशतधारेणपावमान्यःपुनंत्विमाः।श
क्रादिदशदिक्पालाब्रह्मेशःकेशवादयः।आपस्तेघ्नंतुदौर्भाग्यंशांतिंददतुसर्वदा।सुमित्रियान
आपओषधयःसंतुदुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः।समुद्रज्येष्ठागिरयोनद्यो

मंत्रै

राम

मुनयश्चपतिव्रताः।दौर्भाग्यंघ्नंतुतेसर्वेशांतिंयच्छंतुसर्वदा।पादगुल्फोरुजंघास्यनितंबोदरना
भिषु।स्तनोरोबाहुहस्ताग्रग्रीवाअंसांगसंधिषु।नासाललाटकर्णभ्रुकेशांतेषुचयस्थितं।तदा
पो घ्नंतुदौर्भाग्यंशांतिंयच्छंतुसर्वदा।ततआचार्यः प्राङ्मुखोयजमानस्यपश्चात्तिष्ठन्सव्यपाणि
नाकुशान्यजमानमूर्द्धनिनिधायतत्रसार्षपंतैलंऔदुंबरस्रुवेणदाय।ॐमितायस्वाहा।मिता
येद मितियजमानः।एवमग्रेपि।ॐसंमितायस्वाहा।ॐशालायस्वाहा।ॐकटंकटायस्वाहा।ॐ
कूष्मांडायस्वाहा।ॐराजपुत्रायस्वाहेतिषडाहुतीर्जुहुयात्।अपरार्कमतेतुशालकटंकटाभ्या
मेका।कूष्मांडराजपुत्रायचैकाहुतिरितिचतस्रः।अथर्वणकौशिकगृह्यपरिशिष्टयोरप्येवं।
ततःवह्नेरिध्माधानादिकृत्वापूर्वोक्तैःषड्भिर्मंत्रैरग्नौचरुंहुत्वाव्योमकेशादिभ्यश्चैकैकाहुतिं
हुत्वास्विष्टकृदादिप्रायश्चित्तहोमांते।पूर्वादिदिक्षुइंद्रादिदश लोकपालेभ्योनाममंत्रैश्च

रुरोषेण बलिं दत्वा शुद्धोदकेन स्नातो धौतांबरधरो यजमानः साचार्यो विनायकमंबिकां पूर्वो
क्तगायत्रीभ्यां षोडशोपचारैः संपूज्य कृताकृततंडुलान्तिलयुक्तोदनं पक्वापक्वमत्स्यान्त्रिविध
सुरां तदभावे सैंधवयुतं पात्रत्रये क्षीरं पक्वापक्वमांसं मूलकापूपपूरिकोंडेरकस्रजं दध्यन्नपाय
सगुडमिश्रपिष्टमोदकलड्डुकचित्रसुगंधपुष्पकुसुमाषफलानि चैकपात्रे शूर्पे वा कृत्वा पूर्वो
क्तमंत्रेण विनायकायेदमुपहारं कल्पयामीत्युपहारं विनायकायैवमंबिकायै च दत्वा कुसु
मगंधदूर्वासर्षपसहितेनोदकांजलिमापूर्य प्रत्येकं पूर्वोक्तमंत्रेणार्घ्यं दत्वा कुसुमैर्दूर्वासर्ष
पसहितैः पुष्पांजलिं च मंत्राभ्यां दत्वा भूमौ शिरः कृत्वा। रूपं देहि यशो देहि सौभगं भगवति देहि मे।
पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे इत्यंबिकां भगवन्नित्यूहेन विनायकं चोपतिष्ठेतेति
केचित्। बृहत्पराशरो मंत्रांतरमाह। सौभाग्यमंबिके देहि रूपं सौभगं यशोपि च। श्रियं पुत्रांश्च

भ्या ४

॥राम

॥८॥

कामांश्चतथाशौर्यंचदेहिमे।गणेशमातरंबालेयत्किंचिन्मदर्शी।प्सितं।एकनाम्नैवतद्देहिदेहिगौ
रिवरान्ममेति।अर्घ्यदानमुपस्थानंचचतुष्पथेबल्यनंतरंकार्यमितिमदनरत्ने।ततआचार्यः
शूर्पेकुशानास्तीर्यलूताकृताद्युपहारंतत्रनिधायचतुष्पथेभुवमभ्युक्ष्यकुशानास्तीर्यतत्रमं
त्रोक्तादेवताःसंपूज्यतत्रशूर्पंनिधायबलिंदद्यात्।मंत्रास्तु।बलिंगृह्णंत्विमंदेवाआदित्यावस
वस्तथा।मरुतोथाश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः।असुरायातुधानाश्चपिशाचामातरोर
गाः।शाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः।जंभकाःसिद्धगंधर्वानागाविद्याधरानगाः।
दिक्पालालोकपालाश्चयेचविघ्नविनायकाः।जगतांशांतिकर्त्तारोब्रह्माद्याश्चमहर्षयः।माविघ्नं
माचमेपापंमासंतुपरिपंथिनः।सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाः।ततोयजमानो
गृहमागत्यपादौप्रक्षाल्याचम्यपूर्णाहुतिंकृत्वाचार्यंसंपूज्यतस्मैवस्त्रयुगंहेमचदक्षिणांदत्वा

ऋत्विग्भ्योयथा॥श क्त्यन्येभ्यश्चभूयसींदत्वाविनायकांबिकयोरुत्तरपूजांकृत्वाविसृज्याचार्या
यदत्वाग्निंसंपूज्यविभूतिंधृत्वाग्निंविसृज्यब्राह्मणान्भोजयित्वाकर्मेश्वरार्पणंकुर्यात्॥ ॥
इतिनारायणभट्टसूरिसूनुरामकृष्णभट्टसूनुकमलाकरभट्टकृतेशांतिरत्नेविनायकशांतिः
॥ ॥हेमाद्रौभविष्ये।चतुर्थ्यांवारणंहैमंपलार्द्धेनतुशोभनं।कारयित्वांकुशयुतंतिलद्रोणे
परिन्यसेत्।वस्त्रैःपुष्पैःपूजयित्वानैवेद्यंविनिवेद्यच।ततस्तुब्राह्मणेदद्याद्गणेशःप्रीयतामि
ति।कार्यारंभेषुसर्वेषुतस्यविघ्नोनजायते।तेनविनायकशांत्याविकल्पः।वारणःसप्तजन्मा
निभवंतिमदविह्वलाः।इदंचैत्रेश्रावणेकार्त्तिकेवाकार्यमितिहेमाद्रिः॥ ॥अथसर्वकर्मस्वग्नि
निर्णयः।मनुः।वैवाहिकेग्नौकुर्वीतगृह्यकर्मयथाविधि।पंचयज्ञविधानंचपक्तिंचान्वाहिकीं राम
गृही।अत्रमेधातिथिः।गृह्याग्निसाध्यमष्टकापार्वणश्राद्धहोमादिगृह्यकारैरुक्तंगृह्यं।नह्यन्य ॥१०॥

ह्यं नाम किंचित्कर्मास्ति। तेन गृह्यकारोक्तमेव लक्षणया गृह्यं मंतव्यं। नापि गृहशब्दः शाला
वचनः। न हि शालायां किंचित्कर्मोक्तं। तदप्यग्नि संबंधिद्विजानामेवोक्तं। नापि दारवचनः। गृहीत्य
नेनैव गतत्वात्। पंचयज्ञोक्ति वैश्वदेवमात्रपरा। अन्येषामनग्नि साध्यत्वात्। यद्वा गृह्यकर्मत्वेन
तत्राप्यग्निसंबंधसिद्धेर्न तदर्थमिदं। किंतु पंचयज्ञविधानं तु गृही कुर्यादिति विभागः। अन्वाहि
कीं वैश्वदेवार्थीं नित्यां पंक्तिं चाग्नौ कुर्यादिति विभागः। अन्वाहिकीं वैश्वदेवार्थीं नित्यां पंक्तिं
चाग्नौ कुर्यादिति। याज्ञवल्क्योपि। कर्मस्मार्त्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालाहृते वा
पि श्रौतं चैतानिकाग्निषु। अत्र यद्यपि स्मार्त्तं स्मृत्युक्तं वैश्वदेवादिकं कर्मेत्येव विज्ञानेश्वरेणो
क्तं तथापि सामान्यस्य विशेषापेक्षत्वादुपसंहारन्यायेन गृह्यपरत्वमेवेति मेधातिथिः। दृष्टश्च
स्मृतावप्युपसंहारः। यथा दिवा संध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः। कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः इत्यत्र पवित्रं दक्षिणे कर्णे कृत्वेति वि

शेषपरत्वं।अत्रापरार्केपिस्मार्त्तंगृह्योक्तंकर्मप्रत्यहंनित्यंस्मार्त्तहोमपार्वणश्राद्धादि।नह्यन्य
त्स्मार्त्तंपौराणंवागृह्ययज्ञादिनित्यंप्राप्तं।यदनुष्ठेत।तद्विवाहाग्नौकुर्वीत।नष्टेग्नौवैवाहिकक
र्मणैवोत्पाद्य इतितदुक्तिः।दायःपितृधनं।तत्राहतेवानित्यंकार्यं।श्रौतमग्निहोत्रादिवैतानि
केषुगार्हपत्यादिषुकुर्वीततच्चस्मार्त्तंपौराणंगृह्ययज्ञमहारुद्रप्रातचंडीव्रतयज्ञादिकर्मणां
वैवाहिकश्रौताग्निसंबंधनिवृत्यर्थंकल्पसूत्रगृह्येप्राप्तमेवानूद्यतेइति।अन्वाहिकींनित्य
वैश्वदेवार्थंपक्तिंपाकंचगृह्याग्नौकुर्वीत।अपचन्नेकरात्रेणपुनराधानमर्हतीतिस्मृतेः।मि
ताक्षरायांलिखितोपि।यस्यचाग्नौनक्रियतेयस्यचाग्रंनदीयते।अभोज्यंतद्भवेदन्नंभुक्त्वात
पवसेदहः।तेनपुरुषार्थोन्नसंस्कारार्थश्चवैश्वदेवोगृह्यएवेतिमुख्यःपक्षः।वैश्वदेवेकृते
नोपघातेपुनःपाकस्तुलौकिकाग्नावेवगृह्येते।तदाहापरार्केबौधायनः।अचोदितेनपाके

सूं

राम

७

नकृतेनोद्धरणेनवा।लौकिकोग्निःसविज्ञेयःपुनराधानमर्हतीतिवैश्वदेवार्हन्नासर्पुक्ष्यस्वाहा

कारैर्जुहुयात्।वैश्वदेवस्याग्नौजुहोत्यग्नयेस्वाहेत्यादिसूत्रेपक्षादौपुरोडाशकपालेनेतिवत्त

दर्थस्यग्रहणात्।अतएवाशौचेवैश्वदेवाभावान्नगृह्याग्नौपाकः।पर्वणितुवैश्वदेवार्थस्यैव

भोजननियमः।पराग्निपक्वनाश्नीयात्प र्वणिप्रोषितोग्निमानितिकेचित्।तत्रमूलंचिंत्यं॥

अतएवान्यत्रलौकिकाग्निपक्वस्यापिभोजनंसिद्धं।यत्तुप्रातर्होमंतुनिर्वर्त्यसमुद्धृत्यकृताश

नात्।शेषंमहानसेकृत्वातस्मिन्पाकंसमाचरेत्।निष्पन्नेषुचपाकेषुपुनरानीयतंक्षिपेत्।

उल्मुकंतुसमानीयवैश्वदेवंसमाचरेदिति।तद्बह्वृचादीनांपचनाग्निविधानादग्नेरायत

नाद्बहिर्गमनेदोषश्रुतेश्चतद्भिन्नपरं।अन्येषांतुशालाग्नौतुपचेदन्नंलौकिकेवापिनित्यशः॥

यस्मिन्नग्नौपचेदन्नंतस्मिन्होमोविधीयतइतिशातातपोक्तेः।प्रवासेयदिकुर्यात्तत्पचनंयोग्नि

मान्हिकः॥समारोपेहुते चाग्नेर्वैश्वदेवं तु लौकिके। शालाग्नौ लौकिके वापि कृतशेषेऽजले क्षि
तौ। वैश्वदेवः सदा कार्यः पंचसूनापनुत्तये इति बैजवापोक्तेर्वा कार्यः। यत्तु यज्ञपार्श्वः। पचनाग्नौ
पचेदन्नं स्थलकेमतकेपि च। अपेक्षाल्पवसेच्छ्रीं पुनराधानमर्हति। तित्तदृष्टार्थपाकपरमि
त्येके। तत्वंत्वनाकरमेवेदं। अ म थाहुतीहावयेत्स्मार्त्तेन तदभावे हुताहुतमित्यादिविरोधात्।
आपस्तंबोपि। भार्यादिरग्निर्दायादिर्वा तस्मिन्गृह्याणि। आश्वलायनोपि। उक्तानि वैतानि
कानि गृह्याणि वक्ष्याम इति। यानि कर्माणि वक्ष्यामस्तान्येव गृह्याणीत्यर्थः। अन्यत्तु स्मार्त्तं
पौराणं वा शांतिकपौष्टिकव्रतहोमतुलाग्रहयज्ञमहारुद्रादि लौकिक एवेति। सिद्धांतदेवया
ज्ञिकास्तु। गृहशब्दो दंपत्योर्वर्त्तते। तयोः फलदं यावत्कर्म ग्रहयज्ञशांतिकव्रतहोमपा
कादि स्मार्त्तं पौराणं वा तत्सर्वं गृह्यमावसथ्याग्नौ कार्यं। तदुक्तं छंदोगपरिशिष्टे। न स्वेग्ना

राम

॥१२॥

वन्यहोमः स्यादित्युक्तेकां समिदाहुतिं। स्वगर्भसंस्क्रियार्थं चयावन्तो सोऽत्र जायते। अग्नि
स्त्नामधेयादो होमे सर्वत्र लौकिकः। नहि पित्रा समानीतः पुत्रस्य भवति क्वचिदिति। समि
दाहुतिरूपा कर्मणि शिष्यकर्तृका। स्वगर्भसंस्कारार्थं श्वसीमंतादीन्युक्तेप्यनुषंगः। तेतु
वचनात्त्वेग्नो जातेष्विवदित्यर्थः। सदारोन्यान्पुनर्दारानुद्वोढुं कारणांतरात्। यइच्छेदग्निमान्क
र्तुं क्वहोमोस्य विधीयते। स्वेग्नावेव भवेद्धोमो लौकिकेन कदाचन। नह्याहिताग्निः स्वं कर्म लौ
किकेग्नौ विधीयते इति तत्रैवोक्तेश्चेत्याहुः। तदप्युक्तं। यथाह्याधानेनोत्पन्नानां श्रौताग्नीनां
गार्हपत्ये हवींषि श्रपयत्याहवनीये जुहोति। दक्षिणाग्नावन्वाहार्यं पचति। पिंडपितृयज्ञे
न चरंतीत्यादिश्रुतिभिः कर्मविशेषे विनियोगेन नैराकांक्ष्यान्नान्यस्मार्तकर्मपातकादौ
विनियोग इति मीमांसकैः कर्काचार्यैश्चो [illegible] क्तं तथा गृह्याग्नेरपि गृह्याणि वक्ष्यामः। भार्या

२ं०क०

द्विरग्निस्तस्मिन्गृह्याग्नि।गृह्यस्थालीपाकानीकर्मयथाविधीतिकल्पसूत्रमन्वाद्येर्गृह्यकर्म
सुविनियोगेननैराकांक्ष्यात्तत्रैवगृह्याग्निनियमान्नान्यत्रस्मार्त्तपौराणेषुशांतिकपौष्टिक
व्रतादिहोमेषुतीर्थगयादिश्राद्धेषुवागृह्याग्निप्राप्तिः।किंतुलौकिकाग्निरेव अन्यथास्मार्त्त
पौराणकर्मधीविनामपिसिद्धगृह्याग्निविधीनादायनैराकांक्ष्यान्नकुत्रापिस्मार्त्तपौराणेष्व
पिश्रोताग्निहोत्रादिकर्मस्विवनिरग्निद्विजस्त्रीशूद्राणामप्यधिकारःस्यात्‌ःनचाधिकारी
भवेच्छूद्रःपूर्त्तेधर्मेनवैदिके।तस्माच्छूद्रःपाकयज्ञैर्यजेतावृतवान्स्वयमित्यादिवचनादेवनि
षादस्थपतेरिवाधिकारइतिवाच्यं।शूद्रगृहणस्यपूर्वोक्तन्यायप्राप्तानुवादेनातंत्रत्वात्।अ
न्यथानिरग्निद्विजस्त्रीणामनधिकारापत्तेः।अतएवहेमाद्रिविज्ञानेश्वराद्येर्गृह्ययज्ञविना
पकशांत्यादौलौकिकाग्निरेवसर्वेषामुक्तः।यच्चनान्यत्रापिविनियोगः।।अथहेमाद्रौमार्कंडेयः।

राम
।।१३।। निर

श्रो

आहिताग्निस्तुजुहुयाद्दक्षिणाग्नौसमाहितः। अनाहिताग्निरौपसदे अग्न्यभावे द्विजेऽप्सुवा। वाय
वीये। आहृत्यदक्षिणाग्निंतुहोमार्थंवैप्रयत्नतः। अग्न्यर्थंलौकिकंवापिजुहुयात्कर्मसिद्धये।
इदंसर्वाधानिपरं। दर्शविहिताग्निपरंवा। हेमाद्रौश्राद्धेप्रजापतिः। औपासनेनान्यसिद्धिरग्नौक
रणमेवच। इदंगृह्योक्तदर्शाष्टकादिश्राद्धपरमनुवादः। गृह्यानुक्तेतीर्थगयादौतुनाग्नौकरणं
गत्वेशंत्यादाज्यभागवन्नगृह्याग्निः। किंतुलौकिकेपाणौजलेवा। पश्चद्दाऽपांसमीपेवाश्राद्धे
यो विधिस्तद्देतिलथैववायवीयोक्तः। मिताक्षरायांजाबालोऽपि। आरंभेसर्वकृच्छ्राणांसमाप्तौ
चाविशेषतः। आज्येनैवहविःशालाग्नौजुहुयाद्व्याहृतीःपृथक्। समस्त्यर्थसारेऽपि। गार्ह्यमौपासने
कुर्यात्सर्वाधानीतुलौकिके। स्मार्तंचलौकिकेकुर्याच्छ्रौतंवैतानिकाग्निषु। अतएवगृह्याग्निं
विनापिहोमधर्मप्राप्तिरुक्ताकात्यायनसूत्रे। एषएवविधिर्यत्रक्वचिद्धोमइति। अत्रकर्कः॥

यत्र क्वचिद्धोमः शांतिकपौष्टिकादिष्वपि। क्वचिच्छंदः स्वगृह्यव्यतिरेकेणापि यथा यूपविधिः स्या
दिति। यथा सर्वाग्नो कुशेश्वादिरिति दृष्टांतेन स्वगृह्याग्निं। विना पि पौराणे शांतिकपौष्टिकादौ
लौकिकाग्निं तंत्र प्राप्तिं चाह। अन्यत्रापि। गृह्यपरिसमूहनादिप्राप्तिः। यत्र तु लौकिकाग्नि स्था
पनं। तत्रोद्धृतावोक्षिते ग्निमुपसमादधीते त्यादिप्राप्तिरित्याह। तदेतल्लौकिके शांत्यादिहो
मं गमयति। अन्यथा तेषु गृह्यनियमे न्यत्र लौकिकाग्निप्राप्तिस्तत्र विधिश्च निर्विषयो व्य
र्थ एव स्यात्। वक्ष्यच सूत्रेपि। अथ खलु यत्र क्व च होष्यन् स्यात्। अत्र वृत्तिः। क्व च यग्रहणाद्गृह्याग्निं
विनापि लौकिकेग्नौ होमे तंत्र प्राप्तिमाह। यदप्युक्तं। गृह्य शब्दो दंपत्योर्वर्त्तत इति। तदप्ययुक्तं।
सर्वनिबंधेषु हि दारवचनः। शालावचनो वा गृहशब्द उक्तो न तु दंपतिवाचीते न गृह्यसूत्रे

विना स्मार्त्त पौराणग शांतिकपौष्टिकव्रतत्तुलादि होमः सर्वः साग्नेरपि लौकिकेग्नावेवेति ॥राम॥

॥१४॥

सिद्धं। अन्यथा तेषां कर्मणां गृह्याग्निप्रयोजकत्वमप्रयोजकत्वं चेति वैरूप्यं स्यात्। यत्र तु का
तीयपरिशिष्टं एवमुक्तं। तत्रापि गृह्योक्तेष्वेव स्वगतफलेष्वग्निनियमः। नान्यगतेषु गर्भसंस्का
रान्वितेष्विति विवेकः। जातेष्टौ यस्मिन्जाते पूत एव स इति पक्षब्रह्माद्युक्तिविशेषोक्तेर्बाधः। कथं च
तन्मते जातेष्टिः स्वेग्नौ स्यादिति चिंत्यं। तेन देवयाज्ञिकादयः कातीयसूत्रकर्कभाष्यार्थस्याप्य
ज्ञाना मीमांसान्यायाज्ञानाच्च मूर्खा एव। तदप्यपार्थं एव परिशिष्टे। महाशांतिविधानेन निर्म
थ्याग्निं समाहितः। निर्मथ्य हावयेत्तत्र समिधो ब्राह्मणान्बहून्। शतं सहस्रं कोटिं वा विंश
तिर्द्वादशाथवा द्विजाः। जुहुयुः शातवृक्षस्य समिधो घृतसंयुतः। स्वयं वापि यजेद्ब्रह्मा सवितारं दि
ने दिने इति। एतच्च सामवेदे गोतमसूत्रे। शांतिपुण्याहस्वस्त्ययनायुष्यमंगलयुक्तान्य
भ्युदयिकानि विद्वेषणसंवननाभिचारद्विषद्व्यृद्धियुक्तानि शालाग्नौ कुर्यादिति। तदपि गृह्यस

त्रोक्तश्शंत्यादिकर्मपरमेव। अन्यथा पूर्वोक्तविरोधात्। यदपि कर्केर्गृह्याग्निं विनाश्राद्धमेव नास्तीत्युक्तं। तदपि संवत्सरे संवत्सरे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यादित्यादिदर्शपूर्णमासादिकादौ सोऽत्रविधिनिषेधपरं। अग्निं विना वृद्धिश्राद्धसपिंडनाद्यभावात्तेन विनाग्न्यसिद्धेरन्योन्याश्रयात्सर्वविप्लवापत्तेः। तेन सूत्रोक्तेष्वेव गृह्याग्निनियमो नान्यत्रेति सिद्धं॥ मरारुद्रे परशुरामोऽपि। तस्मिन्कुंडे तु गृह्योक्ता कर्त्तव्या कुशकंडिका। लौकिकाग्निं समानीय कुंडमध्ये ततो न्यसेदिति। यदपि। त्रिकांडमंडनीयं पठंति। इक्षुक्षीरविकाराश्च वस्त्राणि धान्ययवांस्तथा। फलमूलानि वाश्नीयात्सर्वाण्यप्रोषितोग्निमान्। पराग्निपक्वं नाश्नीयाद्धिहायगुडगोरसौ। शाकपिण्याकसक्त्वादि आममध्वाम्लफलादिकं। सहस्रसर्वलिसर्पिश्च हविष्यं लघुभोजनं। न सायंनोपवासश्च स्याद्यैशकास्तथैक्षवमिति। तदपि निर्मूलत्वेपूर्वापरविरुद्धं मूर्ख

राम

वंचनमात्रमितिसंक्षेपः॥ ॥इतिरामकृष्णभट्टात्मजकमलाकरभट्टकृतौसर्वकर्मस्वग्निनि
र्णयः॥ ॥अथसर्वशांतिकत्रकृतित्वाद्ग्रहयज्ञउच्यते॥ स्कांदयाज्ञवल्क्ययो॥ श्रीकामःशां
तिकामोवाग्रहयज्ञंसमाचरेत्। वृष्ट्यायुःपुष्टिकामोवातथैवाभिचरन्नपि। सचतुर्धा। के
वलःअयुतहोमोलक्षहोमःकोटिहोमइति। आद्योयाज्ञवल्क्याद्यैरुक्तः। अन्येमात्स्यउक्ताः।
ग्रहयज्ञस्त्रिधाप्रोक्तःपुराणश्रुतिचोदितः। प्रथमोयुतहोमःस्याल्लक्षहोमस्ततःपरं। तृती
यःकोटिहोमस्तुसर्वकामफलप्रदः। तेद्वेधानैमित्तिकाःकाम्याश्च। तद्देशस्तत्रैव। गृहस्यो
त्तरपूर्वेणमंडपंकारयेद्बुधः। रुद्रायतनभूमौवाचतुरस्रमुदक्प्लवं। दशहस्तमथाष्टौवा
हस्तान्कुर्याद्विधानतः। तस्यद्वाराणिचत्वारिकर्तव्यानिविचक्षणैः। मंत्रमुक्तावल्यां। चतुर
स्राश्चतुर्द्वाराअष्टहस्तादितस्त्रयः। चतुर्विंशतिहस्तांताहीनमध्योत्तमाःक्रमात्। यद्वाद्वा

शां०कु०

ना॰नि॰ले

८।

दशहस्तावधाद्विहस्ता द्व्याकृतो नव।अष्टाविंशतिपर्यंताः केचिदुक्ता मनीषिभिः।अग्निपुराणे
प्येवं।अयं मंडपः काम्ये न नैमित्तिकादौ।नित्यं नैमित्तिकौ हित्वा सर्वमन्यत्स मंडपमिति शार
दातिलकात्।कुंडमंडपप्रकारोऽस्माल्लिखितकृतप्रयोगदीपिकायां मत्कृते दानकमलाकरे च ज्ञेयः।
स्कांदे।नवग्रहमखे कुंडं हस्तमात्रं समं भवेत्।चतुरस्रमधो हस्तं योनिवक्त्रं समेखलं।चतुरं
गुलविस्तीर्णमेखला तद्वदुच्छ्रिता।मानहीनाधिकं कुंडमनेकभयदं स्मृतं।योनिर्मात्स्ये।वितस्ति
मात्रा योनिः स्यात्षट्सप्तांगुलविस्तृता।कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलोच्छ्रिता।गजो
ष्ठसदृशी तद्वदायता छिद्रसंयुता।मेखलोपरि सर्वत्र अश्वत्थदलसन्निभा।कुंडाभावे स्थंडिले
वा कार्यं।नित्यनैमित्तिकं होमं स्थंडिले वा समाचरेदिति शारदातिलकात्।कुंडमेवंविधं नस्या राम
त्स्थंडिलं वा समाश्रयेदिति प्रपंचसारात्।स्कांदे।तस्य चोत्तरपूर्वेण स्थंडिलं हस्तमात्रकं।। ।।१८।।

तस्यकुंडस्य।स्थंडिलंवेदी।त्रिवप्रंचतुरस्रंचयितस्योच्छ्रायसंमितं।द्व्यंगुलोच्छ्रितोवप्रःप्रथमः
समुदाहृतः।अंगुलोच्छ्रायसंयुक्तंवप्रद्वयमथोपरि।द्व्यंगुलस्तत्रविस्तारःसर्वेषांकथितोबु
धैः।नवग्रहमखेकुर्याद्द्वित्विजश्चतुरःशुभान्।अथवाप्येकमभ्यर्च्यविधिनाब्राह्मणासह।
मदनरत्नेस्कांदे।नवग्रहमखेविप्राश्चत्वारोवेदवादिनः।अथवाऋत्विजौशांतौद्वावेवश्रु
तिकोविदौ।द्वावेवायुतहोमेतुनप्रसज्जेतविस्तरे।वेधासंभवेसर्वतोभद्रंकार्यंमंडलंसर्वतो
भद्रमेतत्साधारणंस्मृतमितिशारदातिलकात्।मात्स्ये।पुण्येह्निविप्रकथितेकृत्वाब्राह्मण
वाचनं।अग्निप्रणयनंकृत्वावेधामावाहयेत्सुरान्।देवतानांतुसंस्थाप्याविंशतिर्द्वादशाधि
का।आदित्यादिमुखाःसर्वेसाधिप्रत्यधिदेवताः।प्रतिमाआहयाज्ञवल्क्यः।ताम्रकात्स्फा
टिकाद्रक्तचंदनात्स्वर्णकावुभौ।रजतादयसःसीसात्कांस्यात्कार्याग्रहाःक्रमात्।स्ववर्णैर्वा

पटेलेख्यागंधैर्मंडलकेषुवा। मात्स्ये। पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः। सप्ताश्वः सप्तरज्जु
श्च द्विभुजः स्यात्सदारविः। श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः। गदापाणिर्द्विबाहुश्च कर्तव्यो
वरदः शशी। रक्तमाल्यांबरधरः शक्तिशूलगदाधरः। चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः। पीतमा
ल्यांबरधरः कर्णिकारसमद्युतिः। खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः। देवदैत्यगुरू तद्व
त्पीतश्वेतौ चतुर्भुजौ। दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू। इंद्रनीलद्युतिः शूली वरदो गृध्र
वाहनः। बाणबाणासनधरः कर्तव्योर्कसुतः सदा। करालवदनः खड्गचर्मशूली वरप्रदः। नीलः
पद्मासनस्थश्च राहुरत्र प्रशस्यते। धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः। गृध्रासनगता
नित्यं केतवः स्युर्वरप्रदाः। सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः। स्वांगुलेनोछ्रिताः सर्वे राम
शतमष्टोत्तरं सदा। स्कांदे। जन्मभूर्गोत्रमग्निश्च वर्णस्थानमुखानि च। योज्ञात्वा कुरुते शां ॥१७॥

तिंग्रहास्तेनावमानिताः।उत्पन्नोर्कः कलिंगेषु यमुनायां चंद्रमाः।अंगारकस्त्ववंत्यां च मगधा च१
यां हिमांशुजः।सेंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा।शनैश्चरस्तु सौराष्ट्रे राहुर्वैरा ठिना
पुरे।अंतर्वेधां तथा केतुरित्येता ग्रहभूमयः।आदित्यः काश्यपे गोत्रे आत्रेयश्चंद्रमा भवत्।
शनिः काश्यप एवाथ राहुः पैठीनसिस्तथा।केतवो जैमिनेयाश्च ग्रहाग्निस्तदनंदरं।आदित्ये
पिंगलो नाम पिंगलः सोम उच्यते।धूमकेतुस्तथा भौमे जठराग्निर्बुधे स्मृतः।गुरोश्चैव
शिखी नाम शुक्रे भवति हाटकः।शनैश्चरे महातेजा राहोः केतोर्हुताशनः।भास्करांगारकौ
रक्तौ शुक्लौ शुक्रनिशाकरौ।सोमपुत्रो गुरुश्चैव ताबुभौ पीतकौ स्मृतौ।कृष्णौ शनैश्चरं वि
धात्रा राहुं चित्राश्च केतवः।गोभिलेन तु ब्राह्मणौ भार्गवाचार्यौ क्षत्रियावर्कलोहितौ।वैश्यो सो
मबुधौ ज्ञेयौ शेषाः शूद्रान्विनिर्दिशेदिति वर्णा उक्ताः।स्कांदे।मध्ये तु भास्करं विंधाकृशिनं प

शां॰ कृ॰

र्दक्षिणे। दक्षिणे लोहितं विंध्या बुधं पूर्वोत्तरेण तु। उत्तरेण गुरुं विंद्यात्पूर्वेणैव तु भार्गवं। पश्चि
मे तु शनिं विंद्याद्राहुं दक्षिणपश्चिमे। पश्चिमोत्तरः केतुः स्थाप्या वै शुक्लतंदुलैः। अथवा वर्णकैः
कार्याः कार्याः स्वर्णादिधातुभिः। शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्याबुदङ्मुखौ। प्रत्यङ्मु
खः शनिः सोमः शेषा दक्षिणतोमुखाः। प्राङ्मुखो ऊर्ध्वदृष्टी उदङ्मुखो वामदृष्टी। प्रत्यङ्मु
खावधोदृष्टी। आदित्याभिमुखा इति हेमाद्रिः। विकल्प इति युक्तं। वर्णरूपगुणैर्युक्तान्ग्याहृ
त्यावाहयेत्तु तान्। ग्रहमंडलानि ×मात्स्योक्तेरिति× स्कांदे। भानुं तु मंडलाकारं सोमं तु चतु
रस्रकं। अंगारकं त्रिकोणं तु बुधं बाणाकृतिं तथा। गुरुं तु पद्मिकाकारं पंचास्रं भार्गवं तथा। ध
नुस्तुल्यं शनिं विंद्याद्राहुं शूर्पाकृतिं तथा। ध्वजाकाराः केतवः स्युर्ग्रहेशीतत्स्वरूपिणं। तद्वर्ण
मंडलेषु ताम्रादिप्रतिमासु तंदुलैः स्थापयेदित्यर्थः। मंडलमत्स्यौ विकल्प इति हेमाद्रिः॥७

राम
॥१९॥

ग्रहमंत्राना ह्याज्ञवल्क्यः। आकृष्णेनेति इमंदेवा अग्निर्मूर्द्धादिवः ककुत्। उद्बुध्यस्वेति च ऋचो य
थासंख्यं प्रकीर्तिताः। बृहस्पते अतियदर्यस्तथैवान्नात्परिस्रुतः। शन्नोदेवी तथा कांडात्केतुं कृ
ण्वन्निमांस्तथा। स्कांदे। कयानश्चित्र राहोश्चेत्यकर्त्तं। मात्स्येत्वन्येउक्ताः। अग्निंदूतं दिनेशायसो
मायाप्यायस्वग्नइत्यपि। स्योना पृथिवि भौमाय इदं विष्णुर्बुधाय च। इंद्रआसां सुरेज्याय शुक्रज्यो
तिः सिताय च। प्रजापतेति सौराय आयंगौरिति राहवे। केतवे ब्रह्मजज्ञानं स्वैः स्वैर्मंत्रैः प्रतिष्ठि
ताः। अन्यार्थमपिमंत्राणां वचनात्त्वयथार्थमैंद्रीस्यादिति न्यायेन विनियोगः। होमेप्येव
मेव। अधिदेवाः स्कांदे। सूर्यस्य चोत्तरे शंभुमुमां सोमस्य दक्षिणे। स्कंदमंगारकस्यैव दक्षिण
स्यां निवेशयेत्। सौम्या पश्चिमतो विष्णुं ब्रह्माजीवस्य पूर्वतः। इंद्रमैंद्रयां सिताद्विद्धि मंदस्या
ग्रेततो यमं। राहोः पूर्वोत्तरे कालं सर्वभूतभयावहं। केतोर्निर्ऋतिदिग्भागे चित्रगुप्तं निधा

स्मृ०

पयेत्॥ ईश्वरं त्र्यंबकं चेति श्रीश्चतेति च पार्वतीं। यत्क्रंदेति च स्कंदं विष्णुं विष्णोरराटं तु। आ ब्रह्मन्नि
ति ब्रह्माणं सजोषा इंद्र धासवं। यमाय त्वेति च यमं कालं कार्षिरसीति च। चित्रावसुरिति मंत्रेण चि
त्रगुप्तं निधापयेत्। अग्निरापः क्षितिर्विष्णुरिंद्र ऐंद्री प्रजापतिः। सर्पा ब्रह्मा च निर्दिष्टा अधिदेवा
यथाक्रमं। अग्निं दूतमिति ह्यग्नेर्वरुणस्य उदुत्तमं। स्योना पृथिवि मे दिव्या इदं विष्णुस्तु विष्णवे।
इंद्राय त्वेति इंद्रस्योत्तानपर्णेति शचीपतौ। प्रजापते प्रजेशस्य एष ब्रह्मेति वा विधेः। मंत्रो नमोस्तु
सर्पेभ्यः सर्पाणां स्थापने मतः। गोभिर्लब्धसिद्धो। ग्रहदेवतयोर्मध्ये अधिदेवान्निवेशयेत्। म
दनरत्ने संग्रहे तु। अधिदेवाद्दक्षिणतो वामे प्रत्यधिदेवताः। स्थापनीयाः प्रयत्नेन व्याहृतीभिः
पृथक्पृथक्। उत्पल परिमले। ग्रहस्य दक्षिणे पार्श्वे स्थापयेदधिदेवतां। ग्रहस्योत्तरपार्श्वे तु न्य राम
सेत्प्रत्यधिदेवतां। भ्येनकः। क्षेत्रस्यपतिना क्षेत्रपालं भूजोत्तरं न्यसेत्। भूजो भौमः। ग्रहदेवा ॥१९॥

धिदेवानां नैवेद्यं कुसुमानि च। ग्रहवस्त्रासनं दानं स्थापनं चानुपूर्वशः॥ इत्युक्तं। वासिष्ठे त्व
न्यथोक्तं। रुद्रं त्र्यंबकमंत्रेण रवेरुत्तरतोन्यसेत्। सोमस्याग्नेयदिग्भागे श्रीश्चतेमेनकात्म
जां। यदक्रंदेति भौमस्य स्कंदं याम्ये प्रपूजयेत्। विष्णुं विष्णोरराटेति यजेत्सर्वं बुधस्य च। गुरोरु
त्तरतः स्थाप्यो ब्रह्मा ब्रह्मेति मंत्रतः। सजोषेंद्रेति मंत्रेण प्राच्यां शक्रं निधापयेत्। शनेः पश्चि
मतः स्थाप्यो यमायत्वेत्यचायमः। कार्षिरसीति मंत्रेण राहोः कालं तथोत्तरे। चित्रगुप्तं तु के
तूनां चित्रावस्वितिनैर्ऋते। ग्रहदेवतयोर्मध्ये अधिदेवान्निवेशयेत्। मात्स्ये॥ विनायकं तथा
दुर्गां वायुमाकाशमेव च। आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ। मदनरत्ने स्कांदे॥
उत्तरे शनिसूर्याभ्यां गुरोः केतोश्च दक्षिणे। विनायकं प्रतिष्ठाप्य सर्वदेवनमस्कृतं। तत्रैव सं
ग्रहे। राहुमंददिनेशा[illegible]नामुत्तरस्यां यथाक्रमं। गणेशदुर्गावायूंश्च राहुकेत्वोश्च दक्षिणे।

आकाशमश्विनौ चेति पं चैतान्स्थापयेद्बुधः। वसिष्ठः। विनायकं गणनाथं त्वा दुर्गां वेजातवेदसे।

वायोयेतेतथावायुंघृतं घृतैश्चांबरं। यायांशकेति संपूज्यौक्षावष्येतौ ततोश्विनौ। गोभिलीये।

द्वौशद्देवताः स्थाप्यादिशंपालांश्चदिग्गताः। याज्ञवल्क्यः। यथावर्णं प्रदेयानि वासांसि कुसु
मानि च। गंधाश्च वलयश्चैव धूपो देयश्च गुग्गुलः। स्कांदे। दिवाकर कुजाभ्यां हि दापयेद्रक्तचं
दनं। चंदनं भार्गवे सोमे सितवर्णं प्रदापयेत्। कुंकुमेन तु संयुक्तं चंदनं जीवसौम्ययोः। अगुरुं
चंदनं दद्याद्राहुकेत्वर्कजेषु च। गृहवर्णानि पुष्पाणि गायत्र्या धूपमाददेत्। आरवेः कुंदुरुं धूपं
शशिनस्तु घृताक्षताः। भौमे सर्जरसं चैव अगुरुं च बुधे स्मृतं। सिल्हकं गुरवे दद्यात् शुक्रे बि
ल्वागुरुं तथा। गुग्गुलं मंदचारे तु लाक्षा राहोश्च केतवे। उद्दीप्यस्वेति मंत्रेण दीपं दद्यात् घृतं
प्रितः। गुडौदनं रवेर्दद्यात्सोमाय घृतपायसं। लोहिताय हविष्यान्नं बुधाय क्षीरषाष्टिकं। दध्यो

दनं गुरोर्दद्याच्छुक्राय च घृतोदनं। मिश्रितं तिलमाषैश्च नैवेद्यं तु शनैश्चरे। राहोर्माषोदनं दद्या
त्केतोश्चित्रोदनं तथा। मात्स्ये च। मसूरांश्च कुजे दद्यादित्युक्तं। निवेद्यैत्वाऽऽहुतिभिर्होमं कुर्या
दतंद्रितः। अत्र विशेषो मत्कृते दानकमलाकरे ज्ञेयः। मात्स्ये। धूपामोदोत्र सुरभिरुपरिष्टाद्वि
तानकं। अधिदेवादीनां तत्पलपरिमले। सर्वेषां लोकपालानां चंदनं च विलेपनं। शतपत्रा
णि पुष्पाणि दद्याद्गुग्गुलुधूपकं। दीपं गोघृतसंयुक्तं नैवेद्यं च घृतोदनं। मात्स्ये। प्रागुत्तरे
ण तस्माच्च दध्यक्षतविभूषितं। चूतपल्लवसंयुक्तं फलवस्त्रयुगान्वितं। पंचरत्नसमायुक्तं
पंचभंगयुतं तथा। स्थापयेद्व्रणं कुंभं वरुणं तत्र विन्यसेत्। गंगाद्याः सरितः सर्वाः स
मुद्रांश्च सरांसि च। गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्। मृदमानीय विप्रेंद्र स
र्वौषधिसमन्वितां। स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित्॥ याज्ञवल्क्यः। कर्तव्या

मंत्रवंतश्च चरवः प्रतिदैवतं। नानाश्रपयेत्समोप्यचेतिगृह्यसूत्रवचनात्सहपृथग्वाश्रपये
त्। मात्स्ये। होमं समारभेत्सर्पिर्यवव्रीहितिलादिभिः। हेमाद्रौ देवीपुराणे। गणाधिपतये देया
प्रथमा तु वराकृतिः। अन्यथा विफलं विप्र भवतीह न संशयः। अर्कपलाशः खदिरस्त्वपामा
र्गोथपिप्पलः। उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात्। एकैकस्य त्वष्टशतमष्टाविंशति
रेव वा। होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः। प्रादेशमात्र्यः समिधश्च शाखा अप
लाशिनीः। देवानामपि सर्वेषामुपांशु परमार्थवत्। स्वेन स्वेनैव मंत्रेण होतव्याः समिधः
पृथक्। होतव्यं च घृताद्यत्र चरुभक्ष्यादिकं ततः। स्वीदे स्थापनमंत्रा एव होममंत्रा उक्ताः।
अधिदेवादीनां चैवं। धासिध्यामपि। शेषाणां स्थापनमंत्रैर्होमो व्याहृतिभिस्तिलैः। मा
त्स्ये त्वधिदेवादीनामन्ये मंत्रा उक्ताः। आ वो राजेति रुद्रस्य बलिहोमं समाचरेत्। आपो हि

छिन्नमायाश्वस्योनेतिस्वामिनस्तथा। विष्णोरिदं विष्णुरितितमीशोतिस्वयंभुवः। इंद्रमिदेवतात
यइंद्राय जुरूपा पुनः। तथा यमस्य चायंगौरितिहोमः प्रकीर्त्तितः। कालस्य ब्रह्मजज्ञानमितिमंत्रः
प्रशस्यते। चित्रगुप्तस्य चाज्ञातामितिवेदविदोविदुः। अग्निंदूतंवरुणिमह इति वह्नेरुदाहृतः। उदुत्त
मंवरुणमित्यपांमंत्रः प्रकीर्त्तितः। भूमेः पृथिव्यंतरिक्षमिति वेदेषुपठ्यते। सहस्रशीर्षापुरुष
इति विष्णोरुदाहृतः। इंद्रायेंदोमरुत्वत इति शक्रस्यशस्यते। उत्तानपर्णेसुभगे इति शच्याः प्र
शस्यते। प्रजापतेपुनर्होमः प्रजापत इति स्मृतः। नमोस्तुसर्पेभ्य इति सर्पाणां मंत्र उच्यते। एष
ब्रह्मायऋत्विय इति ब्रह्मण्युदाहृतः। विनायकस्य चानून इति मंत्रो बुधः स्मृतः। जातवेदसे सुन
वामदुर्गमंत्रोयमुच्यते। आदित्प्रत्नस्यरेतस आकाशस्य उदाहृतः। काण्डशिशुर्महीनां च
वायोर्मंत्रः प्रकीर्त्तितः। एषोउषा अपूर्व्येति अश्विनोर्मंत्र उच्यते॥ स्कांदे॥ नैवेद्यशेषं कृत्वा तु

श्रां०क०

होममंत्रादनंतरं। अथ व्याहृतिभिर्हुत्वा एकैकस्य यथाक्रमं। अष्टोत्तरं च साहस्रं शतमष्टाधिकं
तथा। अष्टाविंशतिरष्टौ वा एकैकस्य तु होमयेत्। नैवेद्यशेषहोमः केषांचित्। हेमाद्रौ। ततोवदान
धर्मेण स्रुवेणैव यजुषा यावकं। घृताक्तांश्च समिद्भिश्च स्रुवेणाज्यं च हावयेत्। आकृष्णेनेति मंत्रेण
तिलान्व्याहृतिभिर्हुनेत्। चरुणा च समिद्भिश्च सर्पिषा च तिलैः क्रमात्। तत्तन्मंत्रैश्च होतव्याः
क्रमात्तदधिदेवताः। तेन चरोः प्रत्याहुत्यवदानधर्मः। केचिद्भक्तेन होममाहुस्तच्चिंत्यं। मात्स्ये।
होतव्यं च समित्सर्पिश्चरु भक्ष्यादिकं पुनः। मंत्रैर्दशाहुतीर्हुत्वा होमं व्याहृतिभिस्ततः। उदङ्मु
खाः प्राङ्मुखा वा कुर्युर्ब्राह्मणपुंगवाः। अत्र व्याहृतिभिरिति द्वंद्वापवादेकशेषावगतसाहि
त्ययकृत्वयोरुपादेयगतत्वात्सर्वव्याहृतिभिरेकाहुतिरित्येवमुक्तं। हेमाद्रौ भविष्योत्तरेपि। राम
होमो व्याहृतिभिश्चैव सर्वस्तत्र विधीयते। भक्ष्यादिकं नैवेद्यशेषं हुत्वा तत्तद्ग्रहमंत्रैरयुतहोमो। ॥२२॥

१७

यतिलादिद्रव्येण प्रत्येकंदशाहुतीर्हुत्वा प्रणवादिभूरादिव्याहृतिभिर्हौस्तिस्त्रः समस्ताभिश्चैकेत्येव माहुत्यायुतलक्षहोमादि संख्यापूरणीयेति हेमाद्रौ मदनरत्ने चोक्तं। एवं विभागे मूलं नविभ्रमः। नत्वंतुतिसृभिर्व्याहृतिभिरेकांतिरित्येवं सर्वोहोमइतिप्रतिभाति। तदुक्तं हेमाद्रौ प्रविष्ये। भूर्भुवःस्वस्तथा स्वाहालक्षहोमविधिःस्मृतइति। हेमाद्रिस्तुपूर्वापरविरोधान्न्यायविरोधाद्भ्रांतएवामात्येय। मंत्रवंतश्च कर्त्तव्याश्चरवः प्रतिदैवतं। हुत्वाचतान्चरूंस्सम्यक्ततो होमंसमाचरेत्। पूर्णाहुतिंच मूर्द्धानंदिवइत्यभिपातयेत्। अथाभिषेकोमंत्रेणवाद्यमंगलगीतकैः। पूर्णकुंभेनतेनैवहोमांप्रागुदङ्मुखेः। यजमानस्यकर्त्तव्यं चतुर्भिःस्नपनंद्विजैः। तत्रसुरास्त्वेत्यादयोमंत्राः प्रयोगेवक्ष्यंते। अग्निपुराणे। मूर्द्धानंदिवमंत्रेणसंस्रवेणचधारया। दद्यादुत्थायपूर्णांच नोपविश्य कदाचन। महार्णवेतुमूर्द्धानं। पुनस्त्वादित्याः। पूर्णादि

स्तामि

हे २

र्वि॰ सप्तते अग्ने इति पूर्णकुंभे चत्वारो मंत्रा उक्ताः। भविष्योत्तरे। न संख्या नियमश्चात्र ब्राह्मणा
नां नरोत्तम। न कालनियमश्चैव स्वेच्छया यज्ञ उच्यते। ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः।
सर्वौषधैः सर्वगंधैः स्नापितो वेदपुंगवैः। यजमानः सपत्नीक ऋत्विजश्च समाहितः। दक्षि
णाभिः प्रयत्नेन पूजयेद्गतविस्मयः। वासिष्ठ्यां। ततस्तस्याभिषिक्तस्य रक्षार्थं बलिमुत्क्षि
पेत्। दिग्विदिक्षु विचित्रान्नैर्दीपैर्नीराजयेत्ततः। प्रयोगपारिजाते वामनः। आचार्यप्रभृतिभ्य
श्च यहार्चनफलं ततः समिदाज्यचरूणां च तिलहोमफलं तथा। ब्रह्मत्वे कुंभपूजायां वार्चन
स्य फलं वयत्। गणपक्षेत्रपार्कशादुर्गाह्व्यां गदेवताः। तासां जपफलं तद्वद्धुल्ली याजलपूर्व
कं। ततस्तेभ्यो यथाशक्त्या दद्याद्दक्षिणापर्कंथे। ताश्च याज्ञवल्क्येनोक्ताः। धेनुः शंखस्त राम
थानड्वान्हेम वासो हयः क्रमात्। कृष्णा गौ रायसं छागए तावै दक्षिणाः क्रमात्। मात्स्ये। सुवर्णं ॥२३॥

नसमाः कार्पयिऊमानेन दक्षिणाः। सर्वेषामथ गांदद्यात्कुरुर्वयिनेन तुष्यति। स्वमंत्रेण प्रदातव्याः
सर्वाः सर्वत्र दक्षिणाः। तेषदानमंत्राः मत्कृते दानकमलाकरे ज्ञेयाः। अत्रापि प्रयोगे वक्ष्यंते।
मदनरत्ने आश्वलायनः। एकमेकाकृतौ विप्रं होमेत्वन्नेन भोजयेत्। अत्यर्थमिष्यमश्चापि
विप्रमेवं शताकृतौ। सहस्रस्यकृते वैकं जघन्योपि प्रभोजयेत्। अन्यथादहति क्षिप्रं तत्प्राप्नं
नात्र संशयः। अतो ध्रुवमशक्तो यो दक्षिणां चान्नमेव च। जपैः प्रणमैस्तोत्रैश्च तोषयेत्तर्प
येत्कुरून्। स्कांदे। यथा गृहेद्विजस्तद्वद्विधिज्ञो वेदपारगः। तोषयेन्मृदुवस्त्राद्यैस्तुष्टमेनं विस
र्जयेत्। याज्ञवल्क्यः। गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं। दध्योदनं हविश्चूर्णं मांसं चित्रा
न्नमेव च। दद्याद्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुधः। शक्तितो वा यथालाभं सत्कृत्य विधिपू
र्वकं। हविष्यतौदनः। चूर्णं तिलचूर्णमिश्रमोदनः॥ वसिष्ठः॥ ऐशान्यामाहरेत्सम्यक्सुचो

वाथस्रुवेणवा। वंदनं कारयेत्तेन शिरःकंठांसकेषु च॥ मात्स्ये। एवं समग्रं निष्पाद्य सर्वदेवान्विसर्जयेत्। यांतु देवगणाः सर्वे पूजामादाय पार्थिवीं। इष्टकामप्रसिध्यर्थं पुनरागमनाय च॥ अनेन विधिना यस्तु ग्रहपूजां समारभेत्। सर्वान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते। यस्तु पीडाकरो त्यंतमत्यपवित्तस्य वा ग्रहः। तं तु यत्नेन संपूज्य शेषानप्यर्चयेन्नरः। तथा॥ सदैवायुतहोमोयं नवग्रहमखः स्मृतः। विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु। निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाद्भुतेषु च। वश्यकर्माभिचारादितथैवोच्चाटनादिकं। नवग्रहमखं कृत्वा ततः कर्म समारभेत्। अन्यथा फलदं पुंसां न काम्यं जायते क्वचित्। अद्भुतं भूकंपादि। अन्यश्चात्र विशेषः पितृकृतप्रयोगदीपिकायां ज्ञेयः। यत्तु शिष्टाः ग्रहमंत्राणामयुतसहस्रादि संख्यया जपं कृत्वा तद्दशांशेन तिलैर्होमं कुर्वंति। तत्कुत्रापि जपानुक्तेः किंमूलमिति न विद्मः॥ ॥इत्ययुतहोमविधिः॥

॥अथप्रयोगः॥सचयद्यप्यस्मत्पितामहकृतोस्त्येव।तथापिसंक्षेपेणोच्यते॥कर्त्तादेशकालौस्मृ
त्वाश्रीकामःग्रहपीडायामुसातेरोगेवातच्छांतिकामःशत्रुपराजयकामोवायुतहोमाख्यनव
ग्रहयज्ञेनाहंयक्ष्ये।केवलेतुग्रहयज्ञंकरिष्यइतिवासंकल्प्यगणेशंसंपूज्यमातृपूजांवृद्धिश्राद्धंचकृ
त्वाचार्यंवृत्वाप्रार्थयेत्।त्वंनोगतिःपितामातात्वंगतिस्त्वंपरायणं।त्वत्प्रसादेनविप्रर्षेसर्वंमे
स्यान्मनोगतं।आपद्विमोक्षायचमेकुरुयज्ञमतंद्रितः।कोटिहोमाख्यमतुलंशांतिकंसर्वका
मिकमिति।ततःचतुरःऋत्विजोवृणुयात्।यद्वाचार्यौब्रह्माचेतिद्वौ।तेषांतच्चाखयोर्मधुपर्कः।
तदाहहेमाद्रौविश्वामित्रः।संपूज्यमधुपर्केणऋत्विजःकर्मकारयेत्।अन्यथाविफलंकर्मभव
तीहनसंशयइति।सचार्घ्यशाखयाकार्यः।अर्घ्यशाखयामधुपर्कइतितत्रैवस्मृतेः।ततोदश
हस्तमष्टहस्तंवामंडपंकृत्वातन्मध्येहस्तमात्रंकुंडंकुर्यात्।ऐशानेकुंडमितिहेमाद्रिः।

तदीशान्यां वेदी हस्तविस्तृता। वितस्त्युच्छ्रावप्रदृयपुतावत्चतुरस्त्रा कार्या। आद्यवप्रो द्व्यंगुलोच्चं द्वि
तीयस्त्र्यंगुलोच्चः। द्व्यवपि द्व्यंगुलविस्तारो। तत आचार्यो यजमानो यद्वंकर्णौ भिरिति मंडपं प्रदक्षि
णीकृत्य पश्चिमद्वारेण प्रविश्यं देशकालौ संकीर्त्य अमुककर्मणि मंडपपूजादिकरिष्य इति संक
ल्प्य। तदंगत्वेन गणेशपूजनं मंडपदेवतास्थापनादि च करिष्ये इत्युक्त्वा तानि कृत्वा यदत्रेति स
र्षपान्विकीर्य पंचगव्येन शुद्धोदकेन शुची वो हव्येति। आपो हि ष्ठेति प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमि

ति मंत्रद्वयं जपेत्। ततो नैर्ऋते च वेदीशाने चतुष्के विशंतु भूतले नागा लोकपालाश्च सर्वतः। अ
स्मिन्मंडपे वतिष्ठंतु आयुर्बलकराः सदा इति शंकून्त्रोपयेत्। अग्निभ्योप्यथ सर्पेभ्यो ये चान्ये त
त्समाश्रिताः। तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमम्। इति माषभक्तबलिं दत्वा सुवर्णादि राम
लाकया। शांतायशोवतीकांतविशालाप्राणवाहिनी। सती च सुमना नंदा सुभद्रा नवमी मतेति ॥२५॥

सु१

प्रागायतारेखाः कृत्वा हिरण्योत्रभालक्ष्मी। विभूतिर्विमला श्रिया। जथा कालांविशोकाश्चैवमुदगायताः कृत्वा मध्यकोष्ठचतुष्टयमेकीकृत्य कोणेषुरेखादद्यात्। मध्यमपदचतुष्के हृदये ब्रह्मा। पूर्वपदद्वये दक्षिणस्तने अर्यमा। दक्षिणपदद्वये जठरदक्षिणे विवस्वान्। पश्चिमपदद्वये जठरवामे मित्रः। उदक्पदद्वये वामस्तने पृथ्वीधरः। आग्नेयपदार्धयोर्दक्षिणहस्ते सावित्रसवितारौ। नैर्ऋतपदार्धयोर्वक्षणमेढ्रयोर्विबुधाधिपविजयौ। वायव्यपदार्धयोर्वामहस्ते राजयक्ष्मरुद्रौ॥ ईशानपदार्धयोरुरोमुखयोरापापवत्सौ। ईशानपददक्षिणार्धे शिरसि शिखिनी। दक्षिणसार्धपदे दक्षिणनेत्रे पर्जन्यं। तद्दक्षिणेकपदद्वये दक्षिणश्रोत्रे जयंतं। तद्दक्षिणपदद्वये दक्षिणांसे कुलिशायुधं। तद्दक्षिणपदद्वये दक्षिणबाहौ सूर्यं। तद्दक्षिणपदद्वये दक्षिणबाहौ वेवसत्यं। तद्दक्षिणसार्धपदे दक्षिणकूर्परे भृशं। तद्दक्षिणाग्नेयपदार्धे दक्षि-

न

शां.ति.

श्चिमप.२

णप्रवासेऽश्राकाशं।तत्पश्चिमार्धेदक्षिणप्रवाहावेवनायुं।तत्पश्चिमसार्धपदेदक्षिणमणिबं
धेपूष्णं।तत्पश्चिमपदद्वयेदक्षिणपार्श्वेवितथं।तत्पश्चिमपदद्वयेदक्षिणपार्श्वेएवगृहक्षतं।त
त्पदद्वयेदक्षिणरोरोध्वमं।तत्पदद्वयेदक्षिणऊ नौगंधर्वं।तत्पश्चिमसार्धपददक्षिणजंघायां
भृंगराजं।तत्पश्चिमनैर्ऋत्यपदार्धेदक्षिणस्फिचिमृगः।तदुत्तरार्द्धेपादयोःपितॄन्।तदुत्तर
सार्धपदेवामस्फिचिदौवारिकं।तदुत्तरपदद्वयेवामजंघायांसुग्रीवं।तदुत्तरपदद्वयेवामऊ
नौपुष्पदंतं।तदुत्तरपदद्वयेवामोरौवरुणं।तदुत्तरपदद्वयेवामपार्श्वेअसुरं।तदुत्तरसार्धप
देवामपार्श्वेएवशोषं।तदुत्तरवायव्यपदार्धेवाममणिबंधेपापं।तत्प्राक्पदार्धेवामबाहौरो
गं।तत्प्राक्सार्द्धपदेवामबाहावेवनागं।तत्प्राक्पदद्वयेवामकूर्परेमुख्यं।तत्प्राक्पदद्वये
वामबाहौभल्लाटं।तत्प्राक्पदद्वयेवामबाहावेवसोमं।तत्प्राक्द्वयेवामांसेसर्पं।तत्प्राक्

राम

॥२६॥

साईपदेवाम श्रोत्रेम्रदितिं। तस्यागर्धपदेवामनेत्रेदितिं। उत्तरे वास्तोष्पतइतिवास्कं। विदिक्ष
चरकीं· विदारीं· पूतनां· पापराक्षसीं· दिक्षु स्कंदं· अर्यमणं· जंभकं· पिलिपिछं। ततः संपूज्यमं
डलादीशानेवरुणं संपूज्य पायसबलीन्दत्वा मंडपं पंपावमानेन राक्षोघ्नेन च त्रिसूत्र्या वेष्टयेत्।
ततः पूर्वस्यामग्निमीळेपुरोहितमितिसुहृढतोरणमावाह्य सुहृढतोरणायनम इतिसंपूज्य
तत्राऊ वृहस्पतीसंपूज्य कलशं संस्थाप्य ध्रुवं पूजयेत्। दक्षिणे इषेत्वेतिसुभद्रतोरणं संपूज्य
तत्र सर्पांगारकौ संपूज्य कलशं संस्थाप्य धरां पूजयेत्। पश्चिमे ऽग्नआयाहीति सुकर्म तोरण
मावाह्य तत्र शुक्रबुधौ न्यस्य कलशं संस्थाप्य तत्र वाक्पतिं पूजयेत्। उत्तरे शन्नोदेवीति सुहो
त्रतोरणमावाह्य सोमकेतु शनीन्यस्य कलशं संस्थाप्य विघ्नेशं पूजयेत्। ततः पूर्वद्वारे कलशं
त्रा। संस्थाप्य तत्रैरावतं संपूज्य। ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः। अत्रिगोत्रस्तु विप्रेंद्रऋ

त्विक्त्वंमेमखेभवेतिह्यृग्वेदिनावलिंओंदत्वाअग्निमीळइतिसंपूज्यइंद्रंध्यात्वाएह्येहिसर्वा
मरसिद्धसंघैरभिष्टुतोवज्रधरामरेश।संवीज्यमानोप्सरसांगणेनक्षौरंधरंभोसगवन्नमस्ते।
इत्यावाह्य·त्रातारमिंद्रमितिपीतांध्वजाकांध्वजंचो[illegible]संपूज्य·इंद्रःसुरपतिःश्रेष्ठोवज्रहस्तो
महाबलः।शतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमःइतिवलिंदत्वाचामेत्।ततःआग्नेयेकलशे
संस्थाप्य·पुंडरीकममृतंचतत्रसंपूज्यअग्निंध्यात्वा।एह्येहिसर्वामरहव्यवाहमुनिप्रवीरैर
भितोभिजुष्ट।तेजोवतालोकगणेनसार्धंममाध्वरंपाहिकवेनमस्ते।आवाह्याग्निंदूतमिति
रक्तांपताकांध्वजंचोक्षित्वाग्निंसंपूज्य·आग्नेयःपुरुषोरक्तःसर्वदेवमयोव्ययः।धूमकेतुरजो
ध्यक्षस्तस्मैनित्यं०।इतिबलिंसमर्प्याचामेत्।ततोदक्षिणेकलशेसंस्थाप्ययामनंदिग्गजंसं
पूज्ययजुर्वेदिनावलिंओं०।कातराक्षोयजुर्वेदस्त्रैष्टुभोविष्णुदेवतः।काश्यपेयस्तुविप्रेंद्रक्र

त्विर्त्कमेम खेषवेतिवृत्वाइखेत्वेतिसंपूज्ययमंध्यात्वा॰एह्येहि वैवस्वत धर्मराजसर्वामरैरर्चि
तधर्ममूर्त्ते। शुभाशुभानंदशुचामयी शिवायनः पाहिमखन्नमस्ते। इत्यावाह्यायंशौरिति
कृष्णांपताकांध्वजंचोच्छ्रित्य यमायसोमामितिसंपूज्य। महामहिषमारूढं दंडहस्तंमहाबलं। आ
वाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतामिति। बलिंदत्वाचामेत्। ततोनैर्ऋत्यांकलशंसंस्थाप्य
तत्रकुमुदंदुर्जयंचसंपूज्यनिर्ऋतिंध्यात्वा॰एह्येहिरक्षोगणनायकस्त्वं विशालवेतालपिशा
चसंघैः। ममाध्वरंपाहिपिशाचनाथ लोकेश्वरस्त्वंभगवन्नमस्ते इत्यावाह्यमोषुणइतिनी
लीपताकांध्वजंचोच्छ्रित्यसंपूज्य॰निर्ऋतिंखड्गहस्तंचसर्वलोकैकपावनं। आवाहयामिय
ज्ञेस्मिन्पूजेयंप्रतिगृह्यतामितिबलिंसमर्प्याचामेत्। ततःपश्चिमेकलशेसंस्थाप्यांजन
दिग्गजंसंपूज्यसामवेदिनाऋत्विजो॰सामवेदस्तुपिंगाक्षोजागतःशक्रदैवतः। भारद्वाज

स्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिवत्वाऽग्नआयाहीतिसंपूज्यवरुणंध्यात्वाएह्येहियादोगण
वशिधीनांगणेनपर्जन्यसहाप्सरोभिः।विद्याधरेंद्रामरगीयमानपाहित्वमस्मान्भगवन्नम
स्तेइत्यावाह्येमंमेवरुणेतिश्वेतांपताकांध्वजंचोछ्रित्यसंपूज्य·पाशहस्तंचवरुणंयादसांप
तिमीश्वरं।आवाहयामियज्ञेस्मिन्वरुणायनमोनमइतिबलिंसमर्प्याचामेत्।ततोवाय
व्यांकलशंनिधायतत्रपुष्पदंतंसिद्धार्थंचावाह्य·वायुंध्यात्वा·एह्येहियज्ञेममरक्षणाय
मृगाधिरूढःसहसिद्धसंघैः।प्राणाधिपःकालकवेःसहायगृहाणपूजांभगवन्नमस्ते।।
इत्यावाह्य·वायोशतमितिधूम्रांपताकांध्वजंचोछ्रित्यसंपूज्यवायुमाकाशगंचैवपवनं
वेगवत्कृतिं।आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां।अनाकारोमहोजाश्चयस्यास्यादृष्ट
गतिर्दिवि।तस्मैप्रध्यायजगतोवायवेहंनमामिचेतिबलिंदत्वाचामेत्।ततउत्तरेकलश

ध्वजं संस्थाप्य सार्वभौमं दिग्गजं न्यस्य अथर्वविदा ऋत्विजो ब्रह्मणे अथर्ववेदो नुष्टुभो रुद्र
देवतः ॥ वैशंपायन विप्रेंद्र ऋत्विक् मे भव मखे स्मिन्निति वरयित्वा शान्तो दिवी रितिसंपूज्य कुबेरं ध्या
त्वा एह्येहि यज्ञेश्वर यज्ञ रक्षां विधत्स्व नक्षत्रगणेन सार्धं । सर्वौषधीभिः पितृभिः सह देवग
णः पूजां भगवन्नमस्ते । इत्यावाह्य स्थाप्य यस्येति हरितां पताकां ध्वजं चोच्छ्रित्य संपूज्य सर्वन
क्षत्रमध्ये तु सोमो राजा व्यवस्थितः । तस्मै सोमाय देवाय नक्षत्रपतये नमः इति बलिं दत्वाचा
मेत् । ततईशान्यां कलशं निधाय सुव्रती कं मंगलं च संपूज्य ईशानं ध्यात्वा । एह्येहि विश्वेश्व
र नस्त्रिशूलकपालखट्वांगधरेण सार्धं । लोकेन यज्ञेश्वर यज्ञसिध्यै गृहाण । इत्यावाह्याभि
ला देवसवित रिति श्वेतां पताकां ध्वजं चोच्छ्रित्य संपूज्य वृषस्कंधसमारूढ शूलहस्त त्रिलोच
न । आवाहयामि यज्ञे स्मिन् पूजेयं प्रतिगृह्यतां । सर्वाधिपो महादेव ईशानः शुक्ल ईश्वरः ॥ श्र

लपाणिर्विरूपाक्षस्तस्मै॰॥इतिबलिंदत्वाचामेत्र।ततईशानपूर्वयोर्मध्येऽनंतंध्यात्वा॰एह्येहिपा
तालध्वरामरेंद्रनागांगनाकिंनरगीयमान।यक्षोरगेंद्रामरलोकसंघैरनंतरक्षाधरमस्मदी
यमित्यावाह्यश्वेतांपताकांध्वजंचोछ्रित्यायंगौरितिसंपूज्ययोसावनंतरूपेणब्रह्मांडंसच
राचरं।पुष्पवद्धारयेन्मूर्ध्नितस्मै॰॥इतिबलिंदत्वाचामेत्र।ततःपश्चिमनिर्ऋतिमध्येब्रह्माणंध्या
त्वाएह्येहिसर्वाधिपतेसुरेंद्रलोकेनसार्धंपितृदेवताभिः।सर्वस्यधातास्यमितप्रभावोवि
शाधरंनःसततंशिवायेत्यावाह्यब्रह्मजज्ञानमितिरक्तांपताकांध्वजंचोछ्रित्यसंपूज्य॰पद्म
योनिश्चतुर्मूर्त्तिर्वेदवासःपितामहः।यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै॰॥इतिबलिंदत्वाचामेत्र।त
तोमंडपमध्येइंद्रस्यवल्लइतिमन्त्रा।ध्वजमुछ्रित्यतत्रब्रह्मजज्ञानमितिब्रह्माणंसंपूज्यमंड राम
पस्तंभेषुसर्वेभ्योदेवेभ्योनमः।वंशेषुकिंनरेभ्योनमः।पृष्ठेपन्नगेभ्योनमइतिसंपूज्यपूर्व ॥१२९॥

स्यां किंचिद्भूमिमुपलिप्य त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च। ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु तानि मे। देवदानवगंधर्वा यक्षराक्षसपन्नगाः। ऋषयो मनवो गावो देवमातर एव च। सर्वे ममाध्वरे रक्षां प्रकुर्वंतु मुदान्विताः। ब्रह्मा विष्णुश्च रुद्रश्च यक्षो त्रपालो गणैः सह। रक्षंतु मंडपं सर्वे घ्नंतु रक्षांसि सर्वतः। त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः। त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः। ब्रह्मणे· विष्णवे· शिवाय· देवेभ्यो· दानवेभ्यो· गंधर्वेभ्यो· यक्षेभ्यो· राक्षसेभ्यो· पन्नगेभ्यो· ऋषिभ्यो· मनुष्येभ्यो· गोभ्यो· देवमातृभ्यो नमः इति संपूज्य बलिं दद्यात्॥ ॥ इति मंडपप्रतिष्ठा॥ सा च मंडपाभावे न कार्या। द्वारलोपात्। कूटमंडपे तु कार्यैव। विंशहस्तप्रमाणेन मंडपं कूटमेव वेति लिंगे विकल्पोक्त्या व्रीहियववत्समानविधानत्वादित्यन्यत्र विस्तरः। तत आचार्यो ऽमुकस्य होमे ऽग्निप्रतिष्ठां करिष्ये तदंगतया कुंडे उल्लेखनोल्लेपनादि

अग्निप्रतिष्ठांतं कर्म मेखलायो निर्देवतास्थापनं च करिष्ये। कुंडं संमृज्य उपरि मेखलायां श्वे
तायां इदं विष्णुरिति विष्णुं मध्यमेखलायां। ब्रह्मजज्ञानमिति ब्रह्माणं। अधो मेखलायां कृष्णायां
कद्रुद्रायेति रुद्रं। योन्यां गौरी। र्मिमायेति गौरीं च संपूज्या ग्निं प्रतिष्ठाप्य ग्रहवेद्यां सर्वतोभद्रं कृ
त्वा तत्र देवता आवाहयेत्। यथा।। मध्ये ब्रह्मजज्ञानमिति ब्रह्माणं उत्तरादि। आप्यायस्वेति
सोमं। अभि त्वा ऽजीगर्तिः शुनःशेप ईशानो गायत्री।। इंद्रं वो मधुछंदा इंद्रो गायत्री। अग्निं काण्वो
मेधातिथिरग्निर्गायत्री।। यमाय सोमं यमो यमोनुष्टुप्। मोषुणो घोरः कण्वो निर्ऋतिर्गायत्री।
तत्वायामि शुनःशेपो वरुणस्त्रिष्टुप्। वायो शतं वामदेवो वायुरनुष्टुप्। वायुसोममध्यादिषु।
अयं अत्र मे त्रावरुणो वसिष्ठो वसवस्त्रिष्टुप्। आ रुद्रासः श्यावाश्व एकादश रुद्रा जगती।। त्या
नुसांमदोमत्स्योहादशादित्या गायत्री।। अश्विनावर्त्तिरा हूगणो गौतमो श्विनावुष्णिक्। ओ

राम

मासोमधुश्छंदा विश्वेदेवागायत्री। अभित्यंवामदेवःसप्तपक्षा प्रकृतिः। आयंगौः सार्परा
ज्ञीसर्पागायत्री। अप्सरसामेतसाऋष्यशृंगोगंधर्वाप्सरसोनुष्टुप्। ह्रैं ब्रह्मणो मध्ये। कुमारंमा
ताकुमारस्कंदस्त्रिष्टुप्। ऋषभ ऋषभो वैराजोऋषभोनुष्टुप्। ततोनाममंत्रेणैवशूलमहा
कालमितिकेचित्। ब्रह्मेशानमध्ये। अदितिर्लोक्योबृहस्पतिर्दक्षोनुष्टुप्। ब्रह्मेंद्रमध्ये। ता
मग्निवर्णंसोभरिर्दुर्गात्रिष्टुप्। इदंविष्णुरितिविष्णुः। ब्रह्माग्निमध्ये। उदीरतांशंखःस्वधात्रि
ष्टुप्। ब्रह्मयममध्ये। परंमृत्यो संकुसुकोमृत्युरोगाः प्रकृतिः। ब्रह्मनिर्ऋतिमध्ये। गणानां
त्वागृत्समदोगणाधिपतिर्जगती। ब्रह्मवरुणमध्ये। शन्नोदेवीरांबरीषःसिंधुद्वीपआपो
गायत्री। ब्रह्मवायुमध्ये। मरुतोयस्यराहूगणोमरुतोगायत्री। ब्रह्मणःपादमूले। स्योना
मेधातिथिर्भूमिर्गायत्री। तत्रैव। इमंमेगंगेसिंधुक्षित्प्रैयमेधोगंगायमुनासरस्वत्यो।

अष्टी
म २

ष्टुप्

जगती॥ तत्रैव॥ धाम्नो धाम्नो गौतमो वामदेवः सप्तसागरा अनुष्टुप्॥ तदुपरि मेरुं॥ बाह्ये सो
मादिसन्निधौ क्रमेण॥ गदा॥ त्रिशूलं॥ वज्रं॥ शक्तिः॥ दंडः॥ खड्गः॥ पाशः॥ अंकुशः॥ इत्यायुधानि॥ उ
त्तरादि॥ गौतमः॥ भरद्वाजः॥ विश्वामित्रः॥ कश्यपः॥ जमदग्निः॥ वसिष्ठः॥ अत्रिः॥ अरुंधती॥ पूर्वा
ऐंद्री॥ कौमारी॰ ब्राह्मी॰ वाराही॰ चामुंडा॰ वैष्णवी॰ माहेश्वरी॰ वैनायकी॥ तदस्तु॥ ग्रहावेद इत्यावा
ह्य संपूज्य ग्रहमंडलं विलिख्य ग्रहान्स्थापयेत्॥ यथा॥ ग्रहवेद्यां वस्त्रेष्टदलं पद्मं गंधादिना कृ
त्वा मध्ये कर्णिकायां वर्तुले मंडले मूर्तिस्तिंदुलपुंजेषु॰ आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप्॥
मंत्रांते ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपगोत्र रक्तवर्ण सूर्य इहागच्छ इहतिष्ठ॥ अग्निं दूतमिति
सूर्यस्थापनमिति मदनरत्ने॥ व्याहृतिभिरावाह्य मंत्रेण स्थापनमिति तत्रैव एवमग्रेपि॥ राम
तत आग्नेय्यदग्ने चतुरस्रे आप्यायस्व गौतमः सोमो गायत्री॥ अनेनाप्स्वन्त इति वा ॐ भूर्भुवः॥ ३१॥

स्वर्यमुनातीरोद्भवात्रेयगोत्रशुक्लवर्णसोमेत्यादि दक्षिणदले त्रिकोणं अग्निर्मूर्धादिवः ककुत्पतिः पृथिव्या अयं । अङ्गारको गायत्री । अनेन स्योना पृथिवीतिवा । भूर्भुवःस्वः अवंतीसमुद्भव भारद्वाजगोत्ररक्तवर्णभौमेत्यादि । उद्बुध्यध्वं बुधः सौम्यो बुधस्त्रिष्टुप् । अनेनेदं विष्णुरितिवा । ॐ भूर्भुवःस्वः मगधदेशोद्भवात्रेयसगोत्रपीतवर्णबुधेत्यादि । उत्तरे दीर्घचतुरस्रे बृहस्पते अति यदर्यो बृहस्पतिस्त्रिष्टुप् । अनेनेंद्र आसामितिवा । ॐ भूर्भुवःस्वः सिंधुदेशोद्भवांगिरसगोत्रपीतवर्णबृहस्पतेइत्यादि । पूर्वदले पंचकोणे अन्नात्परिस्रुतइतिवा शुक्रज्योतिरितिवा । ॐ भूर्भुवःस्वः भोजकटदेशोद्भव भार्गवगोत्रशुक्लवर्णशुक्रेहेत्यादि । केचित्तु । शुक्रः शुशुक्वानित्यर्द्धर्चो शुक्रमंत्रमाहुस्तच्चिंत्यं । पश्चिमे धनुराकारे शन्नोदेवीः सिंधुद्वीपः शनिर्गायत्री । अनेन प्रजापते न त्वदितिवा । ॐ भूर्भुवःस्वः सौराष्ट्रदेशोद्भव काश्यपसगोत्र कृष्णवर्णशनैश्चरेहेत्यादि । नैर्ऋत्ये शूर्पाकृत्यानो वामदेवो राहुर्गा कोरे

यत्री॥ अनेन कांडात्कांडादिति वायं गौरिति॥ ॐ भूर्भुवः स्वः राहो नाथपुरोद्भव पैठीनसिगोत्र कृष्ण
वर्ण राहो इहेत्यादि॥ वा यव्ये ध्वजाकारे केतुं मधुच्छंदाः केतवो गायत्री॥ अनेन ब्रह्मजज्ञानमिति॥
ॐ भूर्भुवः स्वः अंतर्वेदिसमुद्भव जैमिनिगोत्र चित्रवर्ण केतो इहेत्यादि॥ अथाधिदेवता॥ सूर्यो
त्तरे त्र्यंबकमिति रुद्रं॥ सोम दक्षिणे अप्सु मे सोम इत्युमां॥ भौम दक्षिणे यदक्रंदेति स्कंदं॥ बुध पूर्वे वि
ष्णो रराटमिति विष्णुं॥ गुरो रुत्तरे आ ब्रह्मन्निति ब्रह्माणं॥ शुक्र पूर्वे सजोषा इंद्रेतींद्रं॥ शनेराग्ने
ये यमाय त्वेति यमं॥ राहोरीशाने कार्षिरसीति चित्रगुप्तं॥ अथ प्रत्यधिदेवताः॥ ते यथा ह दक्षिणे॥
उत्तरे वा॥ अग्निं दूतं॥ अग्निं॥ अप्स्वग्ने॥ स्योना पृथिवि॥ भूमिं॥ इदं विष्णुः॥ विष्णुं॥ इंद्र आसां॥ इंद्रं॥ आ
दित्यै रास्नासि॥ इंद्राणीं॥ प्रजापते॥ प्रजापतिं॥ नमोस्तु सर्पेभ्यः॥ सर्पान्॥ ब्रह्मजज्ञानं॥ ब्रह्माणं स्था
पयेत्॥ ततो रवेरुत्तरे गणानां त्वेति गणेशं॥ राहोरुत्तरे जातवेदस इति दुर्गां॥ सूर्योत्तरे वायो ये

तेइति वायुं राहोरैशानेधृतं घृतपावानइत्याकाशं केतो दक्षिणे या वाशिकेत्यश्विनौ स्था
पयेत्। ततो दिक्पालान् त्रातारं अग्निं दूतं यमाय त्वा असुन्वंतं तत्त्वायामि वायो येते वयं सोम
तमीशानं ब्रह्मजज्ञानं नमोस्तु सर्पेभ्य इति दशदिक्पालानावाहयेत्। लक्षहोमे तु सुपर्णो
सि गरुत्मानिति। सामनिःशेषदेहस्त्वं वाहनं परमेष्ठिनः। विषयापहरो नित्यमतः शांतिं
प्रयच्छमे इति। इंद्रं मित्रं वरुणमग्निराहुरिति वा। गरुडमावाह्य कोटिहोमे पूर्वे ब्रह्मजज्ञान
मिति ब्रह्माणं मध्ये। इदं विष्णुरिति विष्णुं पश्चिमे। त्र्यंबकमिति रुद्रमुत्तरे। अमयो अत्रे ति वसू
नाग्नेय्यां। मरुतो यस्येति मरुतश्चावाह्य संपूज्य प्रार्थयेत्। आदित्या वसवो रुद्रा मरुतो लो
कपास्तथा। जनार्दनश्चैव शूलपाणिर्मृगोक्षहा। अत्र संनिहिताः सर्वे भवंतु सुखभागि
नः। पूजांगृह्णंतु सर्वत्र मयाभक्त्योपपादितां। कुर्वंतु चशुभं सर्वे यज्ञकर्तुः समाहिताः। अत्र

शांति.

मंत्राणां वाचनिकत्वेपि स्वशाखास्थैस्तत्प्रकाशकैराबाहनादिकार्यं। संहितायां तु ये मंत्रास्तद्देवत्याः श्रुतौ स्मृताः। तैः पूजा लोकपालानां कर्त्तव्या तु समंततः इति हेमाद्रौ गारुडस्योपलक्षणार्थत्वादिति केचिद्वदंति। ततो वेद्या ऐशान्यां मही द्यौरिति भूमिं स्पृष्ट्वा ओषधयः संमिति यवान् निक्षिप्य आकलशेष्विति कुंभं निधायेमं मे गंगे इति तीर्थजलेनापूर्य तत्र गंधद्वारामिति गंधं। या ओषधीरिति सर्वौषधीः। दधिक्राव्ण इति दधि। ओषधयः समित्यक्षतान्। कांडात्कांडादिति दूर्वाः। अश्वत्थेव इति अश्वत्थवटोदुंबरप्लक्षपल्लवान्। स्योना पृथिवीत्यश्वगजस्थानवल्मीकसंगमह्रदगोकुलराजद्वारेभ्यः सप्तमृत्तिकाः। याः फलिनीरिति फलं। सहिरत्नानीति पंचरत्नानि। हिरण्यरूप इति हिरण्यं निक्षिप्य। युवा सुवासा इति वस्त्रयुग्मेन वेष्ट्य पूर्णा दर्वीति पूर्णपात्रं निधाय तत्र वरुणमावाह्य सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयांतु यजमानस्य दुरितक्षयकारकाः

राम

॥३३॥

इति तीर्थान्यावाह्य सर्वेषां प्रणवादिनमोंतनामभिरुक्ततत्तद्वर्णवस्त्रगंधपुष्पधूपैर्धृतदीपोक्त
नैवेद्यफलतांबूलदक्षिणानमस्कारैश्च पूजां कुर्यात्॥ उपरि फलपुष्पयुतं वितानं च दद्यात्॥ एवं आ
होमसमाप्ति प्रतिदिनं कुर्यात्॥ ततः कलशस्य मुखे देवदानसंवादेइत्याद्यैः कुंभं प्रार्थ्य कुंडे न्वाधा
नादि प्रत्येकं निर्वापादिप्रोक्षणादिना समाप्यैकत्राग्निन्याचायरून्श्रपयित्वाज्यभागांते यज
मानः द्रव्याणि तत्तद्देवताः चतुर्थ्यंताउद्दिश्य उत्सृज्यामि न मम यथा देवतमस्तु इति त्यजेत्॥ ततो
ग्रहणमुक्तसमिधः प्रादेशमात्रा मधुदधिघृतप्लुतास्तत्तन्मंत्रैः प्रत्येकमष्टोत्तरशतमष्टाविंशतिं
वा हुत्वाधिदेवताप्रत्यधिदेवताविनायकादिपंचलोकपालेभ्य उक्तमंत्रैः न्यूनसंख्ययाष्टौ च तस्त्रो
वा हुत्वा तत्तन्मंत्रैरेकामाज्याहुतिं हुत्वोपस्तरणादिना प्रत्येकं तत्तन्मंत्रैः स्रुचा चरु चर्वाहुतिमेकैकां
जुहुयात्॥ ततः चरोः स्विष्टकृतं हुत्वा। व्रीहियवघृतप्लुतैस्तिलैर्यथाकाममुपकल्पितद्रव्येण

ग्रहेभ्यस्तस्तन्मंत्रैर्दशारद्याहुतीर्हुत्वाभूरादिव्याहृतिभिः स्तिसृभिः समस्ताभिश्चैकैकत्येवमयुत
संख्यो होमः कार्यः। अयुतलक्षहोमादिसमासो स्विष्टकृन्नास्त्येव। प्रायश्चित्ताहुतिपूर्णाहुत्या
द्येव कार्यमितिहेमाद्रिमदनरत्नादयः। तन्न। भूर्भुवः स्वः स्वाहेत्येवं सर्वो होमः। भूर्भुवः स्वस्तथा स्वा
हाहोमः सर्वो विधीयते इति हेमाद्रौ भविष्योत्तराच्च स्विष्टकृद्यांतेभिन्नः। अयुतहोमादावतिदेश
प्राप्तस्य तस्य बाधे मानाभावात्। एतच्चरोरधार्यत्वात्पर्युषितत्वापत्तेश्चोक्तं। अन्ये त्वन्यदिने
एव स्विष्टकृत्। अन्यथा। सुत्योत्कर्षे सवनीयपशुयागादेर्होकागतिः। शेषस्थापनार्थं चाज्येस्वे
पादिरूपायआस्त्रेयः इति वदंति। वयं तु स्विष्टकृद्यागद्वयं कार्यं। स्विष्टकृद्यागो हि माभूच्छेषस्य
तत्स्थापनस्य प्रयोजकः। परप्रयुक्तद्रव्योपजीवित्वात्। शेषस्तु तस्य प्रयोजक एव। संस्कार्यत्वा
त्। अन्यथा पशुपुरोडाशादावपि पृथक् स्विष्टकृदिदं न स्यात्। हेमाद्र्यादिलिखनाच्चैवमाहुः दि

राम

॥३४॥

कृ१

तिएकबर्हिपरिधाज्यस्विष्टकृतःस्थालस्थल्यकालाइत्याश्वलायनोक्तेः दिनरूपकालेक्येएकःस्वि
ष्टकृत्कालभेदेतुनानेतियुक्तमुत्पश्यामः।ततःशुभेमुहूर्त्तेहोमंसमाप्यस्विष्टकृदादिप्रायश्चि
त्तहोमांतंस्वशाखीयंप्रणीताविमोकासाकृत्वादिक्पालेभ्योग्रहेभ्यःविनायकादिभ्यःक्षे
त्रपालायबलीन्दत्वास्त्रुचिद्वादशगृहीतंगृहीत्वोर्ध्वस्तिष्ठन्मूर्धानंभारद्वाजोवैश्वानरस्त्रिष्टुप्।
अनेनपुनस्त्वापूर्णादर्विसिक्तस्तेइतिचतुर्भिर्वापूर्णाहुतिंकृत्वाग्नयेवैश्वानरायेदंनममेतित्यागः।
ततःप्रणीताविमोकादिब्रह्मविसर्जनांतंकर्मसमापयेत्।ततःसर्वौषधैःसर्वगंधैश्चप्रागुक्ते
विलिप्तांगंयजमानंसपरिवारंचत्वारोविप्राग्रहकुंभोदकेसमुद्रज्येष्ठेत्याद्यैरभिषिंचेयुः॥पौरा
णोक्ताश्च॥तेच॥सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः।वासुदेवोजगन्नाथस्तथासंकर्षणोवि
भुः।प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते।आखंडलोग्निर्भगवान्यमोवैनिरृतिस्तथा॥

वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा। की
र्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शांतिः कांतिस्तुष्टिश्च मातरः। एतास्त्वा
मभिषिंचंतु देवपत्न्यः समागताः। आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः। ग्रहास्त्वामभिषिं
चंतु राहुः केतुश्च तर्पिताः। देवदानवगंधर्वा यक्षराक्षसपन्नगाः। ऋषयो मनवो गावो देवमातर ए
व च। देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः। अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च।
औषधानि च रत्नानि कालस्यावयवाश्च ये। सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते
त्वामभिषिंचंतु सर्वकामार्थसिद्धये। ततः प्राङ्मुखः कर्त्ता अग्नेः पश्चादाचार्यर्त्विजः उदङ्मुखा
न्संपूज्य देशकालौ संकीर्त्य कृतैतदमुकहोमाख्य ग्रहयज्ञप्रतिष्ठार्थं सूर्यप्रीत्यर्थमिमां कपिलां
रुद्रदैवत्याममुकगोत्रेभ्यो गुरुर्त्विग्भ्यो दक्षिणामहं संप्रददे न मम इत्युक्त्वा। कपिले सर्व

देवानां पूजनीयासि रोहिणि। तीर्थदेवमयी यस्मादतः शांतिं प्रयछ मे इति पठेत्। एवमग्नेर्मेषं॥
पुण्यस्त्वं शंख पुण्यानां मंगलानां च मंगलं। विष्णुना विधृतो नित्यमतः शांतिं प्रयछ मे। इति
सोमाय शंखं। धर्मस्त्वं वृषरूपेण जगदानंदकारकः। अष्टमूर्त्तेरधिष्ठानमतः पाहि सनातन
इति भौमाय वृषं। हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदमतः शांतिं प्रय
छ मे॥ इति बुधाय हेम॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं। प्रदानात्तस्य मे विष्णुरतः शांतिं
प्रयछ मे। इति गुरवे पीतवस्त्रं॥ विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः। चंद्रार्कवाहनं नित्य
मतः शांतिं प्रयछ मे। शुक्राया श्वं। यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसन्निभा। सर्वपापहरा नि
त्यमतः०। इति शनये कृष्णां गां। यस्मादायसकर्माणि त्वदधीनानि सर्वदा। लांगलाद्यायुधा
दीनि तस्माच्छांतिं०। इति राहवे लोहं। यस्मात्त्वं छागयज्ञानां मंगत्वेन व्यवस्थितः। यानं विभावसोर्नि

शांति॰

स्यमतः॰ शांतिकेतुभ्यश्छागं।सर्वेषांवागावः।गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश।यस्मात्तस्माच्छिवं
मेस्यादिहलोकेपरत्रचेतिदेयाः।सर्वेभ्योवास्तुवर्णं।सर्वपक्षेषुशय्यारत्नानिभूमिश्चाधिकानितन्मं
त्रास्तु॥यस्मादशून्यंशयनंकेशवस्यशिवस्यच।शय्याममाप्यशून्यास्तुदत्ताजन्मनिजन्मनि।
यथारत्नेषुसर्वेषुसर्वेदेवाःप्रतिष्ठिताः।तथाशांतिंप्रयच्छंतुरत्नदानेनमेसुराः।यथाभूमिप्रदा
नस्यकलांनार्हतिषोडशीं॥दानान्यन्यानिमेशांतिर्भूमिदानाद्भवत्विहेति॥वस्त्रकांचनरत्ना
न्यपियथाश्रद्धंदद्यात्॥ततोग्निग्रहाणामुत्तरपूजांकृत्वायांतुदेवगणाःसर्वेइतिविसृज्याग्निंसं
पूज्यविभूतिंधृत्वा॰गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर।यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशनेति
विसृज्योक्तसंख्ययाविप्रान्संभोज्यकर्मेश्वरार्पणंकुर्यादिति॥ ॥छ॥ ॥इतिश्रीमन्नारा
यणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृतावयुतहोमः॥ ॥श्रीविश्वेश्वरायनमः॥

राम

॥ ॥ अथ लक्षहोमः ॥ मात्स्ये ॥ कथितो युतहोमोयं लक्षहोममतः शृणु । सर्वकामाप्तये यस्माल्ल-
क्षहोमं विदुर्बुधाः । अस्माद्दशगुणः प्रोक्तो लक्षहोमः स्वयंभुवा । आहुतीभिः प्रयत्नेन दक्षिणाभि-
स्तथैव च । अनेन गुडोदनादि नैवेद्येन । द्विहस्तविस्तृतं तद्वच्चतुर्हस्तायतं तथा । लक्षहोमे भवेत्कु-
ण्डं योनिवक्त्रं त्रिमेखलं । चतुर्हस्तायतभित्तिपक्षांतरं । चिरदाहियवादि विषयी । अन्ये तु क्षेत्रफ-
लोक्तिरियं । द्विहस्तकरण्यां हि चतुर्हस्तं क्षेत्रं भवति । तेनैकएव पक्षइत्याहुः । अत्र ऋत्विजो बहत्प-
राशरेणोक्ताः । युग्मास्तु ऋत्विजः कार्या ब्राह्मणा ये विपश्चिताः । नित्यं जपपराश्चैव नियोज्या-
स्ते दश द्विजाः । कंदमूलफलाहारा दधिक्षीराशिनोपि वा । मात्स्ये । द्व्यंगुलोच्छ्रिता कार्या प्रथमा
मेखला बुधैः । त्र्यंगुलोच्छ्रिता तत्र द्वितीया समुदाहृता । उच्छ्रायविस्तराभ्यां च तृतीया चतुरंगु-
ला । चतुरंगुलविस्तारः पूर्वयोरपि दृश्यते । तस्य चोत्तरपूर्वेण वितस्तित्रयसंमितं । प्रागुदक्

प्रवणं तद्वच्चतुरस्रं समंततः। विष्कंभार्द्धोच्छ्रितं प्रोक्तं स्थंडिलं विश्वकर्मणा। अष्टादशांगुलोच्छ्रभि
त्यर्थः। संस्थापनाय देवानां वप्रत्रयसमावृतं। द्व्यंगुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः। अंगुलोच्छ्रा
यकं प्रोक्तं वप्रद्वयमथोपरि। तस्मिन्नावाहयेद्देवान्पूर्ववच्छुक्लतंडुलैः। आदित्याभिमुखाः सर्वे
साधिप्रत्यधिदेवताः। स्थापनीयाः प्रयत्नेन नोत्तरेण पराङ्मुखाः। ग्रहमध्ये गरुत्मतादिदेवा
स्थाप्या इति हेमाद्रिः। गरुत्मानधिकस्तत्र संस्थाप्यः श्रियमिच्छता। स च सर्वांतिवेद्यां पूर्वभागे स्था
प्यः। अंते तु बादरायण इति न्यायात्। तस्यावाहने मंत्रः। सामभिः शोषदेहस्त्वं वाहनं परमेष्ठिनः।
विषपापहरो नित्यमतः शां॰। विषापहरण इति वा पाठः। पूर्ववत्कुंभमामंत्र्य तद्धोमं समाचरे
त्। सहस्राणां शतं कृत्वा समित्संख्याधिकं पुनः। पूर्ववत्समिदाज्यचरून्हुत्वा। सुपर्णोसिग राम
रुत्मानिति गरुडहोमं कृत्वा तच्छेषसमस्ताभिरेकैकत्यैव समस्तव्याहृतिभिर्लक्षहोमं कुर्यादित्यर्थः। ३७।

हेमाद्रौभविष्योत्तरेपि। भूर्भुवःस्वस्तथाहोंस्वाहोहोमःसर्वेविधौयतइति। घृतकुंभवसोर्धा
रांपातयेद्नलोपरि। औदुंबरीमथार्द्रांचपर्णशाखाविवर्जितां। बाहुमात्रांस्रुचंकृत्वाततस्तंभ
द्वयोपरि। बाहोर्मात्रापरस्याः। हस्तद्वयांतरालदीर्घेत्यर्थः। कुंभमूलेयवमात्रंछिद्रंकार्यमित्य
क्तंहेमाद्रौ। घृतधारांततःसम्यक्अग्नेरुपरिपातयेत्। श्रावयेत्सूक्तमाग्नेयंवैष्णवंरौद्रमैंदवं।
महावैश्वानरंसामज्येष्ठसामचपाठयेत्। अग्निमीळेनवानांमधुछंदाअग्निर्गायत्री॥ विष्णो
र्नुकंषण्णांदीर्घतमाविष्णुस्त्रिष्टुप्। आतेपितःपंचदशानांगृत्समदोरुद्रस्त्रिष्टुप्। स्वादिष्ठया
दशानांमधुछंदाःसोमोगायत्री। महावैश्वानरसाम्नःवैश्वानरऋषिर्देवताचजगतीबृहती
वाछंदः। मूर्धानंदिवइतिज्येष्ठसाम्नोभरद्वाजोवैश्वानरस्त्रिष्टुप्। स्नानेचयजमानस्यपूर्ववत्स्व
स्तिवाचनं। दातव्यायजमानेनपूर्ववद्दक्षिणाःपृथक्। पूर्ववत्सुरास्त्वेत्यादिमंत्रपाठंकुर्यादि

शांति॰

त्यर्थः। नवग्रहमखे विप्राश्चत्वारो वेदवादिनः। अथवा ऋत्विजो शांतौ द्वावेव श्रुतिवादिनौ। कार्या
वयुतहोमे तु न घसंज्ञे न विस्तरे। तद्दश द्वादश चाष्टौ वा लक्षहोमे पि ऋत्विजः। कर्त्तव्याः शक्तितस्त
द्वश्चत्वारो वा विमत्सराः। नवग्रहमखात्सर्वे लक्षहोमे दशोत्तरं। दत्वाद्यान्मुनिश्रेष्ठ भूषणा
न्यपि शक्तितः। आसनानि सवस्त्राणि हैमानि कटकानि च। करांगुलीपवित्राणि कटिसूत्रा
णि शक्तितः। अन्नदानं यथाशक्त्या कर्त्तव्यं भूतिमिच्छता। अन्नहीनः कृतो यस्माद्दुर्भिक्षभयदो
भवेत्। अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः। कर्त्तारं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः। न
वाल्पल्पधनः कुर्याल्लक्षहोमं नरः क्वचित्। तस्मात्पीडाकरो नित्ययए व भवति ग्रहः। तमेव पू
जयेद्भक्त्या होत्रीन्वा यथाविधि। एकमप्यर्चयेद्भक्त्या ब्राह्मणं वेदपारगं। दक्षिणाभिः प्रय राम
त्नेन न बहूनल्पवित्तवान्। लक्षहोमस्तु कर्त्तव्यो यदा वित्तं भवेद्गृहे। यतः सर्वानवाप्नोति कुर्वं ॥३८॥

न्कामान्विधानतः। आहुतेरेकः शालेसहस्रेवेकोविप्रइत्यर्थः। फलंतु। पूज्यतेशिवलोकेचवस्वा
दित्यमरुद्गणैः। यावत्कल्पशतान्यष्टावथमोक्षमवाप्नुयात्। सकामोयस्त्विमंकुर्याल्लक्षहोमं
यथाविधि। सर्वान्कामानवाप्नोतिपदंचानंत्यमश्नुते। पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनं।
भार्यार्थीलभतेभार्यांकुमारीचशुभंपतिं। भ्रष्टराज्यस्तथाराज्यंश्रीकामःश्रियमाप्नुयात्। यं
यंप्रार्थयतेकामंतंतंप्राप्नोतिपुष्कलं। निष्कामःकुरुतेयस्तुपरंब्रह्माधिगच्छति॥ ॥इतिल
क्षहोमः॥ ॥अथकोटिहोमः॥ ॥मात्स्ये॥ अस्माच्छतगुणःप्रोक्तःकोटिहोमःस्वयंस्रुवा।
आहुतीभिःप्रयत्नेनदक्षिणाभिःफलेनच। पूर्ववद्ग्रहदेवानामावाहनविसर्जने। होमेमंत्रास्त
एवोक्ताःस्नानेदानेतथैवच। कुंडमंडपवेदीनांविशेषोयंनिबोधमे। कोटिहोमेचतुर्हस्तंचतुरस्रं
समंततः। योनिवक्त्रद्वयोपेतंतदप्याहुस्त्रिमेखलं। एकंयोनिवक्त्रंपश्चिमेऽपरंदक्षिणेइति

शांति०

हेमाद्रौमदनरत्नेचोक्तंवेदिश्चकोटिहोमेस्याद्धितस्तीनांचतुष्टयं।चतुरस्त्रासमंताद्धित्रिभिर्वप्रैः
समावृता।वप्रप्रमाणंप्रवोक्तंवेदिकायास्तयोबुधः।यत्तुभविष्ये।कुंडस्यपूर्वभागेतुवेदिंकुर्या
द्विचक्षणः।चतुर्हस्तांसमांचैवहस्तमात्रोच्छ्रितांनपेति।तत्क्षेत्रफलपरं।तथाषोडशहस्तःस्यान्मं
डपश्चचतुर्मुखः।पूर्वद्वारेचसंस्थाप्यबह्वृचंवेदपारगं।यजुर्वेदविदंयाम्येपश्चिमेसामवेदिनं।
अथर्ववेदिनंतद्वदुत्तरेस्थापयेद्बुधः।अष्टौतुहोमकाःकार्याविद्वद्वेदांगवेदिनः।एवंद्वादशतान्वि
प्रान्वस्त्रमाल्यानुलेपनैः।पूर्वनिःसृज्यपेद्भक्त्यासर्वाभरणभूषणैः।रात्रिसूक्तंचरौद्रंचपावमा
नंसुमंगलं।पूर्वतोवह्वृचःशांतिंपठन्नास्तउदङ्मुखः।शाक्तंसौम्यंचरौद्रंचकूष्मांडंशांतिमेवच।
पाठयेद्दक्षिणद्वारियजुर्वेदिनमुत्तमं।सौपर्णमथवैराजमाग्नेयंरुद्रसंहितांज्येष्ठसामतथा
शांतिंछंदोगःपश्चिमेपठेत्।शांतिसूक्तंचसौरंचतथाशाकुनिकंशुभं।पौष्टिकंचतथाराज

राम

॥३५॥

न्नुत्तरेणाप्यथर्ववित्॥ हिमाद्रौ॥ भविष्योत्तरे। पूजयित्वा प्रयत्नेन ब्राह्मणं वेदपारगं। वस्त्रा
श्चभूषणैश्चैव गंधमाल्यानुलेपनैः। प्रणम्य विधिवत्तस्मा आत्मानं विनिवेदयेत्। त्वन्नो गतिः
पिता माता त्वं गतिस्त्वं परायणं। त्वत्प्रसादेन विप्रर्षे सर्वं मे स्यान्मनोगतं। आपाद्विमोक्षाय च मे
कुरु यज्ञमनुत्तमं। कोटिहोमार्थमतुलं शांत्यर्थं सर्वकामिकं। वेधां देवानाह। ब्रह्माणं पूर्वभागे तु
मध्ये देवं जनार्दनं। पश्चिमे तु तथा रुद्रं सनुमुत्तरतस्तथा। स्कंदं। वसूनिति वा पाठः। ईशान्यां
च ग्रहान्सर्वानाग्नेय्यां मरुतस्तथा। वायुं सौम्यां तथैशान्यां लोकपालान्क्रमेण तु। आदित्या
वसवो रुद्रा इति सार्धश्लोकद्वयं अयुतहोमेऽत्र कं। भविष्योत्तरे। पूर्णे पूर्णे सहस्रे तु दद्यात्पूर्णा
हुतिं शुभां। पूर्णाहुत्यः समाख्याताः कोटिहोमे नराधिप। सहस्राणि नृपश्रेष्ठ दश शतास्त्रवि
शारदैः। पंचभिः सप्तभिर्वापि होमः कार्योऽत्र पूर्ववत्। भविष्योत्तरे॥ चिंतयेत्तत्र देवेशं पं

चास्यंनृपपावकं।मुखानितस्यचत्वारिसप्तजिह्वानिपार्थिव।एकजिह्वमथैकंतुतस्मात्तंसर्वका
मिकं।पुण्याहजपघोषेणहोमकर्मसमारभेत्।तिलाःकृष्णाघृताभ्यक्ताःकिंचिद्यवसमन्विताः।
होमोव्याहृतिभिश्चैवसर्वस्तत्रविधीयते।पूर्वद्वारेइति।जापकाउक्ताः।द्वारपालास्तुभिन्नाइति
हेमाद्रिः।पंचभिःसप्तभिरितिद्वादशहोमकाः।वाशब्दोष्टापेक्षयामात्स्येएवषोडशाप्युक्ताः।
तत्रापिऋत्विजःकार्यारविनंदनषोडश।सर्वहोमेषुराजर्षेदयाविंत्तेषुपावनाइति।हेमाद्रौतु
विंशतिश्चतुर्विंशतिर्द्वात्रिंशच्चतुःषष्टिःशतंवाहोतारइत्युक्तं।भविष्योत्तरेपि।नियोजयेद्द्विजां
स्तत्रशतसंख्यान्नृपोत्तम।अलाभेतुबहूनांचयथालाभंनियोजयेत्।विद्यारूढांस्तपोवृद्धान्
गृहस्थान्धार्मिकान्छुचीन्।नसंख्यानियमश्चात्रब्राह्मणानांनरोत्तम।नकालनियमश्चात्रस्वे राम
च्छयायश्चउच्यते।।भविष्ये।।अग्न्यादिभिश्चतन्मंत्रैःस्वाहाकारांतयोजितैः।जुहुयात्सर्वदे ।।५०।।

वानांवेधांयेचोपकल्पिताः। स्नानेदानेचमंत्राःस्युस्तएवमुनिसत्तम। वसोर्धाराविधानंचल
क्षहोमवदिष्यते। अनेनविधिनायस्तुकोटिहोमंसमाचरेत्। सर्वान्कामानवाप्नोतिततोवि
ष्णुपदंव्रजेत्। अश्वमेधसहस्राणिदशचाष्टौचधर्मवित्। कृत्वायत्फलमाप्नोतिकोटिहोमा
त्तदश्नुते। ब्रह्महत्यासहस्राणिभ्रूणहत्यार्बुदानिच। नश्यंतिकोटिहोमेनयथावद्विधिभा
षितं॥ ॥इतिमात्स्येकोटिहोमः॥ ॥अथलक्षहोमादौहेमाद्रिमदनरत्नयोर्नृसिंहपुरा
णोविशेषः। दुःस्वप्नदर्शनेघोरेग्रहपीडासुचात्मनः। हसंतींप्रतिमांचैवज्वलंतींचविशेषतः।
प्रस्वेदयुक्तांप्रतिमांदृष्ट्वाचनृपनंदन। तथामहाज्वरग्रस्तेधारांदेवस्यमूर्धनि। सततंनरसिं
हस्यकुर्याद्धाकारयेद्बुधैः। अयनेविषुवेचैवचंद्रसूर्यग्रहेतथा। नरसिंहंसमाराध्यलक्षहो
मंचकारयेत्। अनावृष्टिमहामारीज्वररोगभयेतथा। नरसिंहंसमाराध्यब्राह्मणैर्वेदपा

रगैः। कारयेल्लक्षहोमं तु ग्रामपश्च नराधिपः। दृष्टोपसर्गमरणं प्रजानामात्मनश्च हि। सम्यगारा
ध्ययत्नेन नरसिंहस्य मंदिरे। शंकरायतने वापि कोटिहोमं समाचरेत्। प्रमाणं बाहुमात्रं तु सर्वतः
कुंडलक्षणं। ब्रह्मचारी व्रते युक्तस्त्रिरात्रं तु विशेषतः। अहोरात्रमुपोष्याथ गायत्री मयुतं जपेत्॥ नि
राहारश्च शुचयस्ते सर्वे संयतेंद्रियाः। आरभेयुस्ततो यज्ञं स्ततो होममतंद्रिताः। यवधान्यतिलैर्मिश्रै
र्गायत्र्या प्रथमं कृतं। जुहुयादेकचित्तेन स्वाहाकारान्वितं बुधः। ततो व्याहृतिः पश्चाज्जुहुयात्तु
तिलादिकं। यावत्संपूर्यते संख्या लक्षं वा कोटिरेव च। समस्तव्याहृतिभिरित्यर्थः। तावद्दिने दिने
कुर्याद्विष्णुमार्चनपूर्वकं। तावच्च भोजनं दद्याद्यावद्धोमं समाचरेत्। समाप्ते दक्षिणां दद्यात्ततः
प्रोक्ष्योदकेन च। एवं कृते तु ग्रामस्य राष्ट्रो जनपदस्य च। सर्वबाधाप्रशमनी शांतिर्भवति स
र्वदा॥ अथ गायत्र्या घ्ययुतहोमः॥ हेमाद्रौ मदनरत्ने च देवीपुराणे॥ षडस्रं लक्षणोपेतं वै

द्दूर्यंकारयेच्छिवं। हेमपीतस्तुशोभाद्यंचंद्रार्कौतत्रमातरः। चर्चिकाद्याः प्रकर्त्तव्याः पूर्वादिपरि
कल्पिताः। ग्रहाणांप्रागवस्तूनां मुख्यकाह॥ लक्षहोमः प्रकर्त्तव्यः सर्वपीडानिवारणः। गायत्र्या
ग्रहमंत्रैश्च कूष्मांडैर्जातवेदसे। ऐंद्रवारुणवायव्यैर्वाथुयाम्यैः सवैष्णवैः। होमः शतसहस्र
स्तुअत्रोत्कृष्टो विधीयते। अत्रमंत्रविभागंतु ब्रह्मपराशरोक्तं वक्ष्यामः। सर्वपीडाविनाशाय
कोटिहोमः शुभावहः। यवव्रीहिघृतक्षीरतिलाः कंगुप्रसारिकाः। पंकजोशीरविल्वाम्रदलाहो
मेप्रकीर्त्तिताः। तत्रैवब्रह्मोवाच॥ लक्षहोमंप्रवक्ष्यामियथाप्रोक्तंतुशंभुना। भूमिकंपेदिशो
दाहेग्रहयुद्धउपस्थिते। केतुसंदर्शनेचैवआदित्यस्यचकंपने। कृष्णवर्णेथवासूर्येतथाछिद्रस
मन्विते। रक्तवृष्टिस्तथानद्योविपरीताभवंतिच। निर्गतंगगनाद्धूमंवारिमध्येग्निसंस्थितिः।
यस्यराशौग्रहाःपंचषट्सप्तचसुराधिप। ग्रहणंचंद्रसूर्यस्यग्रहैर्वेष्टिमसंस्थितैः। सूर्यस्या

भ्यर्चनं कार्यं शिवस्याशुभनाशनं। लक्षहोमं महाहोमं कोटिहोमं पुरोदितं। गोभूहिरण्यवस्त्रा
न्नतिलदानं शुभावहं। [illegible] पायसं दधि सौराज्यं देयं नैवेद्यमुत्तमं। एकलिंगे
प्रकर्त्तव्यमथो विप्रगृहेषु च। दशादशाहिनमेकलिंगं। बाहुमात्रे ततः कुंडे जंघामात्रेथ वा पु
नः। होतव्यं सुरराजेंद्र नान्येषु विधिरीदृशः। अहं ते कथयिष्यामि लक्षहोमस्य यो विधिः। चतुर्हस्तं
तथा कुंडं विस्तारं सुरसत्तम। षोडशांगुलविस्तारमुच्छ्राये षोडशांगुलं। चतुरंगुलं सवेदोष्ठं चतु
र्हस्तस्य कीर्त्तितं। द्वादशांगुलविस्ताराद्दैर्घ्याद्द्विगुणविस्तरा। योनिः कुंडे प्रकर्त्तव्या नाधिका
शस्यते क्वचित्। यवव्रीहिघृतं क्षीरं तिलाः कंगुर्दलानि च। हूतस्य सुरराजेंद्र पालाश्यः समिधः
स्तथा। दूर्वाः कुशाः शमी ज्येष्ठा औदुंबर्यः शुभावहाः। गायत्री त्र्यंबकं वापि शंभवायेत्यथापि
च। जातवेदसमंत्रेण महाइंद्रेण चैव हि। सहस्रशीर्षेण नमो हिरण्येनेत्यथापि हि। रुद्रमं

त्रैस्तथा सौरैः पंचरात्रागमोदितैः। होतव्यं शतमष्टौ तु सहस्रमथ संख्यया। पंकजोत्पलबिल्वा
दि होमद्रव्यं शुभावहं। कंपनं स्वेदनं गात्रे अश्रुपातोर्थजल्पनं। देवतानां सुराध्यक्ष उत्पाताः क्षय
कारकाः। लक्षहोमं प्रकुर्वीत कोटिहोममथापि वा। गोदोहे रुद्रसवने महास्नाने शुभावहं। अन्य
था नरको घोरो जायते राजविभ्रमः। ये देवास्ते ग्रहाः सर्वे ये ग्रहास्ते तु जंगमाः। तेषां संपूजनान्नि
त्यं दीर्घायुः पुरुषो भवेत्॥ इति गायत्र्याद्ययुतादिहोमः॥ ॥ अथ लक्षहोमे कोटिहोमे च बहुस्व
रा शारोक्तो विशेषः। युग्माश्च ऋत्विजः कार्या ब्राह्मणाश्च विपश्चितः। नियमव्रतसंपन्नाः सहि
ताः पार्थिवेन तु। नित्यं जपपराश्चैव नियोज्यास्ते दशद्विजाः। कंदमूलफलाहारा दधिक्षीराशिनो
पि वा। अग्निं सोमं च सूर्यं च विष्णुं चैव प्रजापतिं। विश्वेदेवान्महींद्रं च मित्रं स्विष्टकृतं तथा। दधि
मधुघृताभ्यक्तैः समिधश्चैव यज्ञियाः। होमयेच्छतसाहस्रं मंत्रैश्चैव यथाक्रमं। चतुर्विंश

तिगायत्र्यामानस्तोकेतिषट् तथा। त्रिंशद्गृहादिमंत्रैश्च चत्वारि विष्णुदैवतैः। कूष्मांडैर्जुहुया
त्पंचविंशिकयातु षोडश। जुहुयाद्दशसहस्राणि जातवेदसऋचा। पंचैवतुसहस्राणि जुहुयादिंद्र
दैवतैः॥ तथा॥ कोटिहोमेचतुर्हस्तं चतुरस्रायतंपुनः। योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलं
लं। वेदी चकोटिहोमस्यहस्तानांचचतुष्टयं। चतुरस्रासमा तद्वत्त्रिभिर्वप्रैः समावृता। वेदच
तुष्टयस्थान् चतुरोद्वारपालानुदाहृ। अष्टौतुहोमकाः कार्यावेद वेदांगवेदिनः। एवंद्वादश
ते पूज्यागंधमाल्यानुलेपनैः। अन्यत्तत्राग्वत्॥ कोटिहोमेविशेषो भविष्योत्तरे॥ ॥ संवर
णउवाच। भगवन्महदुत्पातसंभवेभूप्रकंपने। निर्घातैः पांसुवर्षेण ग्रहभंगे तथैव चा ज
न्मनक्षत्रपीडासुअनावृष्टिभयेषु च। क्रूरासु ग्रहपीडासु दुर्भिक्षेदेशविप्लवे। व्याधीनां संभवे राम
जातेशरीरेचातिपीडिते। क्लेशेमहति चोत्पन्ने किंकर्त्तव्यं नरोत्तमैः। स्वर्गस्यसाधनं यच्च कीर्त्ति ॥४२॥

ंधनदंतथा।प्रब्रूहिमेद्विजश्रेष्ठतथारोग्यप्रदंनृणां॥सनत्कुमारउवाच॥शृणुराजन्प्रवक्ष्या
मिशांतिकर्मतथो त्तमं।कोटिहोमाख्यमतुलंसर्वकामफलप्रदं।ब्रह्महत्यादिपापानियेन
नश्यंतितत्क्षणात्।उत्पाताःप्रशमंयांतिमहत्संपद्यतेसुखं।विधानंतस्यवक्ष्यामिशृणुष्वेक
मनाःस्वप।देवागारेचसवनेतीर्थेवाशिवसन्निधौ।पर्वतेवाप्रकुर्वीतयदिच्छेत्क्षेममात्मनः॥
शुभेनक्षत्रयोगेचवारेसर्वगुणान्विते।यजमानस्यानुकूलेकोटिहोमंसमारभेत्।पूजयि
त्वाप्रयत्नेनब्राह्मणंवेदपारगं।वस्त्रैश्चभूषणैश्चैवगंधमाल्यानुलेपनैः।प्रणम्यविधिवत्तस्मै
आत्मानंविनिवेदयेत्।त्वंमेगतिःपितामातात्वंगतिस्त्वंपरायणं।त्वत्प्रसादेनविप्रर्षेसर्वं
मेस्यान्मनोगतं।आपद्विमोक्षायचमेकुरुयज्ञमनुत्तमं।कोटिहोमार्थमतुलंशांत्यर्थंसा
र्वकामिकं।पुरोहितस्ततःप्राज्ञःशुक्लांबरधरःशुचिः।ब्राह्मणैःसहितःपुण्यैःसंयतैःसुस

माहितैः। भूमिभागे समे शुद्धे प्रागुदक्प्रवणे तथा। पुण्याहं वाचयेत्पुण्यं हुत्वा विप्रान्सुभूजि
तान्। ततस्तु सहितो विप्रैः सूत्रयेन्मंडपं शुभं। उत्तमं शतहस्तं तु तदर्धेन तु मध्यमं। जघन्यं तु तदर्धे
न शक्तिकालाद्यपेक्षया। मध्ये तु मंडपस्याथ कुंडं कुर्याद्विचक्षणः। चतुर्हस्तप्रमाणेन आयामेन
तथैव च। मेखलात्रितयं तस्य द्वादशांगुलविस्तृतं। तत्प्रमाणं तथा योनिं कुर्वीत सुसमाहितः।
कुंभस्य पूर्वभागे तु वेदिं कुर्याद्विचक्षणः। चतुर्हस्तां समां चैव हस्तमात्रोछ्रितां नृप। स्थापनं तत्र देवा
नां कुर्याद्यत्नेन बुद्धिमान्। उपलिप्य ततो भूमिं मंडपस्य समंततः। विन्यसेत्कलशांस्तत्र जलपूर्णां
श्चतुर्दिशि। अश्वत्थप्लक्षचूताद्यैः पल्लवैरुपशोभितान्। वितानमुपरिष्टाच्च मंडपस्य प्रकल्पयेत्।
स्थापयेद्दिक्षु सर्वासु तोरणानि विचक्षणः। एवं संभृतसंभारः पुरोधाः सुसमाहितः। पुण्या
हजपघोषेण होमकर्म समारभेत्। स्थापयित्वासुरान्वेधां वक्ष्यमाणान्नरिंदम। ब्रह्माणं पूर्वभा

गेतुमध्येदेवंजनार्द्दनं।पश्चिमेतुतथारुद्रंवसूंस्तुनैरतस्तथा।ऐशान्यांचग्रहान्सर्वानाग्नेय्यां
मरुतस्तथा।वायुसौम्यांतथेशान्यांलोकपालान्क्रमेणतु।एवंसंस्थाप्यविबुधान्यथास्थानंनृ
पोत्तम।पूजयेद्विविधवस्त्रगंधमाल्यानुलेपनैः।विरोक्तमंत्रैस्तल्लिंगैःपुराणोक्तैःपृथक्पृथक्।आ
दित्यावसवोरुद्रामरुतोलोकपास्तथा।ब्रह्माजनार्दनश्चैवशूलपाणिर्भगोक्षहा।अत्रसन्निहि
ताःसर्वेभवंतुमखभागिनः।पूजांगृह्णंतुसर्वत्रमयाभक्त्योपपादितां।कुर्वंतुचशुभंसर्वेय
ज्ञकर्तुःसमाहिताः।एवंसंपूजयित्वातान्देवान्यत्नेनशुद्धधीः।नैवेद्यैर्विविधैर्भक्ष्यैःफलैरूपै
स्तथैवच।ततस्तुतैर्द्विजैःसार्द्धंकुंडस्यविधिपूर्वकं।कुर्यात्संस्कारकरणंयथोक्तंवेदचिंतकः।
ततःप्रज्वालयेद्वह्निंनामाख्यातंघृतार्चिषं।नियोजयेद्द्विजां स्तत्रशतसंख्यान्नृपोत्तम।
अलाभेतुबहूनांचयथालाभंनियोजयेत्।विद्यावृद्धांस्तपोवृद्धान्गृहस्थान्संयतेंद्रियान्॥

चिंतयेत्तत्रदेवेशंपंचास्यंनृपपावकं।मुखानितस्यचत्वारिसप्तजिह्वानिपार्थिव।एकजिह्वमयै
कंतुतस्मात्तंसर्वकामिकं।ऋग्भिःपूर्वमुखेहोमोयजुर्भिश्चोत्तरामुखेः।सामभिःपश्चिमैःका
र्यौथर्वभिर्दक्षिणामुखेः।ऋग्भिऋग्वेदिभिः।प्रणवादिभिश्चलल्लिंगैःस्वाहाकारांतयोजितैः॥
जुहुयात्सर्वदेवानांवेषांयेचोपकल्पिताः।होमोव्याहृतिभिश्चैवसर्वस्तत्रविधीयते।व्याहृतीभि
रितिद्वंद्वापवादैकशेषोपादेयगतसाहित्यबहुत्वाविवक्षयाभूर्भुवःस्वःस्वाहेतिसमस्ताभि
रेवहोमोनव्यस्ताभिः।पूर्णेपूर्णेसहस्रेतुदद्यात्स्वर्णाहुतिंशुभं।पूर्णाहुत्यःसमाख्याताःको
टिहोमेनराधिप।सहस्राणिनृपश्रेष्ठदशशास्त्रविशारदैः।एवंप्रकल्पयेद्यज्ञंकोटिहोमाख्य
मुत्तमं।तिलाःकृष्णायवाभ्यक्ताःकिंचिद्व्रीहिसमन्विताः।होमाख्याःकोटिहोमेतुसमिधस्तुपला
शजाः।दक्षिणाचसहस्रंधेनवःसहस्रशंखाइत्यादौनवशतंगावः।नवशतंसुवर्णा॥ ॥

सर्वेषामथवागावइतिपक्षे१

॥अथकोटिहोमस्यशतमुखद्विमुखैकमुखभेदाउच्यंते॥हेमाद्रौभविष्योत्तरेसंवरणउवाच।
बहुत्वात्कर्मणोब्रह्मन्कोटिहोमःसुदुष्करः।कालेनमहताचैवश क्यःप्राप्तंकथंचन।नियमा
ब्रह्मचर्याद्याद्दुष्कराद्इतिमेमतिः।निरोधोब्राह्मणानांचभूरिण्यादिःसुदुष्करः।कार्येगुरुलघी
यस्त्वपर्वकालाद्यपेक्षया।कोटिहोमस्यसंक्षेपंवदमेब्रह्मसंभव॥सनत्कुमारउ०।शतानननो
दशामुखोद्विमुखैकमुखस्तथा।चतुर्विधोमहाराजकोटिहोमोविधीयते।कार्पण्यगुरुतांज्ञा
त्वानेकध्नमथपर्वणः।पर्वग्रहणादि।यथासंक्षेपतःकार्यःकोटिहोमस्तथाशृणु।कृत्वाकुं
शतंदिव्यंयथोक्तंहस्तसंमितं।एकैकस्मिंस्तथाकुंडेदशविप्रान्नियोजयेत्।सद्यःपक्षेतुविप्रा
णांसहस्रंपरिकीर्त्तितं।प्रतिलक्षंदशोत्यर्थः।एकस्थानप्रणीतेग्नौसर्वतःपरिभाविते।होमं
कुर्युर्द्विजाःसर्वेकुंडेकुंडेयथोदितं।यथाकुंडबहुत्वेपिराजसूयेमहाक्रतौ।स्यादेवाग्निबहुत्वे

वनचयज्ञो विभिद्यते। तथा कुंडशतेप्यत्र घृतार्चिषि नियोजिते। एक एव समवेद्यज्ञः कोटिहोमो
न संशयः। एवं यः क्रियते क्षिप्रं थ्याकुलैः कार्यगौरवात्। शाता नृनः स विज्ञेयः कोटिहोमो न सं
शयः। अत्र कुंडानां हस्तमात्रता शीघ्रसाहित्यतादिपरा। तिलयवादौ लक्षे शतांशे। लक्षार्द्धे त्रि
करं कुंडं लक्षहोमे चतुःकरं। तथा। अयुते त्वथ होतव्ये कुंडं स्याद्धस्तमात्रकं। द्विगुणं लक्षहोमे च
कोटिहोमे चतुर्गुणमिति तंत्रांतरोक्तं ज्ञेयं। अत्र ऋत्विगाचार्यसहित इत्युक्तस्याचार्यस्य वि
शेषादुक्तेः सहस्रसंख्या ऋत्विजामेव॥ ॥इति शतमुखः॥ ॥स्वल्पैरहोभिः कार्यस्याद्वर्षा
कालादिके यदा। यदा दशमुखः कार्यः कोटिहोमो महीपते। विप्राणां द्वे शते तत्र वि भज्य वि
नियोजयेत्। अत्र कोटिदशांशो दशलक्षाण्येककुंडे इति। कुंडं पंचकरं प्रोक्तं दशलक्षा ऊतोक्त राम
मादित्युक्तं पंचहस्तकुंडानि प्रति कुंडं च ऋत्विजां विंशतिः सिध्यति। मंडपः पंचाशत्करः पंच

हस्तोवा॥ ॥इतिदशमुखः॥ ॥यत्रकुंडद्वयंकृत्वाविभज्यचविभायसं।होमंकुर्युर्द्विजाश्रयःसं
स्कृत्यविधिपूर्वकं।शतंतत्रनियोज्यंचविप्राणांप्रविभज्यवै।मासेथवार्द्धमासेयाकार्यकालेद्यु
पस्थिते।तदातुद्विमुखःकार्यःकोटिहोमोविचक्षणैः। [illegible]।
यदातुस्वेछयायज्ञंयजमानःसमापयेत्।कालेनबहुनाराजंस्तदाचैकमुखोभवेत्।एककुं
डस्थितोवह्निरेकवित्तैःसमाहितैः।नसंख्यानियमस्तत्रब्राह्मणानांनरोत्तम।नकालनियम
श्चैवस्वेछयायज्ञउच्यते।आवृत्याकर्त्तुकामस्यचातुर्मास्यादिकर्मवत्।सदाप्रसक्तःकर्त्त
व्योयज्ञोयंसार्वकालिकः।अयमेकमुखोराजन्कालेनबहुनाभवेत्।यतोविहितमायुश्च
वित्तंचैवास्थिरंसदा।अतःसंक्षेपतःकार्यंधर्मकार्यंप्रशस्यते।ततःसमाप्तेयज्ञेतुकारये
त्सुमहोत्सवं।शंखतूर्यनिनादेनब्रह्मघोषरवेणच।ततस्तुदक्षयेद्विप्रानृत्विजःश्रद्धयान्वि

तः। निष्कैश्च कंकणैश्चैव कुंडलैर्विविधैर्नृप। गोशतं चैव दातव्यमश्वानां च शतं तथा। सहस्रं च
सुवर्णानां सर्वेषामपि दापयेत्। ग्रामैर्गजैरथैरश्वैः पूजयेच्च पुरोहितं। ततश्चावभृथे स्नाया
त्तैर्घटैः पूर्वकल्पितैः। लक्षहोमोक्तमंत्रेण सर्वविजयकारिणा। एवं समापयेद्यस्तु कोटिहो
मम खंडशुभं। तस्यारोग्यं श्रियः पुत्रा आयुर्वृद्धिस्तथैव च। अनावृष्टिभयं चैव उत्पातभयमेव च।
दुर्भिक्षं ग्रहपीडा च प्रशमं याति भूतले। एतत्पुण्यं पापहरं सर्वकामफलप्रदं। सनकाख्येन मु
निना पार्थिवाय निवेदितं। सर्वोपसर्गशमनं सर्वरोगभयापहं कारयंति मनुजा नृप कोटि
ते होमं। भोगानवाप्य मनसोभिमतान्स्वकामं यांति शक्रसदनं सुविशुद्धसत्वाः। केचित्काम
गजादेः पुरोहितस्य चान्यत्रासंभवाद्गुरोपि प्रकारान्तराजधिकारिकानाहुः॥ पितृचर
णास्तु फलवाक्यमनुजोक्तेरन्यस्यापि वधूधनत्वे राजदत्तग्रामादिहाने वाधिकारः। पुरो

णा २

हितशब्दस्तु गुरवे ग्रामरत्नानीतिवदाचार्येष्वुपपन्न इत्याहुः। अत्र उत्तमं शतहस्तं तु तदर्धे
न तु मध्यमं। जघन्यं तु तदर्धेन देशकालाद्यपेक्षयेति भविष्योत्तरोक्तो मंडपो ज्ञेयः। तत्र शतहस्ते
बहिः पंचहस्तान्मध्ये स्तंभचतुष्कमष्टहस्तं दशहस्तं वा दत्वा मध्ये दशदशहस्तोपरि मध्यस्तंभ
समानस्तंभान्दत्वोपरि तिर्यक्काष्ठानि दत्वा सर्वमध्यचतुष्कोपर्युच्चं कुर्यात्। अस्याशास्त्रीय
त्वेपि सौकर्यार्थत्वात्। ततः प्रागुदक्सूत्रे दशधा विभज्य दशभागपराण्युदंचिसूत्राणि द
द्यात्। तेन दशहस्ताः शतं कोष्ठा भवंति। तेषां मध्यं प्रसाध्य द्विहस्तकर्णिकानि चतुरस्राणि प
द्मानि संभिन्नानि वा शतं कुंडानि कुर्यात्। तेन दशकुंडा दशवीथ्यो भवंति। अत्रैकादशान्याये
न दशभेदाद्धारणप्राधान्यिक दक्षिणोत्तरविहारवत्तद्देशस्थान्येवांगानि तद्देशस्थप्रधानस्यो
पकुर्वंतीति भूसंस्काराद्याज्यभागांतमिध्माबर्हिःस्रुक्स्रुवप्रणीताचरुश्रपणादिभेदेन

पृथक्कुर्यात्‌ः एकस्थानप्रणीतेग्नावित्युक्तेराद्यपक्षेवाद्यकुंडेगृह्यंलौकिकंवाग्निंनिधायान्ये
षुप्रणयेत्‌। स्विष्टकृत्पूर्णाहुतिवसोर्धाराद्यपिपृथगेवसर्वतोमुखयज्ञवत्‌। तत्राध्वर्युभेदात्‌
कर्तृभेदः। अत्रतुतदैक्यमितिविशेषः॥ ॥इतिकमलाकरभट्टकृतेभविष्योत्तरेशतमुखादिको
टिहोमः॥ ॥अथप्रयोगपारिजातेबह्वृचपरिशिष्टोक्तग्रहयज्ञप्रयोगः॥ ॥सनित्योनैमित्तिकःका
म्यश्च। अयनोपरागादावाद्यः। कर्मारंभेद्वितीयः। फलार्थंकाम्यः। काम्येमंडपादिनिमित्तं। नित्यंनैमि
त्तिकंहित्वासर्वमन्यत्समंडपमितिमात्स्योक्तेः। तदभावेकूटमंडपः। मंडपकूटमेववेतिलैंगोक्तेः॥
आश्वलायनः॥ रूपवर्णायुधस्थानमंडलासनवाहनान्‌। समित्कुंडोपहारांश्चपुष्परत्नाकृतीरपि॥ गा
यत्रीमूलमंत्रांश्चनमोमंत्रांश्चकेवलान्‌। अधिप्रत्यधिदेवानांमंत्रांश्चर्ष्यादिसंयुतान्‌। तत्रसूक्तंश्च

राम

ज्ञानीयाद्दोषान्सर्वान्नवग्रहान्‌। अज्ञात्वैवप्रमानिष्टानफलंनैवविंदति। यद्यपिनित्यंनैमित्तिकंहि

मं स्थंडिले वा समाचरेत् इति शारदोक्तेः ॥ काम्ये कुंडं नियतं तथापि कुंडे वा स्थंडिले पि वेत्याचार्यो
क्तेः स्थंडिले पि ॥ कर्त्ता देशकालौ संकीर्त्य मुककामो ग्रहानुकूल्यसिध्यर्थं वा श्रीपरमेश्वरप्रीत्य
र्थं ग्रहयज्ञं करिष्ये इति संकल्प्य गणेशपूजा पुण्याहवाचनं नांदीश्राद्धानि कृत्वा चार्यं षोडशर्त्वी
र्वा त्विजो वृत्वार्चयेत् ॥ ततआचार्यः आचम्य संकल्प्य हस्तमात्रायां चतुस्त्रिंशदंगुलायां च तु
लस्त्रिवप्रायां वेद्यां तंडुलैः सकर्णिकमष्टदलं कृत्वा सूर्यस्य रक्ताक्षतैः सोमस्य शुक्लासितैर्बुधस्य
हरिताक्षतैर्बृहस्पतेः पीताक्षतैः शुक्रस्य शुक्लाक्षतैः शनैश्वरस्य राहोः कृष्णाक्षतैः केतो ध्वचि
त्राक्षतैरित्येवं ग्रहवर्णाक्षतैर्ग्रहमंडलानि कृत्वोदीच्यां श्वेतं पद्मं कृत्वा तत्र मह्योर्द्यौरिति भूमिं स्पृ
ष्ट्वौषधयः सम्मितियवान् आकलशेष्विति कुंभं निधाय इमं मे गंगे सिंधुश्चित्रे य्यमे धोनदीजगती ॥
इति जलेनापूर्य वस्त्रयुग्मसूत्रेण वाष्टयाश्वगजवल्मीकह्रदगोष्ठराजद्वारचतुष्पथमृदः ॥ उद्धृता

सिवराहेण कृष्णेन शतबाहुना। मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतमिति क्षिप्त्वा। स्रुवंतिभीमोरेणुः
सोमो जगती। इति वटाश्वत्थप्लक्षजंबूचूतत्वचः। प्रवोयज्ञेष्विति वसिष्ठो विश्वेदेवास्त्रिष्टुप्। इति तत्पल्ल
वान्। आप्यायस्व गोतमः सोमो गायत्री। इति क्षीरं। दधिक्राव्णो वामदेवो दधिक्रावानुष्टुप्। दधि। शुक्र
मसि ज्योतिरसीति घृतं। गंधद्वारामानं दश्रीरनुष्टुप्। गोमयं। गायत्र्या विश्वामित्रः सविता गायत्री॥
इति गोमूत्रं। सहिरण्यानि श्यावाश्वः सविता गायत्री। इति नवरत्नानि। याओषधीराथर्वणओषधयो
नुष्टुप् इति शतौषधानि। हेमामलानि तिहेमवा। गंधद्वारामिति गंधं च क्षिप्त्वा सर्वे समुद्राः सरितः०।
गंगे च यमुने चैव इमं मे गंगे इति। आपोहिष्ठा नवानां सिंधुद्वीप आपो गायत्री। पंचमी वर्द्धमाना
सप्तमी प्रतिष्ठा त्येके अनुष्टुभौ। न हि तिक्षत्रमित्येकविंशर्चस्य शुनःशेपो वरुणो दश त्रिष्टुभोंत्या
गायत्र्यः। स्वादिष्ठयेति दशानां मधुच्छंदाः पवमानसोमो गायत्री। इति कुंभमभिमंत्र्य स्वस्ति वा

यग्न्यानावाहयेत्॥ यथा॥ व्यस्तसमस्तव्याहृतीनां अत्रिभृगुभरद्वाजप्रजापतय ऋषयोग्निवा
युसूर्यप्रजापतयो देवताः॥ गायत्र्युष्णिगनुष्टुब्बृहत्यश्छंदांसि॥ ग्रहावाहने वि०॥ ॐ भूरादित्यमावा
हयामि॥ ॐ भुवरादित्यमावाहयामि॥ ॐ स्वरादित्यमावाहयामि॥ ॐ भूर्भुवःस्वरादित्यमावाह
यामि॥ ॐ आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप्॥ मंत्रांते भगवन्नादित्य ग्रहाधिपते काश्यप
गोत्र कलिंगदेशेश्वर जपापुष्पोपमांग घृतोद्भुज पद्माभय हस्त सिंदूर वर्णांबर माल्यानुलेप
नज्वलन्माणिक्य रवचित सर्वांगाभरण भास्कर तेजोनिधे त्रिलोकप्रकाशक त्रिदेवतापरमूर्ते
नमस्ते सप्ताश्वारूण ध्वजपताकोपशोभितेन सप्ताश्व रथवाहनेन मेरुं प्रदक्षिणी कुर्वन्नागच्छ
गिरुद्राभ्यां सह पद्मकर्णिकायां ताम्रप्रतिमायां प्राङ्मुखीं वर्तुलाकारां पीठे धितिष्ठ पूजार्थं त्वा
मावाहयामि॥ तद्दक्षिणे॥ ॐ भूरा॥ प्रत्यधिदेवमग्निमावाहयामि॥ ॐ भुवरा० मि॥ ॐ स्वरा० मि॥

ॐ भूर्भुवः स्वरा॰ मि। अग्निं का एवो मेधातिथिर ग्निर्गायत्री। मंत्रांते पिंगश्मश्रुकेशं पिंगाक्षं त्रिनयन
मरुणवर्णं छागस्थं साक्षसूत्रं सप्तार्चिषं शक्तिधरं वरदहस्तद्वयमादित्याधिदेवमग्निमावाहया
मि। तद्वामे। ॐ भूरादित्यप्रत्यधिदेवं रुद्रमावाहयामि। ॐ भुवरा॰ मि। ॐ स्वरा॰ मि। ॐ भूर्भुवः स्व
रा॰ मि। त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्। मंत्रांते त्रिलोचनं पंचवक्त्रं वृषारूढं कपालशूलखट्वांगधा
रिणं चंद्रमौलिं सदाशिवमादित्यप्रत्यधिदेवं रुद्रमा॰। तत आग्नेये। ॐ भूः सोममित्यादि।
आप्यायस्व गौतमः सोमो गायत्री। मंत्रांते भगवन्सोम द्विजाधिपते सुधामयशरीर राधिगो
त्रयमुनादेशेश्वर गोक्षीरधवलांग कांते द्विभुज गदाधर दानांकितकर शुक्लांबरमाल्यानुले
पन सर्वांगमुक्तमौक्तिकाभरणरमणीय समस्तलोकाप्यायक देवतास्वाद्य मूर्ते रत्नमस्तेस
न्नद्धधवलध्वजपताकोपशोभितेन दशाश्वेताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नाग

द्ध्रिरुमयाचसहस्रपभाग्नेयदलमध्येस्फटिकप्रतिमांप्रत्यङ्मुखींचतुरस्रपीठेधितिष्ठपूजा
र्थंत्वामावाहयामि।तद्दक्षिणेभार्गवध्याहृत्यनंतरं।अप्सुमेसिंधुद्वीपआपोगायत्री।मंत्रांतेस्त्री
रूपधारिणीः श्वेतवर्णामकरवाहनाःपाशकलशधारिणीमुक्ताभरणभूषिताःसोमाधिदेवताः
अपआवाहयामि।वामेध्याहृत्यनंतरं।गौरीर्मिमायदीर्घतमाउमाजगती।मंत्रांतेऽक्षसूत्रकम
लदर्पणकमंडलुधारिणींत्रिदशपूजितांसोमप्रत्यधिदेवतांगौरीमावाहयामि।दक्षिणेध्या
हृत्यनंतरं।अग्निर्मूर्द्धाविरूपोंगारकोगायत्री।मंत्रांतेभगवन्नंगारकाग्न्याकृतेभारद्वाजगो
त्रावंतिदेशेश्वरज्वलत्पुंजोपमांगद्युतेचतुर्भुजशक्तिशूलगदाखड्गांगधारिन्रक्तांबरमाल्या
नुलेपनप्रवालाभरणभूषितदुरालोकदीप्तेनमस्तेसन्नद्धरक्तध्वजपताकोपशोभितेनरक्त
मेषरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छभूमिस्कंदाभ्यांसहस्रपभ्रदलमध्येरक्तचंदनप्र

तिमां दक्षिणाभिमुखीं त्रिकोणमध्ये पूजार्थं तामा॰। दक्षिणेभ्याहृत्यनंतरं। स्योनामेधाति
थिर्भूमिर्गायत्री। मंत्रांश्रुक्लं वर्णं दिव्योभरणभूषितां चतुर्भुजां सौम्यवपुषं चं डांशुसदृशां
बरां रत्नपात्रस्वपात्रौषधिपात्रपद्मोपेतकरां चतुर्दिग्भागपृष्ठगतामंगारकाधिदेवतां भूमिमा॰।
व्याहृत्यनंतरं। कुमारश्चिक्षितरं गत्समदस्कंदस्त्रिष्टुप्। मंत्रां तेषण्मुखं शिखंडकविभूषणं
रक्तांबरविभूषणं मयूरवाहनं कुक्कुटघंटापताकाशक्त्युपेतचतुर्भुजमंगारकप्रत्यधिदेवतां
स्कंदमा॰। ऐशान्यां वाहृत्यनंतरं। उद्बुध्यध्वं बुधः सौम्यो बुधास्त्रिष्टुप्। मंत्रां ते सर्वज्ञो नमस्याऽ
त्रिगोत्रमगधदेशेश्वरं कुंकुमवर्णं गोयुतेरव्यूरवेटगदावरदानांकितकरपीतांबरमाल्यानुले
पनमरकताभरणानुलेपनालंकृतसर्वांगं विबुधपतेनमस्तेसन्नद्धपीतध्वजपताकोपशो
भितेन चतुःसिंहरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छविष्णुपुरुषाभ्यां सहपद्मेशानदल

मध्ये सुवर्णप्रतिमामुदङ्मुखीं बाणाकारपीठेधितिष्ठ पूजार्थं त्वामा॥ तद्वामेतरयोरीशं भूर्विष्णुमा॥ ॐ पुरुषमावाहयामीत्यावाह्येदं विष्णुर्मेधातिथिरग्निर्गायत्री। सहस्रशीर्षा नारायणः पुरुषोनुष्टुप्। मंत्रद्वयांते कौमोदकीपद्मशंखचक्रोपेत चतुर्भुजं सौम्याधिदेवतां विष्णुं प्रत्यधिदेवतां पुरुषं चावाहयामि। उत्तरदले व्याहृत्यनंतरं। बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप्। मंत्रांते भगवन्बृहस्पते समस्तदेवताचार्यांगिरसगोत्र सिंधुदेशेश्वर दीप्तसुवर्णसदृशांगदीप्ते चतुर्भुज दंडकमंडल्वक्षसूत्रवरदानांकितपीतांबरमाल्यानुलेपनपुष्परागमयाभरणरमणीयसमस्तविद्याधिपते नमस्ते पीतध्वजेन पीताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागछेंद्रब्रह्मभ्यां सह पश्चोत्तरदलमध्ये सुवर्णप्रतिमामुदङ्मुखीं दीर्घचतुरस्रपीठेधितिष्ठ पूजार्थं त्वामा॥ दक्षिणे व्याहृत्यनंतरं। इंद्रश्रेष्ठानि गृत्समद ऐंद्रस्त्रिष्टुप्:

मंत्रांते चतुर्दंतं गजारूढं वज्रांकुशधरं प्राचीपतिं नानाभरणभूषितं बृहस्पत्यधिदेवतामिं
द्रमा० वामे व्याहृत्यनंतरं। ब्रह्मणालेब्रह्मयुजा। विश्वामित्रो ब्रह्मा त्रिष्टुप्। मंत्रांते पद्मासनं जटि
लं चतुर्मुखमक्षमालास्रुवपुस्तककमंडलुधारिणं कृष्णाजिनवाससं पार्श्वस्थितहंसं बृहस्प
तिप्रत्यधिदेवतां ब्रह्माणमामा० पूर्वदले शुक्रं तेअन्यद्भरद्वाजः शुक्रस्त्रिष्टुप्। मंत्रांते भगवन्भा
र्गव समस्तदैत्यगुरो भार्गवगोत्र भोजकटदेशोद्भव रजतोज्वलांगकांते चतुर्भुजदंडकम
उश्वक्षसूत्रकरदानांकितशुक्लांबरमाल्यानुलेपनवज्राभरणभूषितसर्वांगसमस्तनी
तिशास्त्रनिपुणमते नमस्ते सन्नद्धशुक्लध्वजतेन शुक्लाश्वसहितेन रथेन मेरुं प्रदक्षिणी
कुर्वन्नागच्छेंद्राणींद्राभ्यां सह पद्मपूर्वदलमध्ये रजतप्रतिमां प्राङ्मुखीं पंचकोणपीठेऽधि
तिष्ठ पूजार्थं त्वामा० मि। नदक्षिणे व्याहृत्यनंतरं। इंद्राणी वृषाकपिरिंद्राणी पंक्तिः। मंत्रां

ते संतानमंजरीवरदानधर द्विजप्रभुऔभ्रुकाधिदेवताभिंद्राणीमा०।वामेव्याहृत्यंते इंद्रमिद्देवता
तयेमेधातिथिरिंद्रः प्रगाथो बृहती। मंत्रांते चतुर्दंतगजारूढवज्रांकुशधर शचीपतिं नाना
भरणभूषितं भार्गवप्रत्यधिदेवताभिंद्रमा०।पश्चिमदले व्याहृत्यंते।शमग्निरिरिंबिठिःश
निरुह्लिके।मंत्रांते भगवन्शनैश्चर भास्करतनय काश्यपगोत्र सुराष्ट्रदेशेश्वर कज्जलमानी
गकांते चतुर्भुज चापतूणीरकृपाणाभयांकितनीलांबरमाल्यानुलेपन नीलरत्नाभूषणालं
कृतसर्वांग समस्तभुवनपीषणामर्षमूर्तेनमस्तेसन्नद्धध्वजपताकोपशोभितेन नीलगृ
ध्ररथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ प्रजापति यमाभ्यां सह पश्चिमदलमध्ये कालाय
सप्रतिमां प्रत्यङ्मुखीं चापाकारपीठेऽधितिष्ठ पूजार्थं त्वामा०।मि।दक्षिणे व्याहृत्यंते।हिरण्य
गर्भः प्रजापतिस्त्रिष्टुप्।मंत्रांते यज्ञोपवीतिनं हंसस्थमेकवक्त्रं मालास्रुवपुस्तककमंडलु

सहितंचतुर्भुजंशनैश्चराधिदेवतांप्रजापतिप्रतिमां॰वामेव्याहृत्यंतेयमायसोमंयमोऽनुष्टप
मंत्रांतेईषसीतंदंडहस्तंस्कंधशांपाशधरंकृष्णवर्णंमहिषारूढंसर्वाभरणभूषितंशनैश्चरप्रत्य
धिदेवतीयममा॰नैरृत्यदलेव्याहृत्यंते।कयानोवामदेवोराजगायत्री।मंत्रांतेभगवन्राहो
रविसोममर्दनसिंहिकानंदनपैठीनसिगोत्रबर्बरकालमेघकृतेव्याघ्रवदनचतुर्भुजखड्ग
चर्मवरसनांकितकृष्णांबरमाल्यानुलेपनगोमेदिकाभरणभूषितसर्वांगशौर्यनिधेन
मस्तेसन्नद्धकृष्णध्वजपताकोपशोभितेनकृष्णसिंहरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नाग
छसर्पकृष्णकालाभ्यांसहपश्चनैरृत्यदलमध्येसीसकप्रतिमांदक्षिणाभिमुखीं॰शूर्पाकार
पीठेधितिष्ठप्रजार्थंत्वामा॰तद्दक्षिणेव्याहृत्यंते।आयंगौःसार्पराज्ञीसर्पागायत्री।मंत्रां
तेऽक्षसूत्रधरोत्कुंडलिकाकारपुच्छयुक्तानेकभोगांस्त्रिभोगान्भीषणान्नाकधिदेवता:

राम

॥५३॥

नीलां॰ गं॰ १

सर्पाना॰मि।वामे व्याहृत्यंते।परं मृत्योः संकुसुको मृत्युः त्रिष्टुप्।मंत्रांते करालवदनं भीषणं
पाशदंडधरं सर्पवृश्चिकरोमाणं राजन्यत्यधिदेवतां कालमा॰।वायव्यदले व्याहृत्यंते।केतुं
मधुच्छंदाः केतुर्गायत्री।मंत्रांते भगवन्केतो कामरूप जैमिनिगोत्र मध्यदेशेश्वर धूम्रवर्णध्व
जाहस्ते द्विभुज गदावरदानांकित चित्रांबरमाल्यानुलेपन वैडूर्यमयाभरणभूषित सर्वांग
चित्रशक्तेन मस्तेसन्नद्ध चित्रध्वजपताकोपशोभितेन चित्रकपोत चित्ररथवाहने नमेरुं प्र
दक्षिणीकुर्वन्नागच्छ ब्रह्मचित्रगुप्ताभ्यां सह पश्चवायव्यदलमध्य कांस्यप्रतिमां दक्षिणाभि
मुखीं ध्वजाकारपीठे धिति ष्ठ पूजार्थं त्वामा॰।दक्षिणे व्याहृत्यंते ब्रह्मजज्ञानं न कुलो ब्रह्मात्रि
ष्टुप्।मंत्रांते पद्मासनस्थं कुटिलं चतुर्भुजमक्षमालास्रुवपुस्तककमंडलुधरं कृष्णाजिनवा
सनं पार्श्वस्थितहंसं केत्वधिदेवतां ब्रह्माणमावाहयामि।वामे व्याहृत्यंते सचित्रचित्रं स

रह्याजश्चित्रगुप्तस्त्रिष्टुप्‌। मंत्रांते उदीच्यवेषं सौम्यदर्शनं लेखनीपत्रोपेतं द्विभुजं केतुप्रत्यधिदेवतां चित्रगुप्तमा॰। ततः शनेर्वामे। आतूनइंद्रः क्रुमं कुसीदेविनायको गायत्री। मंत्रांते चतुर्भुजं गजाननं नागयज्ञोपवीतिनं चंद्रधरं दंडाक्षमालापरशुमोदकोपेतं विनायकमा॰। तद्दक्षिणे व्याहृत्यंते। जातवेदसे कश्यपो दुर्गा त्रिष्टुप्‌। मंत्रांते शक्तिबाणशूलखड्गचक्रचंद्रबिंबखेटकपालशुकंठकोपेतं दशभुजां सिंहारूढां दुर्गाख्यां दैत्यासुरहारिणीं दुर्गामा॰। तद्दक्षिणे व्याहृत्यंते क्षेत्रस्य वामदेवः क्षेत्रपालोनुष्टुप्‌। मंत्रांते श्यामवर्णं त्रिलोचनमूर्ध्वकेशं सुदंष्ट्रं भृकुटीकुटिलाननं नूपुराकृतांघ्रिं सर्पमेखलयायुतं सर्वांगमतिक्रुद्धं घंटाबद्धगुल्फावलंबिकरोटिकामालाधारिणमुरगकोपीनं चंद्रमौलिं दक्षिणहस्तैः शूलवेतालखड्गडमरूं दधानं वामहस्तैः कपालघंटाचर्मचापान्दधानं नीमंदिग्वाससमसितद्युतिं क्षेत्रपालमा॰। तद्दक्षिणे व्याहृत्यंते काण्वशिशुस्त्रितो।

वायुरुत्तरिक। धावद्धरिणपृष्ठगतं ध्वजवरदानधारिणं धूम्रवर्णं वायुमा०। तद्दक्षिणे व्याहृत्यंते। आ
दिद्दिक्षोंतरिक्षे गायत्री। नीलोत्पलाभं नीलांबरधारिणं वंद्राक्षोपेतं द्विभुजं षंढमाकाशमा०। तद्दक्षि
णे व्याहृत्यंते। अश्विनावश्विनौ गौतमोश्विनावुष्णिक। प्रत्येकमोषधीपुस्तकोपेतदक्षिणवामहस्ता
वन्योन्यसंपुक्तदेहावेकस्य दक्षिणपार्श्वे परस्य वामपार्श्वे रक्तभांडकरस्थुल्लांबरधारिनारीयु
ग्मोपेतौ देवभिषजावश्विनावा०। तनो दलायोषिंशरीनः। व्याहृत्यंते इंद्रं वो मधुछंदा इंद्रो गायत्री। स्व
र्णवर्णं सहस्राक्षं वज्रपाणिं शचीप्रियं। इंद्रमाग्नेये व्याहृत्यंते अग्निमीळे मधुछंदा अग्निर्गायत्री।
स्वर्णवर्णं सप्तार्चिषं सप्तहस्तं स्रुक्स्रुवतोमरव्यजनघृतपात्राणि दधानं स्वाहाप्रियं मेषवाहनमग्निं०।
व्याहृत्यंते यमाय सोमं यमो यमोनुष्टुप्। रक्तवर्णं दंडधरं महिषवाहनमिलाप्रियं यममा०। व्याहृत्यं
ते। मोषुणो घोरः कण्वो निर्ऋतिर्गायत्री। नीलवर्णं खड्गचर्मधरमूर्ध्वकेशं नरवाहनं कालिकाप्रि

यंनिर्ऋतिमा॰ व्याहृत्यंते। उदुत्तमंमुमुग्धिशुनःशेपोवरुणोगायत्री॥ रक्तंभूषंनागपाशधरंमकरवाहनंपद्मिनीप्रियंवरुणमा॰ व्याहृत्यंतेतववायोवश्वोवायुर्गायत्री॥ श्यामवर्णंहिमदंडधरंकृष्णमृगवाहनंजगत्प्राणरूपंमोहिनीप्रियंवायुमा॰ व्याहृत्यंतेत्वन्नःसोमविश्वतोरक्षाराजन्न॰ गौतमःसोमोगायत्री॥ स्वर्णवर्णंनिधीश्वरंकुंतपाणिमश्ववाहनंचित्रिणीप्रियंकुबेरमा॰ व्याहृत्यंतेकद्रुद्रायकण्वोरुद्रोगायत्री॥ शुद्धस्फटिकवर्णंवरदाभयशू   लाक्षसूत्रधरंवृषवाहनंगौरीप्रियमीशानमा॰ कुंभेवरुणंपूर्ववदावाह्यग्रहवर्णवस्त्रगंधाद्यैःपुष्पैस्तैसंपूज्याग्निप्रतिष्ठादिचक्षुष्यंतेसूर्यमग्निंरुद्रंचामुकसंख्यार्कसमिच्चर्वाज्यैःसोमायगौरींश्चपलाशसमिच्चर्वाज्यैःअंगारकंभूमिंस्कंदंखदिरसमिच्चर्वाज्यैःबुधंविष्णुंपुरुषमपामार्गसमिच्चर्वाज्यैर्बृहस्पतिंब्रह्माणमिंद्रंचाश्वत्थसमिच्चर्वाज्यैःशुक्रमिंद्राणीमिंद्रमौदुंबरसमिच्चर्वाज्यैःशनिंप्रजापतिंयमंशमी

=
राम
॥५५॥

समिद्ववर्ज्यैराहुंसर्पंकालंदूर्वासमिद्ववर्ज्यैःकेतुंब्रह्माणंचित्रगुप्तंकुशाचवर्ज्यैर्विनायकंदुर्गां क्षेत्रपालंवायुमाकाशमश्विनौइंद्रादींश्चप्रधा नविंशांशेनपलाशसमिद्ववर्ज्यैअग्निवायु सूर्यप्रजापतीनमुकसंख्ययातिलव्रीहिभिःसूर्यंत्रयोदशवारमाज्येनाग्निंचतुस्त्रिंशदक्षरंरुद्रंद्वात्रिं शदक्षरंशेषेणस्विष्टकृतमित्यादिनिर्वापादिनाचरुंकृत्वाचतुर्थ्यंतेहोमः।लोकसिद्धएवचरुरितित त्रैव।तदाग्नावधिश्रित्याभिघार्योद्वास्यबर्हिष्यासाद्यप्रत्यभिघारणंसंस्कारः।सूर्यादिभ्यःप्रा गुक्तमंत्रैर्होमः।मध्यमानामिकांगुष्ठैर्मध्वाज्यैर्दधिक्षीरान्यतरात्तसमिद्धोमः।हस्तेनयासमात्रं चरुहोमः।आज्यंस्रुवेणाश्वत्थपर्णेनवाव्यस्तसमस्ताभिस्तिलाज्यैर्व्रीहिहोमः।यथा।सूर्येन इतिपंचानांचक्षुःसूर्योगायत्री।उदुत्यंप्रस्कण्वःसूर्योगायत्री।नमोमित्रस्याभितपाःसूर्योज गती।चित्रंदेवानांकुत्सःसूर्यस्त्रिष्टुप्।उद्वेतिसुभगःपंचानांवसिष्ठःसूर्यस्त्रिष्टुप्।त्वमग्नेप्र

थमइत्यष्टादशार्चा हिरण्यस्तूपोग्निर्जगती।अंत्याष्टमीषोडशीत्रिष्टुप्।त्वमग्नेद्युभिरितिषोडशर्चा

नांगृत्समदोग्निर्जगती।कद्रुद्रायेतिषस्णांघोरःकण्वोरुद्रोगायत्री।इमारुद्रायतवसइत्येकादशा

नांकुत्सोरुद्रोजगत्यंतेत्रिष्टुभौ।आतेपितरितिपंचदशानांगृत्समदोरुद्रस्त्रिष्टुप्।ततोग्रहादी

नांधूपदीपनैवेद्यादिपूजांकृत्वातांबूलंदत्वाप्रसीदंतुसर्वेइतिप्रार्थ्यस्विष्टकृदादिप्रायश्चित्त

होमांतेसमुद्रादूर्मिरित्याद्येःपूर्णाहुतिंकृत्वापूर्णपात्रविमोकादिसमाप्यैशान्यांपंचरंगस्वस्ति

कपीठेकुशोपरियाजमानंसहेमकुशोदुंबरीशाखयाकुंभोदकैरभिषिंचेयुः।आपोहिष्ठेतिनव

भिः।प्रसंम्राजेबृहदर्चाइत्यष्टानामत्रिर्वरुणस्त्रिष्टुप्।स्वादिष्ठयादशानांमधुछंदाःपवमानसो

मोगायत्री।शन्नइंद्राग्नीपंचदशानांवासिष्ठोविश्वेदेवास्त्रिष्टुप्।पवित्रंतेविततंपंचानांपवित्रः

पवमानसोमोजगती।ग्रहाणामादिरादित्योलोकरक्षणकारकः।विषमस्थानसंभूतांपीडांदह

राम

॥५६॥

तुतेरविः।रोहिणीशःसुधामूर्त्तिःसुधागात्रःसुधाशनः।विषमस्थानसंभूतांपी०विधुः।भूमिपु
त्रोमहातेजाजगतांभयकृत्सदा।वृष्टिकृद्दृष्टिहर्त्ताचपी०कुजः।उत्पातरूपोजगतांचंद्रपुत्रोमहाद्यु
तिः।सूर्यप्रियकरोविद्वान्पीडां०बुधः।देवमंत्रीविशालाक्षःसदालोकहितेरतः।अनेकशिष्यसंपू
र्णःपी०गुरुः।दैत्यमंत्रीगुरुस्तेषांप्राणदश्चमहामतिः।प्रभुस्ताराग्रहाणांचपी०भृगुः।सूर्यपुत्रो
दीर्घदेहोविशालाक्षःशिवप्रियः।मंदचारःप्रसन्नात्मापीडां०शनिः।महाशिरामहावक्त्रोदीर्घदं
ष्ट्रोमहाबलः।अतनुश्चोर्द्ध्वकेशश्चपी०तमः।अनेकरूपवर्णैश्चशतशोथसहस्रशः।उत्पातरू
पोजगतःपीडांदहतुतेशिखी।।ततोहिरण्यवर्णाभितिसूक्तेनेमाआपइतित्रिभिर्देवस्यत्वेत्यंते
भूर्भुवःस्वरितिचाभिषिक्तोथयजमानोदिक्पालग्रहादिभ्योमाषभक्तबलीन्दत्वाग्रहाणामुत्तरपू
जांतेव्याहृतिभिरुद्रास्पाचार्यादिभ्योऽपहोमफलंगृहीत्वाधेनुंशंखंरक्तवृषंहेमपीतवस्त्रंश्वेता

श्री३

श्वंकृष्णांगां लोहं गजं छागं वा सर्वाभावे हिरण्यं वा दक्षिणां दत्वा कांस्यपात्रे आज्ये रूपं रूपमिति प्रतिबिंबं विलोक्य आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतं। आज्यं सुराणामाहार आज्ये देवाः प्रतिष्ठिताः। इति सदक्षिणां दत्वा। कृतौ शते सहस्त्रे वैकं यथाशक्ति च विप्रान्संभोज्य आशिषो गृहीत्वा पूर्णतां वाचयित्वा कर्मेश्वरार्पणं कृत्वा भुंजीत॥ अयं बह्वृचपरिशिष्टोक्ते बह्वृचानां नियतः॥ एवमन्यैः स्वशाखोक्तश्चेत्स एव कार्यः। अन्यैः शाखांतरः स्थः स्मार्त्तो वा। अयं सूक्तेनुक्तत्वात् लौकिकाग्नौ कार्यो न गृह्ये॥ येषां गृह्योक्तस्तदभावे वा सर्वार्थं गृह्यो यत्तित्तैः कातीयाद्यैः गृह्ये एवेति दिक्॥ ॥७॥ ॥इति श्रीमन्नारायणभट्टसूनुमहोपाध्याय रामकृष्णभट्टात्मज कमलाकरभट्टकृते शांतिरत्ने नवग्रहयज्ञः॥ ॥७॥ ॥

अथ प्रसवशांतयः॥ ॥तत्र बह्वृचप्रसवे शक्तिलाजोमुखप्रसव उच्यते॥ ॥ग गर्ग ४॥

राम

॥प्रणिपत्य रविं वक्ष्ये प्रायश्चित्तमनुस्मरन्। सर्वारिष्टविनाशाय यदुक्तं ज्योतिरर्णवे। पित्रारिष्टे
सुतारिष्टे मात्ररिष्टे तथैव च। यन्नक्षत्रोत्पन्नो पित्राद्यरिष्टं कुर्यादित्यर्थः। प्रायश्चित्तं तदा कुर्यात्तत्त
द्दोषस्य शांतये। पूषाश्विनी गुरौ सार्पमघा चित्रेंद्रमूलभे। एषु ऋक्षेषु जातस्य कुर्याच्छांतिजननं तथा।
रेवती अश्विनी पुष्या श्लेषा मघा चित्रा ज्येष्ठा मूलेषु कुर्यात्। तथा शब्दः समुच्चयार्थः। तेन पित्र
रिष्टादौ तत्तन्नक्षत्रादि शांतिं कृत्वा एतच्च कुर्यादित्यर्थः। पित्रारिष्टे इत्यनेनैव मूलादावपि प्रा
प्तेः पुनर्मूलादि ग्रहणं यत्र मूला देश्चतुर्थपादादौ तदभावस्तत्रापि प्राप्त्यर्थं। जन्मर्क्षे वा त्रि
जन्मर्क्षे शुभे वारे सु शोभे दिने। कृत्वाभ्यंगादिकं सर्वं गृहालंकारपूर्वकं। गोमयेनोपलिप्याथ
गृहस्येशानभागके। पंकजं कर्णिकायुक्तं रजोभिः श्वेतवर्णकैः। व्रीहींस्तत्र विनिक्षिप्य यथा
वित्तानुसारतः। नवशूर्पं च तन्मध्ये रक्तवस्त्रं प्रसारयेत्। स्थापयित्वा शिशुं तत्र पुनः सूत्रेण

१९ दक्षिणपारं

वेष्टयेत्।प्राङ्मुखंतमंवाचमांदंतिलगर्भगतंशिशुं।गोमुखंदर्शयित्वाथपुनर्जातंतुगोमुखात्।
विष्णुर्योनीतिसूक्तेनगव्येनस्नपयेच्छिशुं।गवामंत्रेषुमंत्रेणगवामंगेषुसंस्पृशेत्।गोवामांगेष्वि
तिवापाठः।विष्णोःश्रेष्ठेनमंत्रेणगोप्रसूतंतुबालकंआचार्यस्तुसमादायपश्चान्मात्रेददेत्तदा॥
माताऽधन्यभागस्थाशिशुमानीयतन्मुखात्।ततःपित्रेतदादद्यात्ततोमात्रेप्रदापयेत्।वस्त्रे
संस्थाप्यतुपितापुत्रस्यमुखमीक्षयेत्।गोमूत्रंगोमयंक्षीरंदधिसर्पिश्चसंयुतं।आपोहिष्ठा
दिभिर्मंत्रैरभिषिंचेत्ततःशिशुं।मूर्ध्निचाघ्रायतंपुत्रंतन्मंत्रेणतदापिता।अंगादंगात्संभवसि
हृदयादधिजायसे।आत्मावैपुत्रनामासिसंजीवशरदःशतं।मूर्ध्नित्रिरवघ्रायतंशिशुंस्था
पयेत्ततः।पुण्याहंवाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः।दरिद्रायात्यविधायतांगामभ्यर्च्यदापयेत्।
गोवस्त्रस्वर्णधान्यानिदद्याद्दर्काद्वितःक्रमात्।यथाशक्तिधनंदद्याद्ब्राह्मणेभ्यस्तदापिता॥

राम

॥५८॥

ततो होमं प्रकुर्वीत स्वस्वशाखोक्तमार्गतः। उल्लेखनादिकं कृत्वा आज्यभागांतमाचरेत्। होमस्ये
शानदिग्भागे धान्योपरि शुभं घटं। पंचगव्यं घटे स्थाप्य तिलांस्तत्र विनिक्षिपेत्। क्षीरद्रुमकषायां
श्च पंचरत्नानि निक्षिपेत्। कषायो निर्यासः। वस्त्रयुग्मेन संछाद्य गंधादिभिरथार्चयेत्। विष्णुंवरु
णमभ्यर्च्य प्रतिमायां विधानतः। प्रतिमां च विधानत इति प्रयोगपारिजातधृतपाठाद्यक्षग्रहणः
प्रतिमायां तत्सृजनं कुर्यात् अयेत देवत्यहोम दर्शनादिति केचित्। यत इंद्रादिभिर्मंत्रैः कुंभं स्प
र्शाभिमंत्रयेत्। यत इंद्रेतिषड्ऋचस्त्क शेषः। दधिमध्वाज्ययुक्तेन होमं कुर्यात्प्रयत्नतः। युक्ते
नेति भावे क्तः। योगेनेत्यर्थः। आपोहिष्ठेति तिसृभिरप्सुमे सोम इत्यथ। तद्विष्णोः परमं पदमष्टो
भ्यां तेति सूक्ततः। ऋग्भिराभिः प्रत्यृचं चाष्टाविंशति संख्यया। अशक्तावष्टसंख्यं वा दधिमधा
ज्यसंयुतं। आदित्यादि ग्रहाणां च होमं कुर्यात्समंत्रकं। ग्रहाणां च दध्यादियुतं होमं कुर्यादित्यर्थः।

अन्यथापुनर्दध्यादिग्रहस्य वैयर्थ्यापत्तेः॥ ॥अथप्रयोगः॥ कर्त्ताऽस्यबालस्याऽमुकनक्षत्रो
त्पत्तिसूचितारिष्टशांत्यर्थं गोमुखप्रसवं करिष्य इतिसंकल्प्य गणेशं संपूज्याचार्यं वृणुयात्॥ आ
चार्यः गोमयोपलिप्ते गृहस्येशानभागे श्वेतचूर्णैः पद्मं कृत्वा तत्रव्रीहिपुंजं शूर्पे रक्तवस्त्रोतिलान्वि
कीर्य प्राङ्मुखमवाक्पादं शिशुं निधाय सूत्रेण शूर्पं वेष्टयित्वा शिशुसमीपे गोमुखमानीय प्रस
वं विभाव्य· विष्णुर्योनिमितिसूक्तस्य त्वष्टा विष्णुरनुष्टुप्॥ विष्णुर्योनिमितिसूक्तेन पंचगव्येन शिशुं
स्नपयित्वा गवामंगेष्विति मंत्रेण सर्वेष्वंगेषु गां स्पर्शयेत्॥ विष्णोः श्रेष्ठेनेति त्वष्टा विष्णुरनुष्टुप्॥ ततो
विष्णोः श्रेष्ठेनेति शिशुमादाय मात्रे दद्यात्॥ ततः सा गोऽर्धन्यभागस्था शिशुमादाय। माता पित्रे।
ततः पिता मात्रे दत्वा वस्त्रे संस्थाप्य पुत्रमुखमीक्षेत॥ ततआचार्यः शिशुं पंचगव्येनापो हिष्ठेति
तिसृभिरभिषिंचेत्॥ ततः पिता अंगादंगादिति शिशुं मूर्ध्नि त्रिरवघ्रायाऽस्य गोमुखप्रसव

राम

स्यपुण्याहं भवंतो ब्रुवंतु· एवं ऋद्धिः श्रीः कल्याणमिति त्रिर्वाचयित्वा गां संपूज्य कस्मैचिद्दरिद्राया ऽऽ
चार्याय तां गां दत्वाऽग्रहश्रीत्यर्थं गोवस्त्रस्वर्णधान्यानि यथाशक्ति भूयसीं दद्यात् । ततआचार्योऽग्निं प्र
हांश्च प्रतिष्ठाप्यान्वाधाने चक्षुषी आज्येनेत्यंत मुक्त्वाऽत्र प्रधानं अप आपोहिष्ठेति तिसृभिः अप्सु मेति च
प्रत्यृचमष्टविंशत्यष्टान्यतमसंख्याभिर्दधिमधाज्याहुतिभिः तद्विष्णोरित्यृचा तावतीभिर्दधिमधाज्या विलुं ४
हुतिभिर्यक्ष्महणं अक्षीभ्यामिति सूक्तेन प्रत्यृचं तावतीभिर्दधिमधाज्याहुतिभिः ग्रहांश्च तावती
भिर्दधिमधाज्याहुतिभिरेकैकयावाहुत्वा शेषेण स्विष्टकृतमित्यादि आज्यभागांते अग्नेरीशान्यां
कुंभं संस्थाप्य तत्र पंचगव्यं तिलान् क्षीरिद्रुमकषायांश्च क्षिप्त्वा वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रे तद्वि
ष्णोरिति विष्णुं तत्वायामीति वरुणं चावाह्य संपूज्य कुंभं स्पृष्ट्वा जपेत् । यत इंद्रेति षट्कांक एव पुत्रं प्र
तं१ गाथ इंद्रो बार्हस्प्रगाथो छंदः । एतान् जप्त्वा यजमानेन त्यागे कृते मिलितैर्दधिमधाज्यैः प्रत्यृचमष्टा

विंशतिसंख्ययाष्टसंख्ययावाजुहुयात्। आपोहिष्ठेतितिसृणांसिंधुद्वीपआपोगायत्री। अप्सुमे
मेधातिथिरापोनुष्टुप्। तद्विष्णोर्मेधातिथिर्विष्णुर्गायत्री। अक्षीभ्यामितिषण्णांविवृहायक्ष्महानुष्टु
प्। अक्षीभ्यांते० ग्रीवाभ्यस्त० आंत्रेभ्य० ऊरुभ्यांते० मेहनात्० अंगादंगात्० एतेर्ग्रहमंत्रैश्चदधिमध्वा
ज्यैर्हुत्वास्विष्टकृदादिशेषंसमाप्यब्राह्मणान्संभोजयेत्॥ ॥इतिगोमुखप्रसवप्रयोगः॥ ॥
अथतिथिनक्षत्रयोगक्रमेणप्रसवशांतयउच्यंते॥ तत्रादौगंडांतः। तिथिलग्ननक्षत्रभेदात्॥
गंडांतोनामसंधिघटिकाःसचोक्तोज्योतिर्निबंधे। पूर्णानंदाख्ययोस्तिथ्योःसंधिनाडीद्वयंत
था। गंडांतंमत्स्यहंजन्मयात्रोद्वाहव्रतादिषु। कुलीरसिंहयोःकीटचापयोर्मीनमेषयोः। गंडांतमं
तरालंस्याद्घटिकार्धंमृतिप्रदं। सार्पेंद्रपौष्णभेष्वंत्यषोडशांशाभसंधयः। तदग्रभेष्वाद्यपादा
भानांगंडांतसंज्ञकाः। रत्नमालायांतुनक्षत्रेष्वन्यथोक्तं। पौष्णाश्व्योःश्विसार्पपित्र्यर्क्षयोश्चयच्च

ज्येष्ठामूलयोरंतरालं। तद्गंडांतं स्याच्चतुर्नाडिकं हि यात्राजन्मोद्वाहकालेषु निषिद्धं। अत्र दोषतारतम्यं ज्ञेयं। रत्नसंग्रहे। सर्वेषां गंडजातानां परित्यागो विधीयते। वर्ज्जयेद्दर्शनं श्रावं तच्चषाण्मासिकं भवेत्। तिथ्यृक्ष गंडे पितृमातृनाशो लग्नेतु संधौ तनयस्य नाशः। सर्वेषु नो जीवति हंति बंधून् जीवन्पुनः स्याद्बहुवारणाश्वः। प्रयोगपारिजाते गर्ग्गः। अश्विनी मघा मूलादौ त्रिषट्कनवनाडिकाः। रेवती सार्पशक्रांते मासाश्वऋतुसायकाः। अश्विनी मघा मूलादौ नाडिका द्वितयं तथा। रेवती सार्पशक्रांते नाडिकाद्वयमेव हि। अश्विनी मघा मूलानां पूर्वार्द्धे बाध्यते पिता। पूषाहिशक्रपार्श्वार्द्धे जननी बाध्यते शिशोः। पितृघ्नश्च दिवाजातो रात्रिजातस्तु मातृहा॥ दिवसगंडांत इत्यर्थः॥ आत्मघ्नः संध्ययोर्जातो नास्ति गंडे निरामयः। सर्वेषां गंडजातानां परित्यागो विधीयते। वर्ज्जयेद्दर्शनं श्रावं तच्चषाण्मासिकं भवेत्। तस्य शांतिं प्रवक्ष्यामि सोममंत्रेण भक्तिमान्। कौस्यपा

त्रंथकुर्वश्तपलैः षोडशभिर्नवैः। अष्टाभिश्च चतुर्भिर्वा द्वाभ्यां वाथ शोभनं तथा। तन्मध्ये पायसे शुभ्रे
नवनीतेन पूरिते। शङ्खं तं चंद्रमर्चेत सितपुष्पसहस्रकैः। दैवज्ञः क्षौमवासास्तु शुक्लमाल्यांबरा
न्वितः। सोमोहमितिसंचिंत्य पूजां कुर्यादतंद्रितः। जपेत्साहस्रकं मंत्रं श्रद्दधानः समाहितः। आ
प्यायस्वेतिमंत्रेण पूजां कुर्यात्समाहितः। दद्याद्दैवज्ञ दक्षिणामिष्टां गंडदोषप्रशांतये। शुक्लां वागी
श्वरं चैव ताम्रपात्रसमन्वितं। गंडदोषोपशांत्यर्थं दद्याद्वेदविदे शुचिः। ज्योतिर्निबंधे तु एतदे
तेधिकमप्युक्तं। कुंकुमं चंदनं कुष्ठं गोरोचनमथापि वा। घृतपूर्णेषु कुंभेषु चतुर्षु प्रक्षिपेत्रसा
त्। सहस्राक्षेण मंत्रेण बालकं स्नापयेत्ततः। पितृयुक्तं दिवाजातं मातृयुग्मं तु रात्रिजं। स्नापये
त्पितृमातृभ्यां संध्ययोरुभयोरपि। कांस्यपात्रं घृतैः पूर्णं गंडदोषोपशांतये। सक्षीरं मौक्तिकं शं
खं श्वेतवस्त्रयुतं शुभं। यजुर्वेदविदे दद्याद्गंडदोषापनुत्तये। दद्याद्धेनुं हिरण्यं च ग्रहांश्चापि प्रपू

जयेत्॥ आयुर्वृद्धिकरं ज्ञस्वा कुर्याद्ब्राह्मणतर्पणं॥ अथ गोमुखप्रसवोग्रहशांतिश्च कार्या॥ अ
न्यत्स्पष्टमितिप्रयोगोभोच्यते॥ ॥ इति गर्गोक्तनक्षत्रगंडशांतिः॥ ॥ अथ तिथिलग्नगंडशां
तिरुक्ता गार्ग्यः॥ अभुक्तेतरजातस्य सूतकांत्यदिनेऽथवा॥ शांतिं शुभेऽह्नि वा कुर्यात्तावत्पुत्रं न
लोकयेत्॥ तिथिगंडे त्वनड्वाहं नक्षत्रे धेनुरुच्यते॥ कांचनं लग्नगंडे तु गंडदोषो विनश्यति॥ आ
द्यभागे पितुर्गंडं त्रयाणामभिषेचनं॥ मातापित्रोः शिशूनामित्यर्थः॥ उत्तरा तिष्य चित्रासु पूर्वा
षाढोद्भवस्य च॥ कुर्याच्छांतिं प्रयत्नेन नक्षत्राकरजां बुधः॥ नामे वाह॥ सुवर्णेन तदर्धेन यथावित्ता
नुसारतः॥ नक्षत्राधिपते रूपं कृत्वा वस्त्रद्वयान्वितं॥ वरुणस्यार्चनं कार्यं स्वस्तिवाचनपूर्वकं॥
कुंभे वरुणं नक्षत्राधिपतिं पूजयेदित्यर्थः॥ शतौषधानि रत्नानि मृत्त्वक्पल्लवसंयुतां॥ पूजां
ते समिदन्नाज्यैर्होमं तिलयवैस्तथा॥ ततः पूर्णाहुतिं कृत्वा वेदाध्यायि कुटुंबिने॥ उत्तराप्रथमे

पादेतिलपात्रंतथैवच। तिष्ये तुगांसवत्सांचसुशीलांचपयस्विनीं। अजांचित्रासुवेदद्यात्स
र्वषादेतुकांचनं। यवांश्चव्रीहिमाषांश्चतिलमुद्गान्प्रदापयेत्। यथावित्तानुसारेण कुर्याद्ब्रा
ह्मणभोजनं। पितुरायुष्यवृध्यर्थंशांतिरत्रविधीयते। एवंयःकुरुतेसम्यक्शांतिकर्मसमाहि
तः। आयुरारोग्यमैश्वर्यंसंप्राप्नोतिदिनेदिने॥ ॥इतितिथिलग्नगंडांतशांतिः॥ ॥अथदिन
क्षयादिशांतिः॥ ॥उक्तंगार्ग्यः॥ अथातःसंप्रवक्ष्यामिजन्मकालेविशेषतः। गंडांतानांचनॄना
मानिमहादोषकराणिच। दिनक्षयेव्यतीपातेव्याघातेविष्टिवैधृतौ। शूलेगंडेतिगंडेचपरिघे
यमघंटके। कालेगंडेमृत्युयोगेदग्धयोगेसुदारुणे। तस्मिन्गंडदिनेप्राप्तेप्रसूतिर्यद्विजायते।
अतिदोषकरीप्रोक्तातत्रपापुलेसति। दिनक्षयादिदोषेगंडांतेरादोषेगोणः। यजनंदेवतानांचग्रहा
णांचैवपूजनं। दीपंघृतवालुयेमत्त्याघृतेनपरिदापयेत्। अभिषेकंशंकरायअश्वत्थस्यप्रद

क्षिणं।आयुर्वृद्धिकरंजप्यंसर्वारिष्टविनाशनं।मृत्युंजयमंत्रस्यआशुःशिशानइत्यादेश्चजु
पमित्यर्थः।गुरुदैवतविप्राणांपूजनंगोत्रवर्द्धनं।सर्वारिष्टहरार्थायग्रहयज्ञंसमाचरेत्।शि
वायविधिवद्भक्त्यादीपदानंकरोतियः।अखंडंगोघृतेनैवसवैमृत्युंजयेन्नरः।विष्णुमूर्तिंम
हापुण्यमश्वत्थंश्रीकरंसदा।प्रदक्षिणंनरोभक्त्यायःकरोतिनरोत्तमः।अकालमृत्युंनिर्जित्य
दीर्घमायुर्जायतेनरः।गाणपत्यंपुरुषसूक्तंसौरंमृत्युंजयंशुभं।शांतिजाप्यंरुद्रजाप्यंकृत्वामृ
त्युंजयीभवेत्।मूलेवासार्पगंडेवाकुर्यादेतानियत्नतः।आयुर्वृद्धिकरार्थायगंडदोषप्रशां
तये।एषांमूलादिगंत्यासमुच्चयः॥ ॥इतिगंडांतशांतिः॥ ॥अथविषघटीशांतिः॥ ॥
ताश्चाहज्योतिर्निबंधेवृद्धगर्गः॥तिथीषुनागाद्रिगिरीशवारिधिर्गजाद्रिदिक्पावकदिक्
भास्कराः।मुनीश्व१५।५८।७।७।३३।४८।७।१०।३१०।१२।७।८ संख्याप्रथमातिथेःक्रमात्

परं विषाख्यं घटिकाचतुष्टयं। विंशाच्चतुर्द्दशदिक्शैलाबाणाश्चतत्वा नियथाक्रमेण॥
२०।१४।११।१०।७।५।२५। सूर्यादिवारेषु भवंत्यनंतरं नाड्यो विषाख्यं घटिकाचतुष्टयं। नक्षत्रे
ष्वाह नारदः। खमार्गणाः ० वेदपक्षाः २४ खरामः ३० व्योमसागराः ४०। वार्धिचंद्राः १४ रूपदस्रा
२१ खरामाः ३० व्योमबाहवः २०। द्विरामाः ३२ खाग्नयः ३० शून्यदस्राः २० कुंजरक्ष्मयः २८। रूप
पक्षाः २१ व्योमदस्राः २० वेदचंद्राः १४ चतुर्दश १४। शून्यचंद्राः १० वेदचंद्राः १४ षडक्षाः ५६ वेदबा
हवः २४। शून्यदस्राः २० शून्यचंद्राः १० पूर्णचंद्राः १० गजेंदवः १८। तर्कचंद्राः १६ वेदपक्षाः २४ खरा
माश्चाश्विभाक्रमात्। आभ्यः परास्युर्घटिकाचतस्रो विषसंज्ञिताः॥ शांतिमाह वृद्धगार्ग्यः।
विषनाडिषु संजातः सर्वारिष्टभयप्रदः। पितमातुलमात्मानं घातयेन्नात्र संशयः। मातुश्च ॥राम॥
विषशस्त्रास्त्रैः क्रूरे लग्नेंशगेपि वा। तद्दोषपरिहाराय शांतिकर्म समाचरेत्। रुद्रोयमोग्निर्म ॥६३॥

त्यकश्चदेवताः परिकीर्त्तिताः। सुवर्णेन यथाशक्त्या तत्तल्लक्षणलक्षिताः। प्रतिमाः कारयित्वा
तु आढक्यव्रीहिभिस्थले। स्वंडिलं परिकल्प्याथ कुंभमोषधिसंयुतं। जलैः संपूर्य संस्थाप्य च तस्त्रः
प्रतिमास्तथा। संस्थाप्य तत्र मंत्रैश्च क्रमादर्चैद्‌ दुनेत्तथा। समिच्चरुघृतद्रव्यैः प्रत्येकं यथाक्रमा

त्। ऋत्विग्भिश्च सहाचार्यो ऊनेदष्टसहस्रकं। अष्टोत्तरशतं वाथ अष्टाविंशतिमेव वा। ततस्तिले
र्जुनेद्देवांस्तत्तन्मंत्रैश्च कृत्यविल्। ततोभिषेचयेद्यानमंत्रैः पौराणकैः क्रमात्। प्रीयतां भगवानी
शः पिनाकी सर्वतोमुखः। तवमूर्त्तिप्रदानेन मम पापं विनाशय। दंष्ट्राकरालवदनो नीलांजनसमा
कृतिः। रक्ताक्षो सिगदापाणिर्मृत्युर्मां पातु सर्वदा। दानमेवं विधैर्मंत्रैर्यथाविधि समाहितः। गो
भूहिरण्यवस्त्रैश्च आचार्यं पूजयेत्सुधीः। एवं कुर्याद्विधानेन विषदोषः प्रशाम्यति॥ ॥इति विष
घटीशांतिः॥ ॥अथ तिथिप्रसवशांतयः॥ ॥तत्र कृष्णचतुर्दशीजातशांतिः॥ प्रयोगपारि

च ३
च ४

उक्तेउत्तरगर्गः। कृष्णपक्षेचतुर्दश्यांप्रसूतेःषड्विधंफलं। चतुर्दशींचषड्भागांकुर्यादादौफलंस्मृतं। शुभं
द्वितीयेपितरंहंतितृतीयेमातरंतथा। चतुर्थेमातुलंहंतिपंचमेवंशनाशनं। षष्ठेचधनहानिःस्या
दात्मनोवंशनाशनं। तस्मात्सर्वप्रयत्नेनशांतिंकुर्याद्विधानतः। आचार्यमृत्विजोवृत्वास्वस्ति
वाचनपूर्वकं। रुद्राधिदेवतांतस्याःकर्षमात्रसुवर्णतः। तदर्धार्धेनवाकुर्याद्वित्तशाठ्यविवर्जि
तः। प्रतिमांकारयेच्छंभोःसर्वलक्षणसंयुतं। वृषभेचसमासीनंवरदाभयपाणिनं। शुद्धस्फटि
कसंकाशंश्वेतमाल्यांबरावृतं। त्र्यंबकेनमंत्रेणपूजांकुर्याद्विधानतः। स्थापयेच्चतुरःकुंभांश्च
तुर्दिक्षुयथाविधि। आग्नेयीमारभ्यविदिक्ष्वित्यर्थः। आग्नेयकुंभमारभ्येत्यग्रेदर्शनात्। पुण्य
तीर्थजलोपेतांधान्यस्योपरिविन्यसेत्। तन्मध्येस्थापयेत्कुंभंशतच्छिद्रसम न्वितं। पंचमंसंच राम
रत्नानिपंचत्वक्पंचपल्लवान्। पंचधान्यंसुवर्णंचतत्तन्मंत्रैर्विनिक्षिपेत्। शतौषधानिनि ॥९६४॥

क्षिप्य श्वेतवस्त्रैश्च वेष्टयेत्। सुरभीणि च पुष्पाणि श्वेतानि परिवेष्टयेत्। सर्वे समुद्राः सरितस्ती
र्थानि जलदा नदाः। आयांतु यजमानस्य दुरितक्षयकारकाः। आवाह्य वारुणैर्मंत्रैरनेन विधि
ना ततः। इमंमेवरुणेत्यनया तत्त्वायामीति वा तथा। त्वन्नो अग्न इत्यनया सत्वंन इति मंत्रतः।
आग्नेय कुंभमारभ्य पूजां कुर्याद्यथाक्रमात्। आनोभद्रा रव्यसूक्तं च भद्रा अग्नेश्च सूक्तकं। ज
प्त्वा पुरुषसूक्तं च कद्रुद्रं तु क्रमाज्जपेत्। ईश्वरस्याभिषेकं च ग्रहपूजां च कारयेत्। पूर्णाकर्मसु नि
र्वर्त्य होमं कुर्याद्विधानतः। विस्तरायामखातं च अरत्निद्वयसंमितं। कुंडकंठं परित्यज्य समंता
द्व्यंगुलं क्रमात्। मेखलोच्छ्रायविस्तारौ चतुस्त्रिद्व्यंगुलैः क्रमात्। पश्चिमे मध्यभागे तु योनिं
कुर्याद्विधानतः। योनिं षडंगुलां तिर्यक् द्वादशांगुलदैर्घ्यकं। अश्वत्थदलसंकाशां किंचिन्निम्ना
यतां शुभां। कुर्यादाघारपर्यंतं स्वगृह्योक्तविधानतः। समिदाज्य चरूंश्चैव तिलमाषांश्च

सर्षपैः। सर्षपसहितास्तिलमाषा इत्यर्थः। अश्वत्थप्लक्षपालाशासमिद्भिः खादिरैः शुभैः। अष्टो
त्तरसहस्रं वा अष्टोत्तरशतं तु वा। अष्टाविंशतिमेतेश्च होमं कुर्यात्पृथक्पृथक्। त्रैयंबकेन मंत्रे
ण तिलाज्याहुतिस्तिःक्रमात्। ग्रहा एवं च होतव्या अस्मदुक्त विधानतः। एवं क्रमेण होतव्यं होमशे
षं समापयेत्। सर्वालंकारयुक्तानां त्रयाणामभिषेचनं। त्रयो मातापितृबालाः। चतुर्भिः कलशै
रद्भिः वृहत्कुंभसमन्वितं। बृहत्कुंभः शतच्छिद्रः। धौतांबरा लिधत्वाथ कुर्यादाज्यावलोकनं। पू
र्णाहुतिं च जुहुयाद्यजमानः समाहितः। तत्सर्वपरयासत्त्या ईश्वराय निवेदयेत्। सर्वालंका
रसंयुक्तां सवत्सां गां प्रदापयेत्। ईश्वरप्रीतये शक्त्या कुर्याद्ब्राह्मणभोजनम्॥ अन्ये
षां चैव सर्वेषां कुर्याद्ब्राह्मणभोजनम्। एवं यः कुरुते शांतिं सर्वपापैः प्रमुच्यते॥ सर्वान् राम
कामानवाप्नोति चिरजीवी सुखी भवेत्॥ ॥ इति शांतिरत्ने कृष्णचतुर्दशीशांतिः॥ ॥ ॥६५॥

॥ ॥अथ प्रयोगः॥ कर्त्ता पित्र रिष्टादौ गोमुखप्रसवं कृत्वान्यत्राहृत्वा देशकालौ स्मृत्वाऽस्य
बालकस्य कृष्णचतुर्दशीजन्मसूचितारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं सनवग्रहमखां
कृष्णचतुर्दशीजननशांतिं करिष्य इति संकल्प्य गणेशपूजा पुण्याहवाचनं नांदीश्राद्धं आचार्यर्त्वि
ग्वरणानि कुर्यात्॥ ततआचार्यः आग्नेयादिविदिक्षु चतुरः कुंभान्मध्ये च शतछिद्रं संस्थाप्य
शतछिद्रे पंचमृदः पंचपल्लवान्पंचरत्नानि पंचत्वचः व्रीहियवगोधूममाषतिलादीनि पंचधा
न्यानि सुवर्णं शतौषधानि दशः विष्णुक्रांता सहदेवी तुलसी शतावरीति मूलशांत्युक्ता औष
धीर्निक्षिप्य वस्त्रे माल्यैश्च वेष्टयित्वा पूर्णपात्रे कर्षतदर्धार्धकृतां रुद्रप्रतिमां त्र्यंबकमिति मं
त्रेण संपूज्य सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयांतु मम शांत्यर्थं दुरितक्षयकारकाः
इति कुंभानभिमंत्र्य। इमं मे वरुण तत्वायामि त्वं नो अग्ने स त्वं नो अग्ने इत्यादि क्रमेण कलशेषु

शांति॰

वरुणंसंपूज्यतेनैवक्रमेणआनोभद्राभद्राअग्नेसहस्रशीर्षाकद्रुद्रायेतिसूक्तानिजपेत्।त
तोग्निर्ग्रहणंचस्थापनंकृत्वासमिद्द्वयमादायचक्षुष्यंतेऽप्रधानंरुद्रमश्वत्थप्लक्षपलाश
खदिरसमिदाज्यचरुसर्षपसहिततिलमाषद्रव्यैःप्रत्येकमष्टसहस्रमष्टशतमष्टाविंश
तिवारंवात्र्यंबकमंत्रेणप्रजापतिंसमस्तव्याहृतिभिःसहस्रादिसंख्ययातिलद्रव्येणशेषे
णस्विष्टकृतमित्यादिनिर्वापादिनाचरुंकृत्वाकर्तात्यागंकृतेसाचार्यर्त्विजोहोमादिबलि
दानांतेशतच्छिद्रेणचतुर्भिःकुंभैर्ग्रहकुंभेनचाऽभिषिंचेयुः॥ ततोयजमानोविभू
तिंधृत्वाकांस्यपात्रेरूपंरूपमित्याज्येसकुटुंबोवलोक्यसदक्षिणंतत्पात्रंविप्रायदत्वापू
र्णाहुत्यादिशेषंसमाप्याचार्यायगां वस्त्रयुगंऋत्विग्भ्यश्चदक्षिणांदत्वाविप्रान्संभो राम
ज्यकर्मरुद्रार्पणंकृत्वाभुंजीतेति॥ ॥इतिकर्म॰कृतःकृष्णचतुर्दशीशांतिप्रयोगः॥ ॥ ॥९६॥

॥ ॥अथसिनीवालीकुहूशांतिः॥ ॥प्रयोगपारिजातेउत्तरगार्ग्यः॥सिनीवाल्यांप्रसूतास्या
द्दासीभार्यापशुस्तथा॥गजाश्वामहिषीचैवशक्रस्यापिश्रियंहरेत्॥कुहूप्रसूतिरत्यर्थंसर्वदोषक
रीस्मृता॥यस्यप्रसूतिरेतेषांतस्यायुर्धननाशनं॥सर्वगंडसमस्तत्रदोषस्तुप्रबलोभवेत्॥शांतिं
विनाविशेषेणपरित्यागोविधीयते॥परित्यागात्तत्रशांतिंकुर्याद्धीमान्विचक्षणः॥शांतौकृतायाम
पित्यागःकार्यएव॥शांतिंविनासुतरांत्यागइत्यर्थः॥तत्फलंतत्क्षणार्धेनशिशोरेवानुपालनेशां
त्यभावेबालत्यागेचेत्यर्थः॥नत्यजेत्संडितोमोहादर्थादज्ञानतोपिवा॥शांतिंविनायदिबालंन
त्यजेदित्यर्थः॥तद्योगनाशयेत्किंचित्स्वयंवानाशमश्नुते॥बालयोगादित्यर्थः॥कल्पोक्तशां
तिःकर्तव्याशीघ्रंदोषापनुत्तये॥रुद्रःशक्रश्चपितरःपूज्याःस्युर्दैवताःक्रमात्॥कर्षमात्रसुवर्णेन
तदर्धार्धेनवापुनः॥अथवाशक्तितःकुर्याद्वित्तशाठ्यविवर्जितः॥प्रतिमांकारयेच्छंभोश्चतुर्भुजसम

न्वितां।त्रिशूलखड्गवरदाभयहस्तां यथाक्रमात्।श्वेतवर्णां श्वेतपुष्पां श्वेतांबरवृषस्थितां।
त्रैयंबकेन मंत्रेण पूजां कुर्याद्यथाविधि।इंद्रश्चतुर्भुजो वज्रांकुशचापससायकः।रक्तवर्णो
गजारूढो यतइंद्रेति मंत्रतः।पितरः कृष्णवर्णाश्च चतुर्हस्ता विमानगाः।पद्मयक्षसूत्रकमंडलव
भयस्यैव धारिणः।ये चेह इति मंत्रेण पूजां कुर्यादनंतरं।आग्नेयीं दिशमारभ्य कुंभान्कोणे
षु विन्यसेत्।तन्मध्ये स्थापयेत्कुंभं शतच्छिद्रसमन्वितं।तेष्वेव पंचगव्यादींस्तत्तन्मंत्रैश्च निक्षि
पेत्।आदिशब्देन पंचमृत्पंचरत्नादीनि चतुर्दशीशांत्युक्तानि द्रष्टव्यानि।कल्पोक्तशांतिः क
र्तव्या कुर्याच्छीघ्रं स्वशक्तितः।शांतिं पठेदित्यर्थः।गोदानं वस्त्रदानं च सुवर्णं चोर्वरां शुभां।दश
दानानि चोक्तानि क्षीरमाज्यं गुडस्तथा।गोदानादेर्दशदानांतर्गतेर्द्विरनुष्ठानं।आज्यावेक्षण
मेतानि तत्तन्मंत्रैश्च कारयेत्।समिदाज्यचरोहोमं तिलमाषैश्च सर्षपैः।इतरेतरयोगद्वंद्वः

त्तिलमाषमिलितं द्रव्यं। अश्वत्थप्लक्षपालाशसमिद्भिः खादिरैः शुभैः। अष्टोत्तरशतं सैख्यैश्च
त्येकं जुहुयाद्द्विजः। त्र्यंबकेन मंत्रेण तिलान् व्याहृतिभिः पुनः। चतुर्भिः कलशैर्युक्तं बहत्कुंभस
मन्वितं। शांतिवत्सकलं कार्यमभिषेकं च कारयेत्। चतुर्दशीशांतिवदित्यर्थः। पितृमातृशिशूनां च
अभिषिंचेत्तु वारुणैः। शिशूनामभिषेकमित्यन्वयः। शंकरस्याभिषेकं च कुर्याद्ब्राह्मणभोजनं।
अन्येषां चैव सर्वेषां ब्राह्मणानां च तर्पणं। यथाशक्त्यनुसारेण द्विजवाचनपूर्वकं। द्विजवाचनं
स्वस्तिवाचनं। तत्पूर्वकं सर्वं कुर्यादित्यर्थः॥ ॥ इति सिनीवालीकुहूशांतिः॥ ॥ अथ प्रयोगः।
कर्तास्य बालस्य सिनीवालीकुहूजननसूचितसर्वारिष्टशांतिद्वारा श्रीपरमेश्वरप्रीत्यर्थं सिनी
वालीजननशांतिं करिष्य इति संकल्प्य गणेशपूजा पुण्याहवाचन नांदीश्राद्धाचार्यर्त्विग्वरणा
नि कुर्यात्। तत आचार्यः सर्षपान्विकीर्य भूमिं प्रोक्ष्य आग्नेयीमारभ्य विदिक्षु चतुः कुंभान्मध्ये

शतछिद्रं संस्थाप्य चतुर्षु पंचगव्यपंचामृतं च पल्लवं पंचरत्नं पंचत्वक् पंचधान्यं सुवर्णं निक्षिप्य श तछिद्रे पूर्णपात्रोपरि कर्षतदर्भैः कल्पितां रुद्रप्रतिमां संपूज्य तद्दक्षिणतो यत इंद्रेनेम इंद्रोनुष्टुप् इति मंत्रेणेंद्रमुत्तरस्यां ये चेह सां स्वः पितरस्त्रिष्टुप् इति मंत्रेण पितृप्रतिमां संपूज्य चतुर्षु कुंभेषु वरुणं संपूज्या नो भद्रा भद्रा अग्ने सहस्त्रशीर्षा कद्रुद्रायेति स्वशाखोक्ताः शांतीश्च पठित्वाग्निं प्रतिष्ठाप्य महानोवाह्यान्वारभ्यात् । चक्षुषी आज्येनेत्यंते ऽत्र प्रधानं रुद्रमश्वत्थप्लक्षपलाश खदिरसमिदाज्यचरुतिलमिश्रमाषैः प्रत्येकमष्टोत्तरशतसंख्ययाइंद्रं पितॄंश्च एतैर्द्रव्यैरष्टा विंशत्यष्टान्यतरसंख्यया प्रजापतिं तिलैर्व्याहृतिभिरष्टाविंशतिसंख्यया शेषेण स्विष्टकृतमि त्यादित्यागे कृते होमं कृत्वा बलिदानांते मूर्द्धनि मितिपूर्णाहुतिं कृत्वा शतछिद्रेण सर्वकुंभोद कैस्तत्वायामीत्यादिमंत्रैरभिषिक्त आचार्यादिभ्यो यजमानो दानानि दद्यात् । गवामंगेषु

तिग्मं।शरण्यं सर्वलोकानां लज्जाया रक्षणं परं।सुवेषधारि वस्त्र त्वमतः शांतिं प्रयच्छ मे॥इति वस्त्रं॥
हिरण्यगर्भगर्भस्थं मिति हिरण्यं।सर्वभूताश्रया भूमिर्वराहेण समुद्धृता।अनंतसस्यफलदा अ
तः शांतिं०॥इति भूमिं॥क्षीरजा तास्तथा शंखाक्षीराः स्मृतसंभवः।क्षीराक्षीरोदकी निश्वक्षीरे प्राण
स्य संभवः।तस्मात्क्षीरप्रदानेन अतः शांतिं०॥इति क्षीरं॥कामधेनुषु संभूतं सर्वक्रतुषु संस्थितं।दे
वानामाज्यमाहारमतः शांतिं०इत्याज्यं॥यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः।सामवेदस्तु
वेदानां महादेवस्तु योगिनां।प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा।तथा रसानां प्रवरः स
दैवेक्षुरसो मतः।मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदा।इति गुडं॥ततः कांस्यपात्रे रूपं रूपमिति
मंत्रेण सकुटुंबः स्वं प्रतिरूपं वीक्ष्य।आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतं।आज्यं सुराणामाहा
रस्त्वाज्ये देवाः प्रतिष्ठिताः।इत्याज्यपात्रं दत्वा दशदानानि दद्यात्॥तानि च।भूगोतिलहिरण्याज्यवा

सोधान्यं गुडनिव रौप्यं लवणमित्याहुर्दश दानानि पंडिताः। इति महादानविधौ उक्तानि। तेषु षण्णां मंत्रा
उक्ताः। महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः। तस्मादेषां प्रदानेन मम पापं व्यपोहत्विति तिला
न्। सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत्। प्राणिनां जीवनोपायमतः शं॰। धान्यं। प्रीतिर्यतः पितृणां
च विष्णुशंकरयोः सदा। शिवनेत्रोद्भवं रूप्यमतः शां॰। । इति रूप्यं। यस्मादन्नरसाः सर्वे नोत्कृष्टा
लवणं विना। शंभोः प्रीतिकरं नित्यम॰। इति लवणं। एतानि दक्षिणांते देयानि। अथ क्रमेण पाठक्रम
स्य बाधात्। अत एवांते दक्षिणानुक्तिः। केचिद्दक्षिणामपि पाठक्रमान्मध्ये कुर्वंति। ततो रुद्रस्यो
त्तरपूजां कृत्वा विसृज्याचार्यहस्ते दत्वाग्निं विसृज्य पूर्णतां वाचयित्वा विप्रान्भोजयेत्। सिनीवा
लीकुह्वोर्दर्शशांत्या समुच्चयः। अव्यभिचारादिति केचित्। तत्वं तु सिनीवाल्यामेव यं शांतिः। कु राम
ह्वां तोषमात्रमुक्तं। दर्शः सूर्येंदुसंगम इति कुह्वा एव दर्शत्वात्तत्र दर्शशांतिरेवेति। केचित्तु दर्शे ष्वस ॥६८॥

न्निपाते पथि संदष्टे श्वानरीवल्कुक्कांदयोः समुच्चयमाऊः। नात्र गोमुखप्रसवः॥ ॥इति नारायणभट्टसुतरामकृष्णभट्टसुतकमलाकरभट्टकृतः सिनीवालीकुहूशांतिप्रयोगः॥७॥ ॥अथ दर्शशांतिः॥ ॥नारदः॥ अथातो दर्शजातानां मातापित्रोर्दरिद्रता। तद्दोषपरिहारार्थं शांतिं वक्ष्यामि ते सदा। पुण्याहं वाचयित्वादौ ऋतुसंकल्पपूर्वकं। कुंडं वा मंडलं कुर्यात्तद्देशे स्थापयेद्घटं। मंडलं सर्वतोभद्रं। तत्कुंभे निक्षिपेद्द्रव्यं दधिक्षीरघृतादिकं। आदिशब्दात्पंचगोमयं। न्यग्रोधोदुंबराश्वत्थाः सचूतानिंबकास्तथा। सचूताः प्लक्षकास्तथेति प्रयोगपारिजाते पाठः। एतेषां वृक्षमूलानां त्वगादीन्पल्लवांस्तथा। पंचरत्नानि निक्षिप्य वस्त्रयुग्मेन वेष्टयेत्। सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयांतु यजमानस्य दुरितक्षयकारकाः। आपो हि ष्ठा त्वं चे नाथ कयान श्चित्र इत्यृचा। यत्किंचेदम्बचा चैव समुद्रज्येष्ठ इत्यृचा। अभिमंत्र्योदकं पश्चादग्नेः पूर्वप्रदेशके। उदकमभिमंत्र्य पश्चा

दर्शदेवतांस्थापयेदित्यन्वयः॥ मंडलं कुर्यादिति यदुक्तं तदाह। हरिद्रं रक्तकं चैव कृष्णं श्वेतं च नीलकं।
एतेषां तंडुलैश्चैव सर्वतोभद्रमुद्धरेत्। दर्शस्य देवतायाश्च सोमसूर्यस्य रूपकं। प्रतिमां स्वर्णजां नि
त्यं राजतीं ताम्रजां तथा। दर्शदेवतारूपसोमसूर्यस्वरूपप्रतिमां स्थापयेदित्यमेदेनान्वयः। कु
त्रापि तत्त्रापीदं। सर्वतोभद्रमध्ये च स्थापयेद्दर्शदेवतां। ग्रहवर्गे दर्शयुग्मं तद्वर्गे गंधपुष्प वस्त्र
कं। आप्यायस्वेति मंत्रेण सविता पश्चात्तथैव च। उपचारैः समाराध्य ततो होमं समाचरेत्। कृ
त्वा वह्निं प्रतिष्ठाप्य कृतसंकल्पमीदृशं। आयुरारोग्यसिध्यर्थं सर्वानिष्टप्रशांतये। पुत्रस्य दर्श
जननदोषनिर्हरणाय च। मातापित्रोः कुमारस्य सर्वानिष्टप्रशांतये। तेषामायुःश्रियै चैव शां
ति होमं करोम्यहं। समिधश्च चरुद्रव्यं क्रमेणाज्ययाहुती। अनेन सविता मंत्रेण सोमो धेनुं च मंत्र राम
तः। एतैर्मंत्रैश्च प्रत्येकं अनेनाष्टोत्तरं शतं। एतैरिति बहुवचनात् पितृदैत्यैर्वा होमोप्यष्टोत्तरशतं। ॥७०॥

दर्शस्यदेवताहोमअष्टाविंशतिसंख्यया।होममेवंकृत्वाथविदध्यात्त्वाभिषेचनं।श्रीसूक्तमा
युष्यसूक्तंचसमुद्रज्येष्ठइत्यृचा।एतैर्मंत्रैरभिषेकंमातापित्रोःशिशोस्तथा।ततःस्विष्टकृदादि
स्याद्धोमशेषंसमापयेत्।हिरण्यरजतंचैवकृष्णांधेनुंसदक्षिणां।अन्येभ्योपियथाशक्तिदा
तव्यादक्षिणातथा।ब्राह्मणान्भोजयेत्तत्रकारयेत्स्वस्तिवाचनं॥ ॥इतिनारदोक्तादर्शशं
तिः॥ ॥अथप्रयोगः॥देशकालौसंकीर्त्यास्यबालस्यदर्शजननसूचितारिष्टनिवृत्तिद्वारा
श्रीपरमेश्वरप्रीत्यर्थंदर्शजननशांतिंकरिष्येइतिसंकल्प्यगणेशपूजास्वस्तिवाचननांदीश्रा
द्धाचार्यर्त्विग्वरणानिकुर्यात्।ततःआचार्यःकुंडात्स्थंडिलाद्वापूर्वेसर्वतोभद्रेकुंभंसंस्थाप्यतत्र
पंचगव्यंन्यग्रोधोदुंबराश्वत्थचूतनिंबवृक्षमूलानांत्वचःपल्लवांश्चपंचरत्नानिनिक्षिप्य
वस्त्रयुग्मेनवेष्ट्यसर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः।आयांतुयजमानस्यदुरितक्षय

कारका इति मंत्रेण आपो हिष्ठेति तच्चेन कया नश्चित्र आभुवत् इति मंत्रेण यत्किंचेदं समुद्रज्येष्ठा इति चोदकमभिमंत्र्य
पूर्णपात्रे आप्यायस्वेति सोमं। सवितापश्चात् सवितृपुरस्तादिति भागः सविता त्रिष्टुप्। इति सूर्यमावाह्य
गंधपुष्पैः पूजयेत्। केचित् पितृमध्ये दक्षिणोत्तरयोश्च सोमसूर्यौ पूजयंति। तत्र मूलं
चिंत्यं। ततोऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात्। अत्र प्रधानं ग्रहान्सोमं सूर्यं चाष्टोत्तरशताष्टाविं
शत्यन्यतमसंख्यया समिच्चर्वाज्याहुतिभिः शेषेण स्विष्टकृतमित्याज्यभागांते। आयुरारोग्य
सिध्यर्थं सर्वारिष्टप्रशांतये। पुत्रस्य दर्शजननदोषनिर्हरणाय च। मातापित्रोः कुमारस्य सर्वा
रिष्टप्रशांतये। तेषामायुःश्रियै चैव शांतिहोमं करोम्यहमिति मंत्राभ्यां होमसंकल्पं कृत्वा आकृ
ष्णेनेति सवितृमंत्रेण सोमोधेनुमिति मंत्राभ्यामष्टोत्तरशतं पितृभ्यश्चेदं पितृभ्य इत्यष्टाविंश
तिसंख्यया हुत्वा होमांते चतुर्दशी विधिना हिरण्यवर्णामिति सूक्तेन आयुष्यमिति सूक्तेन

राम ॥७१॥

समुद्रज्येष्ठा इत्यनया च ऋचा माता पितृ शिशून् अभिषिच्य स्विष्टकृदादि बलिदानांते पूर्णाहुतिं हु
त्वा शेषं समाप्याचार्याय यथाशक्ति रजतं हिरण्यं कृष्णां धेनुं च सदक्षिणां दत्वा ऋत्विग्भ्यः यथाश
क्ति दक्षिणां दत्वोत्तरपूजां विधाय विसृज्याचार्याय प्रतिपाद्याग्निं विसृज्य ब्राह्मणान् भोजयित्वा
शांतिं पाठयित्वा स्वस्तिवाचनं कुर्यादिति ॥ ॥ इति नारायणभट्टसूनु रामकृष्णभट्टात्मज कमला
करभट्टकृतो दर्शशांतिप्रयोगः ॥ ॥ इति तिथिशांतयः ॥ ॥ अथ नक्षत्रशांतयः ॥ तत्रादौ ज्येष्ठा
शांतिः ॥ तदुक्तं शौनकेन ब्रह्मयामले ॥ ज्येष्ठादौ जननी माता द्वितीये जननीपिता । तृतीये जननी
भ्राता स्वयं माता चतुर्थके ॥ आत्मानं पंचमे हंति षष्ठे गोत्रक्षयो भवेत् । सप्तमे चोभयकुलं
ज्येष्ठभ्रातरमष्टमे । नवमे श्वशुरं हंति सर्वं हंति दशांशकः ॥ वसिष्ठः ॥ सुरेशताराजनिता धवा
ग्रजं हि देवताराजनिता तु देवरं । पुरंदरर्क्षे जनितः सुतस्तथा स्वस्याग्रजं हंति न पुत्रिका यदि ॥

विशेषेणनिर्णयसिंधौज्ञेयः॥ ॥ प्रयोगपारिजातेरद्गार्ग्यः॥ सुखासीनंमुनिश्रेष्ठंगर्गमुनिगणा
न्वितं। कृतांजलिपुटोभूत्वापप्रच्छप्रतिशौनकः॥ ज्येष्ठानक्षत्रसंभूतगंडदोषविनिर्णयं। तस्यशांति
विधानंचयथावत्कथयाम्यहं। घटिकेकाचमैत्रांतेज्येष्ठादौघटिकाद्वयं। तयोःसंधिरितिज्ञेयंअशुभं
गंडंसमीरितं। प्रथमेचद्वितीयेचज्येष्ठर्क्षेचतृतीयके। पादत्रयेजातनरोज्येष्ठोप्यत्रप्रजायते। ज्येष्ठो
त्यपादजातस्तुपितुःस्वस्यविनाशनः। तृतीयेकन्यकाजाताहंतिश्रीघ्रंधवाग्रजं। तच्छांतिंतस्यव
क्ष्यामिगंडदोषप्रशांतये। सुदिनेशुभनक्षत्रेचंद्रताराबलान्विते। सूतकांतेतथाकुर्याज्ज्येष्ठाशां
तिंविधानतः। कुर्याच्छचीपतिंरम्यंदेवेंद्रंसुरनायकं। कर्षमात्रसुवर्णेनकर्षार्धेनाथपादतः॥
तद्विधानंप्रकुर्वीतवित्तशाठ्यंनकारयेत्। शालितंडुलसंपूर्णकुंभस्योपरिपूरयेत्। इंद्रायेंद्रोमरु	राम
त्वतइतिमंत्रेणभाग्यतः। गंधपुष्पैश्चधूपदीपैर्नानाभक्ष्यनिवेदनैः। पूजयेद्विधिनाविप्रलोकपा	॥७२॥

लगणान्वितं। रक्तवस्त्रद्वयोपेतं पूजयेत्सुरनायकं। तत्र संस्थापयेत्कुंभान् चतुर्दिक्षु विशेष
तः। तन्मध्ये स्थापयेत्कुंभं शतछिद्रसमन्वितं। पुण्योदकसमायुक्तान् वस्त्रयुग्मेन वेष्टितान्॥
कुंभेषु विन्यसेद्धीमान् पंचगव्यं समंत्रकं। पंचामृतं पंचरत्नं मृत्तिकापंचसंख्यकाः। पंचवल्कक
षायांश्च पंचपल्लवकांस्तथा। सुवर्णं कुशदूर्वाश्च शतौषधिविनिक्षिपेत्। पूजयेद्वारुणैर्मंत्रैः
कुंभांस्तत्र प्रयत्नतः। त्वंनोअग्ने जपेत्प्राचीं सत्वंनोपि द्वितीयकं। समुद्रज्येष्ठा इति च इमं मे गंगे
चतुर्थकं। पूजयेद्वस्त्रयुग्माद्यैश्चतुरः कलशानपि। कलशस्थान् वरुणानपीत्यर्थः। जपं कुर्युः
प्रयत्नेन मंत्रैरेभिर्द्विजोत्तमाः। आनोभद्रा जपं चाद्ये भद्रा अग्ने द्वितीयकं। तृतीयं पावमानं स्
क्तं कद्रुद्राय चतुर्थकं। इंद्रसूक्तं रुद्रजाप्यं जपेन्मृत्युंजयं ततः। इंद्र सूक्तं यो जात एवेत्यादि ज्ञेयं।
इंद्रं संपूज्य देवेंद्रं वरुणं कुंभसंस्थितं। आचार्यो मूलमंत्रेण जपं कुर्याद्विशेषतः। सुसंकल्प्य वि

धानेनहोमकर्मततश्चरेत्।समिद्भिर्ब्रह्मवृक्षस्यशतमष्टोत्तरंतथा।सर्पिषाचरुणाचैवमूलमंत्रे
णवाग्यतः।कृत्वेत्थंप्राप्यंचतेनैवयतश्चरुभये।तिलान्व्याहृतिभिर्हुत्वाशतमष्टोत्तरंपृथक्।भा
र्यशिष्यसमोपेतयजमानेविशेषतः।अभिषेकंप्रकुर्वीतसकैवारुणसंज्ञितैः।समुद्रज्येष्ठेति
मंत्रैरिमंमेवरुणस्तथा।द्यौःशंतेत्यादिभिर्मंत्रैरभिषेकंसमाचरेत्।अभिषेकनिवृत्तौतुयजमा
नःसमाहितः।शुक्लांबराणिधृत्वाथकुर्याद्राज्यावलोकनं।रूपंरूपेतिमंत्रेणचित्रंतैस्करेवच॥
देवतापुरतःस्थित्वाधूपदीपनिवेदनं।दध्यात्वाचमनंसम्यक्तांबूलार्घ्यंतथैवच।नमस्तेसुरना
थायनमस्तुभ्यंशचीपते।गृहाणार्घ्यंमयादत्तंगंधदोषप्रशांतये।कार्यंयत्तुकृतंमेकारितंय
त्फलंशुभं।लब्धातुतत्फलंसर्वंदेवेंद्रायसमर्पयेत्।शुभमघमवित्रिभ्यःश्रेयसंपत्न्यालेख्यंद्रा
यसमर्पयेत्।आचार्यायप्रवर्गांस्थातुसुशीलांचपयस्विनीं।रक्तवर्णांवत्सयुतांसर्वालंकारभू

षितां। वस्त्रयुग्मापिधानं च यथाविभवसारतः। यक्षगंधर्वसिद्धैश्च पूजितो सि शचीपते। दाने
नानेन देवेश गंडदोषं विनाशय। अष्टोत्तर शतं संख्यं कुर्याद्ब्राह्मणभोजनं। तेभ्योपि दक्षिणां
दत्वा प्रणिपत्य क्षमापयेत्। इमां कृत्वा ज्येष्ठाशांतिं यथाविध्युक्तमार्गतः। गंडदोषं विनिर्जित्यआ
युष्मान् जायते नरः॥ इत्युक्तं वृद्धगार्ग्येण शौनकाय विशेषतः। ज्येष्ठानक्षत्र संभूतं गंडदोष प्रशां
तये। अज्ञानाद्यथवाज्ञानाद्वैकल्यात्साधनस्य च। यन्न्यूनमतिरिक्तं वा तत्सर्वं क्षंतुमर्हसि॥ ॥
इति ज्येष्ठानक्षत्र शांतिः॥ ॥ अथ प्रयोगः॥ गोमुखप्रसवं कृत्वा देशकालौ संकीर्त्य अस्य शि
शोः ज्येष्ठाजनन सूचित सकलारिष्ट शांत्यर्थं ज्येष्ठाजनन शांतिं करिष्ये इति संकल्प्य गणेश पूजा
पुण्याहवाचन नांदीश्राद्धाचार्य ऋत्विग्वरणानि कुर्यात्। तत आचार्यो मही द्यौरिति भूमिं स्पृष्ट्वा ओ
षधयः समिति यवान्निक्षिप्य आकलशेष्विति कलशं संस्थाप्य गंधेनाभ्यर्च्य शालि तंडुलैः कलशं

पूरयित्वापूर्णादर्वीइतिपूर्णपात्रंनिधायतदुपरिकूर्चंतदुपरिकृतामिंद्रप्रतिमामिंद्रायेंद्रोमरुत्व
नइतींद्रंलोकपालांश्चावाह्यपूजयेत्।ततःपूर्वादिदिक्षुचतुरःकुंभान्मध्येशानदिक्षुंसंस्थाप्यादि
कुंभेषुपंचगव्यंपंचामृतंपंचरत्नंपंचमृत्तिकाःपंचवृक्षकषायान्पंचपल्लवसुवर्णकुशदूर्वाःश
तौषधीश्चक्षिप्त्वातदलाभेविष्णुक्रांतासहदेवीतुलसीचशतावरीइत्युक्ताओषधीःक्षिप्त्वाव
स्त्रयुग्मेनवेष्टयित्वातेषुत्वंनोअग्नेसत्वंनोअग्नेसमुद्रज्येष्ठाइमंमेगंगेइतिक्रमेणवरुणमा
त४ वाह्यपूजयेत्।ततःपूर्वादिकलशेषुआनोभद्राःसूक्तंभक्ताअग्नेइतिसूक्तंपुरुषसूक्तंकद्रुद्रायेतिसू
क्तंचक्रमाज्जपित्वायोजातएवप्रथमोमनस्वानितिइंद्रसूक्तंरुद्रंत्र्यंबकंचजप्त्वाइंद्रायेंद्रोय
तइंद्रभयामहइतिचाष्टशतमष्टाविंशतिमष्टौवाजुहुयुः।आचार्योइंद्रायेंद्रोइतिमंत्रंशतंयाज राम
पेत्।यतइंद्रभयामहइतिमंत्रंच।ततोग्निंग्रहांश्चप्रतिष्ठाप्यान्वाद्ध्यात्।अत्रप्रधानेइंद्रंपल

शासमित्साज्यचरुद्रव्यैरष्टोत्तरशतसंख्ययाइंद्रायेंद्रोमरुत्वतइति मंत्रेणप्रजापतिंतिलद्रव्येण
घृशतंव्याहृतिभिःशेषेणस्विष्टकृतमित्यादिवल्यंतेपूर्णाहुतिंपूर्णपात्रविमोचनंकृत्वानहिते
क्षत्रमित्यादिवारुणसूक्तैस्त्रिभिःनहितेक्षत्रमितिदशर्चस्याजीगर्तिःशुनःशेपोवरुणस्त्रिष्टु
प्।यच्चिद्धीत्येकविंशत्यर्चस्याजीगर्तिःशुनःशेपोवरुणोगायत्री।इदंकवेरित्येकादशर्चस्यगृ
त्समदोवरुणस्त्रिष्टुप्।ततःसमुद्रज्येष्ठेतिचतुर्भिरिमंमेवरुणेत्यनयाद्यौःशांतेतिचाभिषिंचे
त्।ततःशुक्लांबरधरोयजमानोरूपंरूपेतिमंत्रेणचित्रंतच्चक्षुरित्येताभ्यांचाज्यमवलोक्यतत्
पात्रंसदक्षिणंब्राह्मणायदत्वेंद्रंसंपूज्य।नमस्तेसुरनाथायनमस्तुभ्यंशचीपते।गृहाणार्घ्यंम
याद्त्तंगंडदोषप्रशांतये।इत्यर्घ्यंदत्वाआचार्यादिभ्योहोमादिऊन्यंश्रेयोगृहीत्वाइंद्रायसमर्प्या
चार्य्यायरक्तवर्णवस्त्रद्वयसर्वालंकारयुतांसवत्सांगांयक्षगंधर्वसिद्धैश्चपूजितोसिशची

पते।दानेनानेन देवेश गंडदोषं विनाशयेति मंत्रेण दद्यात्। ततऋत्विग्भ्योन्येभ्यश्च दक्षिणां द
त्वा उत्तरपूजां विधाय विसृज्य अज्ञानाद्वाथवा ज्ञानाद्यत्कल्याणसाधनस्य च। यन्न्यूनमतिरिक्तं
वा तत्सर्वं क्षंतुमर्हसीति संप्रार्थ्याचार्याय दत्वाग्निं संपूज्य विभूतिं धृत्वा विसृज्याष्टशतं वि
प्रान्सदक्षिणां संभोज्याशिषं गृहीत्वा भुंजीतेति॥ ॥इति नारायणभट्टसुतरामकृष्णभट्टसूनु
कमलाकरभट्टकृत ज्येष्ठाशांतिप्रयोगः॥ ॥अथ मूलशांतिः॥ तत्रादौ तदुत्पत्तिदोषः॥ भ
ट्टाः॥ अभुक्तमूलसंभवं परित्यजेत्तु बालकं। समाष्टकं पिताथवा न तन्मुखं विलोकयेत्॥
तदाद्यपादके पिता विपद्यते जनन्यथा। तृतीयके धनक्षयश्चतुर्थकः शुभावहः। प्रतीपमे
त्सपादनः फलं तदेव सार्पभे। अभुक्तमूलमाह वृद्धवसिष्ठः। ज्येष्ठांते घटिका चैका मूलादौ घ
टिकाद्वयं। अभुक्तमूलमित्याहुर्जातं तत्र विवर्जयेत्। बृहस्पतिस्तु। ज्येष्ठांते घटिकार्द्धं तु मूला

दोघटिकार्द्धकं। तयोरंतर्गतानाडी अभुक्तंमूलमुच्यते। वृहन्नारदस्तु। अभुक्तमूलगंडांतं घटिकानां चतुष्टयं। तत्रैवांत्यघटीद्वंद्वं मूलाद्यं द्वंद्वमेव चेत्याह। कश्यपसंहितायां त्वन्यथा मूलफलमुक्तं। मूलाद्यपादजो हंति पितरं तु द्वितीयजः। मातरं स्वं तृतीयोर्थान्सुहृदं तु तुरीयजः। फलं तदेवसार्पर्क्षे प्रतीयं त्वत्यपादतः। परिशिष्टे कात्यायनोपि। प्रथमे पितुर्नेष्टो द्वितीये मातुः तृतीये धनधान्यस्य चतुर्थे कुलशोकावहः स्वयं पुण्यभागी स्यादिति। वसिष्ठः। तोरीयजः शुभकरः फलमेतद्देववैलोमतो भुजगधिष्ण्यभवस्य सर्वं। पित्रादेः स्वस्य च शुभकर इति ज्ञेयं। जपार्णवे। मूलं स्तंभस्त्वचाशाखा पत्रं पुष्पं फलं शिखा। देवाश्च मुनयश्चैव दिशश्च वसवस्तथा। नंदबाणागरुद्रारसा मूलभेदः प्रकीर्तिताः। मूले मूलविनाशाय स्तंभे हानिर्धनक्षयः। त्वचि भ्रात्विनाशाय शाखायां तु विनाशाहता। पत्रे सपरिवारः स्यात् पुष्पे पुष्पवल्लभः। फले बुलभतेरा

ज्येंशिखायामल्पजीवितं।अन्यत्रत्वन्यथोक्तं।मूलेसप्तघटीषुमूलहननंस्तंभेषष्ठसुखक्षयं।त्व
ग्र. ग्दिवंधुविनाशनंचविटपेरुद्रेहतोमातुलः।पत्रेकैःसुकृतीतुबाणकुसुमेमंत्रीफलेसागरैराज्ञा
वह्निद्विशिखाल्पमायुरितिसन्मूलांघ्रिपेस्यात्फलं।तथा।वृषालिसिंहेषुघटेषुमूलंदिविस्थितंयुग्म
तुलांगनांत्ये।पातललग्नंमेषधनुःकुलीरनक्रेषुमर्त्येक्षितिसंस्मरंति।एतल्लग्नफलं।स्वर्गेमूलेभ
वेद्राज्यंपातालेचधनागमं।मृत्युलोकेयदामूलंतदाशून्यंसमादिशेत्।वसिष्ठः।नैर्ऋत्यभोद्भूत
सुतःसुतावाक्षिप्रादवश्यंश्वशुरंनिहंति।तदंत्यपादेजनितोनहंतितस्याक्रमेण।हिभवेकलत्रं।।
विशेषोमत्कृतेनिर्णयसिंधौशेषः।।वसिष्ठः।।व्यतीपातेंगहानिस्यात्परिघेमृत्युमादिशेत्।वैधृतौपि
तृहानिःस्यान्नष्टेंशवंधतांव्रजेत्।मूलेसमूलनाशःस्यात्कुलनाशोधृतौभवेत्।विरतांगेचहीनेच
संध्ययोरुभयोरपि।पर्वण्यपिप्रसूतौचसर्वारिष्टभयप्रदाः।नक्षत्रसदृंतजातश्चपादजातस्तथैव ॥७६॥

च। तस्माच्छांतिं प्रकुर्वीत ग्रहाणां क्रूरचेतसामिति। व्यतीपातादौ शांतिग्रहमखयोः समुच्चयः।
अत्र यत्न तत्करणे ग्रहमखविधानं तदनारभ्याधीतस्य सामस्त्यशास्यभित्रविंशत्प्रकरणस्थेनैवोप
संहारादितरेषु शांतिकेषु ग्रहमखानावश्यकत्वर्थं॥ ॥अथ शांतिः॥ शौनकः। अथातः संप्रवक्ष्यामि
मूलजातहिताय च। मातापित्रोर्धनस्यापि कुलशांतिहिताय च। त्यागे वा मूलजातस्य स्यात् दृष्टादि
त्वदर्शनं। अभुक्तमूलजातानां परित्यागो विधीयते। अदर्शनाद्वाथ पितुः स तु तिष्ठेत्समाष्टकं। ए
वं चडहितुर्ज्ञेयं मूलजातफलं बुधैः। मुख्यकालं प्रवक्ष्यामि शांतिहोमस्य यत्नतः। जातस्य द्वादशा
हे तु जन्मर्क्षे वा शुभे दिने। समाष्टके द्वादशाहे कुर्याद्धि शांतिमादरात्। अष्टवर्षेत्तरं द्वादशाह इत्यर्थः।
सुसमे पुण्यदेशे तु मंडपं कारयेद्बुधः। पुण्यगिर्भिर्मंत्रितैस्तोयैः प्रोक्षितायां क्षितौ ततः। ऋत्विजस्तु
कश्यपेनोक्ताः। ब्राह्मणाः श्रोत्रियाश्चाष्टौ द्वादशात्वयपोऽरोत्ति। तत्रोदकुंभं सुश्लक्ष्णं रक्तवस्त्रेण

विवर्जितं। अलक्ष्ममूलं निर्णिक्तं पूरयेन्निर्मलांभसा। निर्णिक्तं धौतं। वस्त्रावगुंठितं कुर्यात्तत्पूरये
त्तीर्थवारिणा। कूर्चं हेमसमायुक्तं चूतपल्लवसंयुतं। स्वस्तिकोपरि विन्यस्य क्षीरिद्रुमसपल्लवैः।
१२ द्रोणव्रीहींश्च निक्षिप्य ईशान्यां निधापयेत्। पंचरत्नानि निक्षिप्य सर्वौषधिसमन्वितं। अर्चितं
गंधपुष्पाद्यैः श्रीरुद्रं च स्मरन् जपेत्। अत्र च पूर्णपात्रोपरि रुद्रप्रतिमां पूजयित्वा जपः कर्त्तव्यः।
तत्कुंभवस्त्रप्रतिमां तस्मै दद्यात्प्रयत्नतः इत्यये दर्शनात्। षडंगसहितं सम्यक्तं जपेद्रुद्रसंख्यया।
बह्वृचो रुद्रसूक्तैर्वा छंदोगो रुद्रसामभिः। एकादशाष्टत्रिंशैक संख्यया शक्तितो जपेत्। इयं च सं
ख्या सूक्तेषु सामसु। तत्राऽप्रतिरथं सूक्तं शतरुद्रानुवाककं। शतरुद्रानुवाकं त्वमग्ने रुद्र इति।
रक्षामंत्रं तथा पुण्यं राक्षोघ्नं च तथा जपेत्। रक्षामंत्रो रक्षाणो अग्न इत्येकार्चक। एतेषामप्येकाद
शादिसंख्यया जपः। त्र्यंबकं जपेत् सम्यगष्टोत्तरसहस्रकं। एकवारं तथा चापि पावमानीः स्पृश

ञ्जपेत्।जपस्यपंचकुंभाश्चद्वयंवातदलाभतः।रुद्रकुंभोनिर्ऋतिकुंभश्चभिन्नाः।एवंसप्तकुंभाः।
रुद्रकुंभोनिर्ऋतिमध्येईशानादिकोणचतुष्केचत्वारइतिपंचवा।कल्पसंहितायांतुमध्येशत
छिद्रःकोणेषुचत्वारः।एवंपंचकुंभाःईशानादिचतुष्कोणेषुव्रणान्जलपरिपूरितान्।पूर्वोक्तद्र
व्यसंयुक्तान्स्थापयेत्कृष्णवर्णकान्।शतछिद्रंबृहत्कुंभंस्थापयेत्तंडुलोपरि।तत्रपूर्वादितःसूक्तेजप
स्तनेवोक्तः।रुद्रेणक्रमशोभद्राअग्नेसूक्तेनभक्तितः।आनोभद्राअनेनैवपुरुषसूक्तेनचार्चयेत्।
मोच नीमूलऊमित्यष्टोवाक्यान्येकैकोजपेत्।कुंभद्वयपक्षेचतुःप्रस्थवर्णमुक्तंकात्यायनेन।
द्वितीयोदकुंभंकृत्वाचतुःप्रस्थवर्णसंयुक्तमुपरिष्टान्मूलानिधारयेद्वंशपात्रेकृत्वावस्त्रेबध्वे
ति।पंचकुंभपक्षेपिमध्येशतमूलानि।कुंभद्वयमाहश्रीरुद्रस्यैककुंभश्चसर्वसूक्तानितत्रतु।तथा
न्यंचशुभंकुंभंपूर्वोक्तैर्लक्षणैर्युतं।चतुःप्रस्थवर्णंकुर्यात्पंचवक्त्रंतथैवच।वस्त्रावगुंठितंकु

र्यसूरयेत्तीर्थवारिणा। पंचरत्नसमायुक्तमाम्रपल्लवसंयुतं। गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगो
कुलात्। राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत्। कुंभस्य नैरृते देशे होमस्थानं प्रकल्पयेत्। गो
मयालेपिते देशे कुर्यात्स्थंडिलमुत्तमं। कश्यपेन तु मंडपं चतुरस्रं च चतुर्हस्तप्रमाणतः। चतुर्द्वा
रसमायुक्तं तोरणाद्यैरलंकृतं। पूर्वोक्तलक्षणोपेतं कुंडमीशानतो वहिरिस्फक्तं। कृत्वाग्निमुख
पर्यंतं मुल्लेखादिस्वशाखतः। पूर्णपात्रनिधानांतं कृत्वा पूजां समारभेत्। नक्षत्रदेवतारूपं सु
वर्णेन प्रयत्नतः। निष्कमानेन चार्धेन पादेनाथ स्वशक्तितः। प्रतिमां लक्षणे नैकां कारयित्वा वि
चक्षणः। पद्मामूल्यं सुवर्णस्य स्थापयित्वा प्रपूजयेत्। संस्मरेन्निरृतिं श्यामं सुमुखं नरवाहनं।
रक्षोन्वितं खड्गहस्तं दिव्याभरणभूषितं। ज्योतिर्निबंधे तु। मूलरूपं विधातव्यं श्वेतं कुणपवा राम
हनं। खड्गखेटधरं चोग्रं द्विभुजं च वृकाननमित्युक्तं। प्रतिमापूजनार्थाय वस्त्रयुग्मं प्रकल्पयेत्॥७८॥

पंकजं कारयेद्धैमोरक्ताभैव्रीहितंडुलैः। चतुर्विंशद्दलोपेतं शुक्लैर्वा कर्णिकान्वितं। तस्योपरिन्य
सेत्पात्रं स्वर्णं वा रौप्यमन्मयं। शुद्धवस्त्रेण संछाद्य तत्र मूलानि निक्षिपेत्। मूलानि शत मूलानि।
विष्णुक्रांता सहदेवी तुलसी तु शतावरी। मूलानीमानि गृह्णीयाच्छतालाभे विशेषतः। स्थापये
त्कर्णिकामध्ये वस्त्रगंधाद्यलंकृतं। कुर्वन्हेमजलोपेतं कुंकुमौषधिसंयुतं। कूर्चोदर्भस्तंबः। एवंवि
धं कुंभं न्यसेदित्यर्थः। कुंभोपरि न्यसेद्विद्वान्मूलनक्षत्रदेवतां। अधिप्रत्यधिदेवौ च दक्षिणोत्तरयोः
क्रमात्। अधिदेवं यजेद्रौद्रे ज्येष्ठानक्षत्रदेवतां। तथा प्रत्यधिपाढां च पूजयेद्देवतां शुभां। उत्तरा
षाढनक्षत्राया अनूराधांतमर्चयेत्। भूमिस्थ चतुर्विंशतिदलेषु उत्तराषाढाद्यानि चतुर्विंशति
नक्षत्राणि पूर्वादितः स्थाप्यानीत्यर्थः। ऐंद्रादीशानपर्यंतं पूजयेत्स्वस्वनाममतः। स्वलिंगोक्तैश्च त
न्मंत्रैः प्रधानादीन्प्रपूजयेत्। कश्यपेन तु। सुवर्णेन प्रमाणेन तदर्धार्द्धेन वा पुनः। यथा वित्तानुसारे

णप्रतिमां निर्ऋतेः सुधीः ।उदुंबर वटाश्वत्थप्लक्षाम्रत्वक्सपल्लवं ।शतौषधीमूलशंखं नवरत्ना
निमृत्तिकाः ।पंचामृतांबु सद्बीज कुंकुमं रोचनं फलं ।कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेय चंदनं ।वचाक
चोरकं मुस्ता सर्वौषध्यो दश स्मृताः ।गजाश्व रथ्या वल्मीक संगमस्थान संभवाः ।ह्रदगो राज
नगर द्वारतश्चाष्टमृत्तिकाः ।तिलमाषव्रीहियवगोधूमाणुप्रियंगवः ।चणकैः सहिताश्चाष्टौ
सद्बीजाख्यानि सर्वदा ।दधिमध्वक्षतैः कुंभान्च स्थैरेत्तल्लिंगमंत्रकैः ।मोषुणश्चेतिमंत्रेणनिर्ऋतिं
चार्चयेत्तत इत्यृक्तं ।पंचामृतेनसंस्नाप्यआवाह्याथसमर्चयेत् ।उपचारैः षोडशभिर्यद्वा पंचोप
चारकैः ।रक्तचंदनगंधाद्यैः पुष्पैः कृष्णसितादिभिः ।मेषशृंगादिधूपैश्च घृतदीपैस्तथैव च ।सुरा
पोलिकमांसाद्यैर्नैवेद्यैर्भोजनादिभिः ।नैवेद्यैश्चोदनादिभिरिति वा पाठः ।मत्स्यमांससुरादी
नि ब्राह्मणानां विवर्जयेत् ।सुरास्थाने प्रदातव्यं क्षीरं सैंधवसंयुतं ।पायसं लवणोपेतं मांसस्था

नेप्रकल्पयेत्। उक्तमर्घाद्यमस्मैतुयथालाभंसमर्पयेत्। पुष्पांतंतुसमभ्यर्च्यहोमंकुर्याद्यथो
दितं। निर्वापप्रोक्षणादीन्निचरोः कुर्याद्यथाविधि। हविर्गृहीत्वाविधिवन्मंत्रैरर्कस्येच्चक्रमाज्जुनेत्। त
पायसंघृतसंमिश्रंजुनेदष्टोत्तरंशतं। समिदाज्यचरून्पश्चाद्भक्तितः संख्ययाजुनेत्। अधिदेव
तयोश्चैवंजुहुयात्स्वस्वमंत्रतः। चतुर्थ्यंतैर्नमोंतैश्चस्वाहांतैश्चस्वमंत्रकैः। नक्षत्रदेवताभ्यश्च
पायसेनतुहोमयेत्। स्वमंत्रैरष्टौवाश्येयर्जुषेनाभिमंत्रैर्वा॥ रुद्रगुधेतिपंचदशाग्निंजुहुयात्क
सरंततः। अत्रऋग्भिरितिग्रहणात्सत्यस्वंहोमः। यत्रतुसूक्तेनेतिग्रहणंयथाश्रीसूक्तेनेत्यादौ
तत्रसूक्तेनैवहोमोयुक्तः संप्रदायस्तुप्रत्यृचं। गायत्र्याजातवेदसेत्र्यंबकमितिक्रमात्। सीरा
युञ्जंतितामग्निवांस्तोष्यत्यग्निमेवच। तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टीं॥
दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेनमः इतिशेषः। क्षेत्रस्यपतिनागणानाग्निंहुतंतथैवच।

श्रीसूक्तेनतथाविद्वान्स मिदाज्यचरूत्क्रमात्।अष्टोत्तरशतैर्वाथअष्टाविंशतिभिः क्रमात्।अष्टा
दृसंख्ययावापिजुहुयाद्भक्तितोबुधः।त्वन्नःसोमेनपायसंजुहुयात्तुत्रयोदश।चतुर्गृहीतमाज्यंच
यातेरुद्रेतिमंत्रतः।स्त्रुवेणजुहुयादाज्यंमहाव्याहृतिभिःक्रमात्।हुत्वास्विष्टकृतंपश्चात्सायाश्चि
त्ताहुतीर्जुहेत्।कश्यपेनतु।दुर्गाश्रियहविघ्नेशलोकपालांश्चपूजयेत्।प्रजापतये स्वाहेतिमुख्या
तेजुहुयात्ययं।मूलायस्वाहा।प्रजापतयेस्वाहे त्यूपहोमौ।पलाशसमिदाज्येनत्वन्नेनाघसहस्व
 कांस्र वाष्टोत्तरशतंप्रत्येकंजुहुयात्ततः।मूलंप्रजामित्यष्टभिर्वाक्यैर्मंत्रद्वयेनच।सावित्रसौ
म्यनैर्ऋत्यमंत्रैरश्वत्थसंभवैः।समिद्भिश्चतिलव्रीहीन्हुत्वाव्याहृतिभिस्तिलैः।इत्यकं।आचार्यो
यजमानोवाअग्नौपूर्णाहुतिंजुहेत्।समुद्रादूर्मिसूक्तेनप्राजापत्यादृचातथा।पूर्णादर्विसस
तेतिमंत्रैःपूर्णाहुतिंजुहेत्।होमशेषंसमाप्याथवह्निमारोपयेद्बुधः।यत्रमखविसृतित्वात्स्मा

तोग्निप्रक्षेत्रवह्निसमारोपः। कुंभाभिमंत्रणं कुर्याद्दक्षिणेनाभिमर्शयेत्। भयरूपशमनार्था
यजुपेत्रेयंबकं शतं। रुद्रकुंभोक्तमार्गेण रुद्रमंत्रं स्पृशञ्जपेत्। रुद्रकुंभस्य दक्षिणतोभिमर्श
नं कृत्वा याजुषब‍ह्वृचसामगादिः पूर्वोक्तं स्वं जपं जपेदित्यर्थः। एकादशाष्ट त्रिद्व्येकसंख्यया
रुद्रं रुद्रसूक्तं साम वा जपेदित्यर्थः। धूपं दीपं च नैवेद्यं कुंभयुग्मे निवेदयेत्। रुद्रकुंभे निर्ऋति
कुंभे चेत्यर्थः। प्रसादयेत्ततो देवमभिषेकार्थमादरात्। निर्ऋतिं रुद्रं च। तस्मिन्काले ग्रहाति
थ्यं कर्त्तव्यं भ्रूतिमिच्छता। पृथक्प्रशस्तस्तैनैव नक्षत्रेष्वासहैव वा। तेनैव हेतुना ग्रहयज्ञः प
थक्प्रशस्तः। शांत्यासह वेत्यर्थः। अभिषेकविधिं वक्ष्ये सर्वाचार्यैरुदीरि तं। भद्रासनोपविष्ट
स्य यजमानस्यर्त्विजः। दारपुत्रसमेतस्य कुर्युः सर्वेभिषेचनं। अक्षीभ्यामितिसूक्तेन पाव
मानीभिरेव च। आपोहिष्ठेति तिसृभिराप इद्वा इद्येन च। सहस्राक्षत्र्यंचेनापि देवस्य त्वेति मंत्रकैः।

शिवसंकल्पमंत्रेण वक्ष्यमाणेश्च मंत्रकैः। वक्ष्यमाणैः श्लोकैः। ते च प्रयोगे वक्ष्यंते। तच्छंयोर
भिषेकं तु सर्वदोषोपशांतिकं। सर्वकामप्रदं दिव्यं मंगलानां च मंगलं। वस्त्रांतरित कुंभाभ्यां पश्चा
त्तु स्नपयेद्बुधः। ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः। यजमानो दक्षिणाभिस्तोषयेदृत्विगादि
कान्। धेनुं पयस्विनीं दद्यादाचार्याय सवत्सकां। निर्ऋति प्रतिमां वस्त्रं कुंभं हेम च दापयेत्। ग्रहा
र्थवस्त्रप्रतिमास्तत्तदुक्ताश्च दक्षिणाः। श्रीरुद्रजापिने देयः कलशो नद्वान्त्रयत्नतः। तत्कुंभवस्त्र
प्रतिमां तस्मै दद्यात्प्रयत्नतः। इतरेभ्योपि विप्रेभ्यः शक्त्या दद्याच्च दक्षिणाः। उक्तालाभे तु तद्दद्यादा
चार्यब्रह्मऋत्विजां। तत्तन्मूल्यं प्रदातव्यं शक्त्या वा प्रदापयेत्। आचार्याय च यद्दत्तं तदर्धं ब्रह्म

णो भवेत्। सदस्या ब्रह्मणोर्धं च ऋत्विग्भ्यस्तदर्धकं। ज्योतिर्निबंधे त्वत्र सर्वं मूलहोमे प्युक्तः। प्रच्छादनो रामश्च२
णवस्त्रादि दद्यात्कुंभं च काञ्चनं। दानांते होमयेद्विप्रः सर्वं मूलानि तत्र वै हुति। देवता च मूलं। ग्रस्की ॥८१॥

याद्दशिषंतेभ्यः प्रणम्याथक्षमापयेत्॥ दधान्नं पायसादिब्राह्मणान्भोजयेच्छतं॥ अलाभेस
तिपंचाशद्दशार्कतल्लाभतः॥ सर्वशांतेश्च पठनं ब्राह्मणैराशिषस्तथा॥ गृहीक्षमापयेद्दिद्वान्निर्ऋ
तिः प्रीयतामिति॥ विधानेचरितेस्मिंस्तु ततः शांतिर्भवेद्ध्रुवं॥ गंडांतेप्येवमेवस्यात्पुष्यार्थे
थैवच॥ पुष्यार्थेप्रसवेप्येवं शांतिः कार्येत्यर्थः॥ समाप्ते द्वादशाहे कुर्याद्धांतिमादरात्॥ उत्प
न्नं मनुना सम्यङ्मूलजातहितायच॥ मातापित्रोर्धनस्यापिबंधुदोषोपशांतये॥ इतिशौनकोक्ता
मूलशांतिः॥ ॥ शांतमूलानि देवज्ञमनोहरे पुराणसमुच्चये॥ ॥ बर्हिःशिखा १ हरिक्रांता २ सह
देवी ३ पुनर्नवा ४ शरपुंखा ५ वराही च ६ काकजंघा ७ सुलक्ष्मणा ८ तुंबिका चैव ९ कर्कंधु १० कर्पू
री ११ कारवल्लिका १२ कर्कोटिका च १३ चक्रांका १४ श्वेतार्का १५ व्याघ्रपत्रिका १६ रुदंती १७ वाश्वगंधा
च १८ मुसली १९ गिरिकर्णिका २० इंद्रवारुणी २१ अपामार्गः २२ शंखपुष्पी २३ कुमारिका २४ शाल्मकी

वा२५ थ गंधारी२६ निर्गुंडी२७ देवदालिका२८। वटः२ शमी३० तथा प्लक्षः३१ पालाशो२ग्रोश्वत्थ एव च३३।
चूतश्चो३४ दुंबरो३५ जंबू३६ नंदीवृक्षो३७ वेतसः३८। पुन्नागो३९ थार्जुनः४० शोको४१ बकुलो४२
श्मंतकस्तथा४३ शाकलस्ताल४५ स्तमालश्च४६ पाटला४७ शतपत्रिका४८। मधूकश्च४९ शिरी
षश्च५० श्रीवृक्षो५१ हस्ती ह्यं५२ शाबलो५४ बालिबला५५ चैव पाठा५६ नागबलास्तथा५७।।
जाती च५८ बकुलश्चैव५९ केतकी६० कदली६१ तथा।। मातुलिंगी६२ जयंती च६३ यवानी६४ पुं
ड्रिका६५ तथा।। द्रोणपुष्पी६६ तथा कुंभी६७ श्रीपर्णी६८ दमन६९ स्तथा। चंपकः७० पद्मकं७१ चैव
तथा कांचनपुष्पिका७२। सिंहेश्वरी७३ च बदरा७४ राजवृक्षो७५ धवस्तथा७६। कुंदश्च७७ मुचुकुं
दश्च७८ मोजिका७९ क्षारकुंतुका८०। दाडिमी८१ बीजपूरी च८२ ब्राह्मी चामलकी तथा८४ भृं
गराज८५ अधोपुष्पी८६ मत्स्याक्षी८७ चाटरूषकः।८८। तरंगिणी८९ गुडूची च९० निशा९१ हा ।।८२।।

राम

शतमूलिका ९२ बाकुची ९३ काकजंघा च ९४ बर्बरा ९५ तुलसी ९६ तथा। कुशः ९७ काश ९८ स्वे
क्षमूलं ९९ तथा सर्षपमूलका १०० ॥ अला आमेचो क्तवक्षाणां यथा संभवमाहरेत् ॥ ॥ अथैतेषां
मध्य देशभाषया नामा[illegible]नि॥ मयूरशिखा। विष्णुकांता। सहदेवी। गदहपूर्ना। सरपोंका। वरा
हीकंद। मसी। लक्ष्मणा। लौकि। वैरि। १०॥ कपुरी। करे चु। खरखसा। केंचेमउ। श्वेता। कांहिं हेंसि। रुदं
ती। अश्वगंधा। मूसरि। कोरैया। २०॥ इंद्राणी। चिरचिरा। शंखपुष्पी। घिडकुआरी। सालौ। गंधप्र
सारनी। मेंबुडी। देवदाली। वरा। रामी। ३०॥ पाकरी। परास। पीपर। आंब। गूलरि। जामुनि। धनब
हेरा। बेलस। नागकेसर। कोह। ४०॥ अशोका। भोलसरी। पाषाणभेद। शाला। तमाल। ताल। पा
डलि। शेंवती। मऊवा। सिरिसि। ५०॥ बेल। कटाई। बडीकटाई। जैंति। अजवाईनि। पुंड्रिका। रूस। जल
कुंभी। कनारि। सेना। चंपा। ७०॥ पद्मकाष्ठ। पीतकटसरैया। भूंई चंपा। बरीबैरि। चिरौंजी। धव। कुंद।
बरिपार। ककही। पाटी। गुरसकरी। चंबेली। बकुल। केवडा। ९०॥ केरा। बिजंबुर। २९

मुचकुंद।गोभी।मुंडुई॥८०॥अनार।अम्लवेतस।ब्राह्मी।ओरा।भृंगरिया।अधझली।गंडिनी।अ
रूसा।सेवार।गुडूची॥८१॥हलद।शतावरी।बकुरी।कोवा।ठेढी।ममरी।स्पष्टमन्यत्र।मदनरत्नेहे
माद्रौच॥गर्गस्त्वन्यथाह॥ ॥शतमुलाठ्ये त्वाशोमूलानां चशतं पिता।लक्ष्मणाशतमूला
चशिग्रुर्बिल्वसस्तथा।सहकारःश्चेलमूलाविष्णुक्रांताथशंखिनी।सर्पाक्षी।मीननेत्राचपुत्रपोरा
हृतांजलिः।पलाशोबिल्वकश्चैवरोचनाचंदनद्वयं।स्वल्पमांसीमुरोशीरवालकंचामलंतथा।
गोजिह्वातुलसीहस्थासितपुष्पासलांगली।ब्रह्मदंडीद्रोणपुष्पाप्रियंगुःसितसर्षपः।पिप्पली
काकजंघाचत्रायमाणाऊरूस्तथा।ज्योतिष्मतीचगांधारीतिनगंधःपूर्णकौशिकी।भद्रक्षमासुभ
द्राचगुडूचीसिंद्रवारुणी।अलंबुकारुदंतीचकदलीकेतकीतथा।गोक्षुरःशालपर्णीचअरिष्टिका राम
पराजिता।छिन्नरुहाशतपत्राच निकुंभाचसुवर्चला।अश्वगंधारक्तिकणीहरिद्राद्वितयंतथा। ॥८३॥

उष्ट्रवोमधुकारस्त्र ... अश्वत्थोबकुलस्तथा।सर्जरिम्वाएमार्गचर्मरास्वा
तिमुक्तकः।मालती स्वर्णपुष्पाचश्रीपर्णीश्रीफलंतथा।दर्भमूलंकरवीरंमदयंती।विकंकता।
पाटलासुरसास्त्र अर्धसूरनिकास्तथा।फलंमन्मथ वृक्षस्यपलाशस्यचपल्लवाः।रास्नानदीवृक्ष
मूलंसुरसारुविदारिका।श्वेतवीर्यश्वेतपाकानीलोत्पलतथैवच।नागकेसरंचसिंदूरीकुमारी
चैवनिक्षिपेत्॥शालमूलाशाला ... बरी।सहकासहदेवी।श्वेतमूलापुनर्नवा।मीननेत्रामत्स्या
क्षी।पुत्रपारापुत्रजीवः।हस्तांजलीअंजलिनि।हाथाजोआचेतिप्रसिद्धा।पलाशंकटूफलंचंदन
दूर्वा।श्वेतंपीतंचउशीरंवीरणं।आमलाभूम्यामलकी।गोजिकागलकुंभीतिप्रसिद्धा।ब्रह्म
दंडाअधःपुष्पाश्रीरंगपुष्पाकंबुजः।काकजंघाएकांगी।ज्योतिष्मतीमालकांगुणि।गांधारी
घूर्णा।कौशिकीकौशालकी।मृगक्षमाशिशुः।सुभद्रासारिवा।अलंबुकालुंबी।शतपर्वावचा।

अरिष्टिका नागवला। छिन्नारुहा पिंडगुडूची। शालपत्रा कमल्लिनी। निकुंभा दंतिभेदः। सुवर्च
लासूर्यभक्तया। हस्तिकर्णएरंडः। उडुवः पीलुः। मधुकारो मधुकः। सर्जरावीजकः। अतिमुक्तका
माधवांजाती। स्वर्णपुष्पा कुराली। मदयंती यूथिका। अर्धसदनिका पालंकी। मन्मथवृक्षः आ
म्रः। सुरदारुर्देवदारुः। विदारिका कूष्मांडी। श्वेतवी पर्गिरिकर्णः। श्वेतपाका गुंजा। स्पष्टमन्यत्।
सर्वौषध्यस्तु। मुरामांसी वचा कुष्टं शैलेयं रजनी द्वयं। सटी चंपक मुस्ता च सर्वौषधिगणः स्मृतः।
मुराएकांगी। जटामांसी शैलेयं मनसिला। सटी कचोरा। कात्यायनः। मूलन क्षत्रे मूलविधानं
कुर्यात् सर्वौषध्या सर्वगंधैश्च संयुक्तं तत्रोदकुंभं कृत्वा सवस्त्रं गंधपुष्परत्न सिद्धार्थकुसंभयु
क्तं कुर्यात् तस्मिन्नु अग्न्युत्तारं पित्वा अतिरथ रक्षोघ्नं च सूक्तं च द्वितीयोदकुंभं कृत्वा चतुः प्रस्रवणसं
युक्तं उपरिष्टान्मूलानि धारये द्वंशपात्रे कृत्वा वस्त्रेबधा तस्मिन् अधानानि मूलानि वक्ष्याम्यष्टा

राम
।।८४।।

दशमाषहिरण्मयंमूलंस सधान्यानिकाश्मर्यसहदेव्यापराजितावालापाटाशंखपुष्पा
मधुपर्णिकाचक्रांकितामयूरशिखाकाकजंघाकुमरिकाद्रूपंजीवंत्यपामार्गभृंगराजलक्ष्म
णासुलक्ष्मणाजातीव्याघ्रपत्रश्चक्रमर्दकसिद्धेश्वराश्चेत्योदुंबरपालाशप्लक्षवटार्कदूर्वारोहि
तकशतावरीशमीत्यादिमूलशतंपूरयित्वातस्मिन्निषिद्धानिमूलानिवक्ष्यामिबिल्वधव
निंबकदंबराजवृक्षाक्षशेलुप्रियालुइंधिकपित्थकोविदारश्लेष्मातकविभीतकशाल्मलीस
रलकंटकिवर्ज्जंतत्राभिषेकंकुर्यात्पितुःशिरोगर्ज्जनन्यादेवस्यत्वेत्योदुंबर्यासंदीमुपगायामास्ता
णातितत्रासीनात्संपातेनाभिषिंचतिशिरसोधिनुलोमंशिरोमेश्रीर्यशइतियथालिंगमंगा
निसंस्पृशतिस्नानादूर्ध्वंनैर्ऋतंपायसंश्रपयित्वाकाश्मर्यमयंस्रुक्स्रुवंप्रताप्यसंमृज्यान्वार
भ्यआघारावाज्यभागौकृत्वास्रुचंतस्मिन्निचतस्रस्थालीपाकेनजुहुयात्। ऋणुघपाजइति

पंचरत्नाज्जतीश्चतुर्दहीतिनजुऊपाकानस्तोकइतिद्वाभ्यांयातेरुद्रशिवातनूरितिषड्भिरक्षांसि
सेधतिशुक्रशोचिरमर्त्यः।शुचिःपावकईड्यइतिवन्नःसोमविश्वतोरघाराजन्नपायतः।नरिष्येत्वा
वतःसखेतित्रिष्टुरुद्रादिप्राशनांतेकृष्णागौःकृष्णाश्चतिलाःहेममयंमूलंसप्तधान्यसंयुक्तं
माचार्यायदद्यात्स्नानंतुर्हंब्राह्मणेभ्योदद्यान्नक्षत्रसूचकेभ्योवासोदद्यादन्येभ्योब्राह्मणेभ्यःसुवर्णं
दद्यात्कृष्णागोपायसेनब्राह्मणान्भोजयेत्सार्पदैवतेगंडजातएषविधिःकात्यायनेनोक्तःकृते
शांतिर्भवतीति।अष्टादशमाषमितसुवर्णकृतंमूलं।केचित्तुअष्टादशमाषमितिनपठंति।मूल
नामानितुकाश्मर्यांकंभारि।वालाउशीरं।अधःपुष्पीअधलुही।मधुयष्टिकाज्येष्ठमधु।चक्रांकि
तालिबला।काकजंघाकोंगाठोडी।घिउकुवारीवडीघिउकुआरि।छोटा।जावंती।चिरचिरा।भं

गरया।सुलक्ष्मणापुत्तलीसहदेवीऊतीचंबेली।व्याघ्रपत्रीहिंसी।सिद्धेश्वराजैती।रोहितकं

राम

सुगंधतरणं। एतानि। अन्यानि। अन्यानितत्तन्नाम्नाप्रसिद्धानित्रिंशदावश्यकानि। यानिविहि
तानिषिद्धानितेषुतेषुविकल्पः॥ ॥अथशौनकोक्तमूलशांतिप्रयोगः॥ ॥उक्तकालेगेहमु
खप्रसवंकृत्वादेशकालौसंकीर्त्यममास्यकुमारस्यकुमार्यावामूलप्रथमचरणादिजन्मसू
चितपित्रारिष्टादिशांतिद्वाराश्रीपरमेश्वरप्रीत्यर्थंशौनकोक्तविधिनासनवग्रहमखांमूल
जननशांतिंकरिष्यइतिसंकल्प्यगणेशपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धानिकृ
त्वाचार्यंब्रह्माणंसदस्यमृत्विजश्चाष्टौचतुरोवावृत्वामधुपर्कवस्त्रालंकारादिभिर्यथाविभ
वमर्चयेत्। ततः आचार्यः अस्मिन्नायम्याऽस्मिन्कर्मणिआचार्यकर्मकरिष्यइतिसंकल्प्ययद
त्रसंस्थितमितिसर्षपान्विकीर्यापोहिष्ठादिमंत्रैःकर्मभूमिंप्रोक्ष्यसलक्षणमंडपपक्षेमंडप
देवतापूजादिकुर्यात्। ततस्तत्रैशानदेशेवर्णकैःस्वस्तिकंविरच्यतत्रमहीद्यौरितिभूमिंस्पृ

ष्ट्वा ओषधयः समिति द्रोणप्रमाणान्व्रीहीन्प्रक्षिप्य तत्राकलशेष्विति नवं कुम्भं निधायेमं मे
गंगइति तीर्थवारिणा पूर्य गंधद्वारामिति गंधं या ओषधीरित्योषधीं ओषधयः समितिय
वान्कांडात्कांडादिति दूर्वाः अश्वत्थेवइति पंच पल्लवांश्चूतपल्लवांश्च स्योना पृथिवीति सप्त
मृदः याः फलिनीरिति फलं सहिरत्नानीति पंचरत्नानि गायत्र्याद्यैः पंचगव्य मंत्रैः पंचगव्यं
हिरण्यरूपइति सुवर्णं त्रारासः कुशारासइति कूर्चं च प्रक्षिप्य युवासुवासाइति कलशमा
वेष्ट्य पूर्णादर्वीति ताम्रवंशादिमयं पूर्णपात्रं निदध्यात्॥ ततो रुद्रकलशं गत्वा तु दक्ष महीद्यौ
रिति भूमिं स्पृष्ट्वा शक्त्या यवान्क्षिप्य चतुरः कलशान्स्थापयित्वा पूर्णपात्रनिधानांतं कुर्या
त्॥ तत्र प्रतिकलशं मंत्रावृत्तिः॥ ततः मध्ये पूर्णपात्रोपरि स्ववस्त्रे सुवर्णनिर्मितां रुद्रप्रतिमां
त्र्यंबकमिति मंत्रेणावाह्य तेनैव षोडशोपचारैः पूजयेत्॥ अस्य वसिष्ठो रुद्रोनुष्टुप् इतरे

पुवरुणपूजनं। ततएकऋत्विकमध्यकुंभेस्पृष्ट्वा रुद्रैकादशिनीं जपेद्यदियाज्जुषः। बह्वृचस्तु
चत्वारि रुद्रसूक्तानि। छंदोगस्तु रुद्रसामानि। अत्रोभयत्र शक्तितएकादशावृत्त्यैकसंख्या
ग्राह्या। केचित्तु रुद्रः सर्वसाधारणो बह्वृचछंदोगयोस्तु सूक्तसाम्नो रुद्रेण सह विकल्प इत्या
हुः। तत्र रुद्रन्यासः पूर्वग्रंथ एव वक्ष्यते। रुद्रसूक्तानां तु कद्रुद्रायेति नवर्चस्य घोरः कण्वो रुद्रो गा
यत्री अंत्या त्रिष्टुप्। जपेवि०। इमा रुद्राय तवस इत्येकादशर्चस्य कुत्सो रुद्रो आद्या नव जग
त्यो अंत्ये द्वे त्रिष्टुभौ। जपेवि०। आ ते पितरिति पंचदशर्चस्य गृत्समदो रुद्रस्त्रिष्टुप्। इमा रुद्राय
स्थिरधन्वन इति चतसृणां वसिष्ठो रुद्रस्तिस्रो जगत्यो अंत्या त्रिष्टुप्। आ वो राजानमित्येकादशा
नां रुद्रसाम्नां वामदेव ऋषिः रुद्रो देवता आद्यसाम्नस्त्रिष्टुप् ततश्चतुर्णां गायत्री ततस्त्रयाणां
त्रिष्टुप्। ततस्त्रयाणामुष्णिक् छंदः। जपेवि०। ततएकऋत्विकमध्यकुंभे त्र्यंबकमिति मंत्रम

ष्टोत्तरसहस्रंजपेत्।अन्येषुतुक्रमेण।चत्वारिसूक्तानिजपेत्।तानिच।।आशुःशिशानइतित्र
योदशर्चस्यसूक्तस्यऐंद्रोप्रतिरथऋषिःइंद्रोदेवताचतुर्थ्याबृहस्पतिःद्वादश्याःआद्या देव
तात्रिष्टुप्छंदः।अंत्यानुष्टुप्।जपेवि०।त्वमग्नेरुद्रइत्यनुवाकस्यहव्यवाट्ऋषिःअग्न्यात्मारु
द्रोजगती।।जपे०।रक्षाणंइत्यस्यमंत्रस्यवामदेवोग्निस्त्रिष्टुप्।जपेवि०।रक्षोहणमितिपंच
विंशर्चस्यसूक्तस्यरक्षोहांगिरसःपायुरग्निस्त्रिष्टुप्।चतस्रोंत्यानुष्टुभः।जपे०।अत्रसंख्या
पूर्वोक्तायाह्यो।चतुर्थेतुपवमानमप्येकवारंजपेत्।यद्वाएतेषामपिरुद्रकुंभएवजपः।च
तुर्षुशांतिजपइतिताएवंपंचकुंभासंभवेकुंभद्वयंस्थाप्यअस्मिन्पक्षेरुद्रकुंभेपूर्वोक्तरुद्रादि
सर्वजपः।अन्यकुंभेतुवरुणमावाह्यशांतिजपंरुद्रकुर्यात्।अथवापंचकुंभस्थानेएकएव राम
चतुःप्रस्रवणः।तत्रमध्यकुंभकार्याणिमध्यमुखे।कुंभचतुष्टयकार्याणितुचतुर्षुप्रस्रव

रथ्येष्विति विवेकः। ततः पूर्वस्थापितकुंभोत्तरतश्चतुर्विंशाद्दलं पंकजं पंचवर्णैः शुक्लतंडुल
पिष्टेनवाकृत्वा तत्कर्णिकायां महीद्यौरित्यादिना कुंभं संस्थाप्य तत्रेमं मे गंगे इति जलमापूर्य
गंधद्वारामिति गंधं क्षिप्त्वा तत्र मूलानि क्षिपेत्। तदलाभे विष्णुक्रांता सहदेवी तुलसी शताव
रीः प्रक्षिप्य कुशान्कुंकुमं च प्रक्षिप्य या ओषधीरित्यादि पूर्णपात्रनिधानांतं कृत्वोपरि वस्त्रेः
ष्टरत्नं कृत्वा कर्णिकायां मोषुण इति निष्कृतदर्थं तदर्थं निर्मितां निर्ऋतिप्रतिमां पंचामृतस्ना
पितां संस्थाप्य तद्दक्षिणतः इंद्र वो मधुक्षदाइंद्रो गायत्री। अनेनेंद्रं। तदुत्तरतश्च अप्सु मे मेधा
तिथि रापोनुष्टुप्। इत्यपः स्थापयेत्। ततः प्रागादितश्चतुर्विंशतिभूमिस्थदलेषु उत्तराषा
ढाद्यनुराधांतानि नक्षत्राणि तद्देवताश्च स्थापयेत्। देवताश्च। विश्वेदेवाः। विष्णुः। वसवः।
वरुणः। अजैकपात्। अहिर्बुध्न्यः। पूषा। अश्विनौ। यमः। अग्निः। प्रजापतिः। सोमः। रुद्रः।

अदितिः।बृहस्पतिः।सर्पाः।पितरः।भगः।अर्यमा।सविता।त्वष्टा।वायुः।इंद्राग्नी।मित्रइति।
ततोलोकपालानावाहयेत्।ततोनैर्ऋतेऽग्निस्थापनंकृत्वातदीशान्येनवग्रहांस्तत्तन्मंत्रैरावा
हयेत्।ततोन्वाधानंकुर्यात्।तद्यथा।समिद्द्वयमाज्यायचक्षुषी।आज्येनेत्यंतमुक्कानवग्रहान
मुकसंख्याभिःसमिच्चर्वाज्याहुतिभिःअधिदेवताःप्रत्यधिदेवताःलोकपालान्विनायकादीं
श्चप्रत्येकममुकसंख्याभिःसमिच्चर्वाज्याहुतिभिः।निर्ऋतिंप्रतिद्रव्यमष्टोत्तरशतसंख्या
भिर्घृतसंमिश्रपायससमिदाज्यचर्वाहुतिभिःइंद्रमपश्चप्रतिद्रव्यमष्टाविंशतिसंख्याभि
र्घृतसंमिश्रपायससमिदाज्यचर्वाहुतिभिर्विश्वेदेवाद्याश्चतुर्विंशतिदेवताःअष्टाष्टसंख्या
भिःपायसाहुतिभिःरक्षोहणंकृणुष्वेतिपंचदशर्ग्भिः प्रत्यृचमष्ट संख्याभिःकृसरा राम
हुतिभिःसवितारं·दुर्गां·त्र्यंबकं·ऋत्विक्स्तुतिं·दुर्गां·वास्तोष्पतिं·अग्निं·क्षेत्राधिपतिं·मित्रा ॥९८॥

वरुणो अग्निं॰ एताः अष्टाष्टसंख्याभिः कृसराहुतिभिः श्रियं हिरण्यवर्णामितिपंचदशभिः

प्रतिमंत्रमष्टाष्टसंख्याभिः समिदाज्यचर्वाहुतिभिः सोमं त्र्यो दशवारं पायसाहुतिभिः स्रुवं

चतुर्गृहीतेनाज्येन॰ अग्निं वायुं सूर्यं प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि पूर्णपात्रनि

धानांतं कृत्वा स्वस्वमंत्रैर्निर्ऋत्यादिपूजां कुर्यात्। तत्र वस्त्रयुग्मं रक्तचंदनं गंधः। कृष्णसुर

भिः पुष्पाणि धूपो मेषशृंगस्य। आज्यस्य दीपः। पुरुषाहाराऽन्नं पोलिकाश्च। ब्राह्मणस्य सु

रास्थाने सैंधवमिश्रितं क्षीरं। मांसस्थाने लवणयुक्तं पायसं। क्षत्रियादीनां तु सति संभवे मु

ख्यमेव। एतावन्नैवेद्यं। आचमनादिपुष्पांजल्यंतां पूजां कृत्वा अमुष्मै त्वेत्यादि अन्वाधान

क्रमेण पायसकृसरचरून् श्रपयित्वाज्यभागांतं कुर्यात्। ततो यजमानो दक्षिणतः सर्वा

देवता उद्दिश्य यागं कुर्यात्तत्त्रोक्तृत्विक्सहित आचार्यो जुहुयात्। तद्यथा॥ नवग्रहाधिदे

वताग्रस्यधिदेवताविनायकादीनांतत्तन्मंत्रैःसमिदाज्यचरून्पूर्वोक्तसंख्ययाकृत्वानिर्ऋ
तेरिंद्रस्यापांचमंत्रैःक्रमेणद्रव्यचतुष्टयंकृत्वाविश्वेदेवादिमित्रांतेभ्यश्चतुर्विंशतिदेवेभ्यो
अष्टाष्टसंख्याभिःपायसंकृत्वाततोऋग्भि र्जुहुयात्‌।कृणुष्वेतिपंचदशार्चस्यसूक्तस्यगो
तमोवामदेवोरक्षोहात्रिष्टुप्‌।कृसरहोमेवि॰प्रत्यृचंअष्टसंख्ययाजुहुयात्‌।गायत्र्याष्टसंख्य
यासवित्रेकृसराहुतीर्जुहुयात्‌।जातवेदसेकश्यपोदुर्गात्रिष्टुप्‌।कृसरं८।त्र्यंबकं॰।कृसरं८।
सीरायुंजंतीत्यस्यबुधःसौम्यऋषिःकृषिस्तुतिर्देवतागायत्रीछंदः।कृसरं८।तामग्निवर्णां
सोभरिर्दुर्गात्रिष्टुप्‌।कृसरं८।वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्‌।कृसरं८।अग्निंकाएवो
मेधातिथिरग्निर्गायत्री।कृसरं८।क्षेत्रस्यवामदेवःक्षेत्रपालोनुष्टुप्‌।कृसरं८।गणानाजमद
ग्निर्मित्रावरुणौगायत्री।कृसरं८।अग्निंहूतंपुरोदधेइत्यस्यआंगिरसोविरूपोग्निर्गायत्री।

हस्रं॰। हिरण्यवर्णामितिपंचदशर्चस्यसूक्तस्यआनंदकर्दमचिक्लीतेंदिरासुताऋषयः।
श्रीर्देवता आद्यास्तिस्रोनुष्टुभः चतुर्थीप्रस्तारपंक्तिः पंचमीषष्ठ्यौत्रिष्टुभौ ततोष्टावनुष्टुभः अं
त्याप्रस्तारपंक्तिः। होमे वि॰। प्रत्यृचं समिदाज्यचरून् अष्टशतमष्टाविंशत्यष्टान्यतमसंख्यया
विश्वतोवयोधा जुहुयात्॥ त्वंनः सोमइत्यस्य प्रगाथः सोमस्त्रिष्टुप्। पायसहोमे वि॰। १२। त्वन्नः सोमविश्वतोगो
पाइतिवा मंत्रः। त्वन्नः सोमसुक्रतुरितिवा। अनयोरैंद्रोविमदः सोमः प्रस्तारपंक्तिः। ततश्चतु
र्गृहीतमाज्यं गृहीत्वा· यातेरुद्रेतिकश्यपोरुद्रः स्वराडनुष्टुप्। अनेनजुहुयात्। ततः स्रुवेण
व्यस्तसमस्तव्याहृतिभिराज्यंहुत्वास्विष्टकृदादिप्रायश्चित्तहोमांतंकुर्यात्। केचित्तु भूरग्न
येचपृथिव्यैचमहतेचस्वाहा। भुवोवायवेचांतरिक्षायचमहतेचस्वाहा। सुवरादित्यायच
दिवेचमहतेचस्वाहा। भूर्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचस्वाहेतिमहा

र्याहुतिभिर्होमंकृत्वास्विष्टकृदादिकुर्यादित्याहुः।ततोदिक्पालेभ्योनवग्रहेभ्योविनायकादिभ्यो
निर्ऋतयेंद्रायरुद्रेभ्योरुद्रायक्षेत्रपालायचसदीपमाषभक्तबलीन्दद्यात्·ततआचार्योयजमानो
वाचतुर्गृहीतेनद्वादशगृहीतेनवास्रुचंपूरयित्वातत्रफलादिकमवधायपूर्णाहुतिंजुहुयात्।तत्र
मंत्रः॥समुद्रादूर्मिरित्येकादशर्चस्यसूक्तस्यगोतमोवामदेवोग्निस्त्रिष्टुप्।अंत्याजगती।पूर्णा
हुतिहोमेवि०।प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्।पूर्णा०।पूर्णादर्विविश्वेदेवाःशतक्रतुरनु
ष्टुप्।पूर्णा०।सप्ततेअग्नेसप्तवानग्निर्जगती।पूर्णा०।एतैःपूर्णाहुतिंहुत्वाप्रणीतानिनयनादि
कर्मशेषंसमाप्यआतारण्यग्नेःशांतिकरणपक्षेऽस्मिन्कालेसमारोप्यशांत्यासहनवग्रहम
खाकरणेइदानींतस्मिन्नेवाग्नौपृथक्नवग्रहमखःकार्यः।ततश्चतुःकुंभमध्यवर्तिनंकुंभंद
क्षिणतस्पृष्ट्वात्र्यंबकमितिमंत्रंशतवारंजपेत्।याजुषश्चेद्यजमानःतदारुद्रैकादशिनीमपिज

पेत्। बह्वृचश्चेद्रुद्रसूक्तानि। सामगश्चेद्रुद्रसामानि। आथर्वणश्चेत्र्यंबकमंत्रमात्रं। अत्राप्ये
कादशावृत्तिश्चैकसंख्या सर्वत्रस्यात्। ततः स्थापितदेवताः संपूज्य। त्र्यंबकं मोषुण इत्यप
स्थाप्य। सर्वकलशोदकं पात्रांतरे गृहीत्वा सलिंगाचार्यो यजमानं सर्वौषधीभिरनुलिप्तांगं
धृतनववस्त्रं तद्वामतो धृतवैनववस्त्रां सपुत्रां पत्नीमुपवेश्य वक्ष्यमाणैर्मंत्रैरभिषिंचेत्॥ पि
तामहेन कश्यपेन च धारयित्वा बहत्कुंभं शतच्छिद्रं समाहित इत्युक्तं॥ ते च॥ अक्षीभ्यामिति
षट्सूक्तं काश्यपो विवृहायक्ष्मनाशनोनुष्टुप्। अभिषेके वि०। त्रिभिष्टुं देवेति सप्तानां वसिष्ठऋ
षिः आद्यानां त्रयाणामग्निर्देवता। ततश्चतुर्णां विश्वेदेवाः आद्यो गायत्री द्वितीयानुष्टुप्।
ततस्तिस्रो गायत्र्यो ऽन्त्ये द्वे ऽनुष्टुभौ। अभि०। आपो हिष्ठेति नव ऋचः स्पांबरीषः सिंधुद्वीप आपो
गायत्र्यो ऽन्त्ये द्वे अनुष्टुभौ। पंचमी वर्द्धमाना। सप्तमी प्रतिष्ठा। अभि०। आप इद्देति द्वयोः सप्तर्षयो

विश्वेदेवा अनुष्टुप्। सहस्राक्षेति प्रजापत्योयक्ष्मनाशनोयक्ष्महा त्रिष्टुप्। देवस्यत्वेत्यापस्त
बशाखागतैस्त्रिभिर्मंत्रैः। यज्जायतइतिषस्णां प्रजापतिर्मनस्त्रिष्टुप्। ततः। योसौवज्रधरोदे
वोमहेंद्रोगजवाहनः। मूलजातशिशोर्दोषंमातापित्रोर्व्यपोहतु। योसौशक्तिधरोदेवोहुत
भुग्मेषवाहनः। सप्तजिह्वश्चदेवोग्निर्मूलदोषंव्यपोहतु। योसौदंडधरोदेवोधर्मोमहिषवा
हनः। मूलजातशिशोर्दोषंव्यपोहतुयमोमम। योसौखड्गधरोदेवोनिर्ऋतीराक्षसाधिपः॥
प्रशमयतुमूलोत्थंदोषंगंडांतसंभवं। योसौपाशधरोदेवोवरुणश्चजलेश्वरः। नक्रवाहः प्र
चेतानोमूलोत्थाघंव्यपोहतु। योसौदेवोजगत्प्राणोमारुतोमृगवाहनः। प्रशमयतुमूलोत्थं
दोषंबालस्यशांतिदः। योसौनिधिपतिर्देवः खड्गभृद्वाजिवाहनः। मातापित्रोःशिशोश्चैवमूल
दोषंव्यपोहतु। योसौपशुपतिर्देवः पिनाकीवृषवाहनः। सदेवोमूलगंडांतेदोषमाशुव्यपो

राम

हतु॥ विघ्नेशः क्षेत्रपो दुर्गा लोकपाला नवग्रहाः॥ सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः॥ ततः
सुरास्त्वामभिषिंचंत्वित्यादिभिश्चाभिषिंच्य॥ तच्छंयोः शं नु विश्वेदेवाः शक्करी॥ अभि॰॥ ततो रुद्रनि
र्ऋतिशांतिकलशोदकेनान्येन च शतछिद्रमंतर्धीयाभिषिक्तो यजमानो धौते वाससी परिधा
य तिलकं कृत्वा विभूतिं धृत्वा संकल्पपूर्वकमाचार्यादीन्पूजयित्वा तेभ्यो दक्षिणां दद्यात्॥ तत्रा
चार्याय सवत्सां दोग्ध्रीं धेनुं दक्षिणां दद्यात्॥ निर्ऋतिप्रतिमां वस्त्रं कुंभं हेम च दापयेत्॥ कश्यपे
न तु॥ आचार्याय वृषं लोहपिंडं दद्यात्स दक्षिणामित्युक्तं॥ ब्रह्मरोचषं॥ रुद्रजापिने कृष्णमनड्वा
हं रुद्रकलशं रुद्रप्रतिमां च दद्यात्॥ ततः सदस्याय ऋत्विग्भ्यश्च यथाशक्ति दक्षिणां दत्वा भूयसीं
दत्वा निर्ऋत्यादीनामुत्तरपूजां विधाय॥ उत्तिष्ठ॰ अभ्यारमि॰ यांतु देवगणा इति विसृज्याचार्यह
स्ते प्रतिपाद्याग्निं संपूज्य गच्छ गच्छेति विसृज्य शांतं तदर्थं द्राव्यं विप्रान्संभोज्य शांतिसूक्तं जपे

कारयित्वायस्यस्मत्येतिजपित्वाकर्मेश्वरार्पणंकृत्वाभुंजीत ॥ ॥इतिकमलाकरभट्टकृते
शांतिरत्नेमूलशांतिप्रयोगः ॥ ॥अथाश्लेषाशांतिः ॥ ॥तत्रपादफलंप्रागुक्तं ॥ऊपार्णवे ।
मूर्द्धास्यनेत्रगलकांसयुगंचबाहूहृज्जानुगुह्यपदमित्यहिदेहभागः ।बाणाद्रिनेत्रऋतभुक
श्रुतिनागरुद्रषण्णंदपंचशिरसश्चक्रमशस्तुनाड्यः ।राज्यंपितृक्षयोमातृनाशःकामक्रियारतिः ।
पितृभक्तोबलीस्वघ्नस्त्यागीभोगीधनीक्रमात् ।विशेषस्तुनिर्णयसिंधौज्ञेयः ॥शांतिमाह
शौनकः ॥आश्लेषायांतुजातानांशांतिंवक्ष्याम्यतःपरं ।जातस्यद्वादशाहेतुशांतिहोमंसमा
चरेत् ।असंभवेतुजन्मर्क्षेअन्यस्मिन्वाशुभेदिने ।स्नातोभ्यंगादिभिस्तस्मिन्वरयेत्तुद्विजोत्तमा
न् ।विभवेपंचकंभांस्तुद्वयंवातदलाभतः ।देवतास्थापनेचैकमेकंरुद्राभिमंत्रणे ।मूलर्क्षोक्तप्र   राम
कारेणकुंभेनिक्षिप्यपूजयेत् ।गोमयालेपितेदेशेधान्याद्यैःपरिशोभिते ।पीठंकारयेत्तत्र

चतुर्दिक्षु रलान्वितं।तंडुलैः कारयेद्यथा रक्तपीतसितासितैः।कर्णिकायां न्यसेद्व्रीहीन्स्थापयेत्तेषु कुंभकं।आजिघ्रेत्यनया कलशस्थापनं मतं।इमं मे गंगे इति मंत्रेण पूरयेत्तीर्थवारिणा।कुंभं च गंधवस्त्राद्यैस्तत्तन्मंत्रैः प्रपूजयेत्।याः फलिनीरित्यनया क्षिपेद्रत्नौषधादिकान्।कुंभोपरि स्थपात्रे तु आश्लेषाप्रतिमां यजेत्।निष्कार्धपादपादैर्वा कारयित्वा स्वशक्तितः।तत्पूर्वोत्तरनक्षत्रे दक्षिणोत्तरयोर्यजेत्।ऐंद्रादीशानपर्यंतमितरर्क्षाणि पूजयेत्।मूलोक्तेन विधानेन कुंभयोरपि मंत्रतो।रुद्रार्चा रुद्रकुंभे तु पूर्ववच्छेषमाचरेत्।नमो अस्तु सर्पेभ्यः पूजामंत्र इतीरितः।सर्पो रक्तस्त्रिनेत्रश्च द्विभुजः पीतवस्त्रकः।फलकासिधरस्तीक्ष्णो दिव्याभरणभूषितः।एवं ध्यात्वा ततोभ्यर्च्य होमकर्म समाचरेत्।कर्तुः शाखोक्तमार्गेण आचार्यस्याथवाचरेत्।मुखांतं कर्म निर्माय हविराद्यशास्त्रतः।इदं सर्पेभ्यो जुहुयात्साधित्र्यधिदेवतां॥अष्टोत्तरशतं वाथ अष्टाविंशतिमेव

वामूलनक्षत्रवच्छेषं होमकर्म समाचरेत्॥ पूर्णाहुत्यंतकर्माणि कृत्वा संपातकं तथा॥ पूर्णाहुत्यं
तमित्युक्ते रुद्रकुंभादौ होमोत्तरं पुनर्जपाभाव इति शिष्टाः॥ अनंतरमेवाभिषेकविधानात्॥ सं
पातआज्यहोमेषु॥ कुंभेजलेषु प्रक्षिप्य अभिषेकमथाचरेत्॥ दारपुत्रसमेतस्य यजमानस्य पू
र्ववत्॥ अभिषेकं तथाचार्यो ऋत्विग्भिः सहितस्ततः॥ अभिमंत्रितकुंभाद्भिरभिषेचनमाचरेत्॥
तथा पौराणमंत्रैश्च पल्लवैरभिषेचयेत्॥ आश्लेषाऋक्षजातस्य मातापित्रोर्धनस्य च॥ भ्रातृज्ञा
तिकुलस्थानां दोषं सर्वं व्यपोहतु॥ योसौ वागीश्वरो नाम अधिदेवो बृहस्पतिः॥ मातापित्रोः शि
शोश्चैव गंडांतं च व्यपोहतु॥ पितरः सर्वभूतानां रक्षंतु पितरः सदा॥ सर्पनक्षत्रजातस्य वित्तं च
ज्ञातिबांधवान्॥ एवं कृते भिषेके तु सर्पगंतिर्भवेद्ध्रुवं॥ ततः शुक्लांबरधरो यजमानः सुभूषि
तः॥ दक्षिणाभिस्ततो विप्रान्मूलवच्च प्रतोषयेत्॥ इत्युक्तेन विधानेन सर्वारिष्टं व्यपोहति॥ स

राम
॥९८॥

र्वकामाश्च सिध्यंति वेदोक्तायुर्भविष्यति। अर्घ्यमंत्रमाह। सर्पाधीशनमस्तुभ्यं नागानां च गणा
धिप। गृहीत्वार्घ्यमपारं त्वं सर्वाभीष्टप्रशांतये। मूलनक्षत्रवत्कुर्यात्सर्पगंडे स नामतः। अभि
षेके आश्लेषामूलगंडांतमिति। मूलदोषमित्यत्र सार्पदोषं। मूलोत्थाघामिति सार्पोत्थाघामि
त्यूहः कार्यः। इत्थमनेन विधानेन सर्वारिष्टं व्यपोहति। सर्वकामाश्च सिध्यंति वेदोक्तायुर्भविष्य
ति॥ ॥इति शौनकीये आश्लेषाशांतिः॥ ॥अथ मदनरत्ने पितामहसंहितोक्ता मूलाश्लेषाशां
तिः॥ ७॥ मूलादौ च द्विघटिका ज्येष्ठांते च तथैव च। अभुक्तमूलं तद्ज्ञेयं तत्र जातं शिशुं त्यजेत्। मू
लस्यादौ पितुर्गंडं मातुर्गंडं द्वितीयके। तृतीयं धनधान्यस्य चत्वं त्यपादः शुभावहः। विपरीतं फ
लं सर्वमाश्लेषास्वपि मूलवत्। मूलोव्याघातवज्रे च व्यतीपातश्च वैधृतिः। परिघं वारदोषश्च
विष्टिश्च विषनाडिका। एवं योगादिके युक्ते मूले दोषोधिको भवेत्॥ ॥अथातः संप्रवक्ष्या

मिशांतिकर्मविधिंशुभं।निष्केणवाथवानष्टेसुवर्णेनचनिर्म्मितिं।सर्पभयेयदिगंडंचेत्कुर्यात्सर्पाकृ
तिंबुधः।कुंडंकुर्याद्धस्तमात्रंआयामेवतथैवच।मेखलात्रयसंयुक्तंयोन्याचैवसमन्वितं।मंडपं
कारयेत्तत्रयथाविभवसारतः।पुण्याहंवाचयित्वातुसंकल्प्ययथाविधि।अलंकृतांश्चतुःसंख्या
न्त्विजोवरयेद्बुधः।आचार्यंवरयेत्सम्यक्सदस्यैरभिरलंकृतं।आनीयचतुरःकुंभान्कृत्स्नवर्णान्सुशोभ
नान्।शतछिद्रसमायुक्तंवहल्कुंभंसुशोभनं।सूत्रेणवेष्टितंमध्येधान्यस्योपरिविन्यसेत्।शतम
लानिपुण्यानिरत्नानि नवसंख्यया।मृत्तिकादशसंख्याकास्तथापल्लवपंचकं।पंचवृक्षकषा
याणिपंचगव्यंतथैवच।पंचसौगंधिकंचैवपुण्यंलोहत्रयंतथा।धान्यानिसर्वाणितथाकुशान्दूर्वा
स्तथैवच।तीर्थोदकानिसर्वाणिसर्वकुंभेषुविन्यसेत्।मूलानि नामतोवक्ष्येशतसंख्यानियानि
च।सहदेवीशिखंडपुंखाविष्णुक्रांतापुनर्नवा।चंद्रवल्लीसिकागुंजाडुंविकाचतथाबला।काकबंधु

र्यवाहूर्वाकाकमांचीशतावरी।कर्करंसुरसंब्राह्मी।निर्गुंडीमुसलीव चा।बर्षाभ्रूःशंखिनीपाठा
समंगांधहतीद्वयं।अपामार्गःकुशाभंगकासखंडुकरूषकाः।श्रीरक्षेंद्रपवलक्षान्नग्रवक्षोपवा
म्रकः।जंबूबिल्वोमुरामांसीनिंबारिष्टनिशाद्वयं।कदली केतकी तालःश्रीपर्णीशाल्कीतथा।पा
टलार्थ्रेलोकोरगीरंकोशातक्यग्निमंथकः।जीवंतीदाडिमीशालस्तमाल्लंबीजपूरकं।पुन्नागो
बकुलःकुंदोमधुरोमुचुकुंदकः।मुअमाषवलोचैवनंधावर्त्तःकुरंटकः।चंपकोथपलाशश्चतथा
चामलकीतथा।प्रियंगुश्चंदनंदालीदेवदारुशिरीषकं।मुद्गलीहेमलाक्षीचशताह्वातामलीत
था।उशीरंबालखदिरंकरंजंचतथैवच।बदरोश्वत्थरक्षश्चकराक्रांग्रंथिपर्णिका।रास्नाचशं
खिनीचैवनागाकापोतकीतथा।कमलंकुमुदंकोशोनीलोत्पलद्वहद्वयं।एतानिशतमूलानि
सर्वारिष्टहराणिच।अभावेशतमूलानांसर्वौषध्योविनिक्षिपेत्।सर्वौषधीनेभावाभावेदशो

षध्यो विनिक्षिपेत्। अश्वावेद्रश्मृला नीहेममात्रं विनिक्षिपेत्। देवदारु निशायुग्मं पद्मं नीलोत्प
लं तथा। कुष्ठं रौद्रं प्रियंगुं च तगरं मूलमेव च। धात्री फलं वचा कणा सर्षपा नागरं तथा। मुरामांसी
तथा चंडी उशीरं वालकं तथा। शैलजं गंध्रपर्णी श्विषश्री खंडं तालकं तथा। सिद्धि वृद्धि समायुक्ताः स
र्वौषध्यः प्रकीर्त्तिताः। कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेय चंदनं। वचा कर्पूरमुस्तं च सर्वौषध्यो दशास्मृ
ताः। याओंषधीरिति मंत्रेण ओषधादीनि निक्षिपेत्। सहिरत्नानि मंत्रेण नवरत्नानि निक्षि
पेत्। उद्धतासीति मंत्रेण मृदमादाय विन्यसेत्। अश्वो यज्ञेति मंत्रेण पल्लवांश्च विनिक्षिपेत्।
रूवतीति च मंत्रेण त्वक्पंचकं विनिक्षिपेत्। गायत्र्याद्येः पंचगव्यं कांडात्कांडात्तदूर्वी। मधुवा
तेति च मधुस्वादुः पवस्वेति शर्करा। कलशस्य मुखे ब्रह्मा मध्ये रुद्रो ह्यधो हरिः। सर्वे समुद्राः
सरितस्तीर्थानि जलदा नदाः। आयांतु यजमानस्य दुरितक्षयकारकाः। इमं मेव

रुणेसाधंतत्वायामिद्वितीयकं।त्वंनोअग्नेततीयंचसत्वंनोअग्नेततःपरं।आचार्योमूलम
त्रेणवहलंकुंभंप्रपूजयेत।मूलंप्रजाभितिमूलेसर्पेदंसर्पइत्यपि।२।तच्छिद्रस्यपुरतोदेवंतत्रप्र
पूजयेत।निर्ऋतिंसार्पनाथंचवस्त्रयुग्मेनवेष्टयेत।इंद्रादिलोकपालांश्चस्वेनमंत्रेणप्रजये
त।एवंपूजांचनिर्वर्त्यहोमकर्मसमाचरेत।समिदाज्येनचरुणातिलैःसम्यक्होमयेत।अष्टो
त्तरसहस्रंवाअष्टोत्तरशतंतुवा।मूलंप्रजाभित्यष्टोहोमेवाक्यंयथाक्रमं।अनुहोमंततःकु
र्यादाज्येनचरुणासह।।प्रजापतयेस्वाहा।।मूलायस्वाहा।।प्रजायैस्वाहा।।इदंसर्पेभ्य
इतिचवाक्यान्यष्टौतुसार्पभे।।सर्पेभ्यःस्वाहा।।आश्लेषाभ्यःस्वाहा।।दंदशूकेभ्यःस्वा
हेति।।तिलैर्व्याहृतिहोमंचकारयेत्तुसमाहितः।पूर्णाहुतिंचजुहुयादभिषेकंचकारयेत।।
उत्क्षिप्यचशतच्छिद्रंधारयेच्छिरसोपरि।।शतच्छिद्रेक्षिपेद्युक्तेमंत्रैर्वारुणसंभवैः।।स

मुद्र ज्येष्ठादिभिर्मंत्रैर्देवस्यत्वातथैवच ॥ शिरोमेश्रीरितिमंत्रेणापोहिष्ठादिभिस्त्रिभिः ॥ पुनंतु
मां देवजनामंत्रैस्त्रातारमेवच ॥ द्योः शांतेत्यादिभिर्मंत्रैर्मानस्तोकेतिमंत्रकैः ॥ आर्द्रवासांसि
संत्यज्य आचार्यायनिवेदयेत् ॥ आज्यावलोकनंकृत्वा साध्वायप्रदापयेत् ॥ आचार्यायवृषं
दद्याद्यः पिंडंतथैवच ॥ सवलिंकारसंयुक्तां गां सवत्सां सदक्षिणाम् ॥ तदर्धं ब्रह्मणे दद्या
द्वित्विग्भ्योपि तदर्धतः ॥ ब्राह्मणान्भोजयेत्पश्चाद्यथाशक्त्यनुसारतः ॥ अनेनविधिनाशांतिं
यः कुर्यात्सीतिमान्नरः ॥ आयुरारोग्यमैश्वर्यं तस्यशांतिर्भविष्यति ध्रुवम् ॥ ॥ इति कमलाकरभट्टकृ
तो मूलाश्लेषाशांतिः ॥ ॥ अथ शौनकोक्ताश्लेषाशांतिः प्रयोगः ॥ ७ ॥ ॥ उक्ते काले कृत्वा गो
मुस्वप्रसवं कृत्वा देशकालौस्मृत्वास्य कुमारस्य आश्लेषाजन्मसूचितपित्राद्यरिष्टशांतिनिवेश राम
नवग्रहमखमाश्लेषाशांतिं करिष्ये इति संकल्प्य गणेशपूजा पुण्याहवाचनमातृकापूजानां ॥ ९६ ॥

दीश्याक्षनिकृत्वाचार्यमृत्विजश्चवृणुयात्॥ ततआचार्योयदत्रसंस्थितमितिसर्षपान्विकीर्या
पोहिष्ठेतिभूमिंप्रोक्ष्येशानदिशिपंचवर्णैःस्वस्तिकंकृत्वामहीद्योरितिभूमिंस्पृष्ट्वोषधयःसमिति
द्रोणप्रमाणव्रीहीन्क्षिप्त्वाकलशोसीतिकुंभंनिधायेमंमेगंगेइत्यापूर्यगंधद्वारामितिगंधपुष्पो
याओषधीरित्योषधीरोषधयःसमितियवान्कांडात्कांडादितिदूर्वाअश्वत्थेवइतिपंचपल्लवान्
स्योनेतिपंचमृदःयाःफलिनीरितिफलंसहिरत्नानीतिपंचरत्नानिगंधद्वारामितिगंधंगाय
त्र्यादितत्तन्मंत्रैःपंचगव्यंहिरूपइतिहिरण्यंप्रक्षिप्ययुवासुवासाइत्यावेष्ट्यपूर्णादर्वइति
पूर्णपात्रंनिदध्यात्॥ ततोरुद्रकलशाच्चतुर्दिक्षुमहीद्योरित्यादिचतुरःकलशान्यथाशक्ति
पंचेषुस्थापयित्वापूर्णपात्रनिधानांतंकृत्वामध्यकलशेपूर्णपात्रोपरिस्थवस्त्रेसौवर्णंरु
द्रप्रतिमांत्र्यंबकमितिमंत्रेणावाह्यपूजयेत्॥ अस्यवसिष्ठोरुद्रोनुष्टुप्॥ इतरेषुचतुर्षुवरुण

पूजनं।ततएकत्रत्रिकलिककुंभंस्पृष्ट्वारुद्रैकादशिनीं जपेद्यदिपाठुघोयजमानः।बह्वृचश्चेच्चत्वारिरु
द्रसूक्तानि।छंदोगस्तुरुद्रसामानि।अत्रोभयत्रशक्तितएकादशाष्टत्रिध्येकसंख्यायाह्या।केचि
त्तुरुद्रःसर्वसाधारणोबह्वृचछंदोगयोस्तुसूक्तसाम्नोरुद्रेणसहविकल्पइत्याहुः।इदमेवशिष्टाः
कुर्वंति।तत्ररुद्रन्यासादिर्थोगुरुणानिर्मितरुद्रपद्धतौद्रष्टव्यः।रुद्रसूक्तानितुकद्रुद्रायेतिघोरःक
ण्वोरुद्रोगायत्री।इमारुद्रायतवसइत्येकादशर्चस्यकुत्सोरुद्रआद्यानवजगत्योंत्येतुष्टुभौ।।१।
आतेपितरितिपंचदशर्चस्यगृत्समदोरुद्रस्त्रिष्टुप्।इमारुद्रायस्थिरधन्वनइतिचतसृणांवसि
ष्ठस्त्रिस्रोजगत्योंत्यात्रिष्टुप्।आवोराजानमित्येकादशानीरुद्रसाम्नोवामदेवोरुद्रःआद्यसा
म्नस्त्रिष्टुप्।चतुर्णांगायत्री।।त्रयाणांत्रिष्टुप्।त्रयाणामनुष्टुबितिछंदः।जपेवि०।रुद्रन्यासषष्ट्यादितुला राम
पुरुषपद्धतौद्रष्टव्यः।ततस्त्र्यंबकमितिमंत्रमष्टोत्तरसहस्रंपावमानीश्च मध्यमकुंभेजपेत्।ततः।।९७।

प्राक्कुंभे आशुः शिशान इति त्रयोदशर्चस्य सूक्तस्य इंद्रोऽप्रतिरथ ऋषिः। इंद्रो देवता। त्रिष्टुप् छं
दो स्त्यानुष्टुप्। दक्षिणकुंभे त्वमग्ने रुद्र इत्यनुवाकस्य हव्यवाट् ऋषिः अग्न्यात्मा रुद्रो देवता। जग
ती छंदः। पश्चिमकुंभे रक्षोहणं इत्यस्य वामदेवो ग्निस्त्रिष्टुप्। उत्तरकुंभे रक्षोहणमिति पंचविंश
र्चस्य आंगिरसः पायुरग्निस्त्रिष्टुप्। अंत्याश्चतस्रो नुष्टुभः। जपे वि०। अत्रापि पूर्वोक्ताः संख्या
शत्स्या या ख्याः। पञ्च एते षामपि मध्यकुंभ एव जपः। चतुर्षु शांति जप इति। पंचकुंभासंभवे
चतुरः श्रवणं पंचवक्त्रं कुंभं स्थापयित्वा सर्वत्रैवं कुर्यात्। ततः कुंभस्योत्तरतश्चतुर्विंशद्दलं
पंकजं पंचवर्णैः कृत्वा कर्णिकायां पूर्ववत्कलशं स्थापयेत्। तत्र व्रीहिषु नियमः। याः फलिनी रिति
रत्नौषधीः क्षिपेत्। ततः कुंभोपरि स्वर्णपात्रोपरि सर्पो ख्यामाश्लेषा प्रतिमां नमो अस्तु स
र्पेभ्यो ये के च पृथिवीमनु। ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नम इति मंत्रेणावाहयेत्। ततः स

शां॰ति॰

पेरिक्तस्त्रिनेत्रश्चद्विभुजः पीतवस्त्रकः। फलकासिधरस्तीक्ष्णोदिव्याभरणभूषितः। इति सर्प्प
ध्यात्वा तद्दक्षिणतो बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप्। इति मंत्रेण प्रतिमायां बृहस्पतिमावा
ह्य उत्तरश्च उदीरतां शंखः स्वधा त्रिष्टुप्। अनेन प्रतिमायां पितृना वाह्य प्रागादि ईशानपर्य
तं चतुर्विंशतिपंकजदलेषु पूर्वामारभ्य पुनर्वसुपर्यंतं नक्षत्राणि तद्देवता वा आवाहयेत्। यथा।
भगः। अर्यमा। सविता। त्वष्टा। वायुः। इंद्राग्नी। मित्रः। इंद्रः। निर्ऋतिः। आपः। विश्वेदेवाः। विष्णुः।
वसवः। वरुणः। अजैकपात्। अहिर्बुध्न्यः। पूषा। अश्विनौ। यमः। अग्निः। प्रजापतिः। सोमः। रुद्रः।
अदितिः इति। ततो लोकपालानावाह्य पदार्थानुसमयेन कांडानुसमयेन वा पूजयेत्। तत आचा
र्योग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात्। अत्र प्रधानं नवग्रहान् प्रत्येकममुकसंख्याभिः समिच्च राम
र्वाज्याहुतिभिः अधिदेवताः प्रत्यधिदेवताः अमुकसंख्याभिः समिच्चर्वाज्याहुतिभिः विनायका ॥९८॥

दी। लोकपालांश्च प्रत्येकममुकसंख्याभिः समिच्चर्वाज्याहुतिभिः प्रधानदेवतां सर्पान्प्रतिद्रव्यम
ष्टोत्तरशतसंख्याभिर्घृतमिश्रपायससमिदाज्यचर्वाहुतिभिर्बृहस्पतिं पितॄंश्च प्रतिद्रव्यमष्टा
विंशतिसंख्याभिर्घृतसंमिश्रपायससमिदाज्यचर्वाहुतिभिर्गणादिचतुर्विंशतिदेवताः प्रत्येक
मष्टसंख्याभिः पायसाहुतिभिः रक्षोहणं कृणुष्वेति पंचदशर्भिः प्रत्यृचमष्टसंख्याभिः कृसरा
हुतिभिः सवितारं दुर्गां त्र्यंबकं क्षेत्रपालं वास्तुपतिं दुर्गां शास्तारं क्षेत्राधिपतिं मित्रावरुणौ
अग्निं एताः अष्टाष्टसंख्याभिः कृसराहुतिभिः श्रियं हिरण्यवर्णामिति पंचदशभिः प्रतिमंत्रम
ष्टसंख्याभिः समिदाज्यचर्वाहुतिभिः सोमं त्रयोदशसंख्याभिः पायसाहुतिभिः रुद्रं चतुर्गृही
तेनाज्येन अग्निं वायुं सूर्यं प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि पूर्णपात्रनिधानांतं कृत्वा
ज्यभागांतं कुर्यात्। ततो यजमानो दक्षिणतः सर्वा देवता उद्दिश्य त्यागं कुर्यात्। ततो ऽग्न्वि क

सहितआचार्येहोमंकुर्यात्॥ तद्यथा॥ नवग्रहानधिदेवताःप्रत्यधिदेवताविनायकाद्याःलो
कपालांश्चतत्तन्मंत्रैःहुत्वासर्पेभ्योनमोअस्तुसर्पेभ्यइतिमंत्रेणबृहस्पतयेपितृभ्यश्चतत्तन्मं
त्रैर्द्रव्यचतुष्टयंतत्तत्संख्ययाहुत्वाभगणादिचतुर्विंशतिदेवेभ्योनाममंत्रेणाष्टाष्टसंख्ययापा
यसाहुतीर्जुहुयात्॥ततःकृणुष्वेतिपंचदशर्चस्यगोतमोवामदेवोरक्षोहात्रिष्टुप्।कृसरहोमेवि·
गायत्र्यासवितारं।जातवेदसेकश्यपोदुर्गात्रिष्टुप्।कृसरं।त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्।कृसरं।सी
रायुंजंतीत्यस्यबुधःसौम्यऋषिः।ऋत्विक्स्तुतिर्देवता।गायत्रीछंदः।कृसरं।तामग्निवर्णांसौ
भरिर्दुर्गात्रिष्टुप्।कृसरं।वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्।कृसरं।अग्निंकाण्वोमेधातिथि
रग्निर्गायत्री।कृसरं।क्षेत्रस्यपतिनावामदेवःक्षेत्रपालोनुष्टुप्।कृसरं। गृणानाजमदग्निर्मित्रावरुणौ गाय
गायत्री।कृसरं।अग्निंहोतंपुरोदधइत्यस्यआंगिरसोविरूपोग्निर्गायत्री।कृसरं।हिरण्यवर्णामि ॥९९॥

त्रिपंचदशर्चस्यसूक्तस्य आनंदकर्दमचिक्लीतेंदिरासुताऋषयः। श्रीर्देवता आद्यास्तिस्रोनु
ष्टुभः। चतुर्थीप्रस्तारपंक्तिः। पंचमीषष्ठ्यौत्रिष्टुभौ। ततोष्टावनुष्टुभः। अंत्याप्रस्तारपंक्तिः। होमेवि
प्रत्यचं समिदाज्यचरून् तएश ताष्टाविंशत्यष्टान्यतमसंख्ययाजुहुयात्। त्वन्नः सोमविश्वतइत्य
स्यप्रगाथः सोमस्त्रिष्टुप्। पायसहोमेवि०। १२। त्वन्नः सोमविश्वतोगोपाइतिवामंत्रः। त्वन्नः सोम
सुक्रतुरितिवा। अनयोरेंद्रोविमदः सोमः प्रस्तारपंक्तिः। ततश्चतुर्गृहीतमाज्यंगृहीत्वा याते
त्रि४ रुद्रेत्यस्यपोरुद्रः स्वराडनुष्टुप्। अनेनजुहुयात्। ततः स्रुवेणव्यस्तसमस्तव्याहृतिभिः आज्यंहुत्वा
स्विष्टकृत्प्रायश्चित्तहोमांतंकुर्यात्। आज्यहोमेषु संपातस्थापनं। ततोदिक्पालेभ्योनवग्रहे
भ्योविनायकादिभ्यः सर्पेभ्योबृहस्पतयेपितृभ्योरुद्रायक्षेत्रपालायचसदीपमाषभक्तबलिं
दद्यात्। ततआचार्योयजमानोवा चतुर्गृहीतेनद्वादशगृहीतेनवास्रुचंपूरयित्वातत्रफलादि

क्रमवधाय पूर्णाहुतिं जुहुयात्॥ तत्र मंत्राः॥ समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य गोतमो वामदे
वोग्निस्त्रिष्टुप्॥ अंत्या जगती॥ पूर्णाहुतिहोमे वि०॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥ पूर्णा०
पूर्णादर्वि विश्वेदेवाः शतक्रतुरनुष्टुप्॥ सप्त ते अग्ने सप्तवानग्निर्जगती॥ पूर्णा०॥ एतैः पूर्णाहुतिं
हुत्वा प्रणीताविनयनादिकर्मशेषं समाप्य॥ ततः रुद्रं सर्षपं चोपचारैः संपूज्य त्र्यंबकं नमो अस्तु
सर्पेभ्य इत्युपस्थाय संपातं सर्वकलशेषु दत्वा सर्वकलशोदकं पात्रांतरे गृहीत्वा सर्त्विगाचार्यो
यजमानं सर्वौषधीभिरनुलिप्तांगं धृतनववस्त्रं सपुत्रां च तत्पत्नीमुपवेश्य वक्ष्यमाणैर्मंत्रै
रभिषिंचेत्॥ तत्र अक्षीभ्यामितिषण्णां कश्यपो विवृहा यक्ष्मनाशनोनुष्टुप्॥ अभि०॥ त्रिभिष्टु
देवेति सप्तानां वसिष्ठ ऋषिः॥ आद्यानां त्रयाणामग्निर्देवता ततश्चतुर्णां विश्वेदेवाः आद्या गा
यत्री द्वितीयानुष्टुप्॥ ततस्तिस्रो गायत्र्योंत्यै द्वेनुष्टुभौ॥ अभि०॥ आपो हि ष्ठेति नवर्चस्यांबरीषः सिं ॥१००॥

राम

धुद्दीप आपोगायत्री। अंत्येद्वे अनुष्टुभौ पंचमी वर्द्धमाना सप्तमी प्रतिष्ठा अभि॰। आपइद्वेति
द्व्यस्य सप्तर्षयो विश्वेदेवा अनुष्टुप्। सहस्राक्षेणेति प्राजापत्यो यक्ष्मनाशनो यक्ष्महा त्रिष्टुप्।
देवस्यत्वेत्यापस्तंबशाखागतै स्त्रिभिर्मंत्रैः। यज्ञाग्र तइति षण्णां प्रजापतिर्मन स्त्रिष्टुप्। तानः
योसौ वज्रधरो देवो महेंद्रो गजवाहनः। सर्पजात शिशोर्दोषं मातापित्रोर्व्यपोहतु। योसौ शास्त्र
धरो देवो हुतभुङ्मेषवाहनः। सप्तजिह्वश्च देवोग्निः सर्पदोषं व्यपोहतु। योसौ दंडधरो देवो ध
र्मो महिषवाहनः। सर्पजात शिशोर्दोषं व्यपोहतु यमो मम। योसौ खड्गधरो देवो निर्ऋती राक्षसा
धिपः। प्रशमयतु सर्पोत्थं दोषं गंडांतसंभवं। योसौ पाशधरो देवो वरुणश्च जलेश्वरः। नक्रवा
हः प्रचेता नो सर्पोत्थाघं व्यपोहतु। योसौ देवो जगत्प्राणो मारुतो मृगवाहनः। प्रशमयतु सर्पो
त्थं दोषं बालस्य शांतिदः। योसौ निधिपतिर्देवो गदाभृद्वाजिवाहनः। मातापित्रोः शिशोश्चैव

सार्पदोषं व्यपोहतु। योसौ पशुपतिर्देवः पिनाकी वृषवाहनः। आश्लेषामूलगंडांतं दोषमाशु व्य
पोहतु विघ्नेशः क्षेत्रपो दुर्गा लोकपालान्नवग्रहाः। सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः। आश्ले
षाऋक्षजातस्य मातापित्रोर्धनस्य च। भ्रातृज्ञातिकुलस्थानां गंडांतं सव्यपो हन्तु। पितरः सर्वभू
तानां रक्षंतु पितरः सदा। सर्पनक्षत्रजातस्य वित्तं च ज्ञातिबांधवान्। सुरास्त्वेत्याभिरभिषिच्य।
तत्र्यंबको शंभुर्विश्वेदेवाः शंकरी। अभिषेकं ततो रुद्रसर्पकलशोदकेनान्येन च शातछिद्रमं तथा
याभिषिक्तो यजमान आचार्याय धेनुं सर्पप्रतिमां वस्त्रं कुंभं हेमं च ब्रह्मणे वृषं रुद्रजापिने हस्त
मनडुहं रुद्रप्रतिमां कलशं च ऋत्विग्भ्यो यथाशक्ति दक्षिणां दत्वा सर्पाणामुत्तरपूजां विधाय ता
म्रपात्रे फलपुष्पादियुक्तमर्घ्यं गृहीत्वा सर्पाधीशान नमस्तुभ्यं नागानां च गणाधिप। गृहाणार्घ्यं
मया दत्तं सर्पारिष्टप्रशांतये। इत्यर्घ्यं दत्वा उत्तिष्ठेति विसृज्य संकल्पपूर्वकमाचार्यहस्ते प्रतिपा

धाग्निं संपूज्य गच्छेति विसृज्य यथाशक्ति ब्राह्मणान्भोजयित्वा सुहृद्युतो भुंजीत ॥ ॥ इति श्री
मन्नारायणभट्टसुतरामकृष्णभट्टसुतकमलाकरभट्टकृतआश्लेषाशांतिप्रयोगः ॥ ॥ ७ ॥
अथ नक्षत्रविशेषफलमुक्तं नृसिंहप्रसादे ॥ ॥ चित्रायाः पुष्यमध्ये द्विपादे पूर्वाषाढाधिष्ण्यपा
दे तृतीये ॥ जातः पुत्रश्चोत्तराद्ये विधत्ते मातापित्रोर्भ्रातुरायुष्यनाशं ॥ द्विमासी चोत्तरादोषः पु
ष्ये चैव त्रिमासिकः ॥ पूर्वाषाढाष्टमे मासि चित्रायां षाण्मासिकं फलं ॥ नवमासं तथाश्लेषा मूले चा
ष्टकवर्षकं ॥ ज्येष्ठा पंचदशे मासि पुत्रदर्शनवर्जिता ॥ यत्र शांतिर्नोक्ता तत्र ग्रहमखः कार्यः ॥ तस्मा
च्छांतिं प्रकुर्वीत ग्रहाणां क्रूरचेतसामिति वसिष्ठेन सर्वशेषत्वेनोक्तेः ॥ नारदः ॥ कृष्णगोः कपि
लां वा सः कपिलं कृष्णमेव वा तद्दानं तयेत्तु विप्राय दद्यात्तथा स्वलक्षणान्वितैः ॥ ततो होमं प्रकुर्वी
त शांत्यर्थं तु यवैस्तिलैः ॥ नमस्ते रुद्रमंत्रेण दक्षिणां तु प्रदापयेत् ॥ यथा वित्तानुसारेण ततः

शांतिर्भविष्यति।येन मंत्रेण होतव्यं तन्मंत्रं च तथा जपेत्।शतावर्त्तेन मंत्रेण जुहुयाद्वेदमंत्रवित्॥
श्री फलस्यापि सामिधः शिवार्थं जुहुयात्ततः।अष्टोत्तरशतं चैव गायत्र्या जपउत्तमः।शांतिकं प्रज
पेद्विप्र इदं विष्णुर्विचक्रमे।स हस्रशीर्षमंत्रेण जपेत्सौष्टिकशांतये॥आपस्तंबः॥चतुष्पादं पंच
पादं वा भवतीत्येतानि सूर्यदैवत्यानि अद्भुतानि प्रायश्चित्तानि भवंत्युदुत्यं जातवेदसमिति स्था
लीपाकं कृत्वा पंचभिराज्याहुतिरभिजुहोति सूर्याय स्वाहा सर्वग्रहाधिपतये स्वाहा किरणपाणये
स्वाहा ईश्वराय स्वाहा सर्वपापशमनाय स्वाहेति व्याहृतिर्हुत्वाथ साम गायेत्॥ ॥इति श्रीम
न्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते शांतिकमलाकरे प्रसवशां
तिः॥ ॥अथैकनक्षत्रजननशांतिः॥ ॥वृद्धगार्ग्यः॥एकस्मिन्नेकनक्षत्रे भ्रात्रोर्वा पितृपुत्र राम
योः।प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्य निश्चयः॥भ्रात्रोर्भ्रातृभगिन्योरित्यर्थः।पितृपुत्रयोः॥१०२॥

पित्रोर्नक्षत्रे पुत्रदुहित्रोः यद्विप्रसूतिरित्यर्थः। भ्रात्रोः पुत्रयोरित्यत्र भ्रातृपुत्रौ स्वसृदुहितृ
भ्यामित्येकशेषः। पित्रोरित्यत्र पिता मात्रेत्येकशेषः। मध्यमपदलोपी चासमर्थश्च समाहा
रश्छांदसः। ज्योतिर्निबंधे। समानभे यदा देवि पितापुत्रौ च सोदरौ। भगिन्योस्स्वस्य बंधवा तदा
पूर्वस्य नाशनं। तद्दोषनाशाय तदा प्रशस्तां शांतिं च कुर्यादभिषेचनं च। संपूज्य ऋक्षप्रतिमां
तस्येशानं च कुर्याद्विभवानुरूपं॥ तत्र शांतिं प्रवक्ष्यामि सर्वाचार्यमतेन तु। शुभर्क्षे शुभवा
रे च चंद्रताराबलान्विते। रिक्तविष्टिविवर्ज्ये तु प्रारभेद्दिवसे सुधीः। आचार्यं वरयेत्पूर्वं चतुरोथ
द्विजोत्तमान्। पुण्याहं वाचयित्वा तु शांतिकर्म समाचरेत्। अग्नेरीशानदिग्भागे नक्षत्रप्र
तिमां ततः। तत्तदृक्षोक्तमंत्रेण पूजयेत्कलशोपरि। नक्षत्रमंत्राः आपस्तंबशाखीयाः प्रपंचे वा
स्यषप्रसिद्धाः। नक्षत्रदेवतां वा नक्षत्रदेवतापूज्या त्वधिप्रत्यधिपूर्वकमिति ज्योतिर्निबंधो

कैः॥ रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत्॥ स्वशाखोक्तेन मार्गेण कुर्यादग्निमुखं ततः॥ अनेनैे
व तु मंत्रेण ऊनेदष्टोत्तरं शतं॥ तत्तद्दक्षोक्तेने त्यर्थः॥ प्रत्येकं समिदन्नाद्यैः प्रायश्चित्तांतमेव च॥ अ
भिषेकं ततः कुर्यादाचार्यः पितृपुत्रयोः॥ वस्त्रालंकारगोदानैराचार्यं पूजयेत्पुनः॥ ऋत्विजां दक्षि
णां दद्यान्माषत्रयसुवर्णकं॥ देवताप्रतिमादानं धान्यवस्त्रादिभिः सह॥ यानशय्यासनादी
नि दद्यात्तद्दोषशांतये॥ भोजयेद्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः॥ ॥ अथ प्रयोगः॥ ॥
माता पितृनक्षत्रोत्पत्तौ गोमुखप्रसवं कृत्वा भ्रातृनक्षत्रे नाम कृत्वा देशकालौ संकीर्त्यस्य
शिशोः पित्रादिनक्षत्रोत्पत्तिसूचितसर्वारिष्टशांत्यर्थं एकनक्षत्रजननशांतिं करिष्ये इति सं
कल्प्य गणेशपूजाकृत्विग्वरणांते आचार्यः ऐशान्यां कलशं संस्थाप्य तत्र रक्ते वस्त्रे जन्म
र्क्षप्रतिमां तद्दक्ष मंत्रेण वस्त्रयुग्माद्यैः पूजयेत्॥ ततोऽग्निं ग्रहांश्च प्रतिष्ठाप्याऽत्र प्रधानं अमु

कनक्षत्रंतद्दैवतांवासमिद्वर्गाज्यैः प्रत्येकमष्टशतसंख्यया।शेषेणस्विष्टकृतमित्यादिबलि
दानांतंकुर्यात्।ज्योतिर्निबंधेतु।भक्त्याहरिहरौदेवौस्वर्णरूप्यमयौशुभौ।इत्युक्तौहरिहरौसं
पूज्यविविधस्यास्यविश्वस्यपितरौविश्वतोमुखौप्रीयेतांमूर्तिदानेनदेवौहरिहरावुभावि
त्याचार्यायदेयमेवासदक्षिणंदत्वाभिषेकंकुर्यात्।दानंहोमविधेःपश्चाद्दानादन्वभिषिंचन

मित्युक्तं।पूर्णाहुतिंप्रणीताविमोकादिचकृत्वाकलशजलेनाभिषिच्याचार्यायवस्त्रालं
करणंनिर्मोकदानंचऋत्विग्भ्यश्चमाषत्रयमितंसुवर्णंदत्वोत्तरपूजांकृत्वाविप्रान्भोजयेत्॥
॥ ॥इतिकमलाकरभट्टकृतेएकनक्षत्रशांतिप्रयोगः॥ ॥अथव्यतीपातवैधृतिसंक्रमप्र
सवशांतिविधिः॥ ॥शौनकः॥अथातःसंप्रवक्ष्यामिशौनकःशांतिमुत्तमां।वैधृतौचव्यती
पातेमहादोषोभिजायते।कुमारजन्मकालेतुव्यतीपातश्चवैधृतिः।संक्रमश्चरवेस्तत्रजा

तोहरिष्टकारकः।दरिद्राणांमहादुःखंव्याधिपीडामहद्भयं।अश्रियंमृत्युमाप्नोतिनात्रकार्या
विचारणा।स्त्रीणांचशोकदुःखंचसर्वनाशकरोभवेत्।शांतिर्वापुष्कलाकार्यातत्रदोषोनक
श्चन।गोमुखप्रसवंकुर्याच्छांतिंकुर्यात्प्रयत्नतः।जपाभिषेकदानैश्चहोमाद्यपिविशेषतः।न
वग्रहमखंकुर्यात्तस्यदोषोपशांतये।प्रथमंगोमुखाज्जन्मततःशांतिंसमाचरेत्।गृहस्यपू
र्वदिग्भागेगोमयेनानुलिप्यच।अलंकृतेतुदेशेतुव्रीहिराशिंप्रकल्पयेत्।पंचद्रोणमितंधा
न्यंतदर्धंतंदुलेनच।तदर्धंतुतिलैःकुर्यादन्योन्योपरिकल्पयेत्।द्व्यात्रितयराशौतुअष्टपत्रंलि
खेद्बुधः।पुण्याहंवाचयित्वातुआचार्यंवरणंयात्पुरा।पंचांगभूषणंदद्यात्सहवस्त्रांगुलीय
कं।राशौप्रतिष्ठितंकुंभमव्रणंसुमनोहरं।तीर्थोदकेनसंगृह्यसमृदोषधिपल्लवं।सगंध्य
गंधरत्नंचवस्त्रयुग्मेनवेष्टयेत्।तस्योपरिन्यसेत्पात्रंसूक्ष्मवस्त्रेणसंयुतं।प्रतिमांस्थाप

येद्धैमान्साधिप्रत्यधिदेवतां।चंद्रादित्याकृतीपार्श्वेमध्येवैधृतिमर्चयेत्।वैधृतितंदेवतांरुद्रं।
एवमेवव्यतीपातेमध्येसंक्रमणस्यवा।भानोरुत्तरतोरुद्रंअग्निंदक्षिणतोयजेत्।वैधृतो
मध्येरुद्रःदक्षिणोत्तरयोःसूर्यचंद्रौ।संक्रमपातयोर्मध्येसूर्यंदक्षिणोत्तरयोरग्निरुद्रावित्यर्थः
।निष्कमात्रेणसार्धेनपादेनापिस्वशक्तितः।प्रतिमांकारयेद्धैमांतत्तल्लक्षणलक्षितां।तत्तुदा
नपरिभाषायांमयोक्तं।प्रतिमांपूजनार्थायवस्त्रयुग्मंनिवेदयेत्।अधिदेवंभवेत्सूर्यंचंद्रप्र
त्यधिदेवतं।तत्तथाहुतिपूर्वेणतत्तन्मंत्रेणपूजयेत्।त्र्यंबकेनमंत्रेणप्रधानप्रतिमांयजेत्।
उत्सूर्यइतिमंत्रेणसूर्यपूजांसमाचरेत्।आप्यायस्वेतिमंत्रेणसोमपूजांसमाचरेत्।उप
चारैःषोडशभिर्यद्वापंचोपचारकैः।अर्चितंगंधपुष्पाद्यैःफलंनैवेद्यमर्पयेत्।मृत्युंजयेनमं
त्रेणप्रधानप्रतिमांस्पृशेत्।अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा।अष्टाविंशतिवाचाथ

प्रजप्यात्स्वस्य शक्तितः॥ सर्वसौरं प्रजप्याथ सोमार्थं सोममंत्रतः॥ आनोभद्रेति सूक्तं च भद्रा॥
अग्नेश्च सूक्तकं॥ जपेच्च पौरुषं सूक्तं त्र्यंबकमतः परं॥ कुंभं स्पृष्ट्वा चतुर्दिक्षु जपं कुर्युः स्वयर्त्वि
जः॥ कुंभस्य पश्चिमे देशे स्थंडिलेग्निं प्रकल्पयेत्॥ स्वगृह्योक्तविधानेन कारयेत्संस्कृतानलं॥
त्र्यंबकेन मंत्रेण समिदाज्य चरून्हुनेत्॥ अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा॥ अष्टाविंशति
वा कुर्यात्स्वस्य शक्त्यनुसारतः॥ मृत्युंजपेन मंत्रेण तिलहोमं समाचरेत्॥ ततः स्विष्टकृतं
कृत्वा अभिषेकं च कारयेत्॥ समुद्रज्येष्ठा सूक्तेन आपो हिष्ठा त्र्यचेन च॥ अक्षीभ्यामिति सूक्तेन
पावमानीभिरेव च॥ त्र्यंबकेन उत्सूर्य आप्यायस्वेति मंत्रतः॥ सुरास्त्वा इति मंत्रेण अभिषेकं
समाचरेत्॥ आचार्यं पूजयेत्पश्चाद्वस्त्रहेमांगुलीयकैः॥ गोदानं वस्त्रदानं च हेमदानं विशेष

तः॥ तद्दोषरामनार्थाय आचार्याय प्रदापयेत्॥ प्रक्षाल्य नपटं दद्यात्ततः शांतिर्भविष्यति॥ ३॥

पकेभ्यो ब्राह्मणेभ्यो दक्षिणाभिश्च तोषयेत्। दीनांधकृपणेभ्यश्च प्रदद्याद्भूरि दक्षिणां। ब्राह्म
णान्शतसंख्याकान्मिष्टान्नैर्भोजयेच्च तान्। बंधुभिः सह भुंजीत यथाविभवसारतः। एवं
यः कुरुते मर्त्यो नैव दुःखमवाप्नुयात्। आयुरारोग्यमैश्वर्यं मातापित्रोः शिशोरपि। सर्वदुःख
निवृत्तिश्च पुत्रपौत्रप्रवर्द्धनं। सर्वान्कामानवाप्नोति सुखी भूत्वा चिरं वसेत्॥ ॥इति शौनकी
ये व्यतीपातादिशांतिः॥ ॥अथ प्रयोगः॥ ॥गोमुखप्रसवं कृत्वा देशकालौ स्मृत्वास्य शि
शोर्वैधृतिजननसूचितसर्वारिष्टशांतिद्वारा श्रीपरमेश्वरप्रीत्यर्थं वैधृतिजननशांतिं करिष्ये।
एवं व्यतीपातसंक्रमयोः। एकद्दिने तत्सत्वे तु तंत्रेणैकैव शांतिः। संक्रांतौ वैधृतेः सत्वे शांतिद्व
यं पृथक्कार्यं। ततो गणेशपूजनपुण्याहवाचननांदीश्राद्धाचार्यर्त्विग्वरणानि कुर्यात्। ततः
आचार्यो यरक्षेति सर्षपान्विकीर्य भूमिं प्रोक्ष्य पूर्वस्यां मही द्यौरिति भूमिं स्पृष्ट्वा तत्र ओषधयः

समितिपं चद्रोणमितं व्रीहिराशिं कृत्वा तदुपरि सार्द्धद्रोणद्वयपरिमितं तंडुलराशिं तदुपरि सपाद
द्रोणमितं तिलराशिं कृत्वोपरि समं कृत्वा तत्र पंचवर्णैरष्टदलं कृत्वा तत्राकलशो घिति कुंभं प्रतिष्ठा
प्येमं मे गंगे इति तीर्थजलेनापूर्य तत्र सप्तमृत्तिकाः सर्वौषधिपंचपल्लवपंचगव्याष्टगंधपंचरत्नानि
प्रक्षिप्य वस्त्रयुग्मेन संवेष्ट्य पूर्णपात्रोपरि वस्त्रे वैधृतिशांतौ व्याहृतिपूर्वं त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्।
इति मध्ये रुद्रं तद्दक्षिणत उदु त्यं मित्रावरुणौ वसिष्ठः सूर्यस्त्रिष्टुप्। उदुत्यमिति सूर्यमुत्तरत आप्या
यस्वेति सोममावाहयेत्। व्यतीपातसंक्रमशांतौ तु उदुत्यमिति मध्ये सूर्यं दक्षिणतो ग्निं दूतमित्यग्निं
उत्तरश्च त्र्यंबकमिति रुद्रं आवाहयेत्। ततः षोडशोपचारैः संपूज्य रुद्रप्रतिमां स्पृष्ट्वा मृत्युंजयमं
त्रं अष्टसहस्रमष्टशतमष्टाविंशतिसंख्यं वा जप्त्वा सूर्यप्रतिमां स्पृष्ट्वा सर्वसौरान्जपेत्। तथा॥उदु राम
त्य॥ मिति त्रयोदशर्चस्य सूक्तस्य कण्वपुत्रः प्रस्कण्वो नवाद्या गायत्र्योंत्यास्त्वनुष्टुभः। चित्रं देवाना॥१०६॥

नी ३

मितिषडृचस्यसूक्तस्याङ्गिरसःकुत्सस्त्रिष्टुप्।इंद्रंमित्रमितिद्वयोरौचथ्योदीर्घतमास्त्रिष्टुप्।
हंसःशुचिषदित्यस्यगौतमपुत्रोवामदेवोजगती।यत्त्वासूर्येत्यत्रिरनुष्टुप्।यदद्यसूर्येत्येकस्याउ
सूर्यइतितिसृणांउद्धैतिसार्द्धचतसृणांउदुत्यदर्शतमितितिसृणांमैत्रावरुणिर्वसिष्ठस्त्रिष्टुप्।अं
त्याबृहतीशीर्षन्निइतिसतोबृहती।तच्चक्षुःपुरउष्णिक्।बण्महांअसीतिद्वयोर्जमदग्निःपूर्वाबृहती।
उत्तरासतोबृहती।नमोमित्रस्येत्सूर्योनोदिवइतिपंचर्चस्यसूर्यपुत्रश्चक्षुर्गायत्री।विभ्राड्बृहद
तिचतसृणांसूर्यपुत्रोविभ्राड्जगती।विभ्राजमितिप्रस्तारपंक्तिः।आयंगौरितितृचस्यसार्परा
ज्ञीगायत्री।सर्वेषांसूर्योदेवता।ततःसोमप्रतिमांस्पृष्ट्वाआप्यायस्वेतिजपेत्।व्यतीपातसंक्रम
शांतौपूर्ववत्सोरजपस्ततोमृत्युंजयजपः।ततश्चतुर्दिक्षुऋत्विजःकुंभंस्पृष्ट्वाआनोभद्राइतिसूक्तं
भद्राअग्नेरितिसूक्तंपुरुषसूक्तंत्र्यंबकमंत्रंचजपेयुः।ततआचार्योग्निंगृहांश्चप्रतिष्ठाप्यान्वा

तिद्वादशर्चस्यसूक्तस्यसूर्यपुत्रोभितपाजगती।२ राम्यास्त्रिष्टुप्॥५

३६सू०८

दध्यात् अत्रप्रधानं रुद्रं अष्टसहस्राष्टशतान्यतमशतसंख्ययासमिदाज्यचरुतिलद्रव्येणत्र्यंबक
मंत्रेणसूर्यंसोमंचअष्टाविंशतिसंख्ययासमिदाज्यचरुद्रव्येणव्यतीपातसंक्रमयोस्तुसूर्यंरुद्र
संख्ययाग्निरुद्रोअष्टाविंशतिसंख्ययामृत्युंजयंत्र्यंबकमंत्रेणतिलद्रव्येणशेषेणाभिषेकेतमि
त्यादिततउक्तहोमंकृत्वासर्वशांतिषुतिलैर्मृत्युंजयहोमंचकृत्वाबलिदानांतेपूर्णाहुतिंहुत्वास
मुद्रज्येष्ठाइतिमंत्रेणआपोहिष्ठेतितृचेनअक्षीभ्यामितिसूक्तेनपावमानीभिःरुद्रसूर्याग्निमंत्रैःसु
रास्त्वेत्यादिपौराणैश्चाभिषिंचेयुः॥ततोयजमानोरूपंरूपमित्याज्यमवेक्ष्यतत्पात्रंसदक्षिणंब्रा
ह्मणायदत्वाआचार्यायवस्त्रद्वयंगांहेमांगुलीयकादिसुवर्णंप्रछादनपटंचदत्वाऋत्विग्दक्षिणांच
दत्वोत्तरपूजांकृत्वाविसर्ज्याचार्यहस्तेप्रतिपाद्याग्नि[illegible]संख्यशतंब्राह्मणान्द्विजैर्भोजयेदिति॥ राम श्वर
॥ ॥इति श्रीमन्नारायणभट्टसुत कमलाकरभट्टकृतोव्यतीपातादिशांतिप्रयोगः॥ ॥ ॥१०७॥

॥ ॥अथग्रहणशांतिः॥ ॥शौनकः॥ ॥ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते। व्याधिपीडां तदा स्त्री
णां आसौतुकं तु दर्शनात्॥ इत्थं संजायते यस्य तस्य मृत्युर्न संशयः। व्याधिपीडां च दारिद्र्यं शोकश्च
कलहो भवेत्॥ शांतिं तेषां प्रवक्ष्यामि नराणां हितकाम्यया। यस्मिन् ऋक्षे विशेषेण ग्रहणं यदि
जायते। तदृक्षाधिपते रूपं सुवर्णेन प्रकल्पयेत्। सूर्यग्रहे सूर्यरूपं हिरण्येन स्वशक्तितः। चंद्र
चंद्रग्रहे धीमान् रजतेन विशेषतः। राहुरूपं प्रकुर्वीत नागेनैव विशेषतः। नागः सीसं॥ भु
चोद्दिष्टे प्रयत्नेन गोमयेन प्रलेपयेत्। तस्योपरि न्यसेद्धीमान् नववस्त्रं सुशोभनं। त्रयाणां तत्र देवानां
स्थापनं तत्र कारयेत्। श्वेतवस्त्रं श्वेतमाल्यं श्वेतगंधानुलेपनं। चंद्रग्रहे प्रदातव्यं चंद्रप्रीतिकरं च
यत्। राहवे चैव दातव्यं कृष्णपुष्पांबराणि च। दद्यान्नक्षत्रनाथाय श्वेतगंधानुलेपनं। सूर्यं सं
पूजयेद्धीमान् आकृष्णेनेति मंत्रतः। चंद्रग्रहे तथा सम्यक् आप्यायस्वेति मंत्रतः। स्वर्भानोरिति

शांति·

मैत्रेणराहुंयत्नेनपूजयेत्॥ एवंसंपूजयेद्धीमान्समिद्भिश्चार्कसंभवैः। चंद्रग्रहेचपालाशासमिद्भि
र्जुहुयान्नरः। दूर्वाभिर्जुहुयाद्धीमान्राहोःसंप्रीणनायच। समिद्भिर्ब्रह्मवृक्षस्यमेरुणायजुहुयाद्बु
धः। आज्येनचरुणाचैवतिलैश्चजुहुयात्ततः। इदंसर्वेभ्यः। पंचगव्यैःपंचरत्नैःपंचत्वक्पंचपल्लवैः।
जलैरौषधिकल्कैश्चसहितैःकलशोदकैः। अभिषेकंप्रकुर्वीतयजमानस्ययत्नतः। मंत्रैर्वारुण
संभूतैरापोहिष्ठादिभिस्त्रिभिः। इमंमेगंगेपरतस्तत्वायामीतिमंत्रकैः। अभिषेकेनिवृत्तेतुयज
मानःसमाहितः। आचार्यंपूजयेत्पश्चात्सुशांतोविजितेंद्रियः। तस्मैदद्यात्प्रयत्नेनभक्त्याप्रतिह
तिद्वयं। गांचैवदक्षिणांदद्याद्यजमानःसमाहितः। अनेनविधिनाशांतिंकृत्वासम्यग्विशेषतः।
अकालमृत्युरोगंचव्याधिपीडांनचाप्नुयात्। सौख्यंसौमनसंनित्यंसौभाग्यंलभतेनरः॥ ६ राम
संग्रहणजातानांसर्वारिष्टविनाशनं। कथितंभार्गवेणेदंशौनकायमहात्मने॥ ॥ इतिग्रहणशांतिः॥ १०८॥

॥ ॥अथयमलजननशांतिः॥ ॥भारतवृद्धगर्गः॥ स्त्रियागौर्वडवायाश्च यमलंचैव जायते।आ
नीपाधमतोभीतिर्भार्तृतीर्थां शांतिमाचरेत्॥ मयूरचित्रे।घोटिकाहस्तिनीचैव महिषीयमलौयदि।प्र
सूयतेतदानाशः संग्रामश्च महान्भवेत्।कारयेल्लक्षहोमंच बंधुदानंचकारयेत्।भोजनंब्राह्मणा
नांचदद्याद्गांचैवदक्षिणां।महिषीयमलोत्पत्तौ वन्यानांचैवजन्मनि।दद्याद्बैवतुमार्मेंद्रं शांतिंयद्वा
प्रयोजयेत्॥कात्यायनः॥अथातोयमलजनने प्रायश्चित्तिर्यस्यभार्यागौर्दासीमहिषीचवडवा
विकृतिंप्रसवेत्स्वर्णं दिशाहेवतुरंगक्षीरवृक्षाणांकषायमुपसंहरेत्।प्लक्षवटोदुंबराश्वत्थशमीदेव
दारुगौरसर्षपास्तेषांमिश्रमपोहिरण्यंदूर्वांकुरैःसपल्लवैरेभ्योकलशान्प्रपूर्य सर्वौषधीभिर्दंप
तीस्नापयित्वा आपोहिष्ठेतितिसृभिःकयानश्चित्रइतिद्वाभ्यांपंचैंद्रेणपंचवारुणेनेदमापःप्रव
हतेत्यपाघमितिस्नापयित्वा।अपाघमपकिल्विषमपकृत्यामपोरपः।अपामार्गत्वमस्मदपदु

२ त्रातारमिंद्रमितिपंचैंद्रः॥ वरुणस्योत्तंभनमसीतिपंचवारुणमंत्रः।एतौयाजुषौमंत्रौ २

स्वभ्यंसुवेत्यपाद्यमंत्रः।अलंकृत्यतोदर्भेष्विपवेश्यतत्रमारुतंस्थालीपाकंश्रपयित्वाज्यस्यागाविष्ट्वा
ज्याहुतीर्जुहोतिपूर्वोक्तैःस्नपनमंत्रैःस्थालीपाकस्यजुहोत्यग्नयेस्वाहासोमायस्वाहापवमाना
य०पावकाय०मारुताय०मरुद्भ्यः०यमाय०अंतकाय०मृत्यवे०ब्रह्मणे०अग्नयेस्विष्टकृतेस्वाहे
त्येतद्देवगृहोपातेषूल्कगृध्रकपोतःश्येनोवाप्रविशेत्स्तंभोवाप्ररोहेद्वल्मीकंमधुजालंवा
भवेदुदकुंभप्रज्वलनासनशयनयानभंगेषुगृहगोधिकाकृकलासशरीरसर्पणेछत्रध्वज
विनाशेन्येष्वप्युत्पातेषुभूकंपोल्कापा तकाकसर्पसंगमप्रेक्षणादिष्वेतदेवप्रायश्चित्तं
गृहशांतिंचोक्तवि धिनाकृत्वाचार्यायवरंदत्वाब्राह्मणान्भोजयित्वास्वस्तिवाच्याशिषःप्र
तिगृह्णीयादिति।बहृचकारिकायां।अथयस्यवधूर्गर्भिणीयमलौजनयेत्ततः।समरूपश्चवरु
कुर्यात्सूर्णाहुतिमथापिवेति।ब्राह्मणेनुसोग्नयेमरुत्वतेत्रयोदशकपालंपुरोलाशंनिर्वपे

राम

राहुतिं वाहवनीये जुहुयात् स्विष्टकृतं। अत्राहिताग्नेः श्रौतेन मारुतेन त्रयोदशकपालेन समुच्च
यः॥ ॥ इति यमलशांतिः॥ ॥ अथ त्रिकप्रसवशांतिः॥ ॥ शांतिसर्वस्वे॥ सुतत्रये सुता चेत्स्या
त्तत्त्रये वा सुतो यदि। मातापित्रोः कुलस्यापि तदानिष्टं महद्भवेत्। ज्येष्ठनाशो धनेहानिर्दुःखं वा
सुमहद्भवेत्। जातस्यैकादशाहे वा द्वादशाहे शुभेदिने। आचार्यमृत्विजो वृत्वा ग्रहयज्ञपुरःस
रं। ब्रह्मविष्णुमहेशेंद्रप्रतिमाः स्वर्णतः कृताः। पूजयेद्धान्यराशौ च शिवे कलशोपरि शक्तितः। पंच
मे कलशे रुद्रं पूजयेद्रुद्रसंख्यया। रुद्रसूक्तानि चत्वारि शांतिसूक्तानि सर्वशः। आचार्यो जुहु
यात्तत्र समिदाज्यतिलांश्चरुं। अष्टोत्तरसहस्रं वा शतं वा त्रिंशतं तु वा। देवताभ्यश्चतुर्वक्त्रादि
भ्यो ग्रहपुरःसरं। ब्रह्मादिमंत्रैरिंद्रस्य यतइंद्र भयामहे। ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं
ततः। अभिषेकं कुटुंबस्य कृत्वाचार्यं प्रपूजयेत्। हिरण्यधेनुरेका च ऋत्विजां दक्षिणा ततः।

आज्यस्यावेक्षणंकृत्वाशांतिपाठंतुकारयेत्॥ ॥इतित्रिकशांतिः॥ ॥अथसदंतजननशांतिः॥
पार्श्वेविद्वुधमेत्तिरेचपुष्करः॥ दंतजन्मनिबालानांलक्षणंतन्निबोधमे।उपरिप्रथमंयस्यजायंतेच
शिशोर्द्विजाः॥ दंतैर्वासहयस्यस्याज्जन्मभार्गवसत्तम।द्वितीयेचतृतीयेचचतुर्थेपंचमेतथा।यदा
दंताश्चजायंतेमासेचैवमहद्भयं।मासेचैवेतिचकारात्पर्यायेपि।द्वितीयेपर्यायेत्वदोषः।नि
त्यत्वेननिमित्तत्वायोगात्।मातरंपितरंवाथखादेदात्मानमेवच॥ तत्रशांतिंप्रवक्ष्यामितांमेनि
गदतःशृणु।गजपृष्ठगतंबालंनौस्थंवास्नापयेद्विजः।तदभावेतुधर्मज्ञकांचनेतुवरासने।सर्वौ
षधैःसर्वगंधैर्बीजैःपुष्पैःफलैस्तथा।पंचगव्येनरत्नैश्चमृत्तिकाभिश्चभार्गव।स्नापयेद्दित्य
न्वपः।स्थालीपाकेनधातारंपूजयेत्तदनंतरं।सप्ताहंचात्रकर्त्तव्यंतथाब्राह्मणभोजनं।अष्टमेह
निविप्राग्नीतथादेयात्रदक्षिणा।कांचनंरजतंगाश्चध्रुवंवाधनमेवच।अद्भुतसागरेतुसदं

राम

तौत्पतौपंचदशी आथर्वणीशांतिरुक्ता। पाद्मे। दंतजन्मनिसामान्यंशृणुस्नानमतःपरं। भ
द्रासनेनिवेश्यैनंमृद्भिर्मूलफलैस्तथा। सर्वौषधैःसर्वबीजैःसर्वगंधैस्तथैवच। स्नापयेत्पूज
येद्धात्रवह्निंसोमंसमीरणं। पर्वतांश्चतथाख्यातान्देवदेवंचकेशवं। एतेषामेवजुहुयाद्धु
तमग्नौयथाविधि। ब्राह्मणानांचदातव्यायथाशक्त्याचदक्षिणेति॥ ॥इतिदंतजननशां
तिः॥ ॥अद्भुतसागरेबृहस्पतिः॥ बालानामष्टमेमासिषष्ठेमासिततःपुनः। दंतायस्यच
जायंतेमातावाम्रियतेपिता। बालकःपीड्यतेतत्रस्वयमेवनसंशयः। दधिक्षौद्रघृताक्तानां
मश्वत्थसमिधांततः। कृत्वैदष्टशतंप्राज्ञःस्वमंत्रेणतुमंत्रवित्। धेनुंचदक्षिणांदद्यात्ततःसंपद्य
तेसुखं। ज्योतिर्निबंधेतु अष्टमेशुभंसंदृत्यक्तैः। अष्टमादिषुमासेषुदंतोत्थानंशुभावहमितिअ
तःपुरासंविज्ञानबहुब्रीहिणावानवमादिग्रहणं॥ ॥इतिषष्ठाष्टमयोर्दंतोत्पत्तिः॥ ॥

॥ ॥अथप्रसववैकृतशांतिः॥ ॥विष्णुधर्मोत्तरेमार्कंडेयेच॥ अकालप्रसवानार्यःकालातीतप्रजास्तथा॥ विकृतप्रसवाश्चैवयुग्मप्रसवकास्तथा॥ अमानुषाअमुंडाश्चअजातव्यंजनास्तथा॥ हीनांगाश्चाधिकांगाश्चजायंतेयदिवास्त्रियः॥ पशवःपक्षिणश्चैवतथैवचसरीसृपाः॥ विनाशंतस्यदेशस्यकुलस्यचविनिर्दिशेत्॥ निर्वासयेत्तांन्नपतिःस्वराष्ट्रात्स्त्रियश्चप्रज्ञ्याश्चततोद्विजेंद्राः॥ चिकित्सनेब्राह्मणतर्पणेश्चततोस्यशांतिंसमुपैतिपापं॥ गृहानाः॥ मानुषीजनयेद्यत्रद्वित्रिशीर्षंतथापशून्॥ षण्मासाभ्यंतरेभयंतीव्रंजायतेनात्रसंशयः॥ वराहोपि॥ अमानुषान्मानुषीचतथाचैवाप्यमानुषी॥ प्रसूयतेप्रजानीयात्परचक्रागमोभवेत्॥ नारीखरवृषोष्ट्रीश्वसुनःशूकरगर्दभान्॥ राक्षसांश्चपिशाचांश्चयद्यप्येवंप्रसूयते॥ चतुर्विधंभयंघोरंक्षिप्रमेवप्रवर्त्तते॥ भारतमयूरचित्रकवृद्धगर्गः॥ यत्रगर्भेविपर्यासोमानुषाणांगवामपि॥ ॥२३१॥

राम

अद्भुतानि प्रसूयंते तत्र देशस्य विद्रवः। अत्रापि दिव्यजा शांतिः कार्या पंचदशी बुधैः। मानुषा
मानुषाणां च गोजा अश्व मृगपक्षिणां। जायंते जातभेदाश्च सदंता विकृतास्तथा। बहुशीर्षा अ
शीर्षाश्च बहुकर्णा अकर्णका। एकशृंगा द्वित्रिशृंगास्तथैव त्रिचतुर्भुजाः। दीर्घकर्णा महाकर्णा
गजकर्णाश्च मानुषाः। मानवाः श्वापदा व्याघ्रा मार्जारास्तनुधारिणः। जायंते पुरुषा यत्र त
त्र संग्राममादिशेत्। राजश्रेष्ठकुले नाशो धनस्य च कुलस्य च। यमला यत्र जायंते नारीणां राज
वाजिनां। ब्रह्मशांतिं ततः कुर्याद्यत्र ब्रह्मप्रशासितां। अष्टोत्तरसहस्राणि चरुं वै जुहुयाद्घृतं। समि
धांतु पलाशानां तर्पयेत्सर्ववह्निजान्। दासीदाससमायुक्तो गोधान्यफलसंयुतं। कांचनं वृषभं वस्त्रं
दद्याद्विप्राय दक्षिणां। अशि राजापतेज्जंतुस्तथा द्वित्रिशिरास्तथा। सूर्याद्भुतं विजानीयात्सूर्यं जपि
त्वा दिवाकरं। दध्याज्यमधुसंयुक्तं समिधस्त्वर्कसंभवाः। पद्माजनः प्रसातिभिर्जुहुयाद्घृतमेव च।

शांति०

धेनुं सुवर्णं वस्त्रं च दद्याद्दोषे च दक्षिणां। सर्वदोषा विनश्यंति ततः सौख्यं यतेः शुभं। मृगी जनयते सर्पान्

मंडूकांश्चाथ मानुषान्। तस्य शांत्यद्भुतमिदं तद्दारे तं प्रपूजयेत्। उदुंबरस्य समिधो दधि सर्पिः समन्वि

ताः। दोषोपशमनार्थाय जुहुयान्नियमे स्थितः। वस्त्रं सुवर्णं धेनुं च दद्याद्विप्राय दक्षिणां। स्त्रीग

र्भपातो यमलं प्रसूयंते थवा स्त्रियः। सदंताश्चैव जायंते जातमात्रा हसंति च। बुधाद्भुतं विजानीया

त्तद्दारे तं प्रपूजयेत्। वस्त्रं गावः सुवर्णं च दद्याद्विप्राय दक्षिणां॥ ॥अथ सुखप्रसवोपायः॥ मद

नरत्ने। नारायणी यष्टिकायां। करंकी भूतगोमस्तकास्थिका भवनोपरि। तत्कालं निहितो नार्याः सुख

प्रसवकारकः। अस्थिमात्रावशिष्टगोमस्तक इत्यर्थः। उपोदक्याख्यमूलानि तेलयुक्तानि कारयेत्। यो

निप्रलेपो दातव्यः सुखं नारी प्रसूयते। वंशानिंबयोस्त्वक्‌ तुक्‌ तुलसीमूलं कपित्थपत्रं च। कर राम

वीरबीजेन तत्पिष्ट्वा लिप्त्वा च तेनापि॥ मूतगर्भानिःसारयति किमत्र चित्रं सुखप्रसवे॥ ॥ ॥११२॥

क्षीरेण माहिषेणैव। समतोलितं सतैलं योनिं१

॥ ॥ अथ बालग्रहशांतयः॥ ॥ तत्रैव क्रियाकालोत्तरे। प्रथमे हनि गृह्णाति बालकं गंधिनी ग्रही। गात्रोद्वेगो निराहारो लाला ग्रीवा निवर्त्तनं। निशी थे या तु कौलो धूमं जिघ्रा तालचंदनैः। धूप ये न्महिषाक्षेण ततो मुंचति सा ग्रही। बलिस्तत्रैव। मत्स्य मांस सुरा भक्ष्य गंधास्रक् धूप दीपकैः। मंत्रस्तु प्रयोगसारे॥ ॐ नमश्चामुंडे भगवति विश्वक्लिंक्ले ह्रांर अपसर औं दुष्टग्रहान् ॐ। तस्य यागं छं तु यान्यपातान्यतः स्थाने रुद्रो शापयति स्वाहा। विधु क्लिंक्ले ह्रां ह्रीं ॐ मुंच स्वाहा। बालग्र हाणां विधेयं शास्त्राव लिनि वेदने। नारायणी येन्यो मंत्रः। चामुंडे यवश्चिके क्लिंके ॐ ॐ भगवति हि हिं ॐ र रक्षां कुरु र बलिं गृह्ण र फट् ठठेति। बालग्रहे तु सर्वत्र बलि मंत्र स्त्वयं स्मृतः। प्रयोग सारे। कदंबश्च करंजश्च विभीतो निंब एव च। अश्वत्थोडुंबरौ चैव श्लेष्मातक वटौ तथा। भात व क्षाः क्रमेणैतेः पूर्वादीशांत दिग्गताः। प्रतिस्थलं प्रत्येकं प्रतिवृक्षमथापि वा। यत्र धारो च

येत्तत्रमातृणांबलिमाहरेत्।कृत्वानीराजनांतंबलिमितिविधिवद्बालमाहृत्यतत्रसंस्पर्श्याद्भिः
स२ समंत्रंशिरसिकुसुमैरक्षतैर्भ्रामयित्वा।क्षिप्त्वाग्रेदेवतायाविधिवदुपहितैस्तत्रगीतैसुमंत्रैः
कुर्याद्रक्षांक्षणमिवविलयंयातिदुष्टग्रहार्त्तिः॥नीराजनमंत्रस्तु।ब्रह्माविष्णुश्चरुद्रश्चस्कंदो
वैश्रवणस्तथा।रक्षंतुत्वरितंबालंमुंचमुंचकुमारकं।स्तुत्वेतिरक्षाविधौपार्श्वेतौशिरसास्पृ
शेत्।दमुनामंत्रेणदेहंशिशोः॥मदनरत्नेरावणस्तुकृतेकौमारतंत्रे।संभेदकूलदयमूर्त्ति
कांभ्यांमूर्त्तिंविधायैककरभ्रमाणांत्रिलोचनांशूलकपालपाणिंजटाधरांरुद्रतनुंदधानां।भु
जंगभूषांभसितोज्वलांगींअंगीकृताशेषललामलीलां।अत्रमूर्त्तौसिमावाह्यरुद्रंसर्वग्रहा
धिपंस्कंदादिपूतनायुक्तंपूजयेच्चंदनादिभिः।विलिख्यतंडुलैःशुभ्रैश्चतुरस्रांतरद्वयं।तत्र राम
संस्थाप्यपूर्वस्यांतांतद्वद्वर्चाविधिंचरेत्।ततमंत्रैर्विचित्रैश्चनानोपकरणादिभिः।ततःसोप ॥११३॥

स्करांतंतु निक्षिपेच्चतुःपथे। कार्पासास्थिमयूरपिछ्बृहती निर्माल्यपिंडातकत्वश्च्चांसीवृष
दंशाविट्सषवचाकेशाहिनिर्मोककैः। नागेंद्रद्विजहिंगुशृंगमरिचैस्तुल्यैश्चधूपःकृतःस्कंदो
न्मादपिशाचराक्षससुरावेशज्वरघ्नःस्मृतः॥ ततेव॥ द्वितीयेदिवसेमासेहायनेवाखुनंदन॥
गृह्णातिपूतनाबालंयोगिनीस्वस्तनापिवा॥ ततोभवेज्ज्वरःपूर्वंसंकोचोहस्तपादयोः। दंता
न्खादत्यनिशंनिमीलयतिचक्षुषी। आहारंचनगृह्णातिदिवारात्रंचरोदति। अक्षिरोगश्छ
र्दनंचभवेन्नीतिःपुनःपुनः। कृशत्वंचप्रजायेतइत्येतच्छिशुलक्षणं। तंदुलप्रस्थपिष्टेनविनि
र्मायाथपुत्रिकां। त्रयोदशाध्वजादीपास्वस्तिकायवलोदनः। प्रस्थप्रमाणपिष्टेनश्लिष्ठापूपा
वै२ श्चमत्स्यकाः। मांसूत्येतदखिलंपश्चिमायांदिशिक्षिपेत्। पश्चिमायांचसंध्यायामेवंदद्या
द्दिनत्रयं। तृतीयेदिवसेमासेवर्षेवापूतनाभिधा। गृह्णातियोगिनीबालंततःपूर्वंज्वरोभ

वेदप्रस्थप्रमाणेन पिष्टेन पुत्रिकां कारयेत्। नतां रक्तोदनं ध्वजो रक्तः स्वस्तिको रक्त एव च। रक्तपुष्पं रक्त
गंधस्तथा रक्तानुलेपनं। पश्चिमायां तु संध्यायां मुदीच्यां निक्षिपेद्बलिं। चतुर्थे ह्नि मासे तु वर्षे गृह्णा
ति बालकं। वृषभं उनिकानाम पूतना वाथ योगिनी। भीषणाख्या ततस्तस्य जायते प्रथमं ज्वरः। गात्र
भंगोऽस्थिति भ्रंभो वैवर्ण्यं चाक्षि मीलनं। वैकल्यं श्यामता श्वासः कंपा रुचिरितीगितं। तिलपिष्ट
मयैः कृत्वा पुत्रिकां बिल्वकंटकैः। अष्टांगं रचयेत्पुष्पं शुक्लं शुक्लो ध्वजोर्जुनः। स्वस्तिको त्र प्रस्थसिद्धस
र्क्तं तावदपूपकाः। त्रिसंध्यं पश्चिमाशायां बलिं दद्यात्प्रयत्नतः। गोशृंगं सर्पनिर्मोकं लशुनं निंबपत्रकं।
मनुष्यकेश मार्जार लोमान्याज्यं घृतं तथा। एतैश्च धूपयेद्देवनिशि संध्यात्रये पि च। पंचमे दिवसे मा
से वर्षे वा पूतना शिशुं। विडालिकाख्या गृह्णाति या तस्य प्रथमं जायते ज्वरः। हिक्का श्वासश्च शूलं च गात्र
भंगो रुचिस्तथा। तंडुलप्रस्थपिष्टेन निर्माया थ तु पुत्रिकां। शुक्लोदनं ध्वजाः पंच स्वस्तिकाः पंच

दोषार१
पु

वोज्वलाः पंचैश्शुक्लानिकुसुमानिचचंदनं।अपराह्णेवृक्षमूलेपश्चिमायांदिशिक्षिपेत्।पंच
मादिवचतुर्थादिनोक्तोपूपोपीतिमदनस्तले।षष्ठेहनितथामासेहायनेचापिबालकं।पूतनाशकु
निर्नामगृह्णीयात्तदनंतरं।ज्वरउद्वेजनंगात्रेरोगषः श्वासोरुचिस्तथा।कासश्चैहस्तपादाक्षिसंको
चश्चैतिलक्षणं।तंदुलप्रस्थपिष्टेनविनिर्माथाथपुत्रिकां।क्षैरोदनंध्वजाःपंचदक्षलस्वस्तिकपंच
कं।क्षैलमेवाथमत्स्याश्चपायसंदुग्धमेवच।मांसंचापूपकास्त्वर्द्धप्रस्थपिष्टविनिर्मिताः।अपरा
ह्णेपश्चिमायांनिक्षिपेद्बलिपुत्रिकां।पुत्रिकांपूर्ववत्कृत्वापललंशूलपाचितं।मत्स्याःपर्पटिका
श्चैवरक्तंचप्रस्थसंमितं।उदीच्यांपूर्वसंध्यायांबलिर्देयःप्रशांतये।सप्तमेदिवसे मासेवर्षे
वाशुष्करेवती।गृह्णातिपूतनाबालंततःस्यात्प्रथमंज्वरः।गात्रभंगोपविद्वेषश्चाहारेकंपरोद
ने।प्रस्थसंमितपिष्टेनसम्यक्कृत्वाथपुत्रिकां।सप्तध्वजाःसप्तदीपाःस्वस्तिकाःसप्तवैतथा॥

पुष्पाणि मत्स्यमांसं च भक्ष्यं चैव स्रजा हरेत् ।अष्टमे दिवसे मासे वर्षे वा क्रमते शिशुं ।विडालिका
नामधेया पूतनास्य ततो ज्वरः ।गात्रभेदो तरुदितं रोदनं नेत्रमीलनं ।जिह्वारोगः शिरस्फोट
आहारद्वेष एव च ।तंदुलप्रस्थपिष्टेन पुत्तलीं कारयेत्ततः ।पायसं मधुसर्पिश्च क्षीरं लाजाश्च
शष्कुलीः ।गुग्गुलं मेषमांसं च तथा पर्पटिका अपि ।ध्वजाः दीपाश्चत्वारो गंधाना नाविधा अ
पि ।सुमनांसि च रक्तानि त्येवमन्त्रोदितो बलिः ।अमुं समाहरेत्पूर्वसंध्यायां दक्षिणां दिशि ।ह
स्ताष्टम्यां वक्ष्यमाणमंत्रेणानेन संपतः ।नवमे दिवसे वर्षे हायने वापि बालकं ।गृह्णाति मदना
नाम्नी पूतना तदनंतरं ।ज्वरश्छर्दिर्घ्राणशोषं कासश्वासश्च तद्भवता ।गात्रभंगश्च शूलं च चि
ह्नान्येतानि बालके ।प्रस्थमात्रेण पिष्टेन विनिर्माय च पुत्रिकां ।ओदनं मत्स्यमांसं च पर्पटी चे
क्षुमूलकं ।निक्षिपेत्पूर्वसंध्यायामुत्तरस्यां बलिं दिशि ॥ततमंत्रः॥ओं नमो भगवते वासुदेवाय ॥१२५॥

ॐ फट् स्वाहा। दशमे दिवसे मासे हायने वाथ बालकं। पूतना रेवती नाम गृह्णीयाद्बालकं ततः।
ज्वरश्छर्दिः श्वासकासौ शूलं चैत्येतदीरितं। प्रस्थप्रमाणपिष्टेन पुत्रिकां तत्र कल्पयेत्। अष्टां
गं लेखयेत्तत्र बिल्ववृक्षस्य कंटकैः। गुडोदनं च सर्पिश्च ध्वजानां पंचविंशतिः। स्वस्तिकानां
प्रदीपानां पंचविंशतिरेव च। त्वौ चैरिरक्तपुष्पा णीत्येतद्दक्षिणदिग्गतः। संध्यात्रयेव क्ष्यमा
णमंत्रेणानेन निक्षिपेत्। ॐ नमो भगवते वासुदेवाय हन ॐ फट् स्वाहा। एकादशे दिने मासे
हायने पूतनार्चिका। गृह्णाति बालकं पश्चाज्ज्वरस्तस्य प्रजायते। अन्नद्वेषो मुखे शोषो गात्र
भंगश्च रोदनं। ऊर्ध्वदृष्टिरपीत्येतल्लक्षणं तद्गृहाश्रितैः। पुत्रिका माषपिष्टेन रचिता शुक्लमो
दनं। पुष्पाण्यपि च शुक्लानि ध्वजानां पंचविंशतिः। स्वस्तिकानां प्रदीपानां पंचविंशतिरेव
च। एतत्सर्वं पथा शनयां संध्यायां प्रातराहरेत्। ॐ नमो भगवते वज्रहस्ताय ॐ फट् स्वाहा॥

द्वादशेदिवसेमासेवर्षेवापूतनाशिशुं।अद्भुताख्याप्रगृह्णातिज्वरःस्यात्प्रथमंततः।रोदनंसं
र्वदादंतरवाऽस्नंरक्तनेत्रता।।रोमांचस्तापइत्येतदखिलंतस्यलक्षणं।तंडुलप्रस्थपिष्टेनकृत्वा
तत्राथपुत्रिकां।त्रयोदशस्वस्तिकाश्च धूजारीपास्त्रयोदश।अपूपामत्स्यमांसंचतथापर्पटि
काअपि।एतत्सर्वंदक्षिणस्यांदिशिमंत्रेणनिक्षिपेत्।ॐ नमोनारायणायहनदुष्टसत्वानां
फट्स्वाहा।।मदनरत्नेयोगसारे।।वर्षेत्रयोदशेबालंग्रहीगृह्णातिपक्षिणी।तत्रेष्टाकिल
ह्यूलज्वररोदनहासनं।शाल्योदनसुरामांसमत्स्यकुल्माषपायसैः।दद्यात्सहसरंप्रोक्तैर्म
ध्याह्नेत्रिदिनेबलिं।पिबेच्चाभ्यंजयेत्सर्पिस्ततोमुंचतिसाग्रही।वर्षेचतुर्दशेबालंस्वच्छंदना
मतोग्रही।गृह्णातिचेष्टातत्रस्याच्छोणितस्रवणंतथा।शूलंचनभिदेरोस्यात्तत्रनास्तिप्रति राम
क्रिया।वर्षेपंचदशेबालंग्रहीगृह्णातिवारुणी।तत्रेदंवेष्टितंविद्याज्ज्वरोनिद्राविहस्तता।कु ॥११८॥

ल्माषकृसरापूपपोलिकापायसासवैः ॥ सपूपकैर्बलिं दद्यात्त्रिरात्रं च धूपयेत् । चंडेनानुपसर्पितं ततो मुंचति सा ग्रही ॥ षोडशे वत्सरे बालं ग्रहीत्वा तु दुर्जया । तद्दोषाहसनं कोपो पापास्यामीति वचो मुहुः ॥ कुल्माषकृसरापूपतिलपिष्टान्नफलुकैः । दध्ना सह बलिं दद्यात्प्राच्यां दिशि दिनत्रयं ॥ वर्षे सप्तदशे बालं ग्रहीत्वा तु बालकी । कासश्वासौ च विज्ञेयौ तत्र नास्ति प्रतिक्रिया ॥ संवत्सरग्रहा ह्येते कुमारपदपूर्वकाः ॥ ॥ इति कमलाकरभट्टकृते शांतिरत्ने मदनरत्नोक्ता बालग्रहशांतयः ॥ ॥ तथा बालरक्षोक्ता हरिवंशे ॥ नंदोकमेनमारोप्य भूरेणुं परिगृह्य च । शिरः प्ररक्षणं कुर्वन्मंत्रमेनं जजाप सः । ॐ विष्णुस्त्वां पूर्वतः पातु रुद्रो रक्षतु दक्षिणे । ब्रह्मा च पश्चिमे पायाच्चंद्रो रक्षतु चोत्तरे । उपरिष्टात्तथा सर्पः पायाच्चापश्च वासुकिः ॥ तिर्यगूर्ध्वमधो वत्सं शिष्टाः काष्ठाः समीरणः । स्वस्तिं करोतु भगवान्पिनाकी वृषभध्वजः । गावो रक्षंतु सर्वत्र भूमिः पातु स

दाशिवः। एवमुच्चार्यनंरस्तुकुष्ठंपस्पर्शसर्वतः। एषमंत्रोहिवालानांरक्षायेपरिकीर्तितइति॥ ॥
अथयोगपारिजाते। वासुदेवोजगन्नाथःपूतनांतकरोहरिः। रक्षंतुत्वरितंवालंमुंचमुंचकुमारकं॥
कृष्णरक्षशिशुंरक्षमधुकैटभमर्दन। प्रातःसंगवमध्याह्नसायाह्नेषुचसंध्ययोः। महानिशिसदारक्ष
कंसारिष्टनिषूदन। यक्षोरगपिशाचांश्चग्रहान्मातृग्रहानपि। वालग्रहान्विशेषेण छिंधिछिंधिम
हाभयात्। त्राहित्राहिहरेनित्यंत्वद्रक्षाभूषितोशिशुः। इतिभस्माभिमंत्र्यैवंभूषयेत्तेनभस्मना।
शिरोललाटाद्यंगेषुरक्षांकुर्याद्यथाविधि। मंत्रसंरक्षणादेवशिशुःसंवर्द्धतेन्वहं। इतिवालरक्षा॥ ॥
अथपूतनाविधानं॥ ॥तत्रलुब्धजानकेस्कंदौर्सिर्यप्रतिस्कंदउवाच॥ येनकर्मविपाकेनशिशूनां देर
जायतेग्रहः। तत्सर्वंकथयिष्यामिएकचित्तस्तोरिवाकर। लंकायांरावणोनामपोलस्त्योराक्षसेश्वरः। राम
स्यसारस्तस्यवीरस्यद्वादशासन्महाभयाः। ताभिःकृतंतपोघोरंसर्वलोकभयप्रदं। पीडितंताभि॥१३७॥

रखिलंजगत्तीव्रंतपोबलात्॥रुद्रआराधितस्ताभिस्तपसातीव्रतेजसा।प्रसन्नोभूत्तदादेव
स्ताभ्यएवंवरंददौ॥रुद्रउवाच।वरदोहंवराभ्योहेयुष्मभ्यंरजनीश्वराः।ताभिर्वृतंतदापश्यं
बालानांदेहसंभवं।वसासृक्मांसमेदोस्थिमज्जाशुक्रात्मकंरवे।देहिदेवेशसर्वेषांजीवता
मेवशंकर।तच्छ्रुत्वावचनंतासांचुकोपपरमेश्वरः।ब्रह्मवंशसमुद्भूतास्तपोवृत्तिपरायणाः।
तत्कथंबालघातायचेतोवःपरिवर्त्तते।सर्वलोकमतंदेयंप्रार्थितंतुमनी।षिभिः।राक्षस्य
उच्चुः।यदिप्रसन्नोभगवान्दत्वस्मत्प्रियंशिवः।सर्वेषामेवबालानांमेदसातृप्तिरेवनः॥रुद्र
उवाच॥यास्त्रीनिरामुखेस्नातिबालंस्पृशतिभुंजती।प्रसूतिसमयेभ्यंगंनकरोतिप्रमाद
तः॥नग्नानिद्रातिरात्रौवानिघ्नन्सुरतासती।तस्याबालंदिनेमासेवर्षेपिचविशेषतः॥आद्ये
तुदिवसेमासेवर्षेचापिविमोचनी॥गृह्णातुमस्तसाहेनज्वराद्यैर्वेदनोच्चयैः।छिन्तिपेमोहि

नीनामसुनंदातुतृतीयके।चतुर्थेपूतनानामपंचमेत्यासुरीतथा।षष्ठेतुरेवतीदेवीबालंगृह्णा
तुसत्वरं।सप्तमेशकुनीनामह्यष्टमेचपिशाचिका।नवमेपाशिनीदेवीशिशुंगृह्णातुसत्वरं।
महामारीतुदशमेकालिकातुततःपरं।द्वादशेभामिनीदेवीपीडाकरणतत्परा।श्वयमेवकुरुध्वं
भोपीडांबालकेविग्रहे।आत्मनोदिवसेमासेवर्षेचापिपृथक्पृथक्।निमित्तेसतिराक्षस्यश्शु
चैचनकदाचन।युष्मभ्यंबलिदानंयेविदधत्यखिलंपरं।गृहीतमपिबालंतंसंतुष्टाःपरित्यु
चत।इतिलब्धवराःसर्वाःपीडयंतिशिशून्हिताः।दिनमासाद्दमानेननात्रकार्याविचारणा।प्र
थमेदिवसेमासेवर्षेदेवीविमोचनी।तस्यास्तुजायतेपीडाशिशूनांतीव्रवेदना।ज्वरस्तुप्रथमं
तावन्नेत्ररोगमतःपरं।नगृह्णातिस्तनंडिंभोबांतिरात्र्यंतिकीभवेत्।मुष्टीबध्नातिवेगेनदंता राम
न्दंतैर्दशत्यलं।इत्थंचजायतेपीडामोचिन्यादिदिवाकर।तस्याःपूजांप्रवक्ष्यामिबालानांशांत ११८।।

कारिणी। करवीरं रक्तपुष्पं चंदनं रक्तपूर्वकं। धूपस्तु शिवनिर्माल्यमाज्यं बिल्वदलैः स्मृतं। दी
पास्तु पंच विज्ञेयास्तथा पंचैव पोलिकाः। सुपिष्टाः पंच विज्ञेया धज्ञाः पंच सुपीतकाः। तांबूलवि
कराः पंच पूगीफलसमन्विताः। रक्ततंडुलभक्तास्तु प्रोक्ताः साज्यगुडस्तथा। शरावे नूतने प्राङ्नि
धेयं सर्वमेव तत्। ततस्तु पुत्तलीं कुर्यान्नयया उभयते मृदा। निदध्यात्तत्र वै धीमान्पीतवस्त्रसमाव
तां। पीतसूत्रोपवीतां तां पूजयेद्भक्तिमान्नरः। पूर्वोक्तैरेव संभारैर्गंधपुष्पादिभिर्बुधः। वक्ष्यमा
णेन मंत्रेण प्रार्थयेत्तां समाहितः॥ तत्र मंत्रः॥ ॐ नमो भक्तव [illegible] त्सले विमोचिनी स्वाहा॥ एवं
मंत्रमुच्चार्य सर्वां पूजां प्रकल्पयेत्। एकस्मिन्छरावे पुत्तलीं निधायान्यत्र गंधादितांबूलां
तोपचारान्निधाय पंच पल्लवानेकीकृत्य बालकांगेभ्यः समुत्तार्य सोदकान्। ततः पुनर्नीरा
जनं विधाय तत्सर्वं सशस्त्रो मंत्रमुच्चारयन्नयेत्। ते च पल्लवाः जंब्वाम्रोडुंबराश्वत्थवटाः

नांपञ्चगात्रतथा। सर्वांगेभ्यः समुत्तार्य पीडां बालस्य संव्रजेत्। इदं च नर्थां चतुष्पथे वा क्षिपेदिति
शिष्टाः। इत्थं रात्रित्रये कुर्याद्विधानं सुसमाहितः। यामादुत्तरतो नित्यं पूर्वरात्रे विचक्षणः। तस्मिं
स्थाने जपेन्मंत्रं बालानां शांतिहेतवे। एवं प्रशांतिमायाति शिशुः पीडा न संशयः॥ इति लुब्धजा
तके स्कंदोक्तं प्रथमदिवसमासाब्दे शुपीडाशमनविधानं॥ ॥स्कंद उवाच॥ द्वितीये दिवसे मा
से वर्षे चैव रविवासर। मोहिनी नाम देव्यत्र कुरुते पीडनं शिशोः। ज्वरं नेत्ररुजं कासं श्वासं चैव वि
शेषतः। छर्दनं ग्रहणीदोषं जनयत्यनिशं शिशोः। तत्र शांतिविधानं च प्रवक्ष्यामि समासतः। मा
लती कुसुमैः पूजां चंदनं मलयोद्भवं। कुंकुमं केसरं दिव्यं कर्पूरं सुविलेपनं। देव्या भक्तिसमाचा
राद्दशांगं धूपनं तथा। नैवेद्यं पूर्ववद्देयं तथास्या सर्ववत्क्रिया। पूर्ववत्पुत्तलिं कृत्वा शरावे संनि राम
वेशयेत्। वक्ष्यमाणेन मंत्रेण कुर्यात्सर्वमतंद्रितः। तत्र मंत्रः। ॐ सर्वेश्वरि सर्वजनप्रियंकरि ॥११६॥

ग्राहिग्राहि जगत्सर्वं ॐ नमो भगवति स्वाहा। इत्यनेनैव मंत्रेण सर्वं कृत्वा विधानकं। रात्रित्रये
विधातव्यं पश्चिमे याम तो वहिः। प्रथमे यामिनी यामे क्षतं भवति सौख्यदं॥ ॥इति द्वितीय दि
वसादि पीडा शमन विधानं॥ ॥स्कंद उवाच॥ तृतीये दिवसे मासे वर्षे भ्रूणु विधिं रवे। सुनंदा ना
म देव्यत्र बालानां भयदा भवेत्। अवस्थां कुरुते घोरां सुनंदा चैव भामिनी। हृद्रोगं छर्दनं श्वासो
ज्वरेण सह जायते। आकुंचयति गात्राणि शिशु रोदत्यहर्निशं। इत्थं स जायते पीडा सुनंदा कोप
संभवा। तस्याः शांतिविधानं च प्रवक्ष्यामि समासतः। शतपत्राणि पुष्पाणि चंदनस्यानुलेप
नं। हरिद्रा कुंकुमं नागकेसरं बालकान्वितं। गंधार्थं धूपनं दद्यात् गुग्गुलं चाति शोभनं। घृताक्तं
खदिरांगारैः संप्रताप्य विरोचनं। पूर्ववत्पुत्तलिं कृत्वा शरावे सन्निवेशयेत्। प्रस्थत्रय शाली
नामोदनं सर्पिषान्वितं। दीपकाः षोडिकाः पंच तावंतो मुष्टिकाः स्मृताः। ध्वजाः पंचैव विज्ञे

शांति.

पाः सहिताः पंचपल्लवैः। वक्ष्यमाणेन मंत्रेण बलिं सर्वं समाहरेत्॥ तत्रमंत्रः॥ ॐ नमः सुनंदा
यै कुं फट् स्वाहा। इत्यनेन प्रकारेण ग्रामात्स्ह वै विनिक्षिपेत्। त्रिरात्रं रजनी पूर्वयामे बालोपरागं
तये। एवं कृते विधाने च व्याधिमात्रं विनश्यति। वर्द्धते दीपवद्बालाः शुक्लपक्षादिवत्सुखं॥ ॥
इति तृतीयदिनादिपीडाशमनविधानं॥ ॥स्कंद उवाच॥ चतुर्थे दिवसे मासे वर्षे चैव दिवाकर।
पूतनानाम देव्यत्र पीडां प्रकुरुते शिशोः। स तापो जायते पूर्वं मतीसारस्ततः परं। मुष्टीर्बध्नाति
कंपश्च नारं प्रजायते। तस्याः शांतिं प्रवक्ष्यामि पीडा यामुच्यते धिते। पूर्ववत्कुत्तली कृत्वा शारा
वे सन्निवेशयेत्। वेष्टयेद्रक्तसूत्रेण कुंकुमेनानुलेपयेत्। पूजयेद्धत्तूरपुष्पैस्तु बर्बरीपत्रसंयु
तैः। मत्स्यमांसस्य धूपोत्र गव्येनाज्येन संयुतं। त्रयो दीपाः स्त्रिकोणास्तु साज्यवर्त्तिसमन्विताः। राम
तिस्रस्तु पोलिकाज्ञेया मुष्टयस्तु त्रयः स्मृताः। ध्वजास्त्रयः समाख्याता नानाजकार्या विचारणा॥ ॥१२०॥

प्रस्तत्रियमुद्दिष्टं तंदुलानां प्रभाकर ॥ तद्भक्तं सर्पिषायुक्तं शरावे सन्निवेशयेत् ॥ रक्तवस्त्रेण सं
वीतां नमस्कृत्वा तु पुत्तलीं ॥ दध्यक्षतास्समारोप्य विदध्यात्तु समाहितः ॥ पल्लवैः पंचभिर्बालं सर्वांगे
षु प्रमार्जयेत् ॥ मंत्रः ॥ ॐ नमः पूतने मातर्बलिं गृह्ण सुशोभनं ॥ बालकं मुंच वेगेन बलिदानेन ह
र्षिता ॥ इति मंत्रं समुच्चार्य सर्वं बलिमुपाहरेत् ॥ प्रदोषे क्षणे निर्वृत्ते सप्तसप्ते विधिं शृणु ॥ दक्षि
णां दिशिमाश्रित्य निक्षिपेद्ग्रामतो बहिः ॥ एवं कृते बलौ सम्यक् बालकः सुखमाप्नुयात् ॥ ४ ॥
इति चतुर्थदिवसादि पीडाविधानं ॥ ॥ स्कंद उवाच ॥ पंचमे दिवसे मासे वर्षे चैव प्रभाकर ॥
आसुरी नाम देव्यत्र बालकं बाधते भृशं ॥ तत्र चिह्नं प्रवक्ष्यामि बालांगेषु प्रजायते ॥ ज्वरस्तु प्र
थमं पश्चाद्रूपं रोगेत्यहर्णी ततः ॥ मुष्टिबंधः प्रलापः स्यादुद्वेगो नशानं तथा ॥ शिरोरुग्जायते
सं तमेतत्तु लक्षणं रवे ॥ पूर्ववत्पुत्तलीं कृत्वा पीतसूत्रेण वेष्टयेत् ॥ पीतवस्त्रोपवीतां तां रारा

वेसन्निवेशयेत्।घृताभ्यंगोविधेयोत्रहरिद्रालेपनेकृते।ततःपूजांप्रकुर्वीतकुंकुमैःकरवीरजैः
जपापुष्पैर्बंधुजीवैःपुत्तल्याश्चतथानघ।चंदनेनानुलिप्तांतांदिव्यगंधोपशोभितां।राजिका
सर्षपैर्धूपोघृताक्तोत्रप्रशस्यते।दीपकाःसप्तविज्ञेयाध्वजास्तावंतएवच।मुष्टिकापोलिकाः
सप्तसप्तसोहालिकास्तथा।नैवेद्यार्थंसमुद्दिष्टमोदनंसघृतंबलिः।पल्लवैस्तुयथापूर्वंका
रयेन्मार्जनंशिशोः।मंत्रमेतंसमुच्चार्यत्रिरात्रंप्रतिपूजने।मंत्रः।सुकल्लेसुभगेदेविसर्वशत्रु
निवारिणि।कुरुरक्षांशिशोश्चात्रबलिदानेनराक्षसि।इत्युच्चार्यक्षिपेत्सर्वंमध्यरात्रेत्रिवास
रं।पश्चिमांदिशमाश्रित्यग्रामार्धेत्वंतरेरवे॥ ॥इतिस्कांदेपंचमदिवसाधिपपूजाविधानं॥
॥ ॥स्कंदउवाच॥अथषष्ठेदिनेमासेवर्षेवापिदिवाकर।रेवतीनामदेव्यत्रशिशुंगृह्णातिय राम
संशयं।आदौसंजायतेपीडाव्रणानांशिशुमूर्द्धनि।ज्वरस्तुमुखशोषश्चपिपासामधिकाप ॥१२१॥

ते। अर्कं पतिञ्च गात्राणि रुदंति च पुनः पुनः। ततः शांतिं प्रवक्ष्यामि शृणु सूर्य समाहितः। पूर्ववत्पुत्तलीं
कृत्वा मारावेसन्निवेशयेत्। गंगातोयेन संस्नाप्य शुक्लवस्त्रेण वेष्टितां। शुक्लवस्त्रेण सर्वां तां शुक्लमा
ल्यानुलेपनां। शुक्लधूपोत्र निर्दिष्टो बिल्वपत्रैः सहानघ। आज्येनाक्ता स्तु विश्वात्मन्दीपाः पंच प्रकीर्ति
ताः। तावंतो मुष्टिका ज्ञेया पोलिकाभिः समन्विताः। प्रसृतित्रयमात्रा एणंब्रीहि। एण मोदनं स्मृतं। दध्ना
सह युजेनाक्त बलिं कुर्यात्प्रयत्नतः। ध्वजेषु पंचभिः पुष्पैर्बलिमेतं समर्पयेत्। वक्ष्यमाणेन मंत्रेण प्र
क्षिपेच्च समाहितः। मंत्रः। राक्षसि त्वं महाभागे बालं मुंच सुशोभने। क्षेमं कुरु जगत्यस्मिन्नूषोभना प्र
वरेवती। इति मंत्रेण संमंत्र्य प्रदोषे बलिमाहरेत्। संस्नाप्य बालकं पंचपल्लवैः सुसमाहितः। नगरा
दुत्तरे देशे रेवत्यै बलिमाहरेत्। एवं प्रशांतिमायाति बालपीडा प्रभाकर॥ ॥इति षष्ठदिनादि पीडा
विधानं॥ ॥स्कंद उवाच॥ सप्तमे दिवसे मासे वर्षे चैव दिवाकर। शकुनि र्नाम देव्यत्र बालं गृह्णाति

दारुणं।ज्वरस्तु प्रथमं तावच्छिरोरोगस्ततः स्वरः।प्रलापश्चातिसारश्च वांतिरात्यंतिकी भवेत्।अक्ष्णो
र्निमीलनं चापि गा[illegible]त्र कंपो भिजायते।तत्र शांतिं प्रवक्ष्यामि शकुनिप्रीतिवर्द्धनं।रक्तचंदनलिप्तां
गीं पूर्ववत्सुत्तलीकृतां।यथाकालोद्भवैः पुष्पैः पूजयेच्च ततः सुधीः।धूपस्तु गुग्गुलः श्रेयान्दीपाः पं
च प्रकीर्त्तिताः।पोलिकामुष्टिकाः पंच ध्वजाः पंच सुशोभनाः।नैवेद्यमोदनं सर्पिःसहितं प्रसरतेर्मतं।
तंडुलानां सुरश्रेष्ठ मंत्रपूर्वं प्रकल्पयेत्।मंत्रः॥ॐ नमः पद्मपत्राक्षि विशालवदने शिवे।संगृह्य ब
लिमेतं त्वं बालं मुंच सुशोभने।इत्युक्त्वार्चयेत्ततो धीमान्बलिं निशि समाहरेत्।दक्षिणां दिशमाश्रि
त्य विदध्यात्सत्सु वक्रियां।एवं कृते विधाने तु त्रिरात्रं सुरसत्तम।व्याधिमुक्तो भवेद्बालो नात्र कार्या वि
चारणा॥इति सप्तमदिनादिशाकुनीपीडाविधानं॥ ॥स्कंद उवाच॥ अष्टमे दिवसे मासे वर्षे देवी
पिशाचिका।पीडयत्येव बालानिज्वरश्चर्द्दिः शिरोर्त्तिभिः।नेत्रपीडां गसंकोचो हृद्रोगश्चाभिजा

यते।श्टणुतस्यप्रतीकारंयेनतुष्येत्पिशाचिका।प्रकुर्याच्चित्रिरात्रेणशांतिंबालकार्त्तिहारिणीं॥
पूर्ववत्पुत्तलींकृत्वाशरावेसन्निवेशयेत्।पंचामृतैस्तुसंस्नाप्यदेवींतांशिशुनासह।चंदनेनानु
लिप्तांगींश्वेतपुष्पैःप्रपूजयेत्।ध्वजाःसप्तसमाख्यातास्तावंत्यःपोलिकाःस्मृताः।मुष्टिकाश्चा
पिविज्ञेयाहरिद्राक्ताःशुभाःस्मृताः।पीतवस्त्रेणसूत्रेणपिसुसंस्कृतां।विजयापूर्ण धूपोत्र
वर्णेन
घृताक्तैःसंप्रकीर्त्तिताः।दीपास्सप्तघृतेनैवपूरयित्वानियोजयेत्।प्रसृतित्रयभक्ष्यस्यघृताक्तस्य
विशेषतः।नैवेद्यंकल्पयेद्धीमान्देव्यैभक्त्यानसंशयः।तांबूलंचसपूर्करंभक्त्याभ्यार्शेनिधीयते।
भक्त्याचदक्षिणांतत्रदेवताप्रीतयेरवे।वक्ष्यमाणेनमंत्रेणसर्वमेवविधीयते।मंत्रः।ॐनमःस
र्वभूतेशिशोभनेत्वंपिशाचिके।बलिंवैत्वमुरीकृत्यत्वरितंमुंचबालकं॥यथापूर्वंतथाकार्यापिं
चपल्लवसत्क्रिया।त्रिरात्रंरजनीवक्त्रेपूर्वस्यामाहद्दिःक्षिपेत्॥एवंकृतेविधानेतुरोगशांतिःप्र

जायते॥ ॥इति ब्रह्मयामलोक्तं अष्टमदिवसादिबाधाशमनं॥ ॥स्कंद उवाच॥ नवमे दिवसे मा
से वर्षे चैव प्रभाकर। देवता पाशिनी नाम बालार्त्तिं कुरुते भृशं। तत्र चिह्नं प्रवक्ष्यामि समासेन दि
वाकर। ज्वरश्छर्दिर्गले पीडा संकोचो नेत्रयोस्तथा। तर्जनीमध्ययोर्योगे मध्याभ्यां कुरुते भृशं।
अन्नत्यागेन संतोषो मुखगंधोभिजायते। तत्र शांतिं प्रवक्ष्यामि पाशिनीप्रीतये रवे। पूर्ववत्तु
त्तलीं कृत्वा शरावे सन्निवेशयेत्। शुक्लवस्त्रेण संवीतां शुक्लवस्त्रेण वेष्टितां। पूजयेच्छुक्लपुष्पैस्तु
मंदाराद्यैः सुगंधिभिः। गंधार्थं घनसारेण युक्तं चंदनमर्पयेत्। दशांगो धूपनो धूपस्ततो दीपा
न्प्रकल्पयेत्। नववासस्तथा पूपान् पोलिकावानवोत्तमाः। ८। उत्तमाः अदग्धाः। तावंतो मुष्टिकाद्या
कुल्माषांश्चैव तथैव च। नवप्रसृतिमानेन तंडुलोदनमुत्तमं। दध्ना क्षीरेण वाभ्युक्ष्य नैवेद्यं परिकल्प राम
येत्। मध्यरात्रे त्रये यामात् पश्चिमे प्रक्षिपेद्बलिं। मंत्रेणानेन पाशिन्यै मंत्रमुच्चारपूर्वकं। मंत्रः॥ १२३॥

ॐनमः पाशहस्तायैरुद्रस्तवरैस्तुभो।गृहाणेमंबलिंदत्तंबालकंमुंचरोगतः।एतावता।विधानेन
रोगमुक्तोभवेच्छिशुः।पंचानांपल्लवानांतुपूर्ववत्क्रियतेक्रिया॥ ॥इतिब्रह्मयामलोक्तंनवम
दिनादिविधानं॥ ॥स्कंदउवाच॥दशमेदिवसेमासेवर्षेचैवदिवाकर।शक्तिरत्रमहामारीराक्ष
सीघोररूपिणी।महत्कल्पंज्वरंशूलंविदधातिदिवानिशं।विष्टंभंकुरुतेत्यर्थंहिक्काकासमति
क्षयं।तस्यशांतिंप्रवक्ष्यामिबालानांहितकाम्यया।पूर्ववत्पुत्तलींकृत्वाशरावेसन्निवेशयेत्।स्ना
पयेत्सरितांवारिभिश्चंदनेनानुलेपयेत्।पीतवस्त्रेणसंवीतांपुष्पमालोपशोभितां।दशांगंधूप
नेधूपंमहामायैप्रकल्पयेत्।दीपास्तुपंचविज्ञेयास्तावांपःक्षीरषष्ठिकाः।मुष्टिकाःपंचवैशस्ता
ध्वजाःपंचसुशोभनाः।संस्कृतंसार्पिषाभक्तंतंदुलानांचपोष्कलं।नैवेद्यार्थेन्यसेत्तत्रशरावेसु
मनोहरे।तांबूलसहितंभानोदक्षिणासहितंतथा।दक्षिणार्थेनवंवस्त्रंरजतंशक्तितोपिवा॥

पल्लवैः पंचभिर्युक्तं बलिं सर्वं समर्पयेत् । मध्यरात्रादधस्तात्तं बलिं कुर्याद्दिनत्रयं । दक्षिणां दि
शामाश्रित्य प्रक्षिपेन्नगराद्बहिः ॥ मंत्रेणानेन मार्त्तंड वक्ष्यमाणेन तेन मया । मंत्रः ॥ ॐ नमो रक्तव
र्णाक्षि रक्तपद्मनिभानने । रक्तोष्ठे रक्तदशने महामारि महानने । महाबले महामाये महाभयनि
वारके । अनेन बलिदानेन तुष्टा भव सुशोभने । व्याधितं पीडितं बालं रक्ष त्वं परमेश्वरि । इमं मंत्रं स
मुच्चार्य सर्वं बलिमुपाहरेत् । क्षेमाय बालकानां हि नात्र कार्या विचारणा ॥ ॥ इति ब्रह्मयाम
लोक्तं दशमदिनादिपीडाविधानं ॥ ॥ स्कंद उवाच ॥ एकादशे दिने मासे वर्षे वापि दिवाकर ॥
कालिका नाम रेवत्यत्र तया पीडा जायते शिशोः । ज्वरस्तु प्रथमं तावच्छर्द्दिरोगस्तदनंतरं । मुखशोषो
महाग्लानिस्ततः स्याच्चित्तविभ्रमः । तुदंति सर्वगात्राणि वेपंति च पुनः पुनः । अवस्था मत्यक राम
स्यास्यात्कालिकाकोपसंभवा । तत्र शांतिं प्रवक्ष्यामि बालानां हितकाम्यया । पूर्ववत्पुत्त ॥१२४॥

लीं कृत्वा शरावे सन्निवेशयेत्। गंगातोयेन संस्नाप्य चंदनेनानुलेपयेत्। करवीरस्य पुष्पैस्तु पूज
येद्बर्बरीदलैः। रूपयेत्तु तत्कैः शैरश्च सर्षपनिर्मोकसर्षपैः। वचालशुनफेनैश्च घृतयुक्तैः ससर्जकैः।
दीपैस्तु पंचभिः सूर्यस्तैस्तु नीराजयेत्सुतं। नैवेद्यं पायसं क्षीरं षष्टिका तिलमोदकाः। अपूपा मु
ष्टिकाः पोलीः पंचपंच प्रकल्पयेत्। ध्वजाश्च पंचविज्ञेयाः शरावे सर्वमेव तत्। निवेश्य सकलं दे
कालिकायै निवेदयेत्। मंत्रेणानेन सपाश्चवक्ष्यमाणेन तेमया। ॐ नमो घोररूपायै घोरायै घो
रदर्शिने। गृहिसर्वजगन्मात्रि बालं मुंच बलिप्रिये। एवं विधं विधिं कुर्यात्सूर्यवत्सल्लुवक्रियां। एवं
कृते विधाने च रोगमुक्तिर्भवेच्छिशोः। बलिः प्रदोषसमये ग्रामाद्दक्षिणतो बहिः। निधेयो मंत्रमु
च्चार्य नरेणैव सहेति च॥ ॥ इति ब्रह्मयामले कुमे काद्वशदिनमासावृर्षा ग्रामन्नं॥ ॥ स्कंद
उवाच॥ द्वादशे दिवसे मासे वर्षे चैव दिवाकर। भामिनी नाम देव्यत्र पीडयत्यनिशं शिशुं। आ

येनपापेनबालानामज्ञानानामंगदोषवेत् ९

सेज्वरं प्रकुर्याद्विरह्द्रोगं तदनंतरं। कासंश्वासंतती सारं प्रलापं जंभणं तथा। कंपनं सर्वगात्राणि
तपाऊर्ध्वं चनेत्रयोः। इत्थंनानाप्रकारैश्च शिशूनां जायते गदः। तत्र शांतिं प्रवक्ष्यामि बालानां हि
तकाम्यया। पूर्ववत्पुत्तलीं कृत्वा द्वारावेसन्निवेशापेत्। गंधपुष्पाक्षता धूपदीपाश्च विविधा मताः।
नैवेद्यं विविधं चात्र भामिन्ये परिकल्पयेत्। वस्त्रं सूत्रं ध्वजा च्छत्रं ओदनं पायसान्वितं। अपूपैः पा
यसाक्षीरषष्टिकाभिश्च संपुतं। नैवेद्यं कल्पयेद्भक्त्या संध्याकाले निशामुखे। ग्रामादुत्तरतो देशे
बलिं दद्यान्नसंशयः। इत्थं पंचदिने चैतत्कर्त्तव्यं रोगमुक्तये। मंत्रेणानेन सप्ताश्च मंत्रयेत्सर्वतो ब
लिं। बलिं गृह्णातिबालस्य व्याधिं संहर संहर। पंचवक्त्रप्रसादेन प्रसन्नाभव भामिनि। एवं कृते विधाने तु
बालकः क्षेममाप्नुयात्। एतत्तेकथितं सूर्य शांति कृत्स्नं द्यजातकं। सूर्यउ॰। तित्सर्वं पूर्वमेवे त्थमुक्त्वा राम
नस्त्रिषरमुख॥ ॥इतिद्वादशदिनमासमाहेषु स्कोशोकंपीडाशमनं॥ ॥इतिपूतनाविधानं समाप्तं॥१२५॥

॥ ॥अथ ज्वरोत्पत्तौ नक्षत्रशांतयः॥ ॥तत्रादौ नक्षत्रधूननमुच्यते मदनरत्ने हेमाद्रौ च॥ ॥
आत्रेय उवाच॥ अश्विनी त्रितारा। स्त्री। अश्वमुखी। तिर्यङ्मुखी। पीतवर्णा। कांचीवक्षः। कन
कपक्षी। लघुः। अश्विनौ देवते। देवगणः। योनिर्वाजी। अक्षरे अकार आकारौ। ऋतुगमनचौलप्रा
द्वस्त्राभरणान्नप्राशनभैषज्यबीजवापनं नालिकेरस्थापनाश्वसंग्रहणादि कुर्यात्। पंचा
शन्नाडिकांते च तस्यो विषनाड्यः। मकरमासे भ्रन्यंबुधवारे मृत्युयोगः। अर्कवारे आनंदयोगः। के
चित्कलहमिच्छंति। भौमवारे सिद्धयोगः। गुडान्नभोजनं कृत्वा यात्रां गच्छेत्। आयुधश्रमं च कुर्यात्।
मध्याह्ने रक्तमे घोत्पत्तिश्चेत् संच दिने षट्दिने वारष्टिः स्यात्। तद्दिने कुजवारे विघ्नं। ज्वरोत्पत्तिश्चेद्दश
दिनानि पीडा। नीलोत्पलपुष्पैः पूजा। घृतगुग्गुलु धूपः। क्षीरलड्डुकं नैवेद्यं। देवस्य त्वेति पूजामंत्रः।
क्षीरवृक्षसमित्प्रधानद्रव्यं गायत्र्यष्टशतं कृत्वा दध्योदनवज्जलिं दद्यात्। एकादशदिनादारभ्य

पंचविंशतिदिनांतेसुखीस्यात्।संक्रमेमध्यमोर्घः।अश्विन्यांसंक्रांतौधान्यमूल्यंमध्यमंज्ञेय
मित्यर्थः।एवमग्रेपि॥अत्रकर्तादेशकालौस्मृत्वाममामुकनक्षत्रेज्वरोत्पत्तिसूचितसर्वारिष्टशां
तिद्वाराक्षिप्रारोग्यरोग्यप्राप्त्यर्थंअमुकनक्षत्रशांतिंकरिष्येइतिसंकल्प्यगणेशंसंपूज्याचार्यंवृणु
यात्।आचार्यस्तुहोमदेशादैशानेमहीद्यौरितिभूमिंस्पृष्ट्वाओषधयःसमितियवान्निक्षिप्याकल
शोस्मितिकलशंनिधायेमंमेगंगेइत्यापूर्यगंधद्वारामितिगंधंयाओषधीरितिसर्वौषधीः।कांडात्
कांडादितिदूर्वाः।अश्वत्थेवइतिपंचपल्लवान्स्योनेतिसप्तमृदः।याःफलिनीरितिफलंसहिरत्ना
नीतिपंचरत्नानिहिरण्यंचक्षिप्त्वा।युवासुवासाइतिवाससावेष्ट्यपूर्णादर्वीतिपूर्णपात्रेवस्त्रो
परिद्वादशदलंपद्मंकृत्वानक्षत्रदेवतांतन्मंत्रेणवास्यपरितःद्वादशदलेषुसंकर्षणवासुदेवादिद्वा
दशदेवानावाहयेदितिकेचित्।व्रतस्मादित्सुद्वादशहिस्यानाह॥तेच।धातार्यमाचमित्रश्चव

राम

॥१२६॥

शो

रुरंगोंभृगस्तथा।इंद्रो विवस्वान्पूषा च पर्जन्यो दशमः स्मृतः।ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्य
जः।इत्येते द्वादशादित्या नामभिः परिकीर्तिताः इत्यावाह्य दिक्पालांश्चावाह्य तत्र तंत्रोक्त गंधपुष्पधू
पदीपनैवेद्यैः संपूज्याग्निं प्रतिष्ठाप्य तत्तदुक्तद्रव्यैर्गायत्र्याष्टोत्तरशतं नक्षत्रदेवतायै संकर्षणादि
भ्यो द्वादशादिभ्यश्चाष्टौ च तत्स्वएकां वाहुतिं हुत्वा स्विष्टकृदादि प्राणीता विसर्जनांते तत्तद्द्रव्यैर्बलीन्
दत्वाचार्याय दक्षिणां दत्वा कुंभोदकेनाक्षीभ्यामिति सूक्तेनाभिषेकं हुत्वा विसृज्य प्रतिमामाचार्या
य दत्वाग्निं विसृज्य ब्राह्मणान्भोजयेदिति प्रयोगसंक्षेपः॥एवमन्येपि ज्ञेयं॥२॥भरणी त्रितारा।
त्रिकोणाकृतिः।स्त्री।अधोमुखी।यमो देवता।उग्रा।मनुष्यगणः।गजयोनिः।आमलको वृक्षः॥
पक्षी कुक्कुटः।अक्षरे रकार ईकारो।श्राद्धं कुर्यात्।मध्याह्ने रक्तमेघो त्वत्तिश्चे षोडशाहेन वृष्टिः स्यात्।
कुजवारे विघ्नं।द्रव्यसंग्रहं बहती कार वेल्लू कास्थापनं कुर्यात्।चतुर्विंशतिनाडी अंते विषनाड्यः।फा

ल्गुनेमासिश्रून्यंबुधसप्तमीभ्यांसहविषयोगः।अर्धवारेयमघंटकः।अंत्यांशोदिनमृत्युः।कर्कटेचा
पलग्नेकुजांशकेधान्यसंग्रहणं।तस्मिंल्लग्नेचकृषिंकुर्यात्।द्रव्यंनदद्यात्।ज्वरोत्पत्तिश्चेन्मृत्युः।।
संदेहोवाएकविंशतिदिनानिपीडेतिहेमाद्रौ।गुडापूपंनैवेद्यं।कुलसुरभिपुष्पं।सुरभिस्तुलसी।।
पुत्रकेशाःगुडधूपश्चेतिहेमाद्रौ।महिषाक्षोधूपः।त्र्यंबकमितिप्रजामंत्रः।घृतमधुतिलाहोमद्रव्यं।पं
चदिनांतेगायत्र्यष्टोत्तरशतंयमायत्युऊपातु।एकविंशतिदिनांतेसुखीस्यात्।नःशांतिश्चेन्मृत्युः।
वृषभवृश्चिककन्यासुसप्तनवमींविनासोमांगारकबुधास्तेषामुदयवारेषुचभस्मिदर्शनं।संक्र
मेअल्पोर्घः।।कृत्तिकाषट्तारा।क्षुराकृतिः।अधोमुखी।अग्निर्देवतामिश्रा।राक्षसगणःपीत
वर्णः।अजयोनिः।उदुंबरोवृक्षः।पक्षिणिक्रौंचकाकौ।अक्षरेउकारऊकारौ।दधिप्राशयपात्रांग राम
च्छेत्।मुक्तान्नंश्यामंपीतंचदद्यात्।भूषणंदद्यात्।त्रिंशन्नाडिकांतेविषनाडिकाः।कार्त्तिकेमासिश्र १२७॥

न्यंबुधवारेमृत्युयोगः। नालिकेरकमुकैलालवंगेक्षुस्थापनंकुर्यात्। ज्वरश्चेन्नवमदिनानिपी
डा। दध्योदनंनैवेद्यं। यूथिकापुष्पपूजा। सर्पिर्धूपः। पुनंतुमादेवजनाः इतिपूजामंत्रः। सावित्र्या
ष्टोत्तरशतंदध्योदनंचरुकलाऊतशेषेणबलिंचदद्यात्। पंचदिनादारभ्यएकविंशतिदिनांतेसु
खीस्यात्। क्रमेअश्लेषोर्धः। रोहिणीपंचतारा। त्रिकोणाकृतिः। स्त्री। ऊर्ध्वमुखी। प्रजापति
दैवता। पीतवर्णा। मनुष्यगणः। सर्पयोनिः। जंबुवृक्षः। पक्षिणोमयूरकुक्कुटौ। अक्षरऋकारऋ
कारौ। ऋतुसंगमनसीमंतनामकरणान्नप्राशनचौलोपनयनविद्यारंभस्नानविवाहयज्ञ
वाहनवस्त्राभरणाभिषेकदेवतास्थापनसाधुकर्माणिकुर्यात्। चैत्रमासेशून्यं। चत्वारिंशन्नाड्यं
तेविषघटी। रिक्तापूर्णेविषयोगः। तृतीयायांसहाययोगः। गुरुवारेविषयोगः। शुक्रवारेमृत्यु
योगः। मंदवारेसिद्धियोगः। स्थिरराशयंशोविलग्नस्थेकजेधान्यसंग्रहंकुर्यात्। ज्वरश्चेद्दिना

शांति.

निर्त्रीणिनववाधीजा।क्षीरान्नेनैवेद्यंकमलपुष्पपूजा।सरलोधूपः।नमोब्रह्मणेनमोस्त्वग्नयइति
पूजामंत्रः।घृतसर्वधान्यानिचहोमद्रव्यंअष्टशतसप्तमिश्राणिवासमाविध्याष्टोत्तरशतंजुत्वाक्षी
राभेनप्रजापतयेबलिंस्यात।त्रिदिनारारभ्यनवदिनांतेसुखीस्यात।संक्रमेअर्घवृद्धिः।।५।।मृ
गशिरस्त्रितारामृग।शिरआकृतिः।नपुंसकं।सोमोदेवता।मृदुः।देवगणः।योनिःसर्पिणी।।ख
दिरोवृक्षः।मयूरःपक्षी।एकारोक्षरं।तिर्यङ्मुखी।मृगमांसभक्षणंकृत्वायात्रांगछेत।चंद्रचा
पंचेदृष्टदिनेवृष्टिःस्यात।ऋतुगमनसीमंतनामकरणान्नप्राशनवेदोपक्रमयागविद्यारंभ
कर्णवेधनस्नानविवाहबीजावापनाभिषेकवास्तुकर्मगोसंग्रहणानिश्राद्धंचकुर्यात।चतु
र्दशनाडिकांतेविषनाडिका।कार्तिकमासेशून्यं।गुरुवारेमरणयोगः।मृतिश्च।षष्ट्यासहो
ग्रयोगः।रविवारेआनंदयोगः।चंद्रेसिद्धियोगः।चंद्रवारेचंद्रोदयेवृषभलग्नेमध्यस्तंभस्था।।१२९।।

राम

पनंकुर्यात्॥ धनादिवृद्धिः स्यात्॥ अस्मिन्लग्नेविवाह भूमौमृत्संग्रहणंकुर्यात्॥ आत्मसाङ्गवनि।
सस्यस्थापनंचकुर्यात्॥ ज्वरश्चेत्पंचदिनपीडा॥ पायसंनैवेद्यं॥ कुसुमोत्पलपुष्पपूजा॥ दशांगोधू
पः॥ नवोनवइतिपूजामंत्रः॥ सुकृतिलपंचगव्यंहोमद्रव्यं॥ पयोमात्रमितिहेमाद्रिः॥ सावित्र्या
अष्टोत्तरशतंकृत्वासुकृतिलैश्चंद्रायबलिंस्यात्॥ पंचदिनारभ्यनवदिनेतेसुखीस्यात्॥ सं
क्रमेमध्यमोर्घः॥ ॥ आर्द्रा एकतारा॥ स्त्री॥ रुद्रोदेवता॥ तीक्ष्णा॥ पीतवर्णा॥ ऊर्ध्वमुखी॥ मनु
ष्यगणः॥ श्वयोनिः॥ कृष्णखदिरोवृक्षः॥ पक्षीपिंगलः॥ ऐकारोक्षरं॥ असृजंपीत्वायात्रांगच्छेत्॥
इंद्रचापंचेद्दृष्टिर्नास्तिमिथलग्नेमेघपरिवेषश्चेत्पंचदिने सप्तदिनेवृष्टिः स्यात्॥ तत्कालकुजो
दयेवृषलग्नेद्रव्यसंग्रहणंविद्याकर्णवेधश्चश्राद्धंकुर्यात्॥ एकादशनाडिकांतेविषघटी॥ आ
षाढेमासिशून्यं॥ गुरुवारेन्त्यकयोगः॥ सानंगारकेषु चरयोगः॥ द्वितीयांशेदिनमृत्युः॥ मंदवारे

मीसोदये सेतुबंधं। अर्ककुजवारे कर्कटलग्ने औषधसेवां कुर्यात्। अस्मिन्लग्ने विद्यारंभश्च। ज्वरश्चे
न्मृत्यः। दिवान्येकत्रिंशतीडा। वा। सोदनमंन्नैवेद्यं धत्तूरपुष्पपूजा। अगरुधूपः। नमः शंभवेति पूजामं
त्रः। मधाज्यं होमद्रव्यं। सावित्र्याष्टोत्तरशतं कृत्वा। पायसान्नेन रुद्राय बलिं दद्यात्। पंचदिनात्परेभ्य
दशदिनानि सुखी स्यात्। अथ काम्नतिः। संक्रमे समार्घः। ८। पुनर्वसुषट्तारा। नौकाकृतिः। अ
दितिर्देवता। चरा। देवगणः। मार्जारयोनिः। वेणुर्वृक्षः। वायसः पक्षी। अक्षरे ओकारौकारौ। पु
मान्। तिर्यङ्मुखी। ऋतुसंगमनसीमंतनामकरणान्नप्राशनचौलोपनयनविद्यारंभसूतिकाभे
षज्यवास्तुकर्मदेवप्रतिष्ठावस्त्राभरणाभिषेकबीजावापनं यात्रादि च कुर्यात्। त्रिंशन्नाडिकांते
विषनाडिका। मिथुनमासि शून्यं गुरुवारे मृत्युयोगः। अर्कवारेर्थसाधनप्रयोगः। सिद्धिश्च।
राम
चित्। ज्वरश्चेत्सप्तदिनानि पीडा। शुद्धोदनं नैवेद्यं। मल्लिकापुष्पपूजा। मलयजो धूपः। अदितिर्यो ॥१२९॥

रदितिरितिपूजामंत्रः। घृततंडुलद्रव्यं गायत्र्याष्टोत्तरशतं हुत्वा अदितये गंधमाल्योदनैर्बलिं स्यात्।
सप्तदिनादारभ्य सप्तविंशतिदिनांते सुखी स्यात्। संक्रमेऽर्घे वृद्धिः॥ ८ ॥ पुष्यः अष्टतारा। शराकृतिः
पुमान्। तिर्यङ्मुखी। ऊर्ध्वमुखश्च। बृहस्पतिर्देवता। लघुः देवगणः। मेषयोनिः। अश्वत्थो वृक्षः। जी
वंजीवकः पक्षी। अक्षरं ककारः। घृतपानं कृत्वा यात्रां गच्छेत्। विंशतिनाड्यंते विषनाडी। ऋतुसंगमनसी
मंतनामकरणान्नप्राशनचौलोपनयनवर्णवेधनविद्यारंभस्नानाभिषेकबीजावापनवास्तुक
र्मवस्त्राभरणधारणदेवप्रतिष्ठापनयात्रादीनि कुर्यात्। कार्तिके मासि शून्यं। सितवारे विषयो
गः। केचिन्नाशयोगमिच्छंति। दशम्यां सह लग्नयोगः। सोमार्कयोर्यमकंटकः। केचिद्गुरौ सिद्धियोगः। अ
स्मिन्दिने गृहं कृत्वा प्रवेशनं चित्रालिखनं च प्रसूतिश्चेत्पितृमरणं। तृतीयांशे सर्वश्रेयः। चतुर्थां
शे बंधुमरणं। ज्वरश्चेत्सप्तदिनानि पीडा। खंडमंडकानैवेद्यं मल्लिकापुष्पं सरी रुद्रः। वागुगुलुधूपः।

बृहस्पतेअतीतिमंत्रः।घृतपायसंद्रव्यं।सावित्र्याष्टोत्तरशतंकृत्वागंधमाल्योदनैर्बृहस्पतयेबलिंदद्या
त्।दिनत्रयादारभ्यसप्तदिनांतेसुखीस्यात्।संक्रमेर्थसिद्धिः॥८॥अश्लेषाचतुस्तारा।लांगलाका
रा।सर्पदेवता।तीक्ष्णा।स्त्री।अधोमुखी।राक्षसगणः।मार्जारयोनिः।नागवृक्षः।क्षेत्रकाकः।प
क्षी।अक्षरेखकारगकारौ।पायसंप्राश्ययात्रांगच्छेत्।त्रिंशन्नाडिकोत्तेविषघटी।तृतीयांशेदिन
मृत्युः।शत्रुजयश्च।असितवारेमरणयोगः॥कृष्णमेघः।सूर्योदयेअस्ताधर्घटिकांतरेकार्मुकोद
येसर्पमुक्तत्वंलग्नेअवाङ्मुखोभूत्वाविवाहक्षेत्रेशयितोम्दक्षुहरणंफलंवाग्रस्तोयात्।आत्मसं
भवति।बृहस्पतिस्त्यअस्यांशाकेषट्कर्मारंभसर्वमचिरात्सिध्यति।द्रव्यसंग्रहणंच।अस्यादिवा
रेदुस्तुस्थापनकृषिकलमप्रसारणंच।श्रीहिवृद्धिःस्यात्।कूपोदिखननंचकुर्यात्।ज्वरश्चेन्नवदि राम
नानिपीडा।पायसंघृतंचनैवेद्यं।अतसीअगस्त्यपुष्पपूजा।घृतमंडोगुडोवाधूपः।मधुवाता ॥१३०॥

मंत्रः॥ दधिघृताक्तंसहस्राणिशाल्योयवाश्चद्रव्यं॥ गायत्र्याअष्टोत्तरशतंहुत्वासहस्राणिनागा
यबलिंदद्यात्॥ नशांतिश्चेदष्टदिनेमरणं॥ संक्रमेत्योपार्धशाली॥ मघाचतुस्तारा॥ युग्मकृतिः॥ पित
रोदेवता॥ उग्या॥ राक्षसगणः॥ मूषकयोनिः॥ पलाशोवृक्षः॥ अक्षरोघडः॥ अधोमुखी॥ त्रितिरमा
सास्मरणंकृतायायोगंछेत्॥ त्रिंशन्नाडिकांतेविषघटिका॥ कृषिवीजवापनधान्यसंग्रहणंवि
वाहंश्राश्रयणंकृत्वासहस्रगुणंभवेत्॥ ध्ययंनकुर्यात्॥ कार्त्तिकेमासिशून्यं॥ शुक्रवारेमर
णयोगः॥ सूर्यसोमयोर्यमकंटकः॥ पंचम्यासहमरणयोगः॥ अर्केश्वयोयोगिः॥ चंद्रोदयेस
स्यारंभः॥ अस्मिन्लग्नेविवाहभूमौमंत्रग्रहणंलवणंचकुर्यात्॥ ज्वरश्चेन्मृत्युः॥ एकविंशति
दिनानिपीडा॥ घृतगुडपरमान्नैर्नैवेद्यं॥ चंपकपुष्पपूजा॥ गुग्गुलुधूपः॥ पितृन्तुत्तोषमितिमंत्रः॥
घृतमधुमिश्रतिलतंडुलाक्षतंवटपत्राणिद्रव्यं॥ सावित्र्याष्टोत्तरशतंहुत्वाक्षततिलैः पितृभ्यो

बलिं दद्यात्। नरशांतिश्चेद्दशदिनांतेमृत्युः। संक्रमेमध्यमोर्घः॥ १०॥ पूर्वफाल्गुनी द्वितारा। स्त्री
अधोमुखी। अर्यमादेवता। उग्रा। मनुष्यगणः। मूषकयोनिः। पलाशोवृक्षः। काकः पक्षी। अक्ष
रं चकारः। श्यामाकान्नभोजनं कृत्वा यात्रां गच्छेत्। जयोभवेत्। ऋणं दद्यात्। आषाढेमासि सूर्ये
शुक्रवारेमृत्युयोगः। स्वर्णसंग्रहणविद्यारंभग्रहणछादनं च कुर्यात्। अस्मिन्काले तन्नक्ष
त्रपरिवेषः। इंद्रचापोवा दृष्टश्चेद्दशदिनेवृष्टिः स्यात्। विंशतिनाडिकांते विषघटिका। ज्वरश्चे
द्दिनानि नवपंचवापीडा। शुक्लेभाल्योदननैवेद्यं कृसरान्नमिति हेमाद्रिः। श्वेतकरंजपुष्पं बि
ल्वफलं धूपः। अर्यमणं नु देवमिति मंत्रः। यन्मेगर्भेवसतः पापमुग्रमिति पूजामंत्रो हेमाद्रौ।
घृतप्रियंगु द्रव्यं। घृतश्री हव्यो हेमाद्रौ। सावित्र्याष्टोत्तरशतं हुत्वा गंधपुष्पाणां सूर्याय बलिं द राम
द्यात्। षड्दिनादारभ्याष्टदिनांते सुखी स्यात्। नरशांतिश्चेन्मृतिः। संक्रमेमध्यमोर्घः॥ ११॥ १३॥

उत्तराफाल्गुनी २ तारा। स्त्री। ऊर्ध्वमुखी। भगोदेवता। ध्रुवा। मनुष्यगणः। वृषयोनिः। लक्षी
वृक्षः। क्रौंचः पक्षी। अक्षरे टू टे टो। पयःपीत्वा यात्रां गच्छेत्। अष्टादशघटिकांते विषघटिका। ऋ
तुसंगमनसीमंतनामकरणान्नप्राशनचौलोपनयनविद्यारंभविवाहस्नानवस्त्राभरण
ग्रामादिवास्तुबीजावापनाभिषेकगोसंग्रहणानि कुर्यात्। पौष्टिकं च कुर्यात्। मार्गशीर्षं शू
न्यं। वस्त्राभरणे महासिद्धिः। अर्कवारे सिद्धियोगः। मंदवारे विषयोगः। शून्यं चेति केचित्।
चतुर्थ्यां सहस्रत्वकयोगः। शुक्रवारे कलहयोगः। गुरुवारे नाशयोगः। परिवेषे द्रव्यापो हेषो च
पंचदिने सप्तदिने वा वृष्टिः। ज्वरश्चेदेकविंशतिदिनानि पीडा। केसरं नैवेद्यं। श्वेतकरवीरपू
जा। बिल्वफलधूपः। यन्येति मंत्रः। तिलमाषसर्पिर्व्रीहियवद्रव्यं हेमाद्रौ तु रक्तशाल्यन्नं नैवेद्यं।
रक्तोत्पलपुष्पं। घृतगुग्गुलुधूपः। अयं सूत्रे मिर्वसुभिरिति पूजामंत्रः। प्रियंगवो होमद्रव्यं प्रोक्तं।

साविश्रष्टोत्तरशतं जत्वा तैरेवार्यमोवलिं दद्यात्। अथ दशदिनादारभ्य एकविंशतिदिनांते राज्वरमोक्षः। संक्रमे र्ध सिद्धिः॥ १४॥ हस्तः पंचतारा। कवचाकारः पुमान्। तिर्यङ्मुखं। सवितादेवता लघुः। प्रियंगुसमप्रभा। अक्षरे अकार अकारौ। देवगणः। महिषयोनिः। अरिष्टो वृक्षः। घंटकी पक्षी। पयो मिश्रं मल्लकं भुक्त्वा यात्रां गच्छेत्। द्वाविंशन्नाडिकांते विषघटिका। ऋतुसंगमादि शुभकर्म पूर्ववत्। मकरमासे शून्यं। मंदवारे मरणयोगः। विषयोग इत्यपरे। अर्कवारे सिद्धियोगः। वस्त्राभरणधारणे महासिद्धिः। सप्तम्यां सह मरणयोगः। अर्कसित वारेणातिवृद्धिः। चतुर्थ्यां सह मृत्युयोगः। गुरुवारेण कलहयोगः। बुधवारे आनंदयोगः॥ श्राद्धदेवतास्थापन सेनापत्यादि कुर्यात्। द्रव्यं न दद्यात्। संग्रहः। पादेव। गोसर्ग्रहणं च। आ राम यांशे दिन मृत्युः। इंद्रचापे दृष्टे एकविंशतिदिने वृष्टिः स्यात्। ज्वरश्चेन्मृत्युः। संदेहो वा दिना॥ १४॥

निपंचदशापीडा। अपूपंनैवेद्यं। रक्तकरवीरपूजा। दशांगंधूपः। उद्धुत्यमितिमंत्रः। दधिघृतद्रव्यं
साविस्राष्टोत्तरशतंकृत्वागंधपुष्पेणचबलिंदद्यात्। पंचदशदिनान्यारभ्यएकविंशतिदिनांते
सुखीस्यात्। संक्रमेमध्यमोर्घः। १४। चित्राएकतारा। तिर्यङ्मुखी। त्वष्टादेवता। मृदुः। व्याघ्र
योनिः। राक्षसगणः। बिल्वोवृक्षः। हंसःपक्षी। अक्षरेटठो। चित्रान्नभोजनंकृत्वायात्रांगच्छेत्।
एकविंशतिनाड्यंतेविषनाडिका। अन्नप्राशनकर्णवेधचौलोपनयनवस्त्राभरणाभिषेक
श्राद्धकर्मकृषिबीजावापनानिकुर्यात्। वैशाखमासेशून्यं। कुजवारेनाशयोगः। सनैश्चर्कं
जैचरयोगः। इंदुवारेद्वितीययासहविषयोगः। त्रयोदश्यांमरणयोगः। बुधवारेयमघंटकः।
मंदवारेनाशयोगः। माघमासेपूर्वोक्तिइंद्रचापेहष्टदशदिनेवृष्टिः। चैत्रेमासिसायाह्नेविशेष
मेघेउत्पन्नेएकविंशतिदिनेवृष्टिः। ज्वरश्चेद्दिनानिदशपंचवा। मोदकंनैवेद्यं। जपापुष्पपूजा।

रुणांगो धूपः। चित्रं देवानाम् इति मंत्रः। जलमिश्रं घृतं। चित्रोद्दनं च भक्ष्यं। सावित्र्याष्टोत्तरशतं हुत्वा
ताम्रे घृतमिश्रमुद्गैर्बलिं दद्यात्। सप्तदिनादारभ्य विंशति दिनांते सुखी स्यात्। संक्रमे मध्यमो घः॥
॥१४॥ स्वाती एकतारा। रक्तवर्णा। वायुर्देवता। चरा॥ यतिर्यक्मुखी। देवगणः। महिषयोनिः।
उन्मत्तो वृक्षः। मयूरः पक्षी। आमलकभक्षणं कृत्वा यात्रां गच्छेत्। चतुर्दशनाड्यंते विषनाडी। ऋ
तुगमनादिशुभकर्म पूर्ववत्। वैशाखे मासि शून्यं। चंद्रवारे सिद्धियोगः। रविवारे सिद्धियोगः। शु
क्रवारे यमघंटकः। त्रयोदश्यां सह मरणयोगः। द्रव्यं दद्यात्। पूर्वपक्षपंचम्यां विजयः। मंदवारे
वृषोदये सेतुबंधनं कुर्यात्। अक्षरोढकारः। ज्वरश्चेत्साष्टिदिना निपीडा। दध्योदनं नैवेद्यं। द
मनकपुष्पपूजा। श्वेतागरुधूपः। सनः पितेवेति मंत्रः। घृताक्तपायसं द्रव्यं सावित्र्याष्टोत्तरशतं राम
हुत्वा गंधपुष्पैरश्वापवे बलिं दद्यात्। दशदिनादारभ्य चत्वारिंशद्दिनांते सुखी स्यात्। संक्रमे ॥१५॥

मध्यमोर्धः॥१५॥विशाचतुस्तारा।स्त्री।सूर्याकारा।अधोमुखी।इंद्राग्नी देवते।मिश्रा।व्या
घ्रयोनिः।वैकंकतोरक्षः।पिंगलःपक्षी।अक्षरे ढकार णकारौ।मिष्टांबुपानंकृत्वायात्रांगछेत्।
चतुर्दशानघ्यंते विषनाडी।शुभकर्मणिपूर्ववत्।बीजावापनवस्त्राभरणग्रहणं च कुर्यात्।
द्रव्यं न दद्यात्।गलितीयादेव।मार्गशीर्षेश्चन्यां।अर्कनाशयोगः।किंचिद्विषयोगमिछंति।बु
धगुरुवारयोर्यमघंटकः।द्वितीयांरोहिनमृत्युकः।शुक्रवारेसुकोदयेकृष्णाशंसंकुर्यात्।शत्रुद
र्शनं चेत्सुखं भवति।मंदवारेअस्मिन्लग्नेकर्कोलि॑चापलग्नेकुर्यात्।रोर्वाधान्यसंग्रहणं कुर्यात्।
तत्काले भूमिविचारश्चेज्जयो भवति।चंद्रचापेदृष्टेअष्टदिने वृष्टिः।ज्वरश्चेद्विंशतिदिनानिपी
डा।गुडकंनैवेद्यं।बंधुकपुष्पपूजा।तुंबरीपुष्पंहेमाद्रौ।देवदारुधूपः।इन्द्राग्नीतिपूजामंत्रः।
दुग्धोदनंघृतंद्रव्यं।सा।विश्वाषीत्तरशतंकृत्वापयोमिश्रान्नैर्गंधमाल्यैरिंद्राग्निभ्यांबलिंदद्यात्।

दशादिनाशरभ्यविंशतिदिनांतेसुखीस्यात्। संक्रमेप्रोर्धः॥ १६॥ अनुराधाषट्तारा। चक्रमालाकृतिः। पुमान्। तिर्यङ्मुखी॥ मित्रोदेवता। देवगणः। मृगयोनिः। बकुलोवृक्षः। पक्षिरोगोपरपुष्पकाकौ। अक्षराणिनकारथकारदकाराः। द्वासप्तत्यंतेविषघटी॥ कुलस्याभक्षणंकृत्वा यात्रांगच्छेत्॥ ऋतुसंगमसीमंतकर्णान्नप्राशनोपनयनविधारंभश्राद्धबीजावापनादीनि कुर्यात्। मार्गशीर्षमासिशून्यं। अर्कवारेमरणयोगः। केचिन्मृत्युयोगमिच्छंति। बुधवारेसिद्धियोगः। शुक्रवारेआनंदयोगः। भौमवारेमृत्युयोगः। ततौ। पंचमोदिनेमृत्युः। तत्कालेचापलग्नेकुजांशकेधान्यसंग्रहणं। तत्कालेव्यवहारजयोभवति। विवाहेदमोपद्रहणंचकुर्यात्। करवीरपुष्पसदृशोमेघोदृश्येदशादिनेवृष्टिः। ज्वरश्चेदशादिनानिपीडा॥ कुसरंनैवेद्यं। पुंडरीकंपुष्पं। चंदनसिल्हरसोधूपः। देवसवितःप्रसुवयज्ञमितिपूजामंत्रः। सूरणकंदःप्रधानद्रव्य

राम

भ २

रा ४

मितिहेमाद्रिः॥१७॥ज्येष्ठात्रितारा।कुंडलाकृतिः।तिर्यङ्मुखी।चंद्रोदेवता।तीक्ष्णा।राक्ष
सगणः।मृगयोनिः।विषवृक्षः।पर्सीकुकुटी।धकारोक्षरः।तिलैःक्षणं कृत्वायात्रांगछेत्॥
चतुर्दशनाडिकांतेविषघटी।केचित्सेनापत्यंश्राद्धंशांतिवापनंचाहुः।फाल्गुनेमासिमृत्युं।
अर्कवारेनाशयोगः।गुरुप्रतिपदिविषयोगः।इंदुवारेभौमलग्नेकूपादिखननंकुर्यात्।क्रूर
वीरपुष्पसदृशोमेघश्चेदृशाद्दिनेवृष्टिः।ज्वरश्चेन्मृत्युः।संदेहोवादेशापंचादिनानिपीडा।चि
त्रान्नंनैवेद्यं।पद्मोलीपुष्पपूजा।कर्पूरागरुधूपः।इंद्रंधोइतिमंत्रः।घृतंसूरणकंदमूलंध्यंसा
विन्याष्टोत्तरशतंकृत्वागंधपुष्पेणेंद्रायबलिंदद्यात्।नशांतिश्चेन्मृत्युः।अन्यतरांगतिंगछ
तीत्याश्वलायनोमांडव्यश्च।संक्रमेल्पार्घः॥१८॥मूलंनवतारा।पश्वाकृतिः।हंसवर्णः।
अधोमुखी।नपुंसकं।निर्ऋतिर्देवता।तीक्ष्णा।राक्षसगणः।श्वयोनिः।सर्जोवृक्षः।जीवंतिकः

पष्टी॥शाकभक्षणं कृत्वा पात्रांगच्छेत्।तिलभक्षणं केचित्।विंशति नाड्यंते विषघटी।अंत्यांशो
दिनमृत्युः।मेषो दृश्यते चेत्तृतीये दिने दृष्टिर्भवति।ज्वरश्चेन्मृत्युः।दिनानि पंचविंशतिः पीडा द
शधा।मित्रस्य चर्षणीति पूजामंत्रः।कुंकुमं गंधः।पद्मं पुष्पं।साज्यं पायसं नैवेद्यं।चंदनदध्यन्नस
रणकंराः प्रधान द्रव्यं साविआष्टोत्तरशतं स्मरणकं कृत्वा मित्रायसाज्यपायससमुद्गमध्ये बलिं
दद्यात्।अष्टदिनादारभ्य पंचविंशतिदिनांते सुखी स्यात्।संक्रमे मध्यमो घः।नामकरणान्न
प्राशनायनविवाहबीजावापनगोसंग्रहणानि कुर्यात्।उग्रकर्माणि च कुर्यात्।द्रव्यं न द
द्यात् ह्लीयादेवा माघे शून्यं।अर्कवारे मृत्युयोगः।कार्मुकी स्येन गरस्थापनं च।रक्तमेघे षष्ठे
ष्टदिने दृष्टिः।ज्वरश्चेन्मृत्युः।संदेहो वा दिनानि दशपीडा।मत्स्यमांससुरापोलिकानैवेद्यं।रक्ता राम
शोकपुष्पपूजा।लसेचरिकापुष्पं हेमाद्रौ।मेषशृंगो धूपः।मोक्षुरणः परापरा इति मंत्रः।बलं ॥२२५॥

रुणाग्निः संवित्तानइतिमंत्रो हेमाद्रौ। सघृतं कंदमूलं द्रव्यं। मूलं कंदः। सावित्र्याष्टोत्तरशतं हुत्वा नि
र्ऋतये पायसान्नेन बलिं दद्यात्। संक्रमे धीसिद्धिः॥१९॥ पूर्वाषाढा द्वितारा। स्त्री। अधोमुखी॥
आपो देवता। उग्या मनुष्यगणः। कपिपो निर्वानीरो वृक्षः। शक्रः पक्षी। अक्षराणि नकारादि
वांताः। कंदभक्षणं कृत्वा यात्रां गच्छेत्। चतुर्दशनाड्यंते विषघटी। गोसंग्रहणं। शालिवायनं च
कुर्यात्। कूपादिखननं विद्यारंभव्रतबंधनालपनमुखानि कर्माणि कुर्यात्। द्रव्यं न दद्यात्।
गर्भिण्या देवश्रावणे मासि शून्यं। चंद्रवारे विषयोगः। कुजवारे यमोदये प्राकारारंभं च कुर्या
त्। गंधमालापरक्षाकर्माणि च। अस्मिन्लग्ने कूपादिखननं च। रक्तमेखेहष्टे पंचादिने वाधिः।
ज्वरश्चेत्स च विंशतिदिनानि पीडा। मंडकान्नैवेद्यं कल्हारपुष्पपूजा। मनःशिला धूपः। शैलजं
धूपो हेमाद्रौ। आपो हिष्ठेति मंत्रः। यत्किंचेदं वरुणेति हेमाद्रौ। रक्तशालिद्रव्यं सावित्र्याष्टोत्त

रशतंजप्त्वावरुणायपायसान्नेनबलिंदद्यात्।चतुर्दशदिनादारभ्यविंशतिदिनांतेसुखीस्यात्।
संक्रमेत्स्योर्घ्यः।२०।उत्तराषाढाद्वितारा।स्त्री।ऊर्ध्वमुखी।विश्वेदेवादेवता।ध्रुवा।मनुष्यगणः।।
गोयोनिः।श्यामलोवृक्षः।पिंगलःपक्षी।अक्षरोमकारः।गजविक्रयणंगजारोहणंचकुर्यात्।यां
कुस्थापनंशंकुवंतंचकुर्यात्।तिलभक्षणंचकृत्वापात्रांगछेत्।विंशतिनाड्यंतेविषघटी।ऋतुसं
गमनादिशुभकर्माणिकुर्यात्।वैशाखेमासिशून्यं।चंद्रवारेमरणयोगः।अर्कवारेसिद्धिः।कु
जवारेकलहयोगः।मंदवारेमृत्युः।शुक्रवारेआनंदः।तृतीययासहमरणयोगः।संक्रमेयेदृष्टे
एकादशादिनेवृष्टिः।ज्वरश्चैकविंशतिदिनानिपीडा।पंचसर्षपनैवेद्यंपंचवर्णपुष्पैःपूजा।द्राक्षा
धूपः।बालकधूपोहेमाद्रौ।विश्वेदेवासआगतेतिमंत्रः।घृतंसलूकीमंडानिद्रव्यं।सावित्र्या राम
ष्टोत्तरशतंजप्त्वाविश्वेभ्योदेवेभ्यःपायसान्नेनबलिंदद्यात्।एकादशादिनादारभ्यविंशति ॥१३६॥

दिनांते सुखी स्यात्॥ संक्रमे धर्मवृद्धिः॥ २२॥ श्रवणं त्रितारा। इंडआकृतिः। पुमान्। ऊर्ध्वमुखः। विष्णुर्दे
वता। चरा। देवगण०। वानरयोनिः। न्यग्रोधो वृक्षः। मयूरः पक्षी। अक्षरो मकारः। स्नानाद्यंते विषघ
टी। जलं पीत्वा यात्रां गच्छेत्। ऋतुसंगमनपुंसवनसीमंतनामकरणान्नप्राशनचौलोपनयनाभि
षेकाभरणकृषिबीजावापनकर्णसंधानानि कुर्यात्। श्राद्धं च यज्ञं च माघे श्रून्यं। अर्कवारे सिद्धियो
गः। चंद्रवारे मृत्युयोगः। भौमवारे यमघंटकः। शुक्रवारे पक्ष्या सहेयोग्ययोगः। पंचम्या सह वाक् कीर्ति
वा पलग्ने चंद्रांशके धान्यसंग्रहणं कुर्यात्। व्यवहारारंभे जयो भवति। सोमवारे द्वितीयायां सूर्यो
दये गृहारंभं कृत्वा प्रवेशनं च कुर्यात् सकलं वृद्धिर्भवति। ज्वरश्चेत्मासद्वयं पीडा मत्स्यसंदेहो वा। क्षी
रशर्करा घृतभक्ष्यकान्नैवेद्यं। जातीपुष्पं पूजा। दशांगो धूपः। अतो देवा इति मंत्रः। रक्ततंडुलद्रव्यं। सा
वित्र्याष्टोत्तरशतं कृत्वा गंधपुष्पेण विल्वबलिं दद्यात्। मासांते संवत्सरांते सुखी स्यात्। संक्र

मेर्धवृद्धिः॥२२॥धनिष्ठापंचतारा॥व्यक्ताकारा॥मृदंगाकारा॥स्त्री॥ऊर्ध्वमुखी॥वसवोदेवता॥राक्ष
सगणः॥सिंहयोनिः॥शमीवृक्षः॥सत्तु भसणंहत्वापात्रोंगच्छेत्॥दशानाड्यंतेविषघटी॥ऋतुसं
गमनादिशुभकर्माणिपूर्ववत्॥आषाढेशून्यं॥कुजवारेविषयोगः॥केचिन्नाशयोगः॥मंदवारेमं
दोदये आरामभूमिसंचयनंकुर्यात्॥आद्यांशेदिनमृत्युः॥२ऌमेघेदृष्टेविंशतिदिनेवृष्टिः॥ज्वर
श्चेत्संवत्सरादिनापिपीडा॥पायसंनैवेद्यं॥वटकाश्चेतिहेमाद्रिः॥शतपत्रपुष्पपूजा॥घृतगुग्गु
लुधूपः॥त्र्यंबकंयंतामिरुद्रेवाङ्मंत्रः॥बिल्वोदुंबरश्वसमिधोद्रव्यं॥सावित्र्याष्टोत्तरशतंकृत्वा
घृतमिश्रमुद्गैर्वसुभ्योबलिंदद्यात्॥दशादिनारारभ्यपंचदशादिनांतेसुखीस्यात्॥त्रयोदशवा॥
मासांतेवा॥संक्रमेमध्यमोर्घः॥२३॥शततभिषक्शततारा॥पुष्पपुंजनिभाकृतिः॥नपुंसकं॥ राम
ऊर्ध्वमुखी॥वरुणोदेवता॥चरा॥राक्षसगणः॥उरगयोनिः॥कदंबोवृक्षः॥कंटकीपक्षी॥ ॥१३७॥

श्रक्षरोरे फलकारो ॥ अन्नप्राशन चौलपुंसवन कर्णवेधसंधान धान्यवापन श्राद्धशास्त्रारं
भांश्च कुर्यात् ॥ प्रोष्ठपदे मासि शून्यं ॥ कुजवारे मरणयोगः ॥ केचिन्मृत्युयोगमिच्छंति ॥ मंदवारे
यमघंटकं ॥ सनंदार्क कुजयोर्मरणयोगः ॥ गुरुवारे मृत्युवार योगः ॥ अर्के कुजवारे कुलीर लग्ने
त्वौषधोपयोगं कुर्यात् ॥ अस्मिन्लग्ने कृषिलवनं कुर्यात् ॥ अपूपभक्षणं कृत्वा पात्रांगच्छेत् ॥
अष्टादशानाड्यंते विषघटी ॥ ज्वरश्चेद्दशदिनानि पीडा ॥ घृतमंडका नैवेद्यं ॥ सावित्र्याष्टोत्तर
शतं जलोद्भवैर्वरुणाय कृत्वा पायसान्नेन बलिं दद्यात् ॥ षष्ठदिनादारभ्य द्वादशदिनांते सु
खी स्यात् ॥ संक्रमे ल्पार्घः ॥ २८ ॥ ७ ॥ पूर्वाभाद्रपदा द्वितारा ॥ स्त्री ॥ अधोमुखी ॥ अजैक
पाद्देवता ॥ उग्रा ॥ मनुष्यगणः ॥ सिंहयोनिः ॥ आम्रो वृक्षः ॥ अक्षरो वशो ॥ कपोतः पक्षी ॥

शांति•

गुडभक्षणं कृत्वा यात्रां गच्छेत्। षोडशनाड्यंते विषनाडिका॥ आश्वयुजि भ्रमनी। गोसर्यहरणं विघा
रंभं च कुर्यात्॥ द्रव्यं नश्यात्॥ ग हस्तौ पादेव॥ कुजवारे नाशयोगः॥ अंत्यांशे भागवत्यां दिस्थाप
नी॥ द्वितीयांशे शुक्रोदये कूपादिखननं॥ रक्तमेघे छत्रे दिनेव ष्टिः॥ ज्वरस्थेन्मत्यकः॥ सदेहो
वा॥ द्वात्रिंशतिदिनानि पीडा॥ दधि घृतं नैवेद्यं॥ अर्कपुष्पपूजा॥ सर्वौषधिधूपः॥ शन्नोऽ
अज एकपादिति मंत्रः॥ शमग्निरग्निभिः करदिति मंत्रो हेमाद्रौ॥ घृत कूष्मांड खंडसा विद्या
[illegible]॥
धेनुस्तरथालंकृत्वा गं धमाल्यो दने रजैकपदेबलिं दद्यात्॥ दशदिनांते शांतिर्धृति वा सिवति॥
संक्रमे मध्यमोर्घः॥ २५॥ ७॥ उत्तराभाद्रपदा द्वितारा॥ पुमान्॥ ऊर्ध्वमुखी॥ अहिर्बुध्न्यो देवता॥ ध्रुवः॥ मनुष्यगणः॥ गोयोनिः॥ निंबो वृक्षः॥ चक्रवाकः पक्षी॥ अक्षरे षसो॥ १३६॥ राम

मांसभक्षणंकृत्वायात्रांगछेत्॥ चतुर्विंशतिनाड्यंते विषघटी॥ ऋतुसंगमनसीमंतना
मकरणान्नप्राशनचौलोपनयनस्नानविवाहवास्तुबीजावापनवस्त्राभरणाभिषेक
गोसंग्रहणानिकुर्यात्॥ रोगीस्नातश्चेत्सुखीस्यात्॥ श्रावणमार्गशीर्षयोः शून्यौमा
तृतीययोसहमरणयोगः॥ कुजवारेमृत्युयोगः॥ अर्कवारेसिद्धियोगः॥ तृतीयपादेदि
नेमृत्युः॥ स्वक्षेमेघोहष्टश्चेदेकादशदिनेरुष्टिः॥ ज्वरश्चेत्पंचदशाक्षिपीडा॥ अहिर्बुध्न्योदे
वता॥ गुडपलललघृतोदनंनैवेद्यम्॥ करंजपत्रावलिपुष्पम्॥ घृतनिंबपत्रधूपः॥ विष्णुर्यो
निंकल्पयतुत्वष्टारूपाणिपिंशतु॥ आसिंचतुप्रजापतिर्धाता गर्भंदधातुते इतिप्रजामंत्रः॥
घृतप्लुतंमाषचरुमुद्गादिद्रव्यं॥ आर्द्रमाषरुधिरदुग्धानिद्रव्यमितिहेमाद्रौ॥ सावित्र्याष्टोत्त
रशतंकृत्वागंधपुष्पेणाहिर्बुध्न्यायबलिंदद्यात्॥ संक्रमेघटी ३॥ रेवतीद्वात्रिंशता

मानि ५

रापीडाकृतिः स्त्री ॥ तिर्यङ्मुखी पृष्टारेखला । मृदुः देवगणः । गजयोनिः । मधूकोवृक्षः । पिंग
लःपक्षी । अक्षरोहकारः । क्षीरपानंकृत्वा यात्रांगच्छेत् । त्रिंशन्नाड्यंते विषघटी । प्रोष्ठपदे मासिष्ठ
र्यं । ऋतुसंगमसीमंतनामकरणान्नप्राशनचौलोपनयनस्नानविवाहवास्तुबीजावापनवस्त्रा
भरणभिषक्कर्मो संग्रहणानि कुर्यात् ॥ अर्के सिद्धियोगः ॥ अष्टम्यासह विषयोगः । बुधे सोमे
च विषयोगः । ज्वरश्चेद्दशदिनानि पीडा । तंडुलमिश्रं नैवेद्यं । मंदारपुष्पपूजा । गुग्गुलुर्धूपः ।
भौमे नाशयोगः । नंदार्ककुजयोर्विरयोगः । शुक्रवारे सिद्धियोगः । सप्तम्यासहोग्रयोगः । ॐ हंसः
शुचिषदिति मंत्रः ॥ घृताम्रफलसहितकदलीफलानि चद्रव्यं सावित्र्यौंषोत्तरशतं कृत्वा गंधपु
ष्पादिभिः पूजयेच्च बलिं दद्यात् । पंचदिनादारभ्य विंशतिदिनांते सुखी स्यात् । संक्रमे मध्यमोऽर्घः । ॥ २१ ॥
अर्घद्धिरितिगार्ग्यमांडव्यादयः ॥ ॥ इति कमलाकरभट्टकृते शां० हेमाद्रिमदनरत्नोक्तं नक्षत्रपरिपूर्णं समाप्तं ॥

॥वसिष्ठसंहितायां॥रोगेशशांतिं प्रवक्ष्यामि रोगार्त्तानां शरीरिणां॥बलिपूजां च होमैश्च जपब्राह्मण
भोजनैः॥यस्मिन्धिष्ण्ये यदा न्हणां रोगः संजायते तदा॥तद्धिष्ण्यपूजां कर्त्तव्या तदीश्वरसुतुष्टये।
सुवर्णेन प्रमाणेन तदर्धार्द्धेन वा पुनः॥धिष्ण्येशप्रतिमा कल्प्या यथावित्तानुसारतः॥ईशान्या
मथवा प्राच्यामुदीच्यां दिशि संलिखेत्॥तंडुलोपर्य्यष्टदले पद्मं गोमयमंडले॥पंचामृतैश्च सलि
लैः स्तत्तन्मंत्रैः पृथक्पृथक्॥स्नाप्य कल्पोक्तमंत्रेण प्रतिमां स्थापयेत्ततः॥कर्णिकायां सुसंस्था
प्य ध्यात्वा देवं समर्चयेत्॥तद्वर्णवस्त्रगंधाद्यैः रक्तधूपोपहारकैः॥आरक्तवर्णं कुंभं च पंचभिः
पल्लवैर्युतं॥शुक्लवस्त्रस्वर्णरत्नसर्वौषधसमन्वितं॥मत्स्यं च माष्यसद्बीजफलक्षोद्रसमन्वि
तं॥देवस्य एवं ततः स्थाप्य जलमंत्रैः समर्चयेत्॥तत्प्राच्यां स्थंडिले वह्निं विधिवत्स्थापयेत्ततः॥
मुखांतेऽजुहुयात्कर्द्रध्येणाष्टसहस्रकं॥उक्तद्रव्येण तत्तन्नक्षत्रोक्तेन॥तिलैश्च हुत्वा व्याहृ

तिभिरष्टोत्तरसहस्रकं।पूर्णाहुतिंचसुकुर्यात्सम्यक्संकल्पपूर्वकं।ततःशुभ्रोपविष्टस्यरोगि
णःप्राङ्मुखस्यच।मंत्रपूतैःकुंभजलैरब्लिंगैर्वारिमंत्रकैः।मार्जनंकारयेत्तस्यसम्यक्संकल्प
पूर्वकं।नीराजनंचशुभ्रात्मापूजास्थानंसमागतः।देवंकृताशानंभक्त्याप्रणम्यप्रार्थयेदिति।
अमृतोद्भवधिष्ण्येत्रायतस्त्वंशंकरात्मकः।रोगादस्माच्चमांरक्षतववश्यास्त्वधिष्ण्यपाः।इति
प्रार्थ्यततोदद्यात्सवृत्तिमांवस्त्रसंयुतौ।दक्षिणासहितांभक्त्याआचार्यायकुटुंबिने।ब्राह्मणां
चयथाशक्त्याब्राह्मणान्भोजयेत्ततः।कृत्वानक्षत्रपूजांचतिथिवासरयोरपि।सर्वान्कामान
वाप्नोतिरोगीरोगात्प्रमुच्यते।पूर्वोक्तविधिंकृत्वांतेतिथिवारयोःशांतिंचकुर्यादित्यर्थः॥ ॥
अश्विन्यामुत्थितोव्याधिर्नवैरात्रेणशुध्यति।देवस्यत्वेतिमंत्रस्यगायत्री।काश्यपोश्विनौ।श्वे
तवर्णौसुधापूर्णंकुंभौभोजधरौपृथक्।चंदनोत्पलपुष्पाज्यगुग्गुलंचगुडप्रियो।क्षी

राम

रलदुकपोत्कारोसमिधःक्षीरवृक्षजाः।आज्यंचगुग्गुलुश्चधूपःसमिद्भिर्होमः।एवमन्येपि॥गु
ओदनबलिंदद्याद्दीपैःसार्द्धंनिशामुखे।भरिण्यामुत्थितोव्याधिरचिरान्निधनप्रदः।मासेनमुंच
त्यथवादेवस्यकुटिलागतिः।त्र्यंबकस्यतुमंत्रेणचोक्ताछंदर्षिदेवताः।गंधोगरुःकरवीरंपुष्पं
धूपश्चगुग्गुलुः।आज्यदीपंचसर्वेषांनैवेद्यंचगुडओदनं।पाशदंडधरोरक्तस्त्वाज्यमधक्षताहविः।
महिषीनायकारूढाकृसरान्नंबलिंहरेत्।वक्ष्यमाणेनमंत्रेणबलिंसम्यक्प्रदापयेत्।कृत्तिका
सूत्थितोव्याधिर्दशरात्रेणमुंचति।स्रुक्स्रुवाभयवरदःस्ववर्गोमेषवाहनः।मेधातिथिर्मगत्य
ग्निःपुनंतुमामित्यस्यच।चंदनंपृथिकापुष्पंघृतधूपःसगुग्गुलुः।नैवेद्यंतिलमाषान्नंवटका
द्येनसंयुतं।गुडओदनंहविस्तत्रपायसेनबलिंहरेत्।रोहिण्यामुत्थितोव्याधिर्दशरात्रेणमुंचति।
नमोब्रह्मणेतिमंत्रस्यगायत्री।विधिरीश्वरः।स्रुक्कमंडलुस्त्वक्षसूत्राभयवरप्रदः।चंदनं

कमलंपुष्पंदशांशंचैवगुग्गुलं।नैवेद्यंपायसंसाज्यंसर्वदाग्नौहविर्भवेत्।दधिक्षीरघृतक्षौ
द्रशाल्यन्नेनबलिंहरेत्।चंद्रमसेयोस्थितोव्याधिःपंचरात्रेणशाम्यति।गदावरदपाणिश्चश्वेतो
सोरथवाहनः।नवीनवोभवेत्यस्यगायत्रीगौतमःशशी।चंदनंकुंकुमंपुष्पंदशांगंपायसौद
नं।नैवेद्यंमंडकाधूपंघृतंक्षौद्रसमन्वितं।शर्करादधिमिश्रेणशुक्लान्नेनबलिंहरेत्।आर्द्रा
यामुत्थितोव्याधिरचिरान्नि धनप्रदः।मासेनमुंचत्यथवादेवस्यकुटिलागतिः।शुद्धस्फ
टिकसंकाशःशूलखड्गाभयेष्टदः।नमःशंकरायेत्यस्यबृहतीशोवशिष्ठऋषिः।चंदनंसौरभं
पुष्पंदशांशंपायसौदनं।समध्वाज्यंहविस्तत्रदध्योदनबलिंहरेत्।पुनर्वसौभवेद्व्याधिर्न
वरात्रेणमुंचति।कर्मंडल्वक्षसूत्रेचदर्भस्त्रुकूस्रुवाभृत्सदा।अदितिर्थोमंत्रस्यत्रिष्टुभो राम
द्रुहिणोधृतिः।हरिद्राकुंकुमंगंधःपुष्पंसेवंतिकादयः।धूपोमलयजंपिष्टंघृतान्नंपीतवर्णं ॥१४१

समंडकघृतान्नेनबलिंतत्रप्रदापयेत्॥२

कं।घृताक्तंतंदुलहविःपीतान्नेनबलिंहरेत्।पुष्येसमुत्थितोव्याधिःसप्तरात्रेणमुंचति।पी
तोदंडकमंडल्वक्षसत्राभयोद्यतः।बृहस्पतेपरीत्यस्यत्रिष्टुब्जीवोंगिराऋषिः।कुंकुमंवारि
जंपुष्पंनैवेद्यंघृतपायसं।मंडकागुडसंयुक्तमेतद्देवहविर्भवेत्॥आश्लेषासमुत्थितोव्याधिःक्ले
शान्मासेनमुंचति।नमोअस्तुसर्पेभ्यइतिमंत्रस्यहव्यवाडथसर्पराट्।मधुवर्णोभोगयुक्तःखड्गचर्म
धरःशुभः।सकुंकुमागरुर्गंधःपुष्पंनागस्त्यसंभवं।घृतगुग्गुलधूपोत्रनैवेद्यंक्षीरसर्पि
षा।हविःसाज्यंसुदध्यन्नंदध्योदनबलिंहरेत्।पितृभेचोत्थितोव्याधिरचिरान्निधनप्रदः।अ
थवासार्धमासेनधूम्रोदंडपवित्रधृक्।आस्तुंतुनस्तुइतिचास्यजगतीपितरोऋजः।चंदनंचं
पकंपुष्पंधूपःसघृतगुग्गुलुः।नैवेद्यंघृतपिष्टान्नंतिलान्नंसघृतंहविः।सतिलाज्यंवसुमा
न्नंबलिंचपितृतृप्तये॥पूर्वाफाल्गुनकेव्याधिरर्धमासेनमुंचति।भगएवभगवानित्यस्य

त्रिष्टुप्भगो त्रिधिः। पद्माभयकरः पद्मवर्णः सिंहासने स्थितः। चंदनं मालती पुष्पं बिल्वं च धूपो घृ
तोदनं। नैवेद्यं शार्करापूप लड्डुकाभिश्च संयुतं। घृतोदनं हविस्तत्र पायसेन बलिं हरेत्। अर्यम
र्क्षे भवेद्व्याधिरर्धमासेन मुंचति। पद्मवर्णः पद्मसंस्थः पद्मगर्भसमद्युतिः। अर्यमा याति मं
त्रस्य अर्यमा त्रिष्टुब् ब्रह्मजः। कर्पूरकुंकुमं गंधपुष्पं धूपकसंज्ञकं। घृतगुग्गुलु धूपो त्र नैवेद्यं
घृतपायसं। होमद्रव्यं घृतान्नं स्यात् शाल्यन्नेन बलिं हरेत्। हस्ते समुत्थितो व्याधिर्नवरात्रेण
मुंचति। उदुत्यमिति हिरण्यस्तूपो गायत्री आदितिं जपेत्। रक्तगंधकुंकुमं च पुष्पं राजीवसंज्ञकं।
गंधं गुग्गुलु धूपो त्र नैवेद्यं घृतपायसं। मधुपुष्पं तिलाज्यान्नैर्व्रीहिभिः सहितं हविः। गुडशर्क
रमधाज्यपिष्टान्नेन बलिं हरेत्। चित्रायामुत्थितो व्याधिर्दशरात्रेण मुंचति। चित्रं देवाना
मित्यस्य त्वष्टा त्रिष्टुप् पितामहः। अक्षसूत्राभयकरश्चित्रवर्णः शिवे रतः। सकुंकुमागरु

राम

गंधः कुसुमं चित्रवर्णकं। नैवेद्यं मोदकाज्यान्नं चित्रान्नं सघृतं हविः। तदन्नेन बलिं दद्यात्स
र्वरोगापनुत्तये। स्वात्यर्क्षे चोत्थितो व्याधिः सर्वदा निधनप्रदः। एकद्वित्रिचतुःपंचमासे वापि
विमुंचति। सनः पितेति मंत्रस्य गायत्री मरुदंगिराः। खड्ग चर्मधरः कृष्णो गंधः कृष्णागरूद्भ
वं। पुष्पं मदनकं धूपं चंदनागरुगुग्गुलुः। नैवेद्यं पायसं साज्यं हविस्तेन बलिं हरेत्। द्विदैवभे
भवे व्याधिर्मासेनैकेन मुंचति। इंद्राग्नी आगतमिति गायत्री चास्य चैव हि। मधुछंदऋषी
द्राग्नी तयोर्ध्यानं च पूर्ववत्। श्रीखंडं कुंकुमं गंधं तयोः पुष्पं सरोरुहं। देवदारुस्तयोर्धूपो नैवे
द्यं घृतपायसं। तदेवान्नं हविस्तत्र चित्रान्नेन बलिं हरेत्। मित्रभे चोत्थितो व्याधिर्दशरात्रे रुग
मुंचति। मित्रस्य चर्षणीतीदं गायत्री चास्य चैव हि॥ ऋषिर्हिरण्यस्तूपाख्यस्तत्र मित्रोधिदे
वता। द्विभुजः पद्मगर्भाभः पद्मासनसंस्थितः। कुंकुमं पुंडरीकाख्यं पुष्पं धूपं च चंदनं। नैवेद्यं

पायसं सार्ज्यं हविस्कंदस्तु सुररागः। बलिस्तत्र प्रदातव्यो मधुशर्करपायसैः। घृतकर्पूरमाषान्नं
मुस्तगर्भैश्च संयुतं। ज्येष्ठायामुत्थितो व्याधिर्मत्परेवन संशयः। अथ वामासमेकैवामुंचत्येव न
संशयः। इंद्रं वश्र इति मंत्रस्य गायत्री इंद्रो गिराऋषिः। इंद्रस्तु पूर्ववद्गंधं चंदनं कुसुमं शुभं। कर्पूरधू
पो नैवेद्यं चित्रान्नं सुमनोहरं। हविस्तु सुररागकंदं मधुकंदं सुपायसं। विचित्रपुष्पगंधेन दध्य
न्नेन बलिं हरेत्। मूलर्क्षे चोत्थितो व्याधिर्मासार्द्धेन विमुंचति। खड्गचर्मधरः कृष्णः करालव
दनः प्रभुः। मोषुणोस्य च गायत्री घोरकण्वो थ नैर्ऋतिः। गंधः कृष्णागरुः पुष्पं पद्मं नीलोत्पलं
शुभं। धूपः कृष्णागरुर्माषमिश्रान्नमुपहारकं। तदेवान्नं हविस्तत्र माषान्नेन बलिं हरेत्। वा
रिभे चोत्थितो व्याधिः रोगिरो निधनप्रदः। विमुंचत्यथ वामासैर्द्वित्रिषट्पंचसप्तभिः। आ
प्या यस्वेति मंत्रस्य गायत्री पद्मजो जलं सुवर्णाद्विभुजः पद्मपाणिर्गंधिस्तु चंदनं। पद्मं शैलेय

धूपोत्र नैवेद्यं घृतपायसं। हविर्मसूरपिष्टान्नं तदन्नेन बलिं हरेत्। विश्वभे चोत्थितो व्याधिः सार्द्धमासेन मुंचति। विश्वेदेवास इत्यस्य गायत्री। विश्वेदेवताः। कमंडल्वभयांभोजवरदस्त्वकुशगसनः। चंदनं कमलं पुष्पं धूपं सघृतगुग्गुलुः। नैवेद्यं पायसाज्यान्नं हविरप्येतदेव हि। समिद्भिर्निचुलैः सार्द्धं तदन्नेन बलिं हरेत्। श्रवणे चोत्थितो व्याधिर्दशरात्रेण मुंचति। अतो देवेति मंत्रस्य गायत्री। पद्मजो हरिः। पीतांबरः कृष्णवर्णः शंखचक्रगदांबुजः। चंदनं मालती पुष्पं धूपः कर्पूरगुग्गुलुः। शाल्यन्नं षड्रसोपेतं भक्ष्यभोज्यादिभिः सह। नैवेद्यं हविरप्येतत् पायसेन बलिं हरेत्॥ वसुभे चोत्थितो व्याधिर्दशरात्रेण मुंचति। त्रायं ता मिहमंत्रस्यानुष्टुप् व्यासो वसुस्ततः। चापबाणधरः शुक्लो गंधः कर्पूरचंदनं। वारिजं गुग्गुलु धूपो नैवेद्यं घृतपायसं। हविश्चौडुंबरसमिद्गुडखंडस्तथैव च। धनिष्ठास्त्थितो व्याधिर्दशरात्रेण मुंचति। अथ वा बकुभिर्मा

सेर्द्दिवसैर्वाविमुंचति।इमंमेवरुणेत्यस्यगायत्रीकण्वऋषिः।नागपाशधरःश्रीमान्नवरत्न
विभूषितः।मकरस्थोगुरुर्गंधःपुष्पंचकमलोत्पलं।कर्पूरचंदनंधूपोनैवेद्यंघृतपोलिका।हवि
रश्वत्थसमिधश्चैवजान्नेनबलिंहरेत्।अजपाद्भ्रमवेद्व्याधिःसर्वदानिधनप्रदः।अथवाबहु
भिर्मासैर्द्दिवसैर्वाविमुंचति।वामपादकरंभूम्यामाकाशेबद्धयं।प्रसादप्रांजलिःसाक्षादी
श्वरंचतपस्थितः।ग्रामण्योत्यस्याजपाक्षायत्री।चतुराननः।कुंकुमंचंदनंगंधपुष्पंश्चेता
र्कसंभवं।धूपःशतौषधीभिश्चनैवेद्यंदधिपायसं।हविःकूष्मांडखंडैस्याद्दध्यन्नेनब
लिंहरेत्।अहिर्बुध्न्योभवेद्व्याधिःसार्द्धमासेनमुंचति।नमस्तेरुद्रइत्यस्यसर्वेतत्रैवसंस्थि
ताः।गंधचंदनकर्पूरैःपुष्पंपद्मोत्पलंशुभ्रं।सबिल्वगुग्गुलुर्धूपोनैवेद्यंघृतपायसं।मुद्ग
माषतिलान्नाज्ययवव्रीहिसंभवंहविः॥

पूषा च देवतं भोजयेत् सर्वभोज्यधरः शुभः। रक्तचंदनगंधोत्र पुष्पं मंदारसंज्ञकं। धूपस्तु गुग्गुलुः साज्यं
नैवेद्यं घृतपायसं। हविस्तु देवसजलं दध्यन्नेन बलिं हरेत्। ततस्तेशनं तुस्ततो यस्मात् क्रोमनाथमहा
ज्वरारोगात् तस्मात् मांत्राहितं वै गृही बोत्तमं बलिं। प्रतिपत्कृत्स्थितो व्याधिर्द्वादशाहे न शुध्यति। अ
ग्निस्तु देवता तत्र कृसरान्नेबलिं हरेत्। द्वितीयायां भवेद्व्याधिः पंचरात्रेण मुंचति। ब्रह्मा तु देवता
तत्र पायसेन बलिं हरेत्। तृतीयायां भवेद्व्याधिः सप्तरात्रेण मुंचति। ~~[illegible]स्तु देवता तत्र [illegible]~~
~~[illegible] हरेत् चतुर्थ्यां भवेद्व्याधिर्दशदो[illegible] मासकैः। मुं[illegible] देवता[illegible] [illegible]नेन ब~~
~~लिं हरेत् [illegible]मायां भवेद्व्याधिस्त्रिरात्रेण विमुंचति। चंद्रस्तु देवता तत्र दध्योदन~~
~~बलिं हरेत्। सोमवारे भवेद्व्याधिः [illegible]श्चायमरण[illegible]यवा। कुजस्तु देवता तत्र रक्ता~~
~~न्नेन बलिं हरेत्। बुधवारे भवेद्व्याधिः सप्तरात्रेण मुंचति। बुधस्तु दे~~

कामस्तुदेवतातत्रघृतान्नेनबलिंहरेत्।चतुर्दश्यांभवेद्व्याधिर्मृत्युर्दोवाद्विमासकैः।मुंचंतिदे
वताःसर्वाःपिष्टान्नेनबलिंहरेत्।पूर्णिमायांभवेद्व्याधिर्मृत्युर्दोवात्रिमासकैः।तथा॥रविवारे
भवेद्व्याधिःसप्तरात्रेणमुंचति।सूर्यस्तुदेवतातत्रपायसेनबलिंहरेत्।सोमवारेभवेद्व्याधिस्त्रि
रात्रेणविमुंचति।चंद्रस्तुदेवतातत्रदध्योदनबलिंहरेत्।भौमवारेभवेद्व्याधिःक्लेशायमरणा राम
यवा।कुजस्तुदेवतातत्ररक्तान्नेनबलिंहरेत्॥बुधवारेभवेद्व्याधिःसप्तरात्रेणमुंचति।बुधस्तुदे ॥१५॥

वतातत्र मुद्गान्नेन बलिंहरेत॥ गुरुवारे भवे व्याधिः पंचरात्रेण मुंचति। गुरुस्तु देवतातत्र हरिद्रान्नं बलिंहरेत्॥ भृगुवारे भवे व्याधिः सप्तरात्रेण मुंचति। भृगुश्च देवतातत्र हरिद्रान्नं बलिंहरेत्॥ शनिवारे भवेद्व्याधिर्मासार्द्धेन विमुंचति। शनिस्तु देवतातत्र माषान्नेन बलिंहरेत्॥ पंचराश्यादिषु दुर्गान्बलिंदद्यात्तदीश्वरे। यो बलिंकुरुते सम्यग्रोगी रोगात्प्रमुच्यते। आधाननिधनप्रत्यक्जन्माह्वय विपत्करे। नक्षत्रे जनिते व्याधौ क्लेशाय मरणाय च। आश्लेषार्द्रात्रिपूर्वायमवरुणमरुच्छक्रतारानलाः स्युर्ह्दिश्यां स्कंदरिक्तातिथिषु चरविजाराक्कवारेषु येषां। रोगः संजायते तेयमपुरमचिरात्प्राप्नुवंत्येवचंद्रे जन्मन्यष्टाख्यौवंध्रुयय भवनगते मृत्युलग्नेचराशौ॥ ॥इतिकमलाकरभट्टकृतौ शांतिरत्ने ज्वरोत्पत्तिनक्षत्रादिशांतयः॥ ॥अथरविशांतिः॥ मदनरत्ने भविष्ये॥ अतःपरंप्रवक्ष्यामि रहस्यं ह्येतदुत्तमं। येन लक्ष्मीर्धृतिस्तुष्टिः पुष्टिः शांतिश्च जायते। आ

द्वित्यवारं हस्तेन एवं गृह्य विचक्षणः। मंत्रोक्तविधिना सर्वं कुर्यात्पूजादिकं रवेः। प्रत्यर्कं सप्त नक्तानि
कृत्वा भक्तिपरो नरः। ततस्तु सप्तमे प्राप्ते कुर्याद्ब्राह्मणभोजनं। भास्करं च ततः सौवर्णं कृत्वा यत्नेन मा
नवः। ताम्रपात्रे स्थापयित्वा रक्तैः पुष्पैः प्रपूजयेत्। रक्तवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितं। घृतेन
स्नापयित्वा च लड्डुकान्विनिवेद्य च। होमो घृततिलैः कार्यो रविनाम्ना च मंत्रवित्। समिधोष्टोत्तर
शतमष्टाविंशतिरेव वा। होतव्या मधुसर्पिभ्यां दध्ना चैव घृतेन च। दध्ना घृतेन चक्षिप्तो होमः।
सप्तमिधोर्कसमिधः। मंत्रेणानेन नैविद्यं ब्राह्मणाय प्रदापयेत्। आदिदेव नमस्तुभ्यं सप्तसप्ते दिवा
कर। त्वं रवे तारयस्वास्मानस्मात्संसारसागरात्। व्रतेनानेन राजेंद्र भवेदारोग्यमुत्तमं। द्रव्यसंपत्स
तताश्चिरिति पौराणिका विदुः। अपि संवादिनी चेयं शांतिः पुष्टिः सदानृणां। सूर्यपीडासु घोरासु राम
कृता शांतिः शुभप्रदा॥ इत्यादित्यशांतिः॥ ॥अथ चंद्रशांतिः॥ तत्रैव भविष्ये॥ तेद्वद्विजाश्च सुसंग

ह्यसोमवारं विचक्षणः। तद्वदस्तार्कवत्। अनेनैव क्रमविधिना कुर्यात्सूर्यादिकं विधेः। सप्तमे तु
ततः प्राप्ते कुर्याद्ब्राह्मणभोजनं। सप्तमे नक्ते। कांस्यपात्रेथ संप्रोक्षे स्थाप्य सोमं रजतसंभवं। श्वेतव
स्त्रयुगच्छन्नं श्वेतवस्त्रैः प्रपूजितं। पादुकोपानहौ छत्रं भाजनासनसंयुतं। होमं घृततिलैः कुर्यात्सोम
मंत्रं नाम्नाचैवितं। समिधोष्टोत्तरशतमष्टाविंशतिरेव वा। होतव्या मधुसर्पिभ्यां दध्ना चैव घृतेन च॥
दध्नाघृतेन च क्षिप्तो होमः। समिधः पालाश्यः। दध्यन्नशिखरे कृत्वा ब्राह्मणाय निवेदयेत्। मंत्रस्तु।
महादेहो अतिमल्लीपुष्पगोक्षीरपांडुर। सोमसौम्यो भवास्माकं सर्वदा ते नमो नमः। एवं कृते महा
सौम्यसोमस्तुष्टिकरो भवेत्। संतुष्टे त्रिसुते तस्मिन्सर्वे सानुग्रहा ग्रहाः॥ इति चंद्रशांतिः॥ ॥अ
थांगारकशांतिः॥ ॥स्वात्यामंगारकं गृह्य क्षमायां नक्तभोजनं। क्षमायां भूमौ। सप्तमे त्वथ संप्रा
प्ते हैमं ताम्रे निवेश्य च। रक्तवस्त्रयुगच्छन्नं कुंकुमेनानुलेपनं। निवेद्य सज्जया केसरपुष्पधूपाक्षतादि

भिः। होमं घृततिलैः कुर्यात्कुजनाम्ना च मंत्रवित्। समिधोष्टोत्तरशतमष्टाविंशतिरेव वा। होतव्या
मधुसर्पिर्भ्यां दध्ना चैव घृतेन च। समिधः खादिर्य्यः। मंत्रेणानेन तद्द्याद्ब्राह्मणाय कुटुंबिने। कुजकुज
भवोपि त्वं मंगलः परिपठ्यसे। अमंगलानि हत्याशु सर्वदा पय मंगलं। एवं कृते भौमकृतं दुष्कृतं शां
तिमाप्नुयात्। कर्त्तव्यं भौमपीडासु तस्मात्प्रयतमानसैः॥ इत्यारकशांतिः॥ ॥अथ बुधशांतिः॥ ॥
तत्रैव॥ विशाखासु बुधं गृह्य सप्तनक्षान्यथाचरेत्। गृहादारभ्य। बुधं हेममयं कृत्वा स्थापितं कांस्यभा
जने। शुक्लवस्त्रयुगं छत्रं शुक्लमाल्यानुलेपनं। गुडौदनोपसंहारं ब्राह्मणाय निवेदयेत्। बुधत्वं
बुद्धिजननो बोधवान्सर्वदा नृणां। तत्वावबोधं कुरु ते सोमपुत्र नमो नमः। होमं घृततिलैः कुर्या
बुधनाम्ना च मंत्रवित्। समिधोष्टोत्तरशतमष्टाविंशतिरेव वा। होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृते राम
न च। ताश्चापामार्गस्य। बुधशांतिरियं प्रोक्ता बुधवैकृतनाशिनी॥ ॥इति बुधशांतिः॥ ७॥ ॥ १४७॥

॥अथनवग्रहदानादि॥जातकाभरणेसारावल्यांच॥येखेचरागोचरतोष्टवर्गाद्दशाक्रमाद्वा
ह्यशुभाभवंति॥दानादिनातेसुतरांप्रसन्नास्तेषामधुनादानविधिंप्रवक्ष्ये॥माणिक्यगोधूमस
वत्सधेनुःकौसुंभवासोगुडहेमताम्रं॥आरक्तकंचंदनमंबुजंचवदंतिदानंहिविरोचनायोस
द्वंशपात्रस्थिततंडुलाश्चकर्पूरमुक्ताफलशुभ्रवस्त्रं॥युगोपयुक्तंवृषभंचरौप्यंचंद्रायदद्याद्घृत
पूर्णकुंभं॥प्रवालगोधूममसूरिकाश्चवृषोऽरुणश्चापिगुडःसुवर्णं॥आरक्तवस्त्रंकरवीरपुष्पं
ताम्रंचभौमायवदंतिदानं॥तैलंचनीलंकलधौतकांस्यंमुद्गाज्यगारुत्मतसर्वपुष्पं॥दासीचदं
तोद्विरदस्यनूनंवदंतिदानंविधुनंदनाय॥शर्कराचरजनीतुरंगमःपीतधान्यमपिपीतमंबरं॥
पुष्पराजलवणंसकांचनंप्रीतयेसुरगुरोःप्रदीयते॥चित्रांबरंशुभ्रतरस्तुरंगोधेनुश्चवज्रं
रजतंसुवर्णं॥सुतंडुलान्युत्तमगंधयुक्तान्वदंतिदानंभृगुनंदनाय॥माषाश्चतैलंविमलेंद्रनील

तिलाः कुलुत्था महिषी च लोहं कृष्णा च धेनुः प्रवदंति नूनं दुष्टाय दानं रविनंदनाय॥ गोमेदरत्नं
चतुरंगमश्च सुनीलचैलामलकं बलीजः॥ तिलाश्च तैलं खलु लोहमिश्रं स्वर्भानवे दानमिदं व
दंति॥ वैडूर्यरत्नं सतिलं च तैलं सुकंबलश्चापि मदो मृगस्य॥ शस्त्रं च केतोः परितोषहेतोः छाग
श्च दानं कथितं मुनींद्रैः॥ एषां दानमंत्रविधिश्च मत्कृतदानकमलाकरे ज्ञेयः॥ ॥इति ग्रहदाना
नि॥ अथ रत्नधारणं॥ ॥तत्रैव॥ माणिक्यं तरणेः सुजातममलं मुक्ताफलं शीतगोर्माहेयस्य
च विद्रुमं मरकतं सौम्यस्य गारुत्मतं॥ देवेज्यस्य च पुष्परागमसुरामात्यस्य वज्रं शनेर्नीलं निर्म
लमन्ययोश्च गदिते गोमेदवैडूर्यके॥ ॥७॥ अथ ग्रहस्नानानि॥ विष्णुधर्मोत्तरे॥ मंजिष्ठा मदमा
तंगं कुंकुमं रक्तचंदनं॥ पूर्ण कुंभकृतं ताम्रे रसर्पस्नानं विधीयते॥ ————— राम
मदः मातंगो गजमदः॥ उशीरं च [illegible] शिरीषं च कुंकुमं रक्तचंदनं॥ शंखं न्यस्तमिदं स्नानं॥ १४८॥

तिलामाषाप्रियंगुंचगंधपुष्पैतथैवच।न्यस्तंकालघसेकुंभेसोरिपीडाविनाशनं ४

नंचंद्रदोषविनाशनं।खदिरंदेवदारुंचतिलआप्यामलकानिच॥पूर्णकुंभेकृतेरौप्येभौमपीडावि
नाशनं।नदीसंगमतोयानितन्मृत्सद्हितानिच।न्यस्तानिकुंभेमाहेयेबुधपीडाविनाशनं॥
माहेयेमन्मये॥औदुंबरंतथाबिल्वंवटमामलकंतथा।न्यस्तंतुकुंभेसौवर्णेजीवपीडाविना
शनं।रौगोचनानामगदःशतपुष्पाशतावरी॥विन्यस्ताराजतेकुंभेशुक्रपीडाविनाशनं॥गुग्गु
लुहिंगुलतालंशुभांचैवमनःशिला।शृंगेचमाहिषेन्यस्तेक्राकुपीडाविनाशनं॥तालंहरितालं।
वराहविहतीराजन्पर्वताग्रमदंतथा।शजगक्षीरंखकूपात्रेकेतुपीडाविनाशनं॥ग्रहस्नानमि
दंप्रोक्तंसर्वपीडाविनाशनं॥ ॥इतिग्रहस्नानानि॥ ॥अथस्कांदेगुरुशांतिः॥मदनरत्नेस्कां
दे॥ ॥पिप्पलादउवाच॥गुरुपूजांप्रवक्ष्यामियथोक्तांब्रह्मणापुरा।लोकानामुपकारायसर्वो
पद्रवशांतये॥कन्याविवाहकालेतुशुद्धिर्यस्यानविद्यते।ब्राह्मणस्योपनयनेयस्यस्याद्दुःस्थि

तोगुरुः।एभिःपूजांकुर्योःकार्याविधिवद्भक्तिभावितैः।मदंती।कामपुष्पाणिपत्रंपालाशसर्षपाः।
मदंतीयूथिका।कामोमेदनः।गुरूचीवान्यपामार्गंविडंगंशंखिनी।वचा।सहदेवीविष्णुक्रांता
सर्वौषध्यःशतावरी।कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचंदनं।वचाकर्चूरमुस्तंचसर्वौषध्यःप्रकीर्ति
ताः।तथैवाश्वत्थखंगाश्चपंचगव्यंजलंतथा।नूतनंसोदकुंभंचपीतवस्त्रसमन्वितं।पंचरत्नैःसमा
युक्तंईशान्यांस्थापितेनलात्।याओषधीरितिमंत्रेणसर्वास्तस्मिन्विनिक्षिपेत्।कुंभस्योपरिभा
गेतुस्थापयित्वाबृहस्पतिं।सुवर्णपात्रेसौवर्णंप्रतिमांतुयुधिष्ठिर।कारयेत्तुयथाशक्त्याधि
नशाठ्यविवर्जितः।पीतवस्त्रयुगच्छन्नांपीतयज्ञोपवीतिनीं।पूजयेद्गंधपुष्पाद्यैस्ततोहोमंसमाचरेत्।
समिधोश्वत्थवृक्षस्यहोतव्याष्टोत्तरंशतं।तिलव्रीहियवोन्मिश्रंहोतव्यंचयथाक्रमं।बृहस्पतेति
मंत्रेणऋषिच्छंदःसमन्वितं।मंत्रेणानेनजुहुयाद्धान्यंपूर्वंचयत्नतः।ततोहोमावसानेतुपूजयेच्च

राम

बृहस्पतिं॥ पीतगंधैस्तथा पुष्पैर्धूपदीपैश्च भक्तितः॥ दध्योदनं च नैवेद्यं फलतांबूलसंयुतं॥ मंत्रे
णानेन कौंतेय समभ्यर्च्य पुनः पुनः॥ नमस्ते गिरसां नाथ वाक्पते थ बृहस्पते॥ क्रूरग्रहैः पीडिता
नाममृताय नमो नमः॥ पूजयित्वा सुराचार्यं पश्चादर्घ्यं निवेदयेत्॥ गंभीरदृढरूपांग देवेज्य सु
मते प्रभो नमस्ते वाक्पते शांत गृहाणार्घ्यं बृहस्पते॥ अर्घ्यमंत्रः॥ अर्घ्यं दत्वा सुरेशस्य जपहो
मं समर्पयेत्॥ भक्त्या यत्ते सुराचार्य होमपूजादिकं कृतं॥ तत्वं गृहाण शांत्यर्थं बृहस्पते नमो न
मः॥ मंत्रेणानेन संकल्प्य पश्चात्संप्रार्थयेन्नृप॥ जीवो बृहस्पतिः सूरिराचार्यो गुरुरंगिराः॥
वाचस्पतिर्देवमंत्री कुं(शु)भं कुर्यात्सदा मम॥ प्रार्थनामंत्रः॥ एवं संप्रार्थयेद्देवमाचार्यं च प्रपूजये
त्॥ सर्वोपचारसंयुक्तां प्रतिमां तां युधिष्ठिर॥ प्रणम्य च गवा युक्तामाचार्याय निवेदयेत्॥ अ
थाचार्यस्तु नियतो वेदवेदांगपारगः॥ यजमानं सपत्नीकं शर्गं तच्चित्तं जितेंद्रियं॥ कुंभोदकं गृही

त्वातु मंत्रैरेतैः प्रसिंचयेत्। इदमापो यमंत्रेण तामग्निमृच यातथा। या ओषधीरश्वावतीः कूभांडैश्चाभिषेचयेत्। पश्चात्संभोजयेद्विप्रान्यथाशक्त्या युधिष्ठिर। एवं कृत्वा गुरोः पूजां सर्वान्कामानवाप्नुयात्। संक्रांतावपि कौंतेय तथा स्वाभ्युदयेषु च। कुर्वन्बृहस्पतेः पूजामभीष्टफलमाप्नुयात्। संक्रांतौ गुरुसंक्रांतौ॥ इति गुरुपूजा॥ ॥अथ प्रतिशुक्रादिविधिः॥ ॥वसिष्ठः॥ शुक्रे चास्तंगते यात्रा चंद्रे वास्तमुपागते। तयोर्बाल्ये च वार्धे च सा यात्रा भयरोगदा। प्रतिशुक्रं प्रतिबुधं प्रतिसोमं च गर्हिता। तीर्थयात्राविधौ तेषां प्रतिशुक्रो न विद्यते। काश्यपेषु वसिष्ठेषु भृग्वांगिरसेषु च। भरद्वाजेषु वत्सेषु प्रतिशुक्रो न विद्यते। अन्येषां सन्मुखे दोषः प्रतिशुक्रस्य सर्वदा। कृत्वा शांतिं प्रयत्नेन पश्चात्सर्वं समाचरेत्। उपोष्य भृगुवारे च यावच्छुक्रोदयं व्रती। रजतेन च शुक्रेन कारयेत्प्रतिमां भृगोः। लिखिदष्टदलं पद्मं कांस्यपात्रे च तंडुलैः। शुक्लपुष्पाक्षतै

ंधैः प्रतिमां तत्र पूजयेत्। उपचारान्निवेद्याथ शुक्रं तेऽन्यदिच्छया। तन्मंत्रेण जपं कुर्यात्स
म्यगष्टोत्तरं शतं। क्षीरगंधाक्षतैः पुष्पैर्भक्त्या चार्घ्यं प्रदापयेत्। दैत्यमंत्री दिव्यदर्शी शोशनो भा
र्गवः कविः। श्वेतो ऽथ मंडली काव्यो विधिस्थो भृगवे नमः। दत्वेत्यर्घं प्रयत्नेन प्रार्थयेच्चैव भक्ति
तः। त्वत्पूजया ऽनया शुक्र सन्मुखं च समुद्भवं। दोषं विनाशयाक्षिप्रं रक्ष मां तेज सांनिधे। दैवज्ञाय त
तो दद्यात्प्रतिमां श्वेतगोयुतां। एवं कृते न दोषः स्यात् विजयी चार्थवान्भवेत्॥ ॥मात्स्येपि विशेष
उक्तः॥ अथातः शृणु भूपाल प्रतिशुक्रप्रशांतये। यात्रारंभेवसाने च तथा शुक्रोदये सति। शु
क्रपूजा प्रकर्त्तव्या तां निशामय भारत। राजते वाथ सौवर्णे कांस्यपात्रे थवा पुनः। शुक्लपुष्पांब
रयुते श्वेततंदुलपूजिते। निधाय राजतं शुक्रं शुचि मुक्ताफलान्वितं। महाश्वेतगवा युक्तं सामगा
य निवेदयेत्। सह तेन सवत्सां गां इति केचित्पाठः। नमस्ते सर्वलोकेश नमस्ते भृगुनंदन। कवेस

वर्थसिध्यर्थं गृहाणार्घ्यं नमोस्तु ते। दत्वैवमर्घ्यं कौंतेय प्रणिपत्य विसर्जयेत्॥ यावच्छुक्रस्य नक्ष
ताश्रासो हलकैः शुभैः। वटकैः पोळिकाभिश्च गोधूमैश्चणकैरपि। तावत्फलं कथं लभ्यं स्त्रीभिः का
मर्थसिद्धये। एवं शुक्रोदये कुर्वन्यात्रादिषु च भारत। अर्घ्याख्यानमेवैव अभीष्टं सततमाप्नुया
त्॥ तद्वद्वाचस्पतेः पूजां प्रवक्ष्यामि युधिष्ठिर। सौवर्णपात्रे सौवर्णममरेशपुरोहितं। पीतपुष्पां
बरधरं कृत्वा स्नात्वाथ सर्षपैः। पलाशाश्वत्थभंगेन पंचगव्यतिलेन तु। संगः पल्लवः। पीतां
गरागवसनो घृतहोमं तु कारयेत्॥ प्रणम्य च गवा सार्द्धं ब्राह्मणाय निवेदयेत्। नमस्तेंगिर
सानाथ वाक्पते ते बृहस्पते। क्रूरग्रहैः पीडितानाममृताय नमो नमः॥ अर्घ्यमंत्रः॥ संक्रांताव
पि कौंतेय यात्रावस्वभ्युदयेषु च। कुर्वन्बृहस्पतेः पूजां सर्वान्कामान्समश्नुते। संक्रांतौ गुरोः॥ राम
अथ वामेः क्षिकान्येव लुब्धत्वानि बृहंति च। भार्गवांगिरसौ चिंत्य तान्येव प्रतिपादयेत्॥ भक्त्या १५१॥

भोक्तिकदानेन दत्तेन कुरुनंदन। कुरूपता दशोः पुंसां न कदाचित्प्रजायते॥ ये भार्गवोद्यमवा वा
प्य सवस्त्रपुष्पं कुर्वंत्यनन्यमनसोंगिरसश्च पूजां। तेषां गृहे प्रवसतोप्रतिशुक्रजातो विघ्नो न
संभवति भारत पुण्यभाजां॥ ॥इति गुरुशुक्रपूजा॥ ॥अथ शनिशांतयः॥ मदनरत्ने भविष्ये।
ततो मंदस्य दिवसे स्नानमभ्यंगपूर्वकं। कार्यं देयं च विप्राय तैलमभ्यंगहेतवे॥ यस्तु संवत्सरं या
वत्प्राप्ते शनिदिने नरः। तैलं ददाति विप्रेभ्यः स्वशक्त्यान्यजनेपि वा॥ ततः संवत्सरस्यांते प्राप्ते
तस्य दिने पुनः। लोहघटार्पितं सोपि तैलं कुंभे विनिक्षिपेत्। लोहे वाप्यन्मये वाथ कृष्णवस्त्रयु
गान्वितं। कृष्णवस्त्रयुगच्छन्नं कृष्णकंबलशायिनं। स्वयमभ्यंगतः स्नात्वा कृष्णपुष्पैस्तमर्चयेत्।
सुगंधिगंधपुष्पैश्च कृसरान्नैस्तिलोदनैः। पूजयित्वा सूर्यपुत्रं क्षमस्वेति पुनः पुनः। कृष्णाय द्वि
जमुख्याय तदभावेतराय च। देयः श्रूयतेऽश्वरोपेत्तमामंत्रेण नेव वै द्विज। कूराव लोक नवश

द्रवनंनाप्नोतियोयहोरुष्टः।तुष्टोधनकनकसुखंददातिसोस्मान्शनैश्चरःपातु।यःपुनर्नष्ट
राज्यायनरायपरितोषितः।स्वप्नेददौनिजंराज्यंसमेसौरिःप्रसीदतु।कोणंनीलांजनप्रख्यंमंद
चेष्टाप्रसारिणं।छायामार्तंडसंभूतंनमस्यामिशनैश्चरं।नमोर्कपुत्रायशनैश्चरायनीहार
वर्णांजनमेचकाय।श्रुत्वारहस्यंभवकामदस्त्वंफलप्रदोमेभवसूर्यपुत्र।नमोस्तुप्रेतराजाय
कृशदेहायवैनमः।शनैश्चरायक्रूरायशुद्धबुद्धिप्रदायिने।यएभिर्नामभिःस्तौतितस्यतुष्टिंददा
त्यसौ।तदीयंतुभयंतस्यस्वप्नेपिनभविष्यति।इत्यनेनविधानेनशनिंदत्वाविसर्जयेत्।एवमे
तद्व्रतंनित्यंचरिष्यंतिचमानवाः।वासरेवासरेप्राप्तेवत्सरांतरेवदेवतु।तेषांशनैश्चरीपीडादेशे
पिनभविष्यति।कृत्वायसेनघटितंयमराजमूर्तिंलोहेनिधायघटकेतिलतैलपूर्णे।योब्राह्म राम
णायरविजंप्रददातिभक्त्यापीडांशनैश्चरकृतांनहिबाधतेयं।स्कांदे।।स्कंदरत्नं॰ द्वादशाष्टम ।।१५२।।

जन्मस्थे शनौ सर्वयिहेश्वरे। किं कर्तव्यं नरैः शांतिर्विधानं क्लेशशांतये॥ ईश्वर उ०॥ श्रावणे मासि संजाते शोभने शनिवासरे। लोहरूपं शनिं कृत्वा स्नाप्य पंचामृतेन वै॥ पुष्पैरष्टविधैर्धूपैः फलैश्चैव विशेषतः। नामभिः पूजयेद्देवं तैः क्रमेणायहमुत्तमं। कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोंतयमो
तकः। सौरिः शनैश्चरो मंदः पिप्पलादेन संस्तुतः। शनैर्देवीति सर्वत्र वैदिकेन च पूजयेत्। पू
जयित्वा च नैवेद्यं ततः कुर्यात्क्रमेण तु। समाषसक्तं प्रथमे द्वितीये पायसं शुभं। तृतीये लंबिली
कार्या चतुर्थे पूरिका शुभा। श्रं बिली तत्र तंडुलपिष्टकृता यवागूः। प्रथमादिशाद्वावासरपराः॥
॥ ॥ इति शनैश्वरशांतिः॥ ॥ अथ शनैश्वरस्तुतिः॥ स्कांदे नागरखंडे नारद उवाच॥ ॥
ग्रहाणां चो नरैः शश्वब्राह्मणाश्च विशेषतः। पूजिताः पूजयंत्येते निर्दहंत्यपमानिताः। तस्मात्कुरु
स्तुतिं चास्य सवरात्मया — भास्करेः प्रभोः। प्रसादं गच्छते येन॥ कौ पंत्यजति पातकं। ततः

कृतांजलिर्भूत्वास्तुतिंचक्रेसबालकः।पिप्पलादोद्विजश्रेष्ठःप्रणिपत्यमुहुर्मुहुः।नमस्ते
कोणसंस्थायपिप्पलायनमोस्तुते।नमस्तेबभ्रुरूपायकृष्णायचनमोस्तुते।नमस्तेरौद्रदे
हायनमस्तेचांतकायच।नमस्तेयमसंज्ञायनमस्तेसौरयेविभो।नमस्तेमंदसंज्ञायनैश्वर
नमोस्तुते।प्रसादंकुरुदेवेशदीनस्यप्रणतस्यच।शनैश्चरउवाच।परितुष्टोस्मितेवत्सस्तो
त्रेणानेनसांप्रतं।वरंवरयभोवत्सयेनयच्चामिवांछितं।पिप्पलादउवाच।अद्यप्रभृतिनोपी
डाबालानांरविनंदन।त्वयाकार्यामहाभागनस्त्वकीयाकथंचन।यावद्वर्षाणिकेजातेममवा
क्येनसूर्यज।स्तोत्रेणानेनयोन्यस्त्वांब्रूयात्प्रातरुपस्थितः।तस्यपीडानकर्त्तव्यात्वयाभा
स्करनंदन।तस्यपीडानकर्त्तव्यादेयोलोभोमहाप्रभो।अर्धपंचमिकयायोगेतावकेसंस्थि
तेनरः।सार्धसप्तवर्षाण्यष्टमिका।तवनारेतुसंप्राप्तेयस्मिलाभौनलोहसंभुतान्।श

मयादद्याति नो तस्य पीडा कार्या त्वया विभो। कृष्णां गां यस्तु विप्राय तवोद्देशेन यच्छति। अर्द्रा
घ्रमिकया पीडा तस्य कार्या त्वया न च॥ शमी समिद्भिर्यो होमं तवोद्देशेन निर्वपेत्। तथा कृष्ण
तिलैश्चैव कृष्णपुष्पानुलेपनैः॥ पूजां करोति यस्तुभ्यं धूपं वै गुग्गुलुं हरेत्। कृष्णवस्त्रेण सं
तया।४ वेष्ट्य सा ज्यातस्यैव्यथा। सूत उवाच। एवमुक्तः शनिस्तेन बाढमित्यवजल्प्य च। नारदस्य
नुज्ञाय जगाम निजसंश्रयं॥ ॥इति शनिशांतिः॥ ॥मदनरत्ने प्रभासखंडे॥ यः पुनः श्रद्ध
यायुक्तः शुचिः स्नातः समाहितः॥ शमीपत्रैः समभ्यर्च्य प्रतिमां लोहजां मम। माषोदनं तिलै
र्मिश्रं दद्याल्लोहं च दक्षिणां। कृष्णां गां वृषभं वापि यो मे दद्याद्द्विजाय वै। तस्य पीडां न चैवाहं करि
ष्यामि कदाचन॥ ॥अथ राहुशांतिः॥ ज्योतिषे। जन्मांत्यपंचचतुरष्टनवाद्दिसस्थ राहुर्ग्रहो य
दिचारवशेन गच्छेत्। आलोडनं नृपभयं भ्रमणमर्थनाशं रोगप्रवासमरणाग्निभयं करोति॥

॥अथग्रहणशांतिः॥ ॥मात्स्ये॥होराथीयस्यतेयस्यनक्षत्रेवानिशाकरः॥ग्राणसदेहमा
प्नोतिसवामरणमृच्छति॥यस्यत्रिजन्मनक्षत्रेग्रस्येतेशशिभार्गवौ॥तज्जातानांभवेत्पीडा
येजनाःशांतिवर्जिताः॥यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः॥तस्यस्नानंप्रवक्ष्यामिमंत्रौ
षधिसमन्वितं॥चंद्रोपरागंसंप्राप्यकृत्वाब्राह्मणवाचनं॥संपूज्यचतुरोविप्रान्शुक्लमाल्या
नुलेपनैः॥पूर्वमेवोपरागस्यसमानीयौषधादिकं॥स्थापयेच्चतुरःकुंभानयतःसागरानि
तु॥गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत्॥
पंचगव्यंपंचरत्नंपंचत्वक्पंचपल्लवं॥रोचनंपद्मकंशंखंकुंकुमंरक्तचंदनं॥शुद्धस्फटिकसं
तीर्थंबुसितसर्षपगुग्गुलं॥मधुकंदेवदारुंचविष्णुक्रांतांशतावरीं॥बलांचसहदेवींचनिशा राम
द्वितयमेवच॥एतत्सर्वंविनिःक्षिप्यकुंभेष्वावाहयेत्सुरान्॥सर्वेसमुद्राःसरितस्तीर्थानिजलदा ॥१५४॥

नदः।आयांतुयजमानस्यदुरितक्षयकारकाः।गंगेचयमुनेचेति।योसोवज्रधरोदेवआ
दित्यानांप्रभुर्मतः।सहस्त्रनयनश्चंद्रोग्रहपीडांव्यपोहतु।मुखंयःसर्वदेवानांसप्तार्चिरमि
तद्युतिः।चंद्रोपरागसंभूतांअग्निःपीडां।यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः।यमश्चं
द्रोपरागोत्थांग्रह०।रक्षोगणाधिपःसाक्षान्नीलांजनसमप्रभः।खड्गहस्तोतिभीमश्चग्रह०।
नागपाशधरोदेवःसदामकरवाहनः।चंद्रोपरागकलुषंवरुणोमेव्यपोहतु।प्राणरूपोहिलो
कानांसदाकृष्णमृगप्रियः।वायुश्चंद्रोपरागोत्थांग्रह०।योसौनिधिपतिर्देवःखड्गशूलगदा
धरः।चंद्रोपरागदुरितंधनदोमेव्यपोहतु।योसाविंदुधरोदेवःपिनाकीवृषवाहनः।चंद्रोप
रागपापानिनिवारयतुशंकरः।त्रैलोक्येयानिभूतानिस्थावराणिचराणिच।ब्रह्मविष्ण्वर्क
रुद्राश्चदहंतुममपातकं।एवमावाहयेत्कुंभान्मंत्रैरेभिश्चवारुणैः।एतानेवतथामंत्रान्स्व

र्णपट्टे विलेखयेत्॥ ताम्रपट्टे पथा लेख्य नववस्त्रे तथैव च॥ मस्तके यजमानस्य निदध्युस्ते द्वि
जोत्तमाः॥ कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान्॥ गृहीत्वा स्थापयेदूर्ध्वं भद्रपीठोपरिस्थि
तं॥ पूर्वोक्तैरेव मंत्रैश्च यजमानं द्विजोत्तमाः॥ अभिषेकं ततः कुर्यान्मंत्रैर्वारुणसूक्तकैः॥ ततः
शुक्लांबरधरः शुक्लमाल्यानुलेपनः॥ आचार्यं वरयेत्सभ्यां स्वर्णपट्टं निवेदयेत्॥ आचार्यद
क्षिणां दद्याद्गोदानं च स्वशक्तितः॥ होमं चैव प्रकुर्वीत तिलैर्व्याहृतिस्तथा॥ निवृत्ते ग्रहणे सर्वे
ब्राह्मणेभ्यो विशेषतः॥ दानं च शक्तितो दद्याद्यदीच्छेदात्मनो हितं॥ सूर्यग्रहे सूर्यनामयुक्तान्
मंत्रांश्च कीर्त्तयेत्॥ अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत्॥ न तस्य ग्रहणे दोषः कदाचि
दपि जायते॥ ॥ इति मात्स्योक्तग्रहणशांतिः॥ ॥ मदनरत्ने ग्रंथांतरे॥ दूर्वांकुरोशीरश राम
मीशिलाजित्सर्षपयुर्यैर्बिधिपंचमृद्भिः॥ स्नानं विदध्याद्ग्रहणे रवींदोः पीडाहरं शांतिवहं ॥१५५॥

हितस्य। ज्योतिषे। त्रिषड्दशायोपगतं नराणां शुभप्रदं स्यात् ग्रहणं रवींदोः। द्विसप्तनंदेषु तु

मध्यमं स्यात् छेषेषु निष्टं कथितं मुनींद्रैः। आय एकादश। नंदाः नव इषवः पंच। मदनरत्ने गर्गः।

जन्मसप्ताष्टरिष्फांकदशमस्थे निशाकरे। दृष्टोरिष्टप्रदो राहुर्जन्मर्क्षे निधनेपि च। रिःफं द्वादशी।

अंकाः नव। निधनं सप्तमतारा। पृथ्वीचंद्रोदये विष्णुधर्मे। यन्नक्षत्रगतो राहुर्ग्रसते शशिभा

स्करो। तज्जातानां भवेत्पीडा ये नराः शांतिवर्जिताः॥ तत्रैव पुराणांतरे। सूर्यस्य संक्रमो वापि

ग्रहणं चंद्रसूर्ययोः। यस्य जन्मत्रिनक्षत्रे तस्य रोगोथवा मृतिः। तस्य दानं च होमं च देवार्चनज

पो तथा। उपरागाभिषेकं च कुर्याच्छांतिर्भविष्यति। स्वर्णेन वाथ पिष्टेन कृत्वा सर्पस्य चाकृतिं।

ब्राह्मणाय ददेत्तस्य न रोगादिस्तु तत्कृतः। जन्म दशमैकोनविंशतिः ताराः त्रिजन्मानि।

सर्पस्य तदाकारस्य राहोः॥ अद्भुतसारे भार्गवः। यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते॥

राज्यसंगंसुहृन्नाशंमरणंचात्रनिर्दिशेत्॥ राज्यस्याभिषेकनक्षत्रेइत्यर्थः॥ भार्गवार्चनदीपिका
यांज्योतिःसारे॥ सौवर्णंकारयेन्नागंपलेनाथपलार्धतः॥ तदर्धेनतदर्धेनफल्गुणायांमौक्तिकंन्य
सेत्॥ ताम्रपात्रेनिधायाथघृतपूर्णेविशेषतः॥ कांस्येवाकांतिलोहेवान्यस्यदद्यात्सदक्षिणं॥ चंद्र
ग्रहेतुरूप्यस्यबिंबंदद्यात्सदक्षिणं॥ नागंरुक्ममयंसूर्यग्रहेबिंबंचहेमजं॥ तुरंगरथगोभूमि
तिलसर्पिश्चकांचनं॥ कालविवेके॥ सुवर्णनिर्मितंनागंसतिलंकांस्यभाजनं॥ सदक्षिणंसव
स्त्रंचब्राह्मणायनिवेदयेत्॥ सौवर्णंराजतंवापिबिंबंकृत्वास्वशक्तितः॥ उपरागभवक्लेशाच्छि

कल्प २ देविप्रायदापयेत्॥ मंत्रस्तु॥ तमोमयमहाभीमसोमसूर्यविमर्दन॥ हेमताराप्रदानेनमम
शांतिप्रदोभव॥ विधुंतुदनमस्तुभ्यंसिंहिकानंदनाच्युत॥ दानेनानेननागस्यरक्षमांवेधजा राम
द्भयादिति॥ विशेषस्तुमत्कृतेनिर्णयसिंधौज्ञेयः॥ अपर्वणिग्रहणेत्वद्भुतसारेमयूरचित्रे॥ १५८॥

अपर्वणि शशांकार्कौ त्विष्टो नाम महाग्रहः॥ आवृणोति नभःश्यामः सर्वलोकविपत्तये। औ
दुंबरीसहस्राणि चाष्टौ च जुहुयाद्बुधः। मधुक्तानि च तान्यत्रं जातवेदस इत्यृचा। विप्राय दक्षिणां दद्या
द्धेनुं च वृषभं तथा॥ ॥इति राहुशांतिः॥ अथ केतुशांतिः॥ ॥तत्फलमाह ज्योतिर्वसिष्ठः। दिव्या
न्तरिक्षभौमास्तु समास्त्रिविधाश्च केतवो जगति। एकोत्तरशतभेदा दृश्यंते वा सहस्रसंख्यास्ते। वर्षै
र्मासैः पक्षैः क्रमशः परिपाकमुपयांति। स्निग्धः प्रसन्नरूपः शुक्लनिभो ह्रस्वदंडवत्सौम्यः। उद
यास्तसमये त्वेवं सुभिक्षसौख्यावहः केतुः। धूमनिभो धूमाख्यः केतुर्दोषप्रदो भवति। इंद्रशरा
सनरूपः स्थूलनिभो वर्षभीतिदः सम्यक्। वक्रोऽस्तिः शिखाभिरतुला। विद्रुममणिहारहेमनि
भाः। अपरेंद्रे दृग्गोर्दृश्यामहाहवं तद्दिगीरगानां। शुकमुखबंधूकनिभाः वह्निसुताक्षतजसन्निभा
रूक्षाः। दृश्यंते पश्चिमनलदिशि तावंतस्तेऽपि शिखिविषमप्रदाः। मत्स्यसुतावक्रशिखाः रूक्षा रूक्षाः प्र

हरणकाराः। दृश्यंते याम्यायां जनमरकभयप्रदास्तेपि। क्षितितनया द्वात्रिंशद्दर्पणसदृशाः
सरश्मयो विशिखाः। क्षुद्भयदाः सशिरस्का यमतनया मृत्युदाश्च रौलनिभाः। शशितनयाः कुसु
मनिभाः कुंदेंदुक्षीररजतनिभाः। उत्तरभागे शिखिनोऽर्धं हृन्नां ते सुभिक्षकराः। त्रिशिखस्त्रिवर्ण
युक्तो ब्रह्मसुतो ब्रह्मदंडनिभः। अनियतदिक्प्रभवो सौ शं तिकरो ब्रह्मदंडाख्यः। शनितनयाता
रास्ता शुक्लाः कजवश्च षट्संख्याः। दृश्यंते द्विजनैः शुभदा मासेश्च रुग्भयदाः। जीवसुता विक
चाख्याः शुक्लास्ताराश्च स्निग्धाः। याम्यायां दिशि संस्थाः बहवस्ते पापदाः सततं। बुधतनयाश्चो
राख्याः शुक्लाः सूक्ष्माश्च यथेष्टदिक्प्रभवाः। आमयभयदाः सततं जातन्नीपं चपंचाशत्। कुजत
नयाः कैकेयाः क्षतजानलसन्निभास्त्रिभ्रूलधराः। याम्यायां दिशि संस्थाः क्षेमघ्नयदाः षष्ठिसंख्या राम
काः। तामसकीलसंज्ञा राहुसुताः सूर्यमंडले दृष्टाः। अग्निसुतास्त्वाग्नेय्यां विंशत्यधिकाश्च शत १२०॥

संख्याकाःप्रलयानलसदृशाभानुविवहिर्भसयप्रदास्तेपि। अरुणाख्याःश्यामनिभाःशुक्र
सुताविविधरूपसंकीर्णाः। शस्त्रक्षुद्भयदास्तेसप्तोत्तरसप्ततिश्चसंख्याताः। दंडकसंज्ञाश्चाष्टो
तारासदृशाःप्रजापतेस्तनयाः। द्विचत्वारिंशोत्तरशतशतादिकाःपापदाविधातृसुताः। वरुणभ
वाःकंकाख्याःद्वात्रिंशद्वंशगुल्मयष्टिनिभाः। शशिवत्प्रभासमेताराज्ञान्यत्वंप्रकुर्वंति। कालभवाः
षण्णवतिसंख्यास्तेषांकबंधनिभाः। तन्नामानःशिखिनःपौंड्रामयप्रीतिप्रजगतःविमलास्ता
राकारादशदिक्षुसमुद्भवाःशिखिनः। एवंसहस्रभेभदायायाश्चैषांविशेषमभिधास्ये। पश्चि
मदिशिसंभूतश्चोत्तरनम्रश्चसौम्यकेतुस्सः। कुरुतेसुभिक्षमतुलंसितवर्णोसौमहास्निग्धः।
दक्षिणनम्रःप्राच्यांतथाविधेयाम्यकेतुस्सः। रूक्षःक्षुद्भयकारीमरकभयंवाकरोत्येव। धूमनि
१५। भोयाम्यायांकौल्मकेतुर्दरुत्तनुःस्निग्धः। दिक्षुविदिक्षुप्रभवःक्षेमनरकाःवृष्टिरोगकरः। प्राच्यां

दिशिसंभूतः प्रदक्षिणीभ्रमतिचक्रवद्रूक्षः। सचचक्रकेतुरनिशंकपालकेतोश्च तुल्यफलः। पश्चिमतः
संभूतो याम्यांदिशिभ्रमति चाप्रदक्षिण्येः धूमनिभोविषभाख्यः केतुर्भूभारमपनयति। कतिपय
दिवसंगतागमननिवृत्तिकरोधूम्रनिभः। नरपतिकलहाज्जगतः करोतिविलयंसवक्राख्यः। ग
गनत्रिभागदीर्घश्यामनिभोसौ महाभयकरः। ऋजुवक्रगतिंकुरुतेक्रमशोजगतस्त्रिभागह
रः। गतिरहितोध्रुवकेतुः प्रमाणवर्णाकृतिर्नभवेत्। ग्रहनक्षत्रोपगमेदृष्टोनैवाशुभप्रदः के
तुः। उपकरणेषुचराज्ञांस्फरगृहतरुपर्वतेषुसदनेषु। दर्शनमुपैतिपतितोविनाशिनामेवनि
यमेन। कुमुदनिभः कुमुदाख्योदिवसेः षड्भिस्तुपश्चिमेदृष्टः। प्रागुत्तरदिशियदिवासुभिक्ष
मतुलंकरोत्येव। तारोपरिमणिकेतुर्याम्यायांदिशिसकृद्दृष्टः। उदयास्तमयसमयेशुभदोसौ
क्षीरधारेव। जलकेतुर्जलसदृशः सुभिक्षकरः सर्वजंतूनां। हरिलांगूलनिभोभवकेतुःक्रक

राम
॥१५८॥

चसन्निभोवापि।बहुरोगभयंकुरुतेसर्पाकारस्तुतद्वयः।अपरोपिपभकेतुःपद्मनिभःपद्मग
र्भसंकाशः।क्षेमकरोन्टपतीनांसुभिक्षदःसर्वजंतूनां।आवर्त्तकेतुरयंप्रादक्षिण्येनदीप्तिमान्शु
क्लः।शुभदोव्यत्ययकेतुस्तुतुलामयभीतिरीतिकरः।आक्रम्यगगनमखिलंसंवर्त्ताख्यःसधूम
निभः।शूलाग्रस्त्वितरोवासकेतुरसकृद्भयदोजगतः।शुभदाःशुक्लनिभायेहृस्वास्त्वशुभप्रदा
जगतः।केतूनांफलमुक्त्वावक्ष्येयद्दस्रभेषुजातानां।अश्विन्यांयदिकेतुर्जातस्तद्दश्वजीविनंहन्या
त्।याम्येम्लेछाधिपतिंकालिंगंकृत्तिकायांच।रोहिण्यांशूरसेनंउशीनरंसौम्यभेपितथा।रौ
द्रेजलजानिवमादित्येचाश्मकाधीशं।मागधपतिंपुष्येप्यासिकंसार्प्पेपीड्याधिपतिंचपित्र्धिष्ण्ये।
भाग्यर्क्षेतृङ्भयिनींचोत्तरभेदंडनायकांस्त्वखिलान्।हस्तर्क्षेधनिकवरांश्चित्रायांकुरुभवांस्त्व
खिलान्।कांबोजन्टपतिमुख्यान्प्रभंजनेजातकेतुरपि।इक्ष्वाकुवंशनाशंद्वैदैवभेमित्रभेचरवश

गौडेशं ज्येष्ठायां यदि जातः स हन्यते सर्वमंडलाधीशं। मूलेभ आधिपतिं नलदेचकलिंगदेशपतिं।
गूर्जरदेशायेपि सुसान्हन्यात् हैश्वदेवधिष्ण्ये। त्यः कैकयनाथं हन्यात् श्रवणर्क्षे श्रवणर्क्षे वसुभवो
खिलान्ध्रविडान्। नैमिषपतिं हन्यात् शतभिषस्त्वजांघ्रिश्च पांचालान्। अहिर्बुध्न्यर्क्षभवः संकरिकान्
किरातकोणभवान्। पौष्णर्क्षभवः केतुर्द्विजसज्जनधर्ममार्गहापि स्यात्। अभिजिन्नक्षत्रभवः कौं
कणदेशं च निशिचरांश्च। पि। ये केतवश्चाश्विमुखर्क्षजातास्तांयिहाग्दिष्टापि संभवाश्च। कुर्वंति ते ती
क्ष्णफलं जनानां अन्ये तु सामान्यफलप्रदाः स्युः। आदिशब्दात्क्रवसप्तर्षादिषु। अन्येपि बलकेतु
गदाकेत्वादयोद्भुतसारे उक्ताः॥ प्रश्नवैष्णवे॥ भूकंपनिर्घातरजोनिपाता दासप्तरात्राद्ग्रहणाद्र
वींद्वोः। उल्कानिपाताः परिवेषचापाः स्युर्यत्र तद्देशनृपस्य नाशः। यस्यां शिखास्याद्दिशि धूमके
तोः प्रयाति यस्यामुदितोथ केतुः। रोद्रः स्पृशेद्वानिचयानि यानि तेषां स देशान्नृपतीन्निहन्यात्॥१५९॥

ज्येष्ठास्थितोर्के रणकुजेनयुक्तोराहुःशनिर्वायुदितश्चकेतुः। यदातदानीं भुविसार्वभौमोरोगा

६। द्रुगणांबालमलेभ्रगाशौ। अत्रप्रागुक्तःकोटिहोमोलक्ष[illegible]गोवाकार्यः॥ ॥इतिकेतुशांतिः॥ ॥

अथोल्कादि॥ नारदः॥ स्वर्गच्युतानांरूपाणियान्युल्कास्तानिवैभुवि। धिष्ण्योल्काविद्युदशनि

ताराःपंचविधाःस्मृताः। कपिंगाधाधूमनिभाविविधाःपापदानृणां। उदयास्तमयेंद्वोःपति

तोल्काशुभप्रदाः। सितरक्तापीतसितासोल्काहंतिद्विजातिनः। राजराष्ट्रविनाशायप्रासाद

प्रतिमासुच। गृहेषुस्वामिनांपीडानृपाणांपर्वतेषुचा। दिक्षुतत्तद्दिगीशानांकृष्टुकाणांखले

षुच। गोष्ठेगोस्वामिनांपीडाशिल्पकानांजलेषुच। वर्तुलोल्कापुरंहंतिछत्राकारापुरोहितं।

वंशगुल्मलताकाराराष्ट्रविद्राविणीतथा। अत्रप्रागुक्तागोर्किातारविकारश्शांतिःकार्या।

॥ ॥अथप्रतिसूर्यः॥ मयूरचित्रे। उदीयमानःसूर्योवैदृश्यतेप्रतिरूपकः। त्रीण्यपद्दानिभवे

नाशोमासार्द्धेननसंशयः॥ ॥अथपरिवेषः॥नारदः॥किरणावायुनिहताउद्भूतामंडली
कृताः।नानावर्णाकृतिस्ततःपरिवेषाःशशीनयोः।मुहुर्मुहुःचलीयंतेनतेपूर्णफलप्रदाः।अ
नेकवर्त्तवर्णश्चयपरिवेषोन्यपांतकृत्।द्विमंडलश्चक्षेनाथेनपघ्नोथत्रिमंडलं।द्वौग्रहौपरि
वेषस्थौक्षितीशकलहप्रदौ।कुर्वंतिकलहानर्थैपरिवेषगतास्त्रयः।चत्वारःपरिवेषस्थान
पस्यमरणप्रदाः।परिवेषगताःपंचजगत्प्रलयप्रदाग्रहाः।नृपहानिःकुजादीनांपरिवेषेपृथ
क्पृथक्।प्रारब्धस्तौचशारिहपरिवेषोजलप्रदः॥अन्यत्रापि॥राकिंशशिपरिवेषेपूर्वयामे
चपीडारविशशिपरिवेषेमध्यमेचातिवृष्टिः।रविशशिपरिवेषेधान्यनाशस्तृतीयेरवि
शशिपरिवेषेराज्यनाशश्चतुर्थे॥ ॥अथग्रह[illegible]॥[illegible]सारेगर्गः॥छादनंरोधनंचैवर राम
श्मिरोधंतथैवच।अपसव्यंग्रहाणांचचतुर्धायुद्धमुच्यते।एतन्मेंदुसूर्ययोः।किंचतत्त्वन्येषां॥१६०॥

ताराग्रहाणांपंचानांग्रहान्युक्तानियोगतस्मद्गुत्युक्तैः॥ तथाग्रहोग्रहंसमागम्यश्यामीभव
तियोभस्मी।हानिंप्राप्नोतिचव्यक्तंस्यंदतेचमुकुर्मुकुः॥ ॥अथेंद्रधनुः॥ नारदः। नानावर्णशिवो
भानोरिंद्रचापंतदुच्यते।अथवाशेषनागेवाँदीर्घनिःश्वाससंभवं।विदिक्षूर्ध्वंदिक्षूर्ध्वंचा।त
द्भिन्नृपविनाशनं।अवृष्टोवाष्टिदंत्वैंद्र्यांदिशिवृष्टामपष्टिदं।अथवनीगाढमच्छिन्नंप्रतिकूलं
धनुर्हयं।नपीतकृत्तच्छिभवेदानुकूल्येतुतच्छुभं।अत्ररगांत्यनुक्तोगर्गोक्ताशांतिर्वक्ष्यते॥
॥ ॥अथषड्ग्रहादियोगेशांतिः॥ ॥मदनरत्नेब्रह्मयामले॥अथातःसंप्रवक्ष्यामिग्रहयो
गाख्यशांतिकं।अमावास्यादितिथिषुग्रहयोगोभवेद्यदि।एकर्क्षेतिग्मराशौवाएकराश्य
क्षभेदने।शशिसूर्यसमायुक्तेग्रहत्रयसमन्विते।महारोगभयंराष्ट्रक्षयोवृष्टिविनाश
नं।पंचग्रहसमायोगेदुर्भिक्षमरकादिकं।नृपवैरंगर्भनाशोजायतेजननाशनं।ग्रह

षड्ग्रहसमायोगे मंत्रिणो मरणं भवेत्। पश्चिमादिप्रयं सर्वं संकरादिजनक्षयः। पट्टराज्ञो विनाशो वा महाभयमथापि वा। सप्तग्रहसमायोगे क्षितीशमरणं ध्रुवं। जगत्प्रलयमेवापि तदानिमं नित्रुषं जगत्। अतऊर्ध्वं महोत्पातो नानादुःखमनाकुलं। सूर्यस्तद्व्यतिरिक्तश्चेत्तदा योगो महाद्भुतः। विना चंद्रेण योगोपि जगत्प्रलयकारणं। तद्दक्षजालजैत्र नाम हारोगो महासयं। अर्थनाशस्थाननाशो मानहानिर्नृपीडनं। वातपित्तादिसंभूतमहापीडामरुद्भयं। समायोगे ग्रहाणां दोषान्कुर्वंति सर्वदा। षण्मासाभ्यंतरे वापि आयुर्हानिः श्रियस्तथा। जन्माष्टद्वादशेराशौ चतुर्थे पंचमेपि वा। पूर्वोक्तफलमेवात्र तस्माच्छांतिं प्रयत्नतः। कुर्याद्दोषानुसारेण वित्तशाठ्यं न कारयेत्। तत्तद्ग्रहाकृतिं कृत्वा सौवर्णेन प्रयत्नतः। सुवर्णस्य तदर्द्धेन पादेनापि राम कनीयसा। वित्तशाठ्यं न कर्त्तव्यं कर्त्तव्यं शक्तितो नरैः। पूर्वोक्तलक्षणेनैव ग्रहमूर्तिं च कारयेत्॥ १६३॥

ग्रहस्यैकैककलशाग्रहयोगप्रमाणतः। कारयेत्कुंभमेकंवानिर्व्रणंसुदृढंनवं। ग्रहस्येशानदि
ग्भागेशुद्धदेशेशुभस्थले। कुंडेवास्थंडिलेवापिहोमंकुर्याद्विधानतः। तस्यपूर्वोत्तरेदेशेपूजास्था
नंप्रकल्पयेत्। चतुरस्रंहस्तमात्रंस्थंडिलंतंडुलेनतु। लिखेद्ग्रहाकृतिंतत्रस्थापयेत्प्रतिमांततः।
अधिप्रत्यधिदेवादीन्दक्षिणोत्तरतःक्षिपेत्। उक्तगंधैस्तथापुष्पैस्तत्तन्माल्यैःफलैरपि। तत्त
द्ग्रहोक्तमंत्रेणपूर्वोक्तेनैवपूजयेत्। स्वस्तिवाचनपूर्वंतुआचार्यर्त्विग्द्विजैःसह। ग्रहपूजादिकं
कृत्वानैवेद्यांतंसमर्पयेत्। ततोहोमंप्रकुर्वीतस्वगृह्योक्तविधानतः। वक्ष्यमाणंप्रकुर्वीतकलश
स्थापनंततः। पूर्वोक्तेनविधानेनशुद्धतोयेनपूरयेत्। पंचामृतंपंचगव्यंपंचत्वक्पंचपल्लवं।
तत्तन्मंत्रैर्विनिक्षिप्यओषधानिविनिक्षिपेत्। तत्तद्ग्रहोक्तविधिनामूलान्यादाययनिक्षिपेत्। अ
श्लिंगैर्वारुणैर्वापिकलशंपूरयेद्गुरुः। तत्तद्ग्रहोक्तैर्विविधैस्तत्तन्मंत्रैर्जनेदथ। चर्वाज्यैर्जुयात्प

जु०

श्चान्तिलाकृतिमथाचरेत्।अथस्विष्टकृतंकृत्वाहोमशेषंसमापयेत्।भद्रासनोपविष्टस्ययज
मानस्यऋत्विजैः।कलशस्थोदकेनैवअभिषेकंसमाचरेत्।योगग्रहोक्तमंत्रैश्च अधिप्रत्यधि
मंत्रतः।नवग्रहोक्तमंत्रैश्चजातवेदादिपंचकैः।त्र्यंबकेनमंत्रेणक्षेत्रस्यपतिना।अपि।यत
इंद्रहयेनैवलोकपालैश्चकैरपि।सुरास्त्वाइतिमंत्रेणयेनदेवादयःक्रमात्।अन्यैश्चपुण्य
सूक्तैश्च अभिषेकंसमाचरेत्।अभिषेकाच्छृतंवस्त्रमाचार्यायनिवेदयेत्।ततःशुक्लांब
रधरःकुर्यादाज्यावलोकनं।ऋत्विग्भ्योदक्षिणांदद्यात्धेनुंशंखादिकानपि।तदभावेयथाशक्ति
हिरण्यमपिदापयेत्।ब्राह्मणान्भोजयेत्पश्चाद्यथाविभवसारतः।एवंयःकुरुतेसत्यायग्रहदो
षविवर्जितः।पूर्वोक्तसर्वदोषैश्चविमुक्तःसुर्वेत्रवान्सुखी।आयुरैश्वर्यसंपन्नोजीवेद्वर्षशतंनरः। राम
इहलोकेसुखीभूत्वापश्चाच्छिवपुरंव्रजेत्॥ ॥इतिकमलाकरभट्टकृतेशां॰षड्ग्रहयोगशांतिः॥ ॥१६२॥

॥अथ भूमिकंपः॥ ॥नारदः॥ यामक्रमेण भूकंपो द्विजातीनामनिषूदः। राज्ञो विप्रक्षितीशानां
शूद्राणां संध्ययोरपि। अर्यमाख्यानि चत्वारि दस्रेंद्रादितिभानि च। वायव्यं मंडलं त्वेतदस्मिन्कंपो
भवेद्यदि। नृपदृष्टसर्पनाशाय हंति स्त्रावकसंकरान्। अभिजिद्धातृवैश्वेंद्रवसुवैष्णवमित्रभं। वा
सवं मंडलं त्वेतदस्मिन्कंपो भवेद्यदि। राजनाशाय रोगाय हंति माज्जीरकुकुरान्(?)। मूलाहिर्बुध्न्यव
रुणपौष्णाश्वार्द्राहिभानि तु। वारुणं मंडलं त्वेतदस्मिन्कंपो भवेद्यदि। नाशाय रोजकरो(?) हंति पौंड्रचि
त्रपुलिंदकान्। प्रायेण निखिलोत्पाताः क्षितीशानामनिष्टदाः। षड्भिर्मासैश्च भूकंपो ह्याभ्यां दा
हः फलप्रदः। अनुक्ताः पंचभिर्मासैस्तत्तानीं फलदं रजः। निर्घातं तु॥ मामकः श्लोकः। केचिद्दिक्
रिकुंभचालनभवं वा भाभिघातोद्भवं केचिन्नीरधिवीचिदोलनभवं तन्नीनजातं परे। भूकंपं
ब्रुवते वयं हरिगुणश्रेणीसमाकर्णनप्रोद्यद्धर्षफणींद्रकंपितशिरःश्रेणीभवं ब्रूमहे॥ मूलं

तुवाराध्यांतिये॥ तत्रैव। प्रथितनरेश्वरमरणव्यसनान्याग्नेयवायुमंडलयोः। क्षुद्भयमरक।
वृष्टिभिरुपतप्यंतेजनाश्चैव। वारुणपौरंदरयोः सुभिक्षशिववृष्टिहार्दयो लोके। गावोतिभ
रिपयसोनिर्वृत्तवैराश्च भूपालाः। पक्षैश्चतुर्भिरनिलस्त्रिभिरग्निर्दिवराट्च सप्ताहात्। सद्यः फ
लति च वरुणो येषुन कालोद्भुतेषूक्तः। त्रिचतुर्थे सप्तदिने मासे पक्षे तथा त्रिपक्षे च। यदि भवति
भूमिकंपः प्रधाननृपनाशनो भवति॥ अत्रपूर्वोक्तो लक्षहोमः कोटिहोमो वा कार्यः॥ ॥इतिभू
कंपः॥ ॥अथरजः॥ नारदः। सितेनरजसाछन्नादिग्ग्रामवनपर्वताः। यदातदाप्रवर्त्यते निध
नं यांति भूमिपाः॥ ॥अथदिग्दाहः॥ अद्भुतसागरे नारदः। दिग्दाहः पीतवर्णश्चेत्क्षितीशानां भय
प्रदः। बृहस्पतिः। यदास्तमयआदित्ये वह्निज्वालाप्रदृश्यते। दिशां दाहं तु तं विंद्यादिति भार्गवभा राम
षितं॥ ॥अथरविछिद्रे॥ अद्भुतसागरे मयूरचित्रे। तिलैर्हृवांशिभिश्चैव च रुद्री हियथवेस्तथा॥ ॥३६३॥

द्भुत

धान्यैरौदुंबरीभिश्चश्रीफलैराकुलिक्रिया।समासोभोजनैंस्तुवानरःप्रेक्षणमादिशेत्।यो
ममध्यगतंपश्येयदिसूर्यहर्षंनरः।दधिक्षीरघृतानांतुगुडपाद्युतःशुचिः।उपोष्यार्कस्यसमि
धोधेनुंदद्याद्द्विजातये॥ ॥अथोत्पातफलकालः॥अद्भुतसारेपराशरः।तत्रोत्पातफलंदिव्यंपूर्णेव
र्षेविपच्यते।आंतरिक्षंतथाभौमंमासैःषड्भिश्चतत्त्रिभिः।निर्घातस्तुत्रिभिर्मासैर्गंधर्वनग
राणिच।अग्निश्चसप्तरात्रेणमासेनोल्काविपच्यते।पुरध्वजादिभंगेषुफलंमासाद्विपच्य
ते।अरिष्टंपच्यतेषट्सुमासेषुफलहेतिषु।अतिवर्षातिशोकश्चसद्यएवविपच्यते।कीटमूषक
सर्पाणांमक्षिकादिषुयत्फलं।पच्यतेतद्विमासेनमधुसत्सुपच्यते।हयानांहस्तिनांचैवशकुनी
नांशुनीतथा।सद्यस्त्वरुदानियतमुलूकस्यतथैवच।विदेहवाधसंभवणीदर्शनंयक्षराक्षसी।
पशूनांविकृतंयच्चषष्ठेमासिविपच्यते।मांसतैलविकारेषुदेहांगस्पंदनेषुच।वस्त्रआतिविका

रेषु फलं स्यात्सप्तमेऽहनि। चित्रकर्मणि मासाभ्यां शाय[illegible]शुभ। सिकं। सोमध्वजविकारे च विकारः स्
तम्भासिकः। मार्गः। पक्षाद्विकारः सूर्यस्य पाकः सोम[illegible]मासिकः। मासद्वये स्मृतो राहोस्त्रिभिर्मासै
स्तु केतवः। संवत्सरविपाको ज्ञेयो बुधबृहस्पती। षाण्मासिकश्चौशनसः सूर्यजस्य पंचभिः। त्रिभि
र्मासैस्तु भौमस्य उल्कापातुस्तु मासिभिः। अष्टभिर्भूमिकंपस्तु निर्घातः पच्यते त्रिभिः। अनार्त्तवं पुष्प
फलं षड्भिर्मासैर्विपच्यते। पक्षिकीटपतंगानां दशाहात्फलमादिशेत्। घृततैलवसानां च सद्यः फलमु
दाहृतं। रात्रौ विद्रधनुर्दृष्ट्वा राज्ञः शीलविपर्यये। वानराणां नराणां च तथैव गजवाजिनां। नानावा
दित्रशब्दानां फलं मासाद्विपच्यते। बिडालनकुलानां च वराहव्याघ्रयोस्तथा। अन्तरिक्षे शब्दं तु
फलं मासाद्विपच्यते। अद्भुतसागर[illegible]रः। राज्ञः शरीरे लोके च पुरदारपुरोहिते। पाकमायाति राम
पुत्रेषु तथा कोशे च वाहने। मात्स्ये। अद्भुतेतु समुत्पन्ने यदि शक्तिः शिवा भवेत्। सप्ताहाभ्यंतरे ते ॥१६४॥

यमद्भुतं निःफलं तु तत्॥ तत्र सामान्येन शांतिरुक्ता वसिष्ठसंहितायां॥ सोमे शांत्या शमं यातिमा
र्दवं त्वांतरिक्षजं॥ दिव्यं हेमान्नगोभूमिदानेस्त कोटिहोमतः॥ महोपहाराद्रुद्रस्य गोदोहात्तत्पुरःस
रं॥ अलं कृते क्षितितले यावल्लक्षीरं स्त्रवं भवेत्॥ अपि दिव्यं शमं याति किं पुनस्त्विरद्वयं॥ तत्रैव॥ हस्तैः
षोडशभिः कार्यश्चतुरस्रः समंततः॥ मंडपो यज्ञियैर्वृक्षैरथवा वनदारुभिः॥ हस्तैश्चतुर्भिस्तन्मध्ये
कुंडं कार्यं समंततः॥ खातं हस्तैश्चतुर्भिश्च वस्त्रे प्रत्रय समन्वितं॥ समंततश्चतुर्हस्तं षोडशहस्त
मित्यर्थः॥ षडंगुलोन्नतस्त्वाद्यो द्वादशांगुलविस्तृतः॥ आद्यः आद्यो मेखला॥ अंगुलं च यथाकृत
मेव॥ न तु कुंडचतुर्विंशांशः॥ द्वादशांगुलानि॥ मेखलात्रयमाह॥ याद्दशांगुलोन्नतो मध्यः अष्टांगु
लस्तु विस्तृतः॥ चतुर्दशांगुलोत्सेधश्चतुरंगुलविस्तृतः॥ तृतीयवप्रः कर्त्तव्यो योनिश्चैका तु पश्चि
मे॥ चतुर्दशांगुलैर्दीर्घा चोन्नता षोडशांगुलैः॥ हीनाधिका न कर्त्तव्या विस्तारः षड्भिरंगुलैः॥ कुंड

स्पलक्षणं त्वेवं कोटिहोमे तु सर्वदा। ईशान्यां वेदिका कार्या सार्द्धहस्तप्रमाणतः। सर्वदेवमयी
त्वाधा शिवपूजापुरःसरं। ग्रहांस्तानर्चयेत्तत्र पूर्वोक्तविधिना ततः। पलाशसमिदाज्यान्नैर्मुखीते
ष्टशतं पृथक्। अघोरमंत्रेण ततो ग्रहहोमं च कारयेत्। तिलहोमं व्याहृतिभिर्घृताक्तैर्जुहुयात्ततः।
द्वारेषु जापकैः स्वस्ववेदपारायणं क्रमात्। [illegible] नमकं सूक्तं पौरुषं चांगजापकैः। होमोनवभि
राचार्यैः कार्यस्तु ब्राह्मणैः सह। निवेद्यांते ततः पश्चाच्छांतिवाचनपूर्वकं। ब्राह्मणान्भोजयेत्स
श्चात्स्वयं भुंजीत बंधुभिः। शिवाख्यानैः कथालापैर्दिनशेषं नयेत्ततः। एवं यावत्कोटिहोमस्ता
वत्कार्यमतंद्रितैः। तदर्धं वा तदर्धं वा लक्षहोममथापि वा। कार्यं दोषानुसारेण वित्तशाठ्यविवर्जि
तैः। होमांते दक्षिणां दद्यात् ब्रह्मविंशतिमृत्विजः। प्रतिद्विजमलंकारं सार्द्धं निष्कशतद्वयं। तदर्धं
वा तदर्धं वा दोषवित्तानुसारतः। नक्रासाधारणी शांतिरुक्ता तानामतः परं। जसातश्चैव ॥१६५॥

राम

तच्छांतिर्वक्ष्यंते॥ अपथ्यकपथ्यकः॥ अद्भुतसागरे गर्ग्गः॥ सावित्र्या लक्षहोमं तु कुर्याच्छ्रुतिवि
शारदः। गां भूमिं च हिरण्यं च धान्यं वस्त्रं तथैव च। दद्याच्च गुरवे ग्रामं धेनुवासो युगं तथा। अने
न वि॰ धिना भौमम् अद्भुतं शमयेद्बुधः। एष एव विज्ञेय आंतरिक्षाद्भुतेषु च। विशेषोत्र तु सा
वित्र्या दशलक्षं तु होमयेत्। होमं समाहितमनाः कुर्याच्च घृतकंबलं। घृतकंबलोग्रे वक्ष्यते।
धेनूनां द्वादशं देयं शतनिष्कसमायुतं। दिव्याद्भुतेषु कर्त्तव्यः कोटिहोमः समाहितैः। गोसहस्रं च
दातव्यं गुरवे दक्षिणा विधौ। एष प्रोक्तो विधिः सम्यक् दिव्यारिष्टविपत्करः॥ अशक्तो स एव। प्रयत
स्तेषु सर्वेषु दिव्येष्वद्भुतकेष्वपि। महाशांतिं बुधः कुर्यादमृतां विश्वभेषजीं। अमृता ऽथर्ववेदे प्र
सिद्धा। केचित्तु भविष्योक्तां महाशांतिमाहुः। सा वक्ष्यते। विष्णुधर्मे। सर्वोत्पातप्रशामनी अमृता
वाभयास्मृता। अमृता ऽभया चाथर्ववेदोक्ता वक्ष्यते। नारदः॥ कुंडं कृत्वाहु जुहुयादाज्यभागौ

धि२

तेपृथगष्टोत्तरंशतं।पलइंद्रभयामहेस्वस्तिस्तघोरमंत्रकैः।समिदाज्यचरुस्त्रीहितिलैर्व्याहृतिभि
स्तथा।कोटिहोमंतदर्धंवालक्षहोममथापिवा।यथावित्तानुसारेणतन्न्यूनाधिककल्पना।एक
विंशतिरात्रंवापक्षंपक्षार्धमेववा।पंचरात्रंत्रिरात्रंवाहोमकर्मसमाचरेत्।दक्षिणांचततोदद्या
दाचार्यायकुटुंबिने।गणेशक्षेत्रपालार्कदुर्गाक्षोण्यंगदेवताः।तासांप्रीत्यैजपःकार्यःशेषंपू
र्ववदाचरेत्।ऋत्विग्भ्योदक्षिणांदद्यात्सोऽशो[illegible]ःस्वशक्तितः।। ।।इतिरामकल्पमहात्म्येजैम
लाभदकृतेशांतिरत्नेऽद्भुतसामान्यशांतिः।। ।।अथनानोत्पातशांतयः।। ।।वराहमिहिरः।
।।७।। ।।यान्यत्रेरुत्पातान्गर्गःप्रोवाचतानहंवक्ष्ये। [illegible]संक्षेपोयंप्रकृतेरन्यत्वमुत्पातःभ
नुजानामपवाचाद्परक्तादेवताःसृजंतितान्नाशातिघातायनपःशांतिंराष्ट्रेप्रयुंजीत।दि
व्यंग्रहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः।गंधर्वनगरपुरंदरचापादियदांतरिक्षंतत्।।

द्विव्यंप्रशाममुपैतिप्रभूतकनकाश्वगोमहीदानैः।रुद्रायतनमक्षमौगेदोषात्कोटिहोमश्च।अति
स्मितवलनपतनगस्वेदाश्रुकृतिपातजकल्पनाद्यानि।लिंगार्च्चयितनोर्नीनाशगायनरेंद्रदेशनर्मा।देवतपा
त्रीशाकटाक्षयत्रकेतुयुगभंगपतनानि।सपर्यासिनसादनसंगाश्चनदेशनृपशुभदाः।मासैश्चाष्ट
भिः सर्वेषामेवफलपाकः।बुधादेवविकारेषुचिः पुरोधास्त्र्यहोषितस्नातः।स्नानकुसुमानुले
पनवस्त्रैरभ्यर्च्चयेत्प्रतिमा।मधुपर्केणपुरोधास्तस्यैवबलिभिश्चविधिवदुपतिष्ठेत्।स्थालीपाकंजु
हुयाद्विधिवन्मंत्रैश्चतल्लिंगैः॥ ॥इतिविबुधविकारेशांतयः॥ ॥सप्तरात्रंद्विजैविबुधनराणां
गीतनृत्योत्सवाश्चैतद्विधिवदवनिपालैर्यैः प्रयुक्तानतेषांभवतिदुरितपाकोदक्षिणाभिश्च
रुद्रगराष्ट्रेयस्यानग्निः प्रदीप्यतेग्निर्नचेंधनवान्।मनुजेश्वरस्यपीडातस्यचराष्ट्रस्यविज्ञेया।
त्वमीसार्द्रज्वलनेनृपतिवधः प्रहरणेरौद्रः।प्रासादभवनतोरणकेत्वादिष्वग्निदग्धेषुतडिता

षाण्मासैः परचक्रागतो नृपो नियमात्॥ धूमो नाग्निसमुत्थो रजस्तमश्चाग्निजं महाभयदं॥ व्यक्ते नि
श्युर्नाशो दर्शनमपि वा हि दोषकरं॥ धूमाग्निविस्फुलिंगैः शय्यांबरकेशजैर्मृत्युः॥ आयुधज्वलन
सर्पणस्वनाः कोशान्निर्गमे नचेपनानि वा॥ वैकृतानि यदि वायुधे पराण्यासरौद्ररणसंकुलं वदेत्॥
मैत्रैरग्नेः क्षीरद्रुमसंत्समिद्भिर्होतव्योऽग्निः सर्षपाज्यसर्षपैश्च॥ अग्न्यादीनां वैकृते शांतिरेषा दीयुचा
स्मिः कौंचनं ब्राह्मणेभ्यः॥ ॥ शाखाभंगे॥ कस्माद्वृक्षाणां निर्दिशेद्रणोद्योगं॥ नारीदेशा भ्रंशोरु
दिते च व्याधिवाकुल्यं॥ राष्ट्रविभेदो न्यत्तौ बालवधो ऽतीव बालकुसुमेषु॥ वृक्षात्क्षीरस्रावे सर्वद्रव्य
क्षयो भवति॥ सीघे वाहनभ्रंशः संग्रामः शोणिते मधुनि रोगः॥ स्नेहे दुर्भिक्षभयं महद्भयं निःसृते
सलिले॥ शुष्कविरोहे च वीर्यान्नसंक्षयः शोषणे च विरुजाने॥ पतितानामुत्थाने स्वयं भयं दैव
जनितं च॥ पूजितवृक्षो ह्यनतो कुसुमं फलं नृपवधाय विकर्तव्या॥ धूमस्तस्मिन्ज्वाला यवा भवे नृप॥ १६७॥

राम

वधायैव। स्नावस्तु वा पितरः पुजस्य पत्नुवा जनसंक्षयो विनिर्दिष्टः। वृक्षाणां वैकृत्ये दशभिर्मा
सैः फलविपाकः। स्रग्गंधधूपांबरपूजितस्य छत्रं निधायो परिपाद्यपस्य। कृत्वा शिवं रुद्रजपो
कार्यो रुद्रेभ्य इत्यत्र षडेव होमाः। पायसेन मधुना च भोज्ये ब्राह्मणान्घृतयुतेन नाभपतिः। मे
दिनीं निगदितात्र दक्षिणा वैकृते तरुसंस्तेहितार्थिभिः। नालेक्ष्ये यदि वारीनामेकस्मिन्द्वित्रिसंभ
वो मरणं। कथयति तदधिपती नीयमलं जातं च कुसुमफलं। अतिवृद्धिः सस्यानां नानाफलपुष्पसं
भवो वृक्षे। भयति हि यद्येकस्मिन्परचक्रस्यागमो नियमात्। अर्धे नियदा तैलं भवति तिलाना
मैतैलता वा स्यात्। अन्नस्य च वैरस्यं यदा तदा क्षुद्भयं हि महत्। विकृतं कुसुमं फलं वा ग्रामादस्य
वा पुराद्बहिः कार्यं। सौम्योत्र चरुः कार्यो निर्वापो वा पशुः शांतिः। सस्ये तु दृष्ट्वा विकृतिं प्रदेयं तत्क्षे
त्रमेव प्रथमं द्विजेभ्यः। तत्क्षेत्रमध्ये चरुमत्र भौमं कृत्वा न दोषं समुपैति तज्ज्ञः। दुर्भिक्षमनावृष्ट्या।

मतिवृष्टौक्षुद्भयं परभयं च। रोगोन्यर्तुभवो नृपतिवधो नभ्रआतायी। शीतोष्णविपर्यासे
यथावद्दतुषु न प्रवृत्तेषु। षण्मासाद्राष्ट्रभयं विज्ञेयं दैवजं जनितं च। अन्यर्तौ सिसा हि प्रबोधवर्षेषु
धानन्नपमरणं। रक्तेशस्त्रेथोगोमांसास्थिवसादिभिर्मरकः। धान्यहिरण्यत्वक्फलकुसुमाद्ये
वर्षितेभयं विंद्यात्। अंगारपांसुवर्षे विनाशमुपयाति तत्र नगरं। उपलाविना जलधरैर्विकृता
वाप्राणिनोयदादृष्टाः। छिद्रंवाप्यभिवृष्टं सहस्रानामीतिसंजननं। क्षीरघृतक्षौद्राणां दधिला
को क्षौलिचारिणं। वर्षे देशविनाशः शस्त्रायुधवर्षे पि भयं सन्नपयुद्धं। यद्यमलेर्के छायानदृश्यते
दृश्यते प्रतीपा वा। देशस्य तदासुमहद्भयमायातं विनिर्देश्यं। यद्येनभसि सुरेंद्रधनुर्दिवायदा
दृश्यते थवारात्रौ। प्राच्यामपरस्यां वा यदा न राक्षद्भयं सभयं। सूर्येंदुपर्जन्यसमीरणानां योगः राम
स्मृतोवृष्टिविकारकाले। धान्नान्नगोकांचन दक्षिणाश्च देयास्ततः शांतिमुपैतिपापम्॥ ॥१६९॥

अपसर्पणं नदीनां नगरादचिरेण शून्यतां कुरुते। शोषश्चाशोषाणां अन्येषां वा ह्रदादीनां।
स्नेहासृङ्मांसवहाः संकुलकलुषाः प्रतीपगाश्चापि। परचक्रस्यागमनं नद्यः कथयंति षण्मा
सात्॥ ज्वालाधूमक्वाथाः रुदितोत्क्रुष्टानि चैव कूपानां। गीतप्रजल्पितानि च जनमरकाय प्र
दिष्टानि। सलिलोत्पत्तिरखाते गंधरसविपर्यये च तोयानां। सलिलाशयविकृतौ वा महद्
भयं तत्र शांतिरियं। सलिलविकारे कुर्यात्पूजां वरुणस्य वारुणैर्मंत्रैः। तैरेव च जलहोमैः शम
मेवं पापमुपयाति। प्रसवविकारे नृणां द्वित्रिचतुः प्रभृतिसंप्रसूतिर्वा। हीनातिरिक्तकाले
देशकुलानां संक्षयो भवति। वडवोष्ट्रमहिषगोहस्तिनीषु यमलोद्भवे मरणमेषां। षण्मासा
त्सूतिफलं शांतौ श्लोकौ च गर्गोक्तौ। नार्यः परस्य देशेषु त्यक्ता। त्याज्यास्तु हितार्थिना। तर्पयेच्च द्वि
जान्कामैः शांतिं चैवात्र कारयेत्। चतुष्पदाश्चैः स्वयूथेभ्यस्त्यक्तव्याः परभूमिषु। नगरे स्वामि

स्येनमंत्रेण

नंष्टमन्यथा तु विनाशयेत्।अन्यत्र वेसरो सक्तो स्त्री।गौर्वा ज्ञातिमैथुने।स्थालीपाकेन धाता
रंपशुना च पुरोहितः।प्राजापत्यां पत्येनयजेद्दद्यात्कन्यां दक्षिणां यानं वा हृदियुक्तं यद्दिग्गच्छेन्न चैव वाह
पुत्र्कं।राष्ट्रभयं भवति तदा च कारणं सास्यमं गेव।अनभिहिततूर्यनादः शब्दो वा नाडितेषु यदि नस्या
त्।विपरीतो वा तेषां पि रागमो न पतिमरणं वा।गोलांगल्योश्च संगे ध्वजस्य पाथिपस्करविकारे।का
ष्ठनिनादे च तथा शस्त्रभयं मुनिवचश्चेदं।वाप्यथेच्छेषु न पतिर्वा धुं सक्तुभिरर्चयेत्।आवायोरिति
पंच वे जितव्याः प्रयत्ने द्विजैः।विकन्य दक्षिणो होमः परमान्नं च भोजयेत्।पुरपक्षिणो वनचराव
न्या वा निर्भया विशंति पुरं।नक्तं वा दिवसचराः क्षपाचरा वा चरंत्यहनि।श्येनाः प्ररुदंती वक्षा
रे वाः संति जंबुकारी तान्ः।वासं नरेंद्र भवने कपोतकः कौशिको यदि वा।कुक्कुटरुतं प्रदोषे हेमंता
दौ च कोकिलालापः।प्रतिलोमं मंडलचराः श्येनाश्चांबरे मयरताः।गृहचैत्यतोरणेषु द्वारे षु च ॥१६९॥

राम

पक्षिसंपातः मधुवल्मीकांभोरुहसमुद्भवाः श्वापिनाशाय। श्वभिरस्थिवावयवप्रवेशनं मंदिरेषु म
रकाय। मृगपक्षिविकारेषु कुर्याद्धोमान्सदक्षिणान्। देवाः कपोत इति च जप्तव्याः पंचभिर्द्विजैः। सु
देवा इति चैकेन देया गावश्च दक्षिणाः। उपेत्य काकुनस्तं कुमनोऽब्द शिरांसि च। [illegible]शक्रध्वजेंद्रकील
स्तंभप्रयातसंभेषु। तद्वत्कपाटतोरणकेतूनां नरपतेर्मरणं। संध्याद्वयस्य दीप्तिर्धूमोत्पत्तिश्च कान
नेनग्नौ। छिन्नाभावे भूमेर्दरणं कंपश्च भयंकरं। प्रहरंति धिषिधीत्यायुधकाष्ठाश्मपाणयो बालान्
निगदंतः प्रहरंते तत्रापि भयं भवत्याशु। अंगारगैरिकाद्यैर्विकृतप्रेतप्रेताभिलेखनं यस्मिन्। नाय
कचित्रितमथवा क्षयपक्षयं याति न चिरेण। लूतापटाकशाबलं न संध्ययोः पूजितं कलहयुक्तं। अशु
र्भनित्योच्छिष्टं च तद्गृहं नाशमुपयाति। दृष्टेषु यातुधानेष्वथ निर्दिशेन्मरकमाशु संप्राप्तं। अ
शुभं [illegible] महाशांत्याथ बलयो भोज्यानि सुमहांति च। कारयीत मरेंद्रं च माहेंद्रीभिः समर्च

येत्॥ ॥इतिवाराह्यांभानोत्पातशांतयः॥ ॥अथमात्स्येक्ताद्भुतशांतयः॥ ॥मदनरत्नेगर्गः॥
पुरुषापचरान्नियतमपरज्यंतिदेवताः।अपरागाच्चदेवानामुपसर्गःप्रवर्त्तते।दिव्यांतरिक्षभौमं
चत्रिविधंपरिकीर्त्तितं।ग्रहर्क्षवैकृतंदिव्यंमांतरिक्षंनिबोधमे।उल्कापातोदिशांदाहःपरिवेषस्त
थैवच।गंधर्वनगरंचैववृष्टिश्चविकृताचया।एवमादिलुलोकेस्मिन्नांतरिक्षंविनिर्दिशेत्।चर
स्थिरभवंभौमंभूकंपाश्चैवभूमिजं।जलाशयानांवैकृत्यंभौमंचपरिकीर्त्तितं।भौमेत्वल्पफलं
ज्ञेयंचिरेणचविपच्यते।अभ्रजंमध्यफलदंमध्यकालेफलप्रदं।अभ्रमांतरिक्षं।अद्भुतेतुसमुत्प
न्नेयदिवृष्टिःशिवाभवेत्।सप्ताहाभ्यंतरेज्ञेयमद्भुतंनिष्फलंहितत्।अद्भुतस्यविपाकश्चविनाशां
स्तानदृश्यते।त्रिभिर्वर्षैस्तथाज्ञेयंसमहद्भयकारकं।राज्ञःशरीरेलोकेचपुरेदारेगृहेतथा।पाक राम
मायातिपुत्रेषुतथावैकोशवाहने।ऋतुस्वभावात्प्रजेप्रभवंत्यद्भुतसंस्थिताः।शुभावहास्तेविज्ञेया॥१७०॥

तांश्चमेवदतःशृणु। वज्राशनिमहीकंपसंध्यानिर्घातनिस्वनाः। परिवेषरजोधूमरक्तार्का
सुमनोदयः। द्रुमेभिन्नरसस्नेहोबहुशाश्चफलोद्गमः। गोपक्षिमदवृद्धिश्चशुभानिमधुमाध
वे। तारोल्कापातकलुषंकपिलार्केदुमंडलं। अनग्निज्वलनास्फोटधूमरेणवानिलाहतः। रक्तपू
यव्रणंसांध्यंनभश्चैवार्णवोपमं। सरितांचांबुसंशोषंदृष्ट्वाग्रीष्मेशुभंभवेत्। शक्रायुधंपरि
विधिगुरुस्तुक्रविरोहणं। कंपोद्वर्त्तनवैकृत्यंरसनंदरणंक्षितेः। नवोदपानसरसांवृध्यूर्ध्वतर
णप्लवाः। शीर्षाणिचाविरोही। एणंवर्षासुशुभमिष्यते। शीतानलतुषारत्वंदर्शनंमृगपक्षिणं।
रक्षोयक्षपिशगनांदर्शनंवागमानुषी। दिशोधूमांधकाराश्चसनभोवनपर्वताः। उच्चैःसूर्यो
दयास्तौचहेमंतेशोभनाःस्मृताः। दिव्यस्त्रीरूपगंधर्वविमानाद्भुतदर्शनं। ग्रहनक्षत्रताराणां
दर्शनंवागमानुषी। गीतवादित्रनिर्घोषोवनपर्वतसानुषु। सस्यवृद्धीरसोत्पत्तिःशरत्कालेशु

भाःस्मृताः।हिमपातानिलोत्पाताविरूपाद्भुतदर्शनं।कृष्णांजनाभमाकाशंतारोल्कापातपिं
जरं।चित्रगर्भोद्भवस्त्रीषुगोऽजाश्वमृगपक्षिषु।पत्रांकुरलतानांचविकाराःशिशिरेशुभाः।ऋतु
स्वभावेनविनाद्भुतस्यजातस्यदुष्टस्यतुशीघ्रमेव।अकालागमःशांतिरनंतुकार्यायथोक्तावसुधाधि
पेन॥ ॥गर्गउ०॥देवतार्चाःप्रनृत्यंतिवेपंतेप्रज्वलंतिवा।आरोहंतिप्रस्विद्यंतिपरस्परं।उत्तिष्ठं
तिनिमेषंतिप्रधावंतिरमंतिच।मज्जंतिविकृतिस्तेषांमानुषाणांभयावहाः।अवाङ्मुखावातिष्ठं
तिस्थानात्स्थानंभ्रमंतिच।वमंत्यग्निंतथाधूमंस्नेहंरक्तंतथावसां।एवमादीनिदृश्यंतेविकाराःस
हजोत्थिताः।लिंगायतनचित्रेषुतत्रवासंनरोचयेत्।राज्ञोवाव्यसनंतत्रसचदेशोविनश्यति।दे
वयात्रासुचोत्पातान्दृष्ट्वावश्यंभयंवदेत्।यात्रासंबंधिनःशकटाक्षध्वजभंगादयः।पश्चिमांरु
द्रजांज्ञेयंनृपाणांलोकपालजं।रुद्रजंतत्रतिमोत्स्यंपशुभयंरमित्यर्थः।एवंसर्वत्रज्ञेयोसेनापती॥१७१॥

राम

नांच यत्स्यात्स्कंदस्यापि विशाखजं ।ॐकारनं विष्णुवस्थिं प्रविश्वकर्मसमुद्भवं ।विनायकोद्भवं लै
यंगणनां सेवकाय च ।देवद्वृतेनयाः प्रेष्याः देवस्त्रो धुनपस्त्रियः ।वासुदेवेषु विज्ञेयं गृहणामे
वमान्यथा ।देवताचविकारेषु शुचिः स्नातः पुरोहितः ।देवतार्चांतु गत्वा वेस्नात्वा ।साथ
पूजयेत् ।मधुपर्केण विधिवदुपतिष्ठेदनंतरं । तल्लिंगेन च मंत्रेण स्थालीपाकं यथाविधि ।पु
रोधा जुहुयाद्धोमं सहस्रराजमतं द्विजः ।विप्रांश्च पूज्यां मधुरान्नपानैः सदक्षिणैः सप्तदिनं नरेंद्रः ।
प्रासेष्टमेहि क्षितिगोप्रदानैः सकांचनैः शांतिमुपैति पापी ॥ ॥इति देवप्रतिमावैकृतशांतिः ॥ ॥
अथाग्निवैकृतशांतिः ॥ ॥गर्ग उ० ।अग्निः प्रदीप्यते यत्र रा[illegible]ष्ट्रेश्च शामनिंधनः ।न दीप्यते चेंधवां
स्तत्राष्ट्रं पीड्यते नृप ।ज्वलेद्वार्द्रश्च वंशोवा तथार्द्रांभ्मदा सुधा ।प्रासादतोरणद्वारं नृपवेश्म सुरा
लयं ।एतानि यत्र दह्यंते तत्र राजभयं वदेत् ।विद्युता वा प्रदह्यंते तत्रापि नृपतेर्भयं ।अनेशानि

न३

तमांसिस्युर्विनापांसुरजांसि च। धूमश्चानग्निजो यत्र तत्र विद्यान्महाभयं। तडिद्विनाभ्रं गगने भ
यं स्याद्वृष्टिवर्जिते। दिवा सतारे गगने तथैव भयमादिशेत्। लोहायुधविकारः स्यात्तत्र संग्राममा
दिशेत्। त्रिरात्रोपोषितस्तत्र पुरोधाः सुसमाहितः। समिद्भिः क्षीरवृक्षाणां सर्षपैश्च घृतेन च।
होमं कुर्यादग्निमंत्रैर्ब्राह्मणांश्चैव भोजयेत्। दद्यात्सुवर्णं च तथा द्विजेभ्यो गाश्चैव वस्त्राणि त
था भुवं च। एवं कृते तत्समुपैति नाशं यदग्निवैकृत्यभवं द्विजेंद्र॥ ॥इत्यग्निवैकृतशांतिः॥ ॥
अथ वृक्षोत्पाते॥ गर्गः। पुरेषु ये षु दृश्यंते पादपा देवचोदिताः। रुदंतो वा हसंतो वा ~~वृ~~ भ्रमंतो वा व
रसा भुवि। रुदतो व्याधिरभ्येति हसतां देशविभ्रमः। शाखाप्रपतने कुर्यात्संग्रामं योधपातनं।
बालानामिमरणं कुर्याद्बालानां फलपुष्पतः। स राष्ट्रभेदं कुरुते फलपुष्पमनार्त्तवं। क्षीरं सर्वत्र राम
गंभीरं स्नेहे दुर्भिक्षलक्षणं। वाहनापचयं मध्ये रक्ते संग्राममादिशेत्। मधुस्रावे भवेद्व्या ३७२॥

४२ जल्पत्यपिचवृक्षेषुस्वनत्यपिधनक्षयं।एतत्सृजितवृक्षेषुसर्वराज्ञोविपद्यते।पुष्पैःफलैर्वाविकृतैराज्ञोमृत्युंतथादिशेत् २

जलस्रावेचवर्षति।अरोगशोषणंज्ञेयंब्रह्मन्दुर्भिक्षलक्षणं।शुष्केषुसंप्ररोहत्सुवीर्यमन्नंच
हीयते।उत्थानेपतितानांचभयंखेदकरंभवेत्।स्थानात्स्थानेतुगमनेदेशभंगंतथादिशेत्।
अन्येषुचैववृक्षेषुवृक्षोत्पातेघृतंद्विजः।आच्छादयेत्त्वातंवृक्षंगंधमाल्यैर्विभूषयेत्।वृक्षोप
रितथाछत्रंकुर्यात्पापप्रशांतये।केचित्तुवृक्षोत्पातेवृक्षछेदनमाहुस्तदेतच्छिरोधार्यंत्विंत्यी।शि
वमभ्यर्चयेद्देवंपशुंचास्मैनिवेदयेत्।रुद्रेभ्यइतिवृक्षेषुकृत्वारुद्रंजपेत्ततः।मध्वाज्ययुक्ते
नतुपायसेनसंपूज्यविप्रांश्चभुवंचदद्यात्।गीतेननृत्येनतथार्चयेत्तंदेवंहरिंपापविना
शहेतोः॥ ॥इतिवृक्षोत्पातशांतिः॥ ॥अथवृष्टिवृते॥गर्गः।अतिवृष्टिरनावृष्टिर्दुर्भिक्षा
दोनयंमतं।अनृतौतुदिवानंतोवृष्टिर्व्याधिभयायत्।अनभ्रेवैकृताश्चैवविज्ञेयाराजहेतवे।
वैकृतागर्जितारयः।शीतोष्णानांविपर्यासेकृतूनांरिपुजंभयं।सततंवर्षतेयत्रतत्रशास्त्रभ झोणि

यं भवेत्। अंगारपांसुवर्षेण नगरं तद्विनश्यति। मज्जास्थिस्नेहमांसानि जनमारीभयं भवेत्। फ
लं पुष्पं तथा धान्यं परेण गतिभयाय तु। पांसुजंतूपलानां च वर्षतो रणजं भयं। छिद्रे वाभिप्रवर्षेण
सस्यानामीतिवर्धनं। विरजस्के रवौ व्यभ्रे यस्य छाया न दृश्यते। दृश्यते तु प्रतीपा वा तत्र देशे भयं
भवेत्। प्रतीपा विपरीता निरभ्रे वा। तथा रात्रौ श्वेतं रात्रौ याम्योत्तरेण तु। इंद्रायुधं तथा दृष्ट्वा उ
ल्कापातस्तथैव च। दिग्दाहपरिवेषौ च गंधर्वनगरं तथा। परचक्रभयं विंद्याद्देशोपद्रवमेव च।
सूर्येंदुपर्जन्यसमीरणानां होमस्तु कार्यो विधिवद्द्विजेंद्र। धान्यानि गोकांचनदक्षिणाश्च दे
या द्विजानामघनाशहेतोः॥ ॥इति वृष्ट्यादिवैकृतशांतिः॥ ॥अथ जलाशयवैकृते॥ ॥७॥
गर्ग उवाच॥ नगरादुपसर्पंति समीपमुपयांति च। नद्यो ह्रदप्रस्रवणा निरंभो वै भवंति च। वि राम
वर्णकलुषा तप्ता फेनवर्त्तं तु संकुलं। क्षीरं स्नेहं सुरां रक्तं वहंते व्याकुलोदकं। षण्मासाभ्यंत ॥१७२॥

रेतत्र परचक्रभयं विदुः। जलाशयानि तेनैव प्रज्वलंति क्वचन। एवं भुंचंति च ब्रह्मन्ज्वालां धू
मं रजांसि च। अखाते वा जलोत्पत्तिः ससत्वा वा जलाशयाः। संगीतशद्बाश्च यं तेजनमारभ
यं विदुः। द्विव्यं महाभयं विद्धि मधुमात्रावसेवनं। जप्तव्या वारुणा मंत्रास्तेश्च होमो जले भवेत्।
मध्वाज्ययुक्तं परमान्नमत्रह यं द्विजानामथ भोजनार्थं। गावश्च देयाः सितवस्त्रयुक्तास्तथो
दकुंभाः सकलार्थसिद्ध्यै॥ ॥इति जलाशय वैकृत शांतिः॥ ॥अथोपस्कर वैकृतशांतिः॥
गर्गउ०॥ उपयुक्तान्ययुक्तानि प्रयुक्तान्यपि च यांति चेत्। नयांति चोद्यमानानि अचोदितानि
चलंति च। आकाशतूर्यनादश्च गीतगंधर्वनिःस्वनः। काष्ठदर्वीकुठारादि विकारं कुरुते यदि। ग
त्वा लंश्चलसंघाश्च स्त्रियं स्त्री वापि घातयेत्। उपस्करादि विकृतौ घोरं शास्त्रभयं भवेत्। वा
योश्च पूजां द्विजसत्तु भिश्च कृत्वा नियुक्तौश्च जपेच्च मंत्रान्। दद्यात्स्वभक्तं परमान्नमत्र सद

क्षिणंतेनशमोस्यभ्रूयात्॥ ॥अथमृगपक्षिशांतिः॥भर्गडि०॥प्रविशंतियदायामानारण्या
मृगपक्षिणः॥अरण्यंयांतिवारण्याःस्थलंयांतिजलोद्भवाः॥स्थलजावाजलंयांतिघोरावास
तिनिर्भयाः॥राजद्वारेपुरद्वारेशिवाश्चाप्यशिवप्रदाः॥दिवारात्रिंचवारापिरात्रौवापिदिवाच
राः॥ग्राम्यास्त्यजंतिग्रामंवाशून्यतांतस्यनिर्दिशेत्॥दीप्तंवासंतिसंध्यासुमंडलानिचकुर्वते।
वाशंतेविस्वरंयत्रतत्राप्येतत्फलंलभेत्॥प्रदोषेकुक्कुटोवासेद्धेमंतेवापिकोकिलः॥अर्कोदये
र्काभिमुखीशिवावापिस्वयंद्विरोत्॥गृहेकपोतःप्रविशेत्क्रव्यादोमूर्ध्निवापतेत्॥मधुवाम
क्षिकाःकुर्यान्मृत्युर्गृहपतेर्भवेत्॥प्राकारद्वारगेहेषुतोरणापरवीथिषु॥केतुछत्रायुधाद्ये
षुक्रव्यादःसंश्रयेयदि॥जायतेवाथवल्मीकोमधुवादृश्यतेयदि॥सदेशोनाशमायातिरा
जावापिम्रियेत्तदा॥मूषिकाराजभान्दृष्ट्वाप्रहृतक्षतद्रव्यंवदेत्॥काष्ठोन्मुकास्थिश्रृंगस्था

राम
॥३७४॥

श्वानमर्कटवेदनाः।दुर्भिक्षवेदनाज्ञेयाःकाकाधान्यमुखायदि।जनानभिसर्वतश्चानिर्प
यारण्यवेदनाः।काकोमैथुनयुक्तश्चश्वेताभोयदिदृश्यते।राजावाम्रियतेतत्रसदेशोवावि
नस्यति।उलूकोवासतेयत्रनिपतेद्वातथागृहे।क्षयोगृहपतेर्मृत्युःधननाशस्तथैवच।मृगपा
क्षिविकारेषुकुर्याद्धोमंसदक्षिणं।देवाःकपोतइतिचऋचस्थ्यैपंचभिर्द्विजैः।मुदेवइतिचै
केनदेयागावश्चदक्षिणाः।जपेच्छकुतस्सूक्तंचमनोवेदशिरांसिच।मंत्रावृग्वेदेप्रसिद्धाः।
गावश्चदेयाविधिवद्द्विजानांसकांचनावस्त्रयुगोत्तरीयाः।एवंकृतेशांतिमुपैतिपापंभृगै
र्द्विजैर्वाविनिवेदितंयत्॥ ॥इतिमृगपक्षिवैकृतशांतिः॥ ॥गर्गउवाच॥प्रासादतोर
णाट्टालद्वारप्राकारवेश्मनां।अनिमित्तंचपतनंदृढानांराजमृत्यवे।रजसावाथधूमेनदे
शोयत्रसमाकुलाः।आदित्यश्चेंद्रकाराश्चविवर्णाभयवृद्धये।राक्षसायत्रदृश्यंतेग्रा

मरणाश्च विविधा गिरिः। ऋतवश्च विपर्यस्ता अपूज्याः पूजयेज्जनाः। नक्षत्राणि वियोगीनि
तन्म हद्भयलक्षणं। केतूदयोपरागौ च छिद्रं च शशिसूर्ययोः। ग्रहर्क्षविकृतिर्यत्र तत्रापि भय
मादिशेत्। स्त्रियश्च कलहायंते वालानिघ्नंति वालकाः। क्रियाणामुचितानां च विच्छित्तिर्यत्र
दृश्यते। अग्निर्यत्र न दृश्येत दृश्यमानोथ शाम्यति। क्षुधार्ता वा सिवाहा यांति चोत्तरतस्तथा।
पूर्णकुंभाः स्रवंते च वर्हयो वा विलुंपते। मंगल्यध्वनयो यत्र न श्रूयंते समंततः। क्षवत्नुबाधि
ते वाथ प्रोत्साहे सति नर्दितः। न देवतेषु वर्त्तंते यथावद्ब्राह्मणेषु च। मंदघोषाणि वाद्यानि
वाद्यंते विस्वराणि च। गुरुमित्रद्विषो यत्र शत्रुपूजारताः सदा। ब्राह्मणाः सुहृदोमान्याज्जने
यत्रावमन्यते। शांतिमंगलहोमेषु नास्तिक्यं यत्र मन्यते। राजा वा म्रियते तत्राथवा देशो
विनश्यति। राजो विना शो संप्राप्ते निमित्तानि निबोध मे। ब्राह्मणान्प्रथमं द्वेष्टि ब्राह्मणै

श्च विनिंदति। रमते निंदया चैषां प्रशंसां नाभिनंदति। ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जि
घांसति। नैतान्स्मरति कृत्येषु याचितश्चाभ्यसूयति। अपूर्वं तु करं लोभात्तथापातयते जने।
एते धर्म्यं च ये तेषां स्यात्सपत्नीकान्द्विजोत्तमान्। भोज्यानि चैव कार्याणि सुराणां बलयस्तथा
गावश्च देया द्विजपुंगवेभ्यो भुवं तथा कांचनमंबराणि। होमश्च कार्यो द्विजपुंगवैश्च एवं कृते
शांतिमुपैति पापं। अद्भुते तु समुत्पन्ने यदि वृष्टिः प्रजायते। सप्ताहाभ्यंतरे ज्ञेयमद्भुतं नि
ष्फलं हि तत्॥ ॥इति श्रीमत्स्यपुराणे अद्भुतशांतयः॥ ॥अथ नानोत्पातशांतयः॥ ॥
मत्स्य उवाच। गर्गः॥ औत्पातिकां महाशांतिं वदतः शृणु मेधुना। यत्र व्याधिरनावृष्टिः परचक्र
मुपस्थितं। दुर्भिक्षं जनमारो वा राज्ञो मरणमेव वा। तत्र शांतिक्रमः प्रोक्तो महाकल्पमिहा
रभेत्। पुनर्होमश्च कर्तव्यो बृहस्पतिमतं यथा। गावस्तथैव दातव्यास्तथैवायुर्विवर्द्धिनीः।

य

राज्ञोभिषेकं कुर्वीतितथैवचसऋत्विजः। त्रिरात्रंसप्तरात्रंवाउपोष्यंचपुरोहितः। औदुंबरीणांवि
धिवत्समिधांचशतंदहेत्। ब्राह्मणान्भोजयेत्तत्रकृतांतेभूरिदक्षिणा। यथानांहोमयेद्द्रोणान्घृ
तानांदशैवच। द्विजेघृताढकंदद्याद्धवद्रोणंससेतिकं। राज्ञःकुलेप्रधानेवाघृतद्रोणंविधीयते।
वृषसैकादशगावश्चविप्रेभ्यःप्रतिपादयेत्। कुलेयस्यनरोहंतिपुत्रादुहितरस्तथा। सर्वऊीवो
पसर्गश्चतत्रकर्मप्रयोजयेत्। सावित्र्याकारयेत्कर्मततःपापंप्रशाम्यति। अत्यंफुल्लमतिशी
तंचअतिवर्षमनूदकं। अनार्त्तवंपुष्पफलमतिरात्रंचमारुतः। वाहनानांमतिश्चैवअति
मात्रंचमूषकाः। आरण्यमृगसंघानामथवापुरसेविनां। यद्वाप्योत्पातिकंकिंचिच्छूलपक्षा
श्चवायसाः। भैरवंचातिमात्रंचरुदंतिमृगपक्षिणः। विद्युत्तलनितनिर्घोषमनभ्रेवाति
वर्षणं। सिंहव्याघ्रतरक्षूणांदर्शनंचचतुष्पथे। ईदृशैर्लक्षणैरुत्पातैर्विनाशमभिलक्ष

येत्।अन्योत्रजायते राज्ञा तथावान्यः पुरोहितः।तत्र शांतिं प्रवक्ष्यामि पापप्रशमनीं शुभां।औदुं
बरीणां समिधां शतमष्टोत्तरं दहेत्।सहक्षीरघृताक्तानां महामंत्रगणैः शुभैः।कृत्वा शतसहस्रं तु
परां शांतिमवाप्नुयात्।यंत्रं वा मुशलं वापि स्फुटते वाप्युलूखलं।भूतानां चैव बिभ्येत गृहे देवकु
ले तथा।त्रिपरीतद्रपीठं वा आसनं शयनं तथा।अकस्मात्स्फुरते यत्र कंपते वा वसुंधरा।तथायु
क्तमयुक्तं वा यानं युग्मं प्रधावति।अचलं चलते यत्र विवादश्चैव मंत्रिणां।अयुक्तं ब्राह्मणैः सा
र्द्धं विवदंति तथा भृशं।ईदृशेषु निमित्तेषु महाभयमुदाहरेत्।श्रेष्ठिनां सार्थवाहानां मम त्यानां
भयं वदेत्।महाजनविवादांश्च मंत्रिणां च विनिर्दिशेत्।तत्र शांतिं प्रवक्ष्यामि प्राजापत्येति वि
श्रुतं।अश्वत्थसमिधो कृत्वा घृताक्ता मधुसंयुताः।सावित्र्यष्टसहस्रेण प्राजापत्यां स्तु मंत्र
येत्।पायसं भोजयेद्विप्रान्भुक्तांते भूरिदक्षिणां।ततः प्रशाम्यते पापं प्रजापतिमतं यथा।यम

लानि च जायंते शुभानि निजवाहनाः। मुंडवक्रमुखाश्चैव कुंडाश्च कुणपास्तथा। अमानुषामा
नुषाणां गजानां मृगपक्षिणां। दंताश्चोपरि जायंते अश्वाश्च विकृताननाः। बहुशीर्षमशीर्ष
वा बहुवर्णमवर्णकं। एकशृंगमशृंगं वा चतुर्भुजमथा भुजं। दीर्घकर्णमकर्णं वा अजकर्णमुखं तथा। व्याल
व्याघ्रमुखाकारं बिडालमुखमुन्नतं। ईदृशानि च रूपाणि दृश्यंते यत्र गौतम। तत्र संग्रामतो ब्रूया
द्भयं क्षयकरं महत्। जनक्षयं च घोराणां राज्ञः श्रेणिबंधं तथा। तत्र शांतिं प्रवक्ष्यामि सर्वपापप्रणा
शिनीं। खदिराश्वत्थसमिधां सहस्राष्टोत्तरं दहेत्। विरूपाक्षेण मंत्रेण विधिवत्सुसमाहितः।।
विरूपाक्षोग्निमूर्द्धेत्यादिः। तत्राहि विरूपाक्ष ऋषिः। दद्याच्च कपिलां धेनुं कृतां ते शांतिमिच्छता। तत
स्तच्छाम्यते पापं जातवेदो वचो यथा। यथा कार्याणि जायंते श्वदंष्ट्रे दंडपातने। अपूज्याश्चैव पूज्यं राम
ते मान्याश्चैवावमन्यते। अनड्वांश्च पिबेद्धेनुं धेनुश्चानडुहं पिबेत्। विधुनोति च गां वत्सः प्रजाते १७७।।

नाभिनंदति।प्रजातं वत्सं गौशितिशेषः।मैथुनं विपरीतं च अकाले मृगपक्षिणां।ब्राह्मणाभि
नमर्यादान तिष्ठंति स्वकर्मसु।ईदृशे लक्षणे सा तैर्विधा देशस्य विभ्रमं।कलहं जायते घोरं दुर्भि
क्षजनमारकं।राजामात्यविनाशं च पौराणां च महद्भयं।तत्र शांतिं प्रवक्ष्यामि सर्वपापप्रणाशिनीं
प्रथाल्याश्वत्थसमिधः कृत्वा संस्तरणे महत्।औदुंबरीणां समिधां सहस्राष्टोत्तरं बुधः।जुहुया
द्विधिवह्नौ परां शांतिमुपादधत्।दासीदाससमायुक्तं गृहं दद्याद्द्विजातये।ततः प्रशाम्यते पापं
गौतमस्य वचो यथा।यथापि पीलिकायत्र ग्रामे पुनगरेषु च।दृश्यंते ह्यतिमात्रं वै वृक्षवीरा हता
लयाः।शांतेर्गृहे देवगृहे तथा च नृपतेर्गृहे।उपर्युपरि मोंतं तु दृश्यंते वेश्म वत्सरा।मक्षिका मशका
दंशा अतिमात्रं भयावहाः।ईदृशे लक्षणे सा तैर्महा चोरभयं भवेत्।द्रव्याणां हरणं ब्रूयात्सर्व
कस्य चागमे।तत्र शांतिं प्रवक्ष्यामि विश्वामित्रोपदर्शितां।अश्वत्थसमिधश्चैव कृत्वा चाष्टो

त्तरं शतं। पूर्णपात्राणि वै दद्यात् हुत्वांते भूरिदक्षिणं। सर्वोपस्कर संयुक्तं गृहं दद्यात् द्विजातये। तिलपा
त्रप्रदातव्यं तिलान्‌ जुह्वीत संयुतः। अनग्निर्ज्वलति यत्र अधूमे धूमदर्शने। बालैः सह कुमाराश्च
कलहं यत्र कुर्वते। गवाश्वानां भवेन्नित्यं तथा घोषनिवासिनां। श्रेष्ठानां सार्थवाहानां कलहो य
दि जायते। राजामात्य विनाशं च पौराणां च महद्भयं। तत्र शांतिं प्रवक्ष्यामि पितामहवचो यथा।
पालाश समिधामग्नौ सहस्राष्टोत्तरं दहेत्। ब्राह्मणान्‌ भोजयेत्तत्र परमान्नं घृतप्लुतं। ततस्तु श
म्यते पापं पितामहवचो यथा। प्राकारेन द्वारे रम्ये रो पुराट्टालकेषु वा। रथ्या चतुष्पथे चैव देव
तायतनेषु वा। निवासं यत्र कुर्वंति बकाः काकाश्च कौशिकाः। गृध्राः परभृतश्चैव आरण्या मृग
पक्षिणः। विरूहे कलहं घोरं सिद्धानां वचनं यथा। निरूहं तत्कथयेत्। तत्र शांतिं प्रवक्ष्यामि नारदे
नोपलक्षितां। अश्वत्थ समिधानीतु च ताकानां विभावसौ। वायव्येनेह मंत्रेण निवेद्यं च सुड्‌ग

राम
॥१७८॥

णितं।ततस्तु शाम्यते पापं नारदस्य वचो यथा। मृतः श्मशाने योनीतः पुनर्जीवति मानवः। गृहे यस्य प्रविष्टोसौ तिष्ठेदथ कदाचन। अचिरान्मृत्युतां याति हृतदारपरिग्रहः। तत्र शांतिं प्रवक्ष्यामि धर्मरा
जमतं यथा। सक्षीराणां घृताक्तानां भग्ने हुत्वा मुखे बुधः। औदुंबरीणां विधिवत्ततः शांतिकृता
भवेत्। सावित्र्यष्टसहस्रेण क्षीरशांतिं च कारयेत्। क्षीरशांतिश्च रक्तानामेकवर्णानामित्यादि
नावक्ष्यते। कपिलां तिलकांस्यं च कृत्वा तेभ्यो दक्षिणा। ततस्तु शाम्यते पापं धर्मराजमतं यथा। श्वा
शृगालोथ वा गृध्रः काको वा यदि मानुषः। श्मशानान्मांसमादाय पुरमध्ये प्रवेशयेत्। नगरं प
त्तनं वापि ग्रामं वा यदि वा गृहं। अचिरेणैव कालेन तच्छ्मशानी भविष्यति। चोरमंडलपातं तु पुरच
क्रस्य चागमं। अनारोग्यमनावृष्टिं दुर्भिक्षं जनमारकं। संग्रामं शस्त्रसंघातं क्षिप्रमेव विनि
र्दिशेत्। अश्वत्थसमिधो गृह्य तिलांश्च मधुसंप्लुतान्। विरूपाक्षेण मंत्रेण विरूपाक्षान्त्सशोणि

तान्।तिलपात्रोपहारं च क्षीरशांतिं च कारयेत्। ततश्च शाम्यते पापं प्रजापतिमतं यथा। सोत्राम
णिः पाकयज्ञः पशुबंधस्तथैव च। कृतवश्च प्रवर्त्तंते अनर्थी त्यकृतोदयः। यस्मिंस्तथा प्रवर्त्तते क्रोध
लोभान्यादपि। अदत्वादक्षिणां सम्यक्कमहतु सात तल्लक्षणं। अनारोग्यमनायुष्यं दुर्भिक्षं जनमा
रकं। ज्वरः कासस्तथा श्वासः कंडूदद्रुविकोष्ठिकाः। शिरोरोगाक्षिरोगाश्च पांडुरोगोग्रहः। आधय
श्च प्रवर्त्तंते दुर्दृष्टैः स्वप्नलक्षणैः। तत्र शांतिं प्रवक्ष्यामि बृहस्पतिमतं यथा। त्रिरात्रोपोषितो भूत्वा
हविष्याशी पुरोहितः। सक्षीराणां घृताक्तानां समिधां च शतं दहेत्। पलाशस्येत्यथर्वः। वज्राग्निः प्रा
शनिर्वापि ज्वलंश्चेन्निपतेद्दिवि। पुरे जनपदे वापि तत्र विंद्यान्महद्भयं। संवत्सरे ततो घोरे विंद्यान्नृ
पजनक्षयं। राजामात्यविनाशं च निर्दिशेन्नात्र संशयः। तत्र शांतिं प्रवक्ष्यामि इन्द्राग्निकथनं य
था। अपामार्गस्य समिधां सहस्राष्टोत्तरं दहेत्। पायसं भोजयेद्विप्रान्क्षीरशांतिं च कारयेत्॥ १७८॥

गल ४

राम

॥ रक्तानामेकवर्णानां गवां क्षीरं समाद्दिशेत् ॥ कृत्वा कृतिशतं विप्रो माहेंद्रेणैव मंत्रवित् । सुव
र्णमणिसंकाशा कृत्वा तां तेभ्यो रिदक्षिणा । ततस्तच्छाम्यते पापमिंद्राग्निवचनं यथा । प्रतिस्रोतां म
हानद्यः प्रवहंति जलाशयाः । उन्मार्गपथगामी निजलान्यपहरंति च । उद्धरंति जलं भूमौ पुष्क
रिण्यो जलाशयाः । कुमुदोत्पलपुष्पाणां नद्याः स्रोतसि संभवः । संदर्शनं सप्तऋषीणां नागा
नां जलशायिनां । चैत्यवृक्षा महोल्काश्च शुष्यंति च पतंति च । पूयशोणितगंधाश्च कुणपानां
सुगंधिनां । कृमिशोणितवर्षं च छिन्नभिन्नप्ररोहिता । ईदृशानि निमित्तानि सर्वतिलत्रैव गोत
म । परचक्रागमं विद्यात्सर्वलोकभयावहं । राजामात्यभयं ब्रूयात्पौराणां च महद्भयं । औदुंबरी
णां विधिवत्समिधां च समाहितः । सहस्राष्टोत्तरं जुहुयादैंद्राग्नेन च मंत्रवित्तो द्विजानां गोसह
स्रं च कृत्वा तां तेभ्यो रिदक्षिणा । उत्पाता ह्यनिमित्तास्तु ये के चिद्दूयरा रुणाः । गोप्रदानेन शाम्यंति

प्रजापतिमतंयथा॥ व्रतोपवासैर्नियमैर्होमैर्ब्राह्मणतर्पणैः॥ दिव्योत्पातैस्समुत्पन्नैर्माहेंद्रंसाध
येद्बुधः॥ वारुणंचांतरिक्षेचआग्नेयंपार्थिवेतथा॥ तथासंग्रामकालेपिप्रहारणांनिवृत्तये॥ एव
मित्यादिकंलोकेदिव्यभौमांतरिक्षगं॥ नियमैर्व्रतोपवासैश्चशांतिभिश्चप्रशाम्यति॥ देवताय
त्रपूज्यंतेसांवत्सरपुरोहितैः॥ गुरवोग्रहनक्षत्रंतदाशुभलक्षणं॥ ॥इतिमदनरत्नेगर्गोक्ता
नामोत्पातशांतिः॥ ॥तत्रैवदेवीपुराणे॥ अपचारेणलोकानामुपकाराद्दुरात्मनां॥ अपर
क्ता विनाशायसृज्यंतेदेवतामुने॥ उत्पातान्त्रिविधाकारान्दिव्यभौमांतरिक्षजान्॥ सप्राचींदि
शमन्वावर्त्ततेथपद्मस्यमणिकुंकुमस्थालीदर्पणयानछत्रशय्यासनावसथध्वजपताका
गृहैकदेशप्रभंजनेषुगजवाजिमुख्याःप्रमीयंतइत्येवमादीनितानिसर्वाणींद्रदेवत्यानित्र
मुत्तानिप्रायश्चित्तानिभवंतींद्रंवोविश्वतस्परीतिस्थालीपाकमष्टशतंजुहुयात्पंचभिराज्याहु

राम

॥१९०॥

तीरभिर्जुहुयादिंद्रायस्वाहाशचीपतयेस्वाहावज्रपाणयेस्वाहेश्वरायस्वाहासर्वपापप्रश
मनायस्वाहेतिव्याहृतिभिश्चपृथक्जुहोति॥सदक्षिणांदिशमन्वावर्त्ततेथयदास्यप्रजायां
पशुषुशरीरेवारिष्टानिप्रादुर्भवंतिव्याधयोनेकविधाःसर्वतिअतिस्वप्नदुःस्वप्नमतिभोजनमा
लस्याजीर्णंनिगृहद्वारेणवासर्पोगच्छतिकपोतःप्रविशतिशरीरेवारोहतिअंकुल्लास्त्रीअदर्श
नमादर्शइत्येवमादीनितानिसर्वाणियमदेवत्यानिभवंतिनाकेसुपर्णमितिस्थालीपाकं
कृत्वापंचभिराज्याहुतीरभिर्जुहोतियमायस्वाहाप्रेताधिपतयेस्वाहादंडपाणयेस्वाहेश्वरा
यस्वाहासर्वपापप्रशमनायस्वाहेतिव्याहृतिभिश्चपृथक्जुहोति॥सप्रतीचींदिशमन्वाव
र्त्ततेथयदास्यक्षेत्रगृहसस्येषुधान्येषुईतयःप्रादुर्भवंत्युपद्रवावाअनेकविधाआखुप
तंगपिपीलिकमधकंठकशलभकंसोक्ष्मकमित्येवमादीनितान्येतानिसर्वाणिवरुणदेव

त्यानि भवंति घ्नंतीइति वरुणस्योत्तंभनमसीति स्थालीपाकं कृत्वा पंचभिराज्याहुतीरभि
जुहोति वरुणाय स्वाहा पांपतये· पाशपाणये· ईश्वराय· सर्वपापप्रशमनाय स्वाहेति व्याहृति
भिर्हुत्वा सामगायेत्। एवं सर्वत्र जुहोति। स उदीचीं दिशमन्वावर्त्तते थ यदास्य कनकरजत
वस्त्र वैडूर्य मुक्तामणि वियोगो भवति आरंभा वा विपद्यंते मित्राणि वा विरज्यंते वेश्मनि
मधून्यलाबूनि वा जायंते वल्मीका श्वोदीयंते शुष्क वृक्षाः प्ररोहंति तैलं स्त्यायति रात्रौ विद्रव
ति दंष्ट्रादिवा घोषो वाश्चेतं चवा पवंश्मशानेन ग्नोधूमो जायते श्चलरी गर्भं गच्छतीत्येवमादी
नि वैश्रवणदेवतान्यद्भुतानि भवंति अभित्यं देवमिति स्थालीपाकं कृत्वा पंचभिराज्याहुती
रभिजुहोति· वैश्रवणाय यक्षाधिपतये· हिरण्यपाणये· ईश्वराय· सर्वपापप्रशमनाय राम
स्वाहेति व्याहृतिभिश्च पृथक् जुहोति। स पृथिवीमन्वावर्त्तते थ यदास्य पृथिवी स्फुटति ॥१८२॥

स्खलति कंपति ज्वलति रुदति धूमायत्यकस्मात्सलिलमुद्गिरति हसत्युन्निमज्जति निमग्नमुन्मलयति
अकालेषु पुष्पफलानीत्येवमादीन्यग्निदेवत्या॰ भवंत्यग्निर्हूतमिति स्थालीपाकं कृत्वा पंचभिराज्यं
जुहोत्यग्नये स्वाहा हविष्मते॰ शक्तिपाणये॰ ईश्वराय सर्वपा॰ स्वाहेति व्याहृतिभिश्च पृथग्जुहोति।
सोंऽतरिक्षमन्वावर्त्तते यदा स्युर्विवाता वाता वायंते धेषु चापरूपाणि दृश्यंते खरकलं भगध्व
कंकपोतोलूकश्येनभासवायसगोमायुसंस्थान्युपरि पांशुमांसपेश्यस्थिरुधिरवर्षाः प्रव
र्त्तंते काकमिथुनानि दृश्यंते रात्रौ मणिधनुः पश्येच्छुष्कायामं विशीर्त्तिवृक्षाः स्रवंति रुधिरा
ण्याकाशेन गरमेवमादीनि वायुदेवत्यानि भवंति वात आवातु इति स्थालीपाकं कृत्वा पंचभिरा
ज्याहुतीर्जुहोति वायवे स्वाहा मरुद्गणाधिपतये॰ शीघ्रपाणये॰ ईश्वराय॰ सर्वपाप॰ स्वाहेति व्या
हृतिभिर्हुत्वाऽथ सामगायेत्। स दिवमन्वावर्त्तते यदा तारावर्षाणि उल्काः पतंति धूमायंति

द्विशो दर्श्यंति केतवश्चो त्तिष्ठंति॰ गवां शृंगे धूमो जायते॰ गवां स्तनेषु रुधिरं स्रवति॰ अत्यर्थं हिमं नि
पतती त्येवमादीनि सोमदेवत्यान्यद्भुतानि भवंति सोमं राजानमिति स्थालीपाकं कृत्वा पंचभिरा
ज्यं जुहोति सोमाय स्वाहा॰ नक्षत्रपतये॰ शीतपाणये॰ महागणपतये ईश्वराय॰ सर्वपापहे तिव्या
हृतिभिश्च पृथग्जुहोति। सपरं दिवमन्वावर्त्तते देवतायतनानि कंपते देवताप्रतिमा हसंति न
त्यंति रुदंति गायंति स्फुटंति खिद्यंत्युन्मीलंति निमीलंति प्रतियांति नद्याः कबंधमादित्ये दृ
श्यते जलं च परितप्यते कलुपता काछत्रवज्रविषाणानि प्रज्वलंत्यश्वानां वालधिष्वंगाराः क्षरं
त्यद्भुतानि मर्माणि ऋते इत्येवमादीनि विष्णुदैवत्यानि भवंतीदं विष्णुरिति स्थालीपाकं कृत्वा पंचा
ज्याहुतीर्जुहोति विष्णवे स्वाहा॰ सर्वभूताधिपतये॰ चक्रपाणये॰ ईश्वराय सर्वपाप॰ स्वाहेति व्या
हृतिभिर्जुहुयात् कृत्वा पसाम गायेत्। खननाद्दहनाद्भिमर्शनात्कोत्पिराक्रमणाच्चवतुर्भिः शुध्यति ॥१९२॥ राम

तेभूमिः पंचमात्रोपलेपना त्संभारान्त्र दक्षिणमानीयब्राह्मणान्स्वस्तिवाच्य संभारैर्युप
स्पृष्टं तद्वक्ष्यक्षेत्र छाम्यतिह ब्राह्मणेभोजनं हिरण्यंवासोभूमिर्दक्षिणेति। सोथ स्तादिशाम
न्वावर्त्ततेथ यदास्य गर्भमानुषं महिष्यजाश्वोष्ट्राः प्रसूयंतेहीनांगान्यतिरिक्तांगानि विकृ
तरूपाणिवाजायंते अचलानि चलं त्येवमादीनि· रुद्रदैवत्यानि भवंत्याघोराज्ञानमितिस्थाि
लीपाकं कृत्वापंचभिर्जुहोति रुद्राय स्वाहा· पशुपतये· शूलपाणये· ईश्वराय· सर्वपाप· स्वा

भि

हेतिव्याहृतिर्हुत्वासामगायेत्। सऊर्ध्वां दिशामन्वावर्त्ततेथ यदास्य मनुष्याणामतिदुःस्वप
र्वताः स्फुटंतिनिपतंत्याकाशद्भूमिः कंपतेमहाधूमाउन्मीलंत्यश्मानः प्लवंतेच तुष्पादं पंचपदं
भवतीत्येवमादीनि· सूर्यदैवत्यानिभवंत्युदुत्यंजातवेदसमितिस्थालीपाकंकृत्वापंचभि
राज्याहुतीर्जुहोति· सूर्याय· सर्वग्रहाधिपतये· किरणपाणये· ईश्वराय· सर्वपा· स्वाहेति

व्याहृतिभिर्हुत्वाथसामगायेत्। ससर्वादिशोन्वावर्त्तेत्तथयदास्यस्त्रियोयमलानिप्रसूयंतेश्वे
तकाकः काकमैथुनंचदृश्यतेउल्कापाताश्चसर्वत्रदिशांदाहाश्चजायंतेपिशाचराक्षसगोऽथवाविप्
लेषुगिश्वोऽवयतिपशुषुमानुषोभवतिमानुषेषुसर्वाणिसत्वानिपरावोजायंतेवाऽश्वनःकर्म
भिर्वारुद्रंहेपिस्त्रीपुंसयोःपुंश्चल्यभावःसर्वपापेषुबुद्धिरित्येवमादीनि·रुद्रदेवत्यानिभवं
तिविश्वतश्चक्षुरितिस्थालीपाकंकृत्वापंचाज्याहुतीर्जुहोतिरुद्रायस्वाहा·उमापतये·शूल
पाणये·ईश्वराय·सर्वपाप·व्याहृतिभिःपृथग्जुहोति।भूमिकंपंदिशांदाहोग्रहयुद्धंतुजायते।
गगनेदृश्यतेकेतुरादित्यश्चैवकंपते।आदित्येदृश्यतेछिद्रंहलंवर्णाभिजायते।विपरीतानदी
चैवरुधिरंचप्रवाहयेत्।गगनाश्रूयतेगीतंभेघोषश्चैवजायते।एवमादीनिसर्वाण्यद्भुतानि राम·
प्रायश्चित्तानिभवंति।गृहेगृहेभवेच्छांतिर्मातृगणंप्रजनंबलिः।दानंरुद्रजपोनित्यंभास्करे ॥३८३॥

ज्याग्रहार्चनं। लक्षहोमं कोटिहोमं द्रूर्वाहोमं पुरोदितं। गोभूहिरण्यवस्त्रान्नतिलदानं शुभावहं।
पायसं दधिक्षीराज्यं देयं विप्रेषु भोजनं। अथ पूर्वाकृतौ कृत्वा हुत्वा दर्भशमी वीरणान् दधिसर्पि
सर्षपान् कलिनीरमार्गतिलयवव्रीहयः समिधश्चैतान्याहरेत्स्नातः स्थंडिलमुपलिप्य तं त्रेणाग्नि
दनं कृसरं यवान्सक्तु पायसं दधिमधुघृताक्ताः पृथक् चरवः सर्वेषां पायसमग्निं समाधाय जुहु
यादिंद्र विश्वा अवीवृधन्· नाके सुपर्णं· वरुणस्योत्तंभनमसि। अभित्यं देवं सवितारं· अग्निं दू
तं वृणीमहे· इदं विष्णुः· विश्वतश्चक्षुः· गौरीर्मिमाय· क्रीडाक्रीडान्· ध्रुवासि ध्रुवोयं· यो जाना
नि नर्जीयं नै· इहैव स्तं मा वियोष्टं·। पुनः पत्नीमग्निरदादायुषा सह वर्चसा। दीर्घायुरस्या यः प
तिर्जीवाति शरदः शतमिति॥ ॥इति मदनरत्ने देवीपुराणे ऽद्भुतशांतयः॥ ॥अथ प्रासादक
लशलिंगार्चाभंगे शांतिः॥ अद्भुतसागरे नारदः॥ यत्र देवकुले वैजयंतं पतेद्गृध्रो यथा पुनः। कंकोथ

पतते चैव चूडायामग्निदर्शनं। लिंगं वा भिद्यते यत्र कंपते वा निमित्ततः। चूडाभंगे भवेद्यत्र प्रतिमा
भिद्यते थवा। ग्रामोत्साहो भवेत्तत्र स्वामिनो मरणं दिशेत्। तत्र शांतिं प्रवक्ष्यामि येन संपद्यते शुभं।
कुंडं कृत्वा विधानेन ततो होमं समारभेत्। वरुणं वयमद्देवत्यं साधयित्वा विधानतः। सस्रुवणेन
हस्तेन ततः कर्म समारभेत्। अष्टोत्तरशतं कृत्वा घृताक्तसमिधां ततः। माषैर्मुद्गैस्तिलैश्चैव
घृतेन मधुना सह। एभिः पंचसहस्राणि शक्तिबीजेन होमयेत्। होमांते तर्पयेद्विप्रान्दक्षिणा
भोजनादिभिः। भूमिं धेनुमनड्वाहं स्वर्णं धान्यं सदक्षिणं। पंचगव्यं ततः कृत्वा स्नायाद्देवालये
द्विजः। बलिं दत्वा विधानेन कृसरैः पायसैस्तथा। ईशानं स्थापयेत्तत्र बलिं दत्वा विधानतः।
एवं कृत्वा विधानं तु कृतकृत्यो भवेन्नरः। मंडपस्य तथा वृत्तिश्शूद्रादेवकुलस्य चात्र कस्मान्नि राम
पतेद्यत्र कंपते वा निमित्ततः। दधिक्षीरघृताक्तानामश्वत्थसमिधां ततः। जुहुयाद्दशशतं ग्रा १८४।

न्द्रस्मारुद्रेतिमंत्रवित्।धेनुंचदक्षिणांदद्यात्तिलपात्रंचकांचनं॥ ॥इतिशांतिरत्नेलिंगाचादि
भंगशांतिः॥ ॥अद्भुतरत्नेपरिशिष्टे॥गृहमध्येस्थूलाविरोहते॥कपोतोवागारमध्येनिपतेद्यस्यो
वागृहंप्रविशेत्क्रौंचोगृहमारोहेद्वल्मीकंवोपजायतेगोरात्मानंप्रतिधयेदनड्वान्वादिशामुल्लिखेद
ग्नेर्वाधूमोजायते।छत्राकंनिर्यासंवोपजायतेमंडूकोऽवृष्टोवासेत्तस्याप्रेक्षित्दंतपतनेषुवागृ
होत्पातेषुदेवयजनोल्लेखनप्रभृत्यग्निमुखान्कृत्वास्थालीपाकंजुहोतियतइंद्रभयामहइतिपुरो
नुवाक्यामनूच्यस्वस्तिदाविशस्पतिरितियाज्ययाजुहोत्यथाज्याहुतीरुपजुहोतिवास्तोष्पते
शान्नइंद्राग्नीकयानश्चित्रआभुवत्कोअद्यभवतन्नःसमनसावितिस्विष्टकृत्प्रभृतिसिद्धमाधे
नुवरप्रदानादन्याग्नेयेणशमीपर्णेषुकृतशेषंनिदध्यात्तिशान्नोदेवीरभिष्टयइतिस्थालीपाकंस
क्षालनमाज्यशेषंचपात्र्यांसमानीयनिनयेत्प्रोक्षयेद्वा।तच्छंयोरावृणीमहइतिअन्नंसंस्कृत्य

ब्राह्मणान्संपूज्याशिषो वाचयित्वा शिवमित्यद्भुतो व्याख्यातः॥ ॥अथ जनमारशांतिः॥ ॥
हेमाद्रौ गर्गः॥ जनमारसमुत्पत्तिं प्रवक्ष्यामि च शांतिकं। यदा लोभसमाविष्टैः पीड्यंते पार्थिवैः प्र
जाः। रमत्यभद्रं नगरे न च धर्मेण तिष्ठति। न चास्तस्यानुवर्त्तंते प्रजा धर्मं विहाय ताः। क्रोधलोभ
समाविष्टाः साध्वाचारविवर्जिताः। पूजयंति च नो मोहाद्देवान्विप्रांस्तथा पितृन्। तांस्वधर्माभि
भूतांस्तु ततो रुद्रः प्रकुप्यति। अंतकोऽथ स भगवान्भूतानां प्रिय एव च। कुरुते सौ विकारांश्च
हेतुभूतान्पृथग्विधान्। ताराग्रहान्केतुदंडान्कुमारकेकारकान्। ससूर्यसंध्याविकृतीर्घो
रान्याम्मृगपक्षिणः। भूमिकंपोल्कानिर्घातशीतोष्णानिलविक्रियाः। अतिवर्षमवर्षं तु तथैवाकाल
विपर्ययं। औषध्यो रसहीनाश्च भवेदृतुविपर्ययं। रसवीर्यविहीनास्ता रोगान्संसादयंत्यथ। राम·
दिव्यभौमांतरिक्षाः स्युरुत्पाता दोषसूचकाः। संभवंति ततो रोगा दारुणा जनमारणाः। रुद्रस्र ॥१८५ग

कोपजं तस्माज्जनमारं प्रचक्षते। तेनाभिभूताः सर्वे पि लभंते बुद्धिवैकृतं। सत्वं बलं च विकृतिं याति
प्रायेण जंतुषु। ब्रह्मस्वहरणाद्वापि गुरुद्रोहात्तथा तां वधात्। लक्ष्यते जनमारोयं समुत्पन्न इति श्रुतिः।
तस्मात्प्रसादयेद्यत्नाद्देवदेवं महेश्वरं। दैवज्ञेन प्रदिष्टेन विधिना सुसमाहितः। गाणपत्येन विधि
नाथर्वशिरसा तथा। यामलेन विधानेन कुर्याद्देवप्रसाधनं। शिवसूक्तमनुमासूक्तं जपेच्च श
तरुद्रियं। बल्युपहारान्विविधांश्चत्वरेषु निवेदयेत्। आवाहयित्वा सगणं रुद्रं रात्रावेव हि स्तुच।
ब्राह्मणान्भक्ष्यभोज्यैश्च दक्षिणाभिश्च तोषयेत्। प्रसादिते तदा रुद्रे जनमारो निवर्तते। नखैरेष
नानादैवत्यैर्विविधैश्चान्यकर्मभिः। बलाच्छमयितुं शक्यो रुद्रकोपसमुत्थितः। तस्मात्प्र
सादयेद्यत्नैः सर्वाय जगतो हितं। शिवप्रजानां भवति यदा सप्रीयते शिवः। धर्ममंगलशीलश्च देव
ब्राह्मणवैदिकः। सर्वज्ञिवे रतः सर्वैः रूपवर्गैर्मुविर्मुच्यते। जपोपवासनिरतो नृपतिश्च यतेंद्रियः।

युक्तोहोममुपाश्रित्य नियमेन यथाविधि। एवं युक्तस्य नृपतेः कर्मसिद्धिः प्रशस्यते। कर्मणस्त
स्य मूलं हि श्रद्धा नानो नृपः स्मृतः। उपोषितो नरः स्नातः शुक्लवस्त्रसमाहितः। आत्मरक्षांस्वर्थं कृ
त्वा ततः शांतिं प्रयोजयेत्। धर्मात्मा धर्मविदुषां राज राजपुरोहितः। राजा वै सगुणो येषां कुशलं
तत्र वर्द्धते। विष्णुधर्मोत्तरे। रुद्राणां च तथा जप्यं सर्वाघविनिषूदनं। सर्वकामकरो होमस्त्वथ सर्व
त्र शांतिदः। अजाविकानामश्वानां कुंजराणां तथा गवां। मनुष्याणां नरेंद्राणां बालानां पोषि
तामपि। ग्रामाणां नगराणां च देशानामपि भार्गव। उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च। मर
के समनुप्राप्ते रिपुजे च तथा भये। रुद्रहोमः परा शांतिः पायसेन घृतेन वा। मार्कंडेये। उपसर्गानशे
षांस्तु महामारीसमुद्भवान्। तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम। मम दुर्गायाः। अत्र प्रागुक्तो राम
गायत्र्या नृसिंहमंत्रेण वा लक्षहोमः कोटिहोमो वा ज्ञेयौ॥ ॥इति शांतिरत्ने महामारीशांतिः॥ ॥१९६॥

॥ ॥अद्भुतसागरेगार्ग्यः॥काकस्यमिथुनंपश्येत्काकःशिरसिचेद्विशेत्।शिरस्फुरसिवाकुर्यप्रक्षा
घातंनखैस्तथा।विदारणंचकुरुतेशयानंचस्पृशेयदि।तदावदेत्तुमरणंमहारिष्टंमथापिवा।मह
रात्रेपदाकाकोवाशतेहेतुनाविना।तद्गृहारिष्टमाचष्टेग्रामारिष्टमथापिवा।शांतिंतत्रप्रकुर्वीतवि
धानेनयथोदितं।शुचौदेशेरत्निमात्रेस्थंडिलेग्नींनिधायच।तदीशानेचाष्टदलेकुंभस्योपरिशि
क्षितः।हिरण्यनिर्मितंइंद्रंलोकपालसमन्वितं।पूजयित्वास्वशाखोक्तंविधिनाश्रपयेच्चरुं।
कृत्वाज्यभागपर्यंतंजुहुयात्क्रमशोहविः।पालाशीःसमिधोव्रीहींश्चरुमाज्यमितिक्रमात्।अ
ष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा।यतइंद्रेतिमंत्रेणलोकपालेभ्यएवच।लोकपालबलिंदत्वा
इंद्रायेचरुशेषतः।वायसेभ्योबलिंदद्यादिंद्रवारुणमंत्रतः।ऐंद्रवारुणवायव्याःसौम्यावैनैर्ऋ
तास्तथा।वायसाःप्रतिगृह्णंतुभूमौपिंडंमयार्पितं।पूर्णाहुतिंततोदत्वाआचार्यंपूजयेत्ततः।

कुंभोदकेनाभिषेकोयजमानस्यविस्तरात्। आचार्यायेंद्रप्रतिमींद्विजानांभोजनंदिशेत्॥ शांतं तदर्द्धमर्द्धवाशक्त्यभावेदशापिवा। सर्वशांतिंपाठयित्वागृहस्थोयाद्विजाशिषः। एवंकृतेभवेच्छां तिःकाकारिष्टविनाशिनी॥ एवंश्वेतकाकदर्शनेपि। काकोमैथुनयुक्तश्चश्वेतःसपादिदृश्यते॥ इतिहेमाद्रौगर्गोक्तेः॥ केचित्तुश्वेतकाकमैथुनदर्शनेविशिष्टदोषोनकेवलेइत्याहुः॥ तेचेद्य दिपदात्तथैवदृश्यतेयदावृत्त्याचनिमित्तभेदात्शांतांताइत्यपेक्ष्याः॥ ॥इतिकाकमैथुनशां तिः॥ ॥मानवसंहितायां॥ अथातःसंप्रवक्ष्यामिवायसःप्रविशेद्गृहं। प्रवेशाद्वारतोगच्छेन्मा समेकंविसर्जयेत्। द्वारांतरेयदागच्छेत्षण्मासांस्तद्विवर्जयेत्। देवालयेनृपाणांतुग्रामना शोभविष्यति। गृहप्रवेशानेकाकोगृहाशोषुक्षयंकरः। श्वानमार्जारतोगच्छेद्वायसःप्रविशेद्गृ हं। गृहस्थमरणंविद्यात्सर्वनाशोगृहेभवेत्। एतेषांदोषजातानांशांतिंवक्ष्येसमासतः॥ प्र

रामः।

वेशास्थानदेशेषु दक्षिणेवागृहात्ततः। आचार्यवरयेत्पादौ ब्राह्मणं वेदपारगं। व्रीहिद्रोणे वसुश्च
क्षणं स्थापयेद्व्रणं घटं। पंचपल्लवसंयुक्तं पंचगव्यसमन्वितं। पंचरत्नसमायुक्तं पूरयेत्तीर्थवा
रिणा। तस्योपरिन्यसेत्पात्रे काकरूपं शचीपतिं। कर्षमात्रसुवर्णेन पादेनाथ स्वशक्तितः। यतइंद्रे
ति मंत्रेणार्चयित्वा तु देववित्॥ इंद्रादीशानपर्यंतमर्चयेल्लोकपालकमात्॥ कुंभाभिमंत्रणं
कुर्याच्छ्रीरुद्रं च समरंजपेत्। स्वगृह्योक्तेन विधिना होमकर्म समाचरेत्। यतइंद्रेति मंत्रेण
समिदाज्यचरून्हुनेत्। अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा। त्र्यंबकेन मंत्रेण तिलानष्ट
शतं हुनेत्। इदं विष्णुस्तु मंत्रेण लाजहोमं समाचरेत्। उपहोमं ततः कृत्वा महाव्याहृतिभिर्हुनेत्।
इंद्राय स्वाहा। वायसोत्पातशमनाय। शांताय स्वाहेति। ततः स्विष्टकृतं हुत्वा होमशेषं समा
पा पयेत्। सर्षपैस्तैरभिषिंचेत्तु गोयुग्मं दक्षिणां दिशेत्। आज्यावलोकनं कृत्वा महाशांतिं पठेन्न

रः॥ ॥इतिवायसशांतिः॥ ॥श्रीरग्निबंधुनाशश्चवित्तहा निर्मह्यशः।बंधुलाभःपुत्रहानि
स्त्रीचिंतामहतोगदः।पूर्वादीनिफलान्येषामिंद्रलुसेचमस्तके।पंचत्वकपल्लवःस्वर्णपंचामृतफ
लोदकैः।अभिलिंगमंत्रितैर्मंत्रैःस्नानाद्दोषंविमुंचति।एवमेवाग्निर्दाहेपिमस्तकेमेध्यदूषिते।दं
तछेदेकाकहतोसरटीपतनेपिच।लाभदःकुड्यगोधात्रशुभदोयत्व्ययव्ययः।दक्षिणेस्फुर
णोलाभंवामेस्फुरणमन्यथा।स्त्रीणांविपरीतं।सीताकर्पीद्रक्षणदाचराणांवामानिनेत्रा
णिसमुल्लसंतीतिरामायणोक्तेः॥ ॥अथकाकमैथुनशांतिः॥ ॥मदनरत्नेनारदः॥द्दिवा
वाथद्दिवारात्रौयःपश्येत्काकमैथुनं।सनरोमृत्युमाप्नोतियद्दिवास्थानशासनं।अकाकघा
तव्रतेचविंदथीतार्द्धवत्सरं।तद्दोषशमनायेत्थंशांतिकर्मसमाचरेत्।गृहस्येशानभागेतु राम
होमस्थानं प्रकल्पयेत्।स्वगृह्योक्तविधानेनतत्रस्थाप्यहुताशनं।मुखांतेसमिदन्नाज्यैर्हु ॥१९८॥

नेदृष्टोत्तरं शतं॥ प्रतिमं त्र्यंबकेन त्र्यंबकेन अयमस्तु हृदयेन च॥ अपमृत्युमपहत्यध्वमिति मंत्र

हृदयंतेनेति यथास्तिद्धं यातताभिषेहितिरनैर्जया घृतं प्रकल्पयेत्॥ पूर्णाहुतिं च जुहुयात्

स्वस्ति चिरलंकृतः॥ स्वर्णश्रृंगी रौप्यखुरां कृष्णां धेनुं पयस्विनीं॥ वस्त्रालंकारसहितां निष्क

द्वादशसंयुतां॥ तदर्धेन तदर्धेन तदर्धेनाथवा युतां॥ यथा वित्तानुसारेण तन्नाधिकक

ल्पना॥ आचार्याय प्रयत्नेन द्यात्कुटुंबिने॥ ब्राह्मणान्भोजयेत्पश्चात्स्वस्तिवाचन

पूर्वकं॥ एवं यः कुरुते सम्यक् सर्वदोषात्प्रमुच्यते॥ अथ पंचाशदुत्तरशतशांति॥ मदनर

त्नेवृद्धगार्ग्यः॥ मूर्ध्नि राज्यश्रियो वा स्यात् नेत्रयोर्वंधुदर्शनं॥ नासिकायां तु सौभाग्यं वक्त्रे मिष्टान्न

भोजनं॥ कंठे निःस्वं प्रियाश्लेषः॥ स्कंधयोर्विजयो ध्रुवं॥ धनलाभो र्वक्ष युग्मे करयोरर्थसंक्ष

यः॥ वक्षः स्थले तु सौभाग्यं हृदि प्रीतिविवर्धनं॥ पुत्रलाभस्तु नाभौ स्यात् नाभौ कीर्तिविव

र्दनं॥ अर्थलाभस्तुष्टे स्यात्तयोर्द्वयोः सुतदारागमः॥ कटिस्थाने वस्त्रलाभे गुह्यस्थाने स्त्री
मागमः॥ गुदे देशो विनाशः स्यात् रुग्जातो भ्रष्टवाहनम्॥ जंघयोश्च निरुद्योगः पादयो
र्भ्रमणं भवेत्॥ इत्थं पल्याः प्रपातस्य फलं फलं ज्ञेयं विचक्षणैः॥ एतदेव फलं विद्या
त्सरटस्य प्ररोहणे। पल्याः प्रपतने चैव सरटस्य प्रपातने। पंचरात्रे भवेत्तस्य व्याधि
र्वा ऽन्यविशेषतः॥ पतनानंतरं तस्यारोहणं यदि जायते। पतने फलमुक्तं यत् रोहणे
विफलं भवेत्। आरोहणं चोर्ध्ववक्त्रे अधोवक्त्राभिपातनं। भवेद्यदि सुशास्त्रेण तत्फ
लं जायते ध्रुवं॥ मृत्युयोगे दग्धदिने पाते च पकंटके। चंद्राष्टमे नैधने वजन्मर्क्षे वि
षनाडिके॥ अष्टमे क्रूरसुते विष्टिवैधृतिसंयुते। दुर्निमित्ते तयोः पाते निधनं जा
यते ध्रुवं गतयोः स्पर्शनमात्रेण सचैलं स्नानमाचरेत्॥ गव्यं पंचविधं प्राश्य कुर्याद्

कलशे वस्त्रयुग्मेन पूजयेद्विधिनात तः ।२

ज्यावाल्लीकनं। शास्ते नाप्पथवाशास्तेयदा छेदात्मनः शुभं। पुण्याहं वाचयित्वा तु शांतिकर्म
ततश्चरेत्। प्रतिरूपं तयोः कुर्यात्सुवर्णेन स्वशक्तितः रक्तवस्त्रेण संवेष्ट्य गंधपुष्पैः प्रपू
जयेत्। अग्निसंस्थापनं कृत्वा होमं कुर्याद्विधानतः। मृत्युंजयेन मंत्रेण समिद्भिः खदि
रैः शुभैः। तिलैर्घृतैस्तिहोमं च अष्टोत्तरसहस्रकं। महाव्याहृतिहोमं च सर्पिः क्षीरेण का
रयेत्। अभिषेकं ततः कुर्याद्यजमानस्य मूर्धनि। पुष्पैर्वारुणसूक्तैश्च यैः शांतादिक
मंत्रतः। धेनुवस्त्रयुगं दद्यात् कुर्याच्छांतिमुत्तमां। तस्या पुर्विजया लक्ष्मीः। कांतिः पु
ष्टिश्च जायते। पक्षी सरटयोः शांतिविधानं शौनकोदितं। कीर्तितं च फलो येतं वृद्धा
र्येण धीमता॥ इति पल्लीसरटशांतिः॥ नारदः। पल्ल्याः प्रपतने चैव सरटस्य प्ररोहणे। शुभा
शुभं विजानीयात्तत्तत्स्थाननिरीक्षतः। पल्ल्याः प्रपतने सर्वफलमुक्तं शुभाशुभं। प्रीविरा

ज्यश्रियो वाति भर्त्ति त्वैश्वर्यवर्द्धनं सव्ये तु जीनपः । प्रीतिस्तो त्वघसव्येन हृद्वंपंकजत्तौ र सिलभार्य
तु धनलाभस्तथैव च । वामजङ्घौ च निधनं गदितं सर्वसूरिभिः । सव्यहस्ते मित्रलाभो वामहस्ते तु
निस्वता । उदरे हृत्तभाँ तु सुपुत्रा वा । निरूप्यते । वामनागे महारोगः कटंबा सव्येन हृयवः । वाम
कट्यां तु निधनं मुनिभिस्तत्वदर्शिभिः । जातो रेखं विजानीयात्सव्यपादे सुभावहा । वामपादे
तु गमनं इति प्राहुर्महर्षयः । स्त्रीणां च सरटे स्वैव व्यस्तमेतत्फलं वदेत । फलं प्ररोहणे चै
व सरटस्य प्रवारतः । सर्वत्रिषु शुभं विद्या छांतिं कुर्यात्त्वशक्तितः । अशुभस्थाने सुभावाभि
रसुभेरोषशांतये । नत स्वरूपं सुवर्णेन रूपं तथैव च । पत्तं जयेन मंत्रेण वस्त्राभिभिरर्घ्य
र्चयेत् । अग्निं तत्र प्रतिष्ठाप्य जुहुयात्तिलपायसैः । आचार्यो वरुणैः सूक्तैः कुर्यात्तत्रा
भिषेचनं । आज्यावलोकनं कृत्वा यत्ना ब्राह्मणभोजनं । गणेशशाहे च पालार्क दुर्गाहोष्यं गदे
वताः । तासां प्रीत्यै जपः कार्यः शेषं सर्ववराधरेत । अत्रिस्मो र दक्षिणां दद्यात्षोडशोभ्यः । स

प्रतिकृतिः ॥ [illegible] ॥

॥अथकपोतशांतिः॥मदनरत्नेनारदः।आरोहेत्तुगृहंयस्यकपोतोवाप्रवेशयेत्।स्थानहानिर्भ
वेत्तस्ययद्वानर्थपरंपरा।दोषायधनिनांगेहेदरिद्राणांशिवायच।तच्छांतिस्तुप्रकर्त्तव्याजपहोम
विधानतः।ब्राह्मणान्वरयेत्तत्रस्वस्तिवाचनपूर्वकं।षोडशद्वादशाष्टौवाश्रौतस्मार्त्तक्रियापरान्।
देवाःकपोतइत्यादिऋग्भिःस्यात्संचभिर्जपः।कुंडंकृत्वाप्रयत्नेनस्वगृह्योक्तविधानतः।ईशान्यां
स्थापयेद्वह्निंमुखांतेष्टोत्तरंशतं।प्रत्येकंसमिदाज्यान्नैःप्रतिश्रवणपूर्वकं।यतइंद्रभयामहे
स्वस्तिदेतिचत्र्यंबकैः।त्रिभिर्मंत्रैश्चजुहुयात्तिलान्व्याहृतिभिःसह।जयादींश्चततोभक्त्याकु
र्त्तापूर्णाहुतिंस्वयं।विप्रेभ्योदक्षिणांदद्याद्दोषशांतिंततोजपेत्।ब्राह्मणान्भोजयेत्पश्चात्स्व
यंभुंजीतबंधुभिः।एवंयःकुरुतेभक्त्यातस्माद्दोषात्प्रमुच्यते।पिंगलस्यस्वरस्यैवंमधुवल्मीक
योरपि।संपूर्णंमंदिरेहानिःशून्यसद्मनिमंगलं।प्राकारेषुपुरद्वारेप्रासादाद्येषुवीथिषु।ततः

संग्रामपस्यैवसीम्निसीमाधिपस्यच।शंतिकर्माखिलंकार्यंपूर्वोक्तेनक्रमेणतु॥ ॥इतिक
पोतपिंगलादिशांतिः॥ ॥अथाश्विनशुक्लप्रतिपदिरेवंतपूजा॥ ॥तत्रमंत्रः॥शालिहोत्रे॥
नमोदेवाधिदेवायतुरंगबलचारिणे।सूर्यपुत्रायदेवायतुरंगाणांहितायच।तुरंगपरिषघ
स्यनगजोपरिधावति।साश्वमश्वाधिपंरक्षशरणंत्वांव्रजाम्यहं।रूपनारायणीयेआचारप्र
संमंत्रांतरंयथा।सूर्यपुत्रमहाबाहोछायाहृदयनंदन।शांतिंकुरुतुरंगाणांनरेवंतायनमोस्तु
ते।तत्रैवब्राह्मे।अश्वयुक्शुक्लपक्षेतुस्वातियोगेशुभेदिने।पूर्वमुच्चैःश्रवानामप्रथमंसूर्यमा
वहत्।तस्मात्साश्वैर्नरैस्तत्रपूज्योसौश्रद्धयासमं।पूजनीयाश्चतुरगानवमीयावदेवहि।शां
तिस्वस्त्ययनेकार्येतदातेषांदिनेदिने।धान्यंभक्ष्यातकंकुष्ठंवचांसिद्धार्थकांतथा।पंचरंगेण राम
सूत्रेणतदातेषांतुबंधयेत्।वायव्यैर्वारुणैःसौरैःशास्त्रमंत्रैःसवैष्णवैः।वैश्वदेवैस्तथाग्नेयैर्हि॥१९॥

मः कार्यो दिने दिने तुरगा रक्षणीया अश्व पुरुषैः शस्त्रपाणिभिः। नवा ताश्वाः क्वचित्तत्र न चवा स्याः
कदाचन। आश्विनशुक्लपक्षे यस्यां तिथौ प्रातः स्वातियोगतां तद्दिनान्नवमीपर्यंतं व्रती प्रतिमायां
रेवंत पूजापूर्वमुच्चैः श्रवसं संपूज्य प्रत्यक्षाश्वान्पूजयेदित्यर्थः॥ शालिहोत्रे॥ नीराजितैश्च तुरगैः कृ
तेच लौहाभिसारिके यज्ञे। अभिषिक्ते राजाश्वे ततो नृपाणां भवेद्यात्रा। आश्वयुक्शुक्लपक्षे तिथौ द्वि
तीयादि सप्तरात्रं तु। वडवारूपेणैका स्वातिः सूर्यस्य वहति रथं। साभारेणाक्रांता क्रुद्धा यान्या
न्निरीक्षते भीक्ष्णं। तेषां तेजः सत्वं बलं कृत्स्नं निगृह्णाति। तस्मात्स्वात्युपतापे वाजिनि पीडा भ
वेन्महती। एवं च सप्तरात्रं स्वातेः संपात एष निर्दिष्टः। तत्र दिवाकरकिरणैरस्पृष्टा वाजिनो रक्ष्याः।
शालां तदोपलिप्तां मनोरमां वर्जितां चरविकिरणैः। नानाकारैः पुष्पैरलंकृतां धूपितां कुर्यात्।
तस्यां स्नातास्तुरगाः सुपूजिताभ्यार्चिताः स्थिता यायां। पुरुषैश्च शस्त्रहस्तैः सप्ताहं रक्षितव्यास्तु

गुग्गुलुहिंगुवयस्छांस्त्वचापामार्गतंदुलेलोह।सिद्धार्थांश्वेलरुछाबभीमाद्धाजिनांके
वे।वयस्छाआमलकी।।तंदुलंबीजं।वेरिंचकल्पयित्वामध्यविधानेनपावकंजुहुयात्।।शा
लिहोत्रगदितेनमंत्रेणानेनहोमयेत्।रोहिताश्वमहाभागहव्यवाडमरोत्तम।धूमध्वज
कलद्वारस्वर्गस्यप्रथितःपथि।उत्तिष्ठहोमंगृह्णीमेंशांतिरस्तुरुयपुच।स्वाहेतितत्रमं
त्रेणप्राययेत्प्रथमाकुतिं।ततःप्रजापतींद्रायसोमायवरुणायच।वैवस्वतेकुबेराय
सुषेणायाहिरण्यायिने।आदित्येभ्यस्तथाश्विभ्यांरुद्रेभ्योवसुभिःसह।।विष्णोश्चविश्वे
देवानांसाध्यानांगुरुभिःसह।स्वाहाकारेणजुकुयात्प्रथमेहव्यवाहने।प्रजापत्यादि
मरुद्देतेभ्यःसमस्तेभ्यःएकाकुतिरुपनारायणः।विद्याधरयक्षगंधर्वनक्षत्रोडुगण
स्हांवरवासुकीप्रभृतीनांगरुडश्चपौर्णमासीदेवतानदीनांसागरवनस्पतीनांस्वाहा

कारेण जुहुयात्। अन्येभ्यो देवेभ्यः स्वाहा इति तिस्रः। वादित्रं वाहनागारे गानं निसं
प्रयोजयेत्। अतिक्रम्य च सप्ताहमष्टम्यां स्नापयेद्धयान्। वरुणाय बलिं दत्वा पश्चा
त्तोयेवगाहयेत्। अष्टम्यां द्वितीयाद्यष्टमतिथौ नवम्यामित्यर्थः। ततः शुक्लनवम्यां तु नि
ष्क्रम्य नगराद्बहिः। नवम्यामतीतायां दशम्यामित्यर्थः। तथा च भोजराजः। उत्सवं विधि
विहितं बलिं च नीराजनं च बलवृध्ये। आश्वयुजेऽष्टम्यादिषु कुर्वीत यथाक्रमं नृपतिः
दिशि पूर्वोत्तरायां तु देशे प्राक्प्रवणे शुचौ। तत्र तोरणमुत्थाप्य दशहस्तसमुच्छ्रितं॥
विस्तारेषोसमाख्यातं ध्वजमालाविभूषितं। शुद्धस्नातास्ततो वाहाः सान्नाहिकपुरः
सराः। पुण्याहब्रह्मघोषैश्च गीतवादित्रनिःस्वनैः। सूतमागधगंधर्वैः स्तूयमानाः
स्वलंकृताः। शास्त्रहस्तैश्च पुरुषैस्तथैवाश्वोपजीविभिः। नेतव्या रक्षमाणाश्च तत्र तो

रथासंनिधो। दक्षिणेस्तंभनिकटे कृत्वाचाग्निं पुरोहितः। अष्टोमनुष्या अव्यंगा उल्का
हस्ताद्विधास्थिताः। तेनाग्निव्यक्तिहारेण कुर्युरुल्काप्रदीपनं। हविःशेषेण राजाश्वं
प्राशयित्वानुतर्पयेत्। चरुशेषेण पिंडं वाजिने दद्यादित्यर्थः। अश्वराजपुरोधास्तु
विष्णुस्तेपुरतस्थितः। वरुणः पाशहस्तस्त्वां पृष्ठतः परिरक्षतु। वैवस्वतकुबेरौ च
पार्श्वयोरभिरक्षतां। चंद्रादित्योप्रष्ठवंशामुदरं पृथिवीधराः। रक्षंतु यक्षगंधर्वा
बलभिद्गोरदानुते। हविःशेषमिदं प्राश्य विजयार्थं महीपतेः। तत्स्त्वं प्राशितं चापि
पूजयेद्द्विषजांबरः। कर्णजापमिदं चास्य दक्षिणे श्रवणे न्यसेत्। कुलाभिजननं
ज्ञात्वा लक्षणैर्व्यंजनैः स्थितं। कर्तारमभिरक्षस्त्वं शिवस्तव भवेदिति। अंकं दंडमभि
शानिक्षमस्व तुरगोत्तम। एवमामंत्रितो वाजी ब्रह्मघोषनिनादितः। सेव्यमानः

कुशोत्सृष्टैर्वारिभिर्मंत्रसंस्कृतैः। ततस्तोरणमध्येतु मंत्रिभिः सहपार्थिवः। निर्गच्छेज्ज
यमित्युक्त्वाशेषैरनुगतोहयैः। कुर्याद्दाश्वयुजं कर्म सर्वमेतद्दशेषतः॥ ॥इतिरूपना
रायणकृतशालिहोत्रोक्ताश्वशांतिः॥ अथमदनरत्नेश्वशांतिः॥ शालिहोत्रे॥ उत्पा
तेषुनिमित्तेषु वाजिनामिंगितेषु च। हयशालोत्तरे भागे स्थंडिलेतच्च कल्पयेत्। त्रिरा
त्रोपोषितस्तत्र शांतिं कुर्यात्प्रयत्नतः। नचवासोभिरास्तीर्णं स्थंडिलंतु चतुर्दिशं।
उदकुंभास्तु चत्वारः स्थापनीयाश्चतुर्दिशं। रसपात्राणिदेयानि पूर्णकुंभेषु तेषुथ।
रसाः। घृतदुग्धदधिमधुरूपाः। शिरस्यलंकृतोष्णीषो यथावत्कृतमंगलः। आकृती
र्जुकुर्याद्धोमं घृतेनतु समाहितः। पितामहाय रुद्राय स्कंदाय वरुणाय च। अश्विन्यो
र्वैवनारायणे शक्राय च तथाग्नये। वायवे चाथ हरये श्रियै दैवतथैव च। गंधर्वेभ्यश्च

सोमाय उच्चैःश्रवस एव च। रेवन्ताय भवेत्तत्र उत्पातस्य तु कारिणी। मंडले तां विदित्वा
च बलिभिश्चाथ पूजयेत्। नातमष्टाधिकं कृत्वा प्रतिदेवं पुरोहितः। ततस्तु पूजनं
कुर्याद्देवतानां विशेषतः। पायसोल्लेपिकादीपधूपमाल्यानुलेपनैः। मधुपायससं
मिश्रं विप्रा भोज्याः सदक्षिणाः। एकैकं देवमुद्दिश्य दत्त्वा सप्ताष्टपंच वा। सुवर्णं चंदनं
वासो गां च कांस्यं च दक्षिणा। निष्कृत्यर्थं तदा देयं त्रिरात्रं तु सहि भुजा। ब्राह्मणांश्च पूज
येत्सर्वान्स्वस्ति वाच्या द्विजोत्तमाः। एतद्धि शांतिकं कार्यं सर्वोत्पातविनाशनं। रा
ज्ञो विजयदं पुण्यं धनधान्यविवर्धनं॥ इति मदनरत्ने शालिहोत्रोक्ता अश्वशांतिः।
॥ ॥ अथाश्वगजशांतिः॥ मदनरत्ने गारुडे। अथ राज्ञा प्रकुर्वीत चतुर्थ्यां गजवाजि
नां। शांतिमामयतप्तानां नद्युत्पातोदयेसति। कबलानि च नादंते यदा त्वश्रूणि तु

चति। नानाव्याधिसमुत्थाभिः पीडाभिः पीडयते यदा। अरिष्टेपि समुत्पन्ने तथोत्पा
तभयेषु च। तदा शांतिं प्रकुर्वंति गजानां वाजिनां तथा। शांत्यर्थं गजवाजीनां मंड
पं चतुरस्रकं। द्वादशारत्निमानेन संमितं कारयेत्सुधीः। कुंडं त्रिमेखलं कुर्याद्धस्तं
वा चतुरस्रकं। तत्पुरस्ताद्दक्षिणतः पश्चिमे वोत्तरे तथा। चतुरस्रं ततः कुर्यात्कुंडं
हस्तप्रमाणतः। कोणेषु च तथा कुर्याद्धस्तं वार्धत्रिकोणकं। अर्कपालाशखदिरबि
ल्वाश्वत्थघटैरपि। औडुंबरायापामार्गसमिद्भिस्तत्र तत्र च। मध्ये सर्वसमिद्भिर्वा
पलाशैर्वाज्यबिल्वकैः। तिलतंदुललाजाभिः सक्तुसिद्धार्थशालिभिः। यवैरपि
त्रिमध्वक्तैर्मध्ये सर्वमिति स्थितिः। दध्ना च पयसा चैव घृतेन मधुनापि च। कोणेषु च त
थाज्येन मध्ये तु सकलैरपि। स्थापयेत्तु ततः कुंभानष्टासु सर्वदिक्षु वा। वस्त्रयुग्मेन सं

छन्नान्सर्वौषधिसमन्वितान्। सर्वरत्नयुतान्युग्मान् गंधपुष्पोदकैरपि। चतुरः कलशांस्तत्र चतु
र्ष्वपि समंततः। कोणेषु च यथान्यायं जलवस्त्रादिकैर्युतान्। स्मरेत्प्रधानकुंभे तु नरसिंहाकृतिं हरिं।
चक्रशंखगदापद्मवज्राभिन्नारशक्तयः। पूर्वादिक्रमयोगेन ध्यातव्याः कलशेष्वपि। वह्न्याद्याशादिदिक्
पालकांस्तत्र तत्र च पूजयेत्। प्रधानकुंभात्पुरतः कुर्याच्च तत्र मंडलं। तत्र संपूज्य देवेशं पश्चाद्धोमादि सा
धयेत्। मंडलाग्रे न यः कुंभे कुंभाग्रे कुंडमेव च। सर्वत्रानलसंस्कारः स्वगृह्योक्तेन कर्मणा। जुहुयाद
ग्निसिध्द्यर्थे साज्याहुतिसहस्रकं। आनुष्टुभेन मंत्रेण गुरुर्वा स्यात्पुरोहितः। आनुष्टुभो नृसिंहमंत्रः
स्याद्वा नृसिंहविज्ञेन होमयेदयुतं स्वयं। समिदाज्यचरूण्येवं कलामंत्रीः समाहितः। संपात्याज्या
हुतिं तां च सहस्रं वायुतं चरेत्। ततः स्विष्टकृदित्यादि समाप्य विधिवत्ततः। संस्पृश्योदुदरकुंभं
च जपेद्दशसहस्रकं। पूर्वं तत्कलशान्स्पृष्ट्वा जपेत्तत्र सहस्रकं। अंतरेषु च कुंडेषु गायत्र्या प्र
णवेन च। कृत्वाग्नेर्युगपत्कार्यं होमतंत्रं तु पूर्ववत्। प्रतिकुंभे सहस्रं च जपेत्तानप्युपस्पृशेत्।

पूजयेल्लोकपालादीन् गंधादिभिरतंद्रितः। अथराजानमाकार्यस्वास्तीर्णेसिंहविष्टरे। कुंभोद
केनदेवाग्रेतन्मंत्रेणाभिषेचयेत्। पर्यंलकलत्रोश्चापिन्नृपंपश्चाद्गजादिकं। गजादीनवशिष्टे
नतोयेनस्नापयेद्बुधः। अन्यवाहादिपोश्चैवसर्वानेवसमाहितः। बाह्यकुंभोदकेनेवस्नाप
येत्तत्रसाधकः। राज्ञोनीराजनंकुर्याद्वाहनेषुचमंत्रवित्। दक्षिणामथ्यलंदत्वाकृत्विग्भ्योगु
रवेन्नृप। विकृतंवस्त्रभूषादिआचार्यायनिवेदयेत्। ग्रामदानेश्वरत्लेश्चविप्रेज्ञान्पूजयेत्सु
धीः। सर्वालंकारसंयुक्तेराजवाहोपरिस्थितं। आचार्योराजभवनेनृपंसंवेशयेत्स्वयं। पूर्वे
स्नानावशिष्टेनकुंभतोयेनमंत्रवित्। गजशालोचसंप्रोक्ष्यवाजिशालांतथैवच। सिद्धा
र्थतंडुलैः पुष्पैः फलैश्चाप्यवकीर्यच। शालामध्येनृसिंहंचसुदर्शनमनामयं। पूजयेद्गंध
पुष्पाद्यैः सर्वालंकारसंयुतं। सत्कुंभिःकुसरान्नेनकुर्याद्भूतबलिंचाहिः। ततः शालासुसर्वा
सुब्राह्मणान्भोजयेद्बहून्। ततः संवेशनंकुर्यादाचार्योगजवाजिनं। एवंशांतौकृतायांतुस
र्वबाधाविवर्जितः। संपन्नोगजयुक्तस्तुनृपस्तेनप्रजायते॥ इतिमरनस्त्नेगारुडेगजाश्वशांतिः॥ ॥

॥अथपसुमारशांतिः॥ ॥परसुरामप्रतापेब्रह्मांडे॥यदापश्रूनांपुरदेशामध्येदुष्टग्रहाः स्युः
हमियुक्तास्त्वकाले।ज्वरातिरोगेनतदैवविधान्मारापश्रूणांसमुपागतेयं।तत्रमात्स्ये।पश्रू
नांमरकेप्राप्तेनराणामथदारुणे।एतेषुदृश्यमानेषुरौद्रीशांतिस्तदेष्यते॥॥अथगोशांतिः॥
गर्गः॥व्याधयस्तुद्दराप्रोक्ताग्रवांवक्ष्यामितांस्तुते।उद्वेगोहृदयश्याहीपतनंमोहनंतथा।गलिं
गः पूतनाचैवदारुणोघोटकस्तथा।कर्णालंबश्चगोघ्नश्चहराग्गोव्याधिरुच्यते।तेषांरूपसमु
त्थानांशांतिंचापिब्रवीमिवः।रात्रौगावेषुयागावोविचसंतियतस्ततः।अश्रुप्रमोक्षंकुर्वंतिव्रजं
तिचपतंतिच।श्रोणितंचैवकुर्वंतिपुरीषंमूत्रमेवच।ॐकारंचैवकुर्वंतिरोमंथोबलमेवच।प्रति
ष्ठाप्याग्रतोदेवान्वेदिंकुर्यात्स्वमाणतः।देवायहाः।पूर्णकुंभान्कुशान्माल्यंलाजांश्चैवाथपोळि
काः।मेध्यंमांसंसुपक्वंच।तथैवतिलपिंडकाः।घृतसर्षपतैलेनसर्वपानक्षतांस्तथा।शुक्लाग्र

राम ॥१९५॥

त्रिसरान्यात्न्समिधश्चसमाहरेत्।उदुंबरंपलाशंचखदिरंबिल्वमेवच।अश्वत्थंचैवदूर्वांच
समिधस्तत्रकारयेत्।ततोरुद्रंसंपूज्यस्तुतिः॥यथा॥ब्राह्मणब्रह्मशब्देनस्तुवंतेसततंतुयं॥
सशिवः२॥श्चतोदेवोगोषुमारींव्यपोहतु।पूज्यतेसततंभक्त्याविष्णुनाप्रभविष्णुना।सशिवः०।
श्रीमतारुचिरांगेणघंटाकर्णगणेनयः।नित्यंप्रणम्यतेयोसौहर्षेनानन्यचेतसा।सशिवः०।
नित्यंरुद्रबलोपेतोरुद्रभक्तिसमन्वितः।घंटाकर्णगतोदेवोयःशिवोज्ञानसाधकः।शिवयो
गानुभावेनगोषुमारींव्यपोहतु।शिवायदेवदेवायमहादेवाययोगिने।रुद्रायस्थाणवेनित्यंना
गहारायतेनमः॥पराशरायसिद्धायमंत्रसिद्धिप्रदायिने।त्र्यंबकायमहेशायअनंतायनमो
नमः॥अभिमंत्र्यशिवंतोयमेतैर्मंत्रैर्यथाक्रमं।प्रोक्षयेतगवांदेहंततःशांतिर्भवेद्ध्रुवं॥इदं
यःपठतेगोषुरोगार्त्तासुविशेषतः।गोशांतिकृत्सदाकालंगोषुशांतिर्भवेद्ध्रुवं॥ॐ॥ ॥

॥इतिगोशांतिः॥ ॥अथाश्वशांतिः॥परशुरामप्रतापे॥स्कांदे॥देशमन्यंनयेक्षिप्रंवाहानन्यांश्च
दूरयेत्॥एवंतंपूजयेत्तत्रमहाकालींहरींहरं॥सहस्रकलशस्नानंरवेरद्भुतनाशनं॥अश्वानांव्याध
योयत्रशत्त्याब्राह्मणभोजनं॥दद्याद्देवल्कतेक्षिप्रंव्याधिःशाम्यतिवाजिनां॥ईश्वरस्यकुबेरस्य
यमस्यवरुणस्यच॥बृहस्पतेरुशनसोमहेंद्रस्यविवस्वतः॥पूजांकुर्यान्नरोनित्यंहोमंचापिवि
चक्षणः॥तत्रमाहेश्वराःसप्तमहादेवाद्विनिर्गताः॥चत्वारोराजसास्तेषुमुनिभिःपरिकीर्तिताः॥
त्रयोरौद्राःसुराज्ञेयायेचैवघ्नंतिवाजिनः॥वाहप्राणहराराजन्रुद्रस्यवशवर्तिनः॥त्रिदिनंचै
वसप्ताहंदशाहंपक्षमेवच॥यावत्कालंकर्मकुर्यात्पूजयेत्तावदेवहि॥तावदेवचहोमंचकुर्या
द्रुद्रपुरःसरं॥देवतानांप्रसादेनरोगान्मुंचंतिवाजिनः॥ ॥शालिहोत्रः॥स्थानापकर्षणंकृत्वा राम
न्शिवपूजाविधीयते॥उच्चैःश्रवाहयःपूज्योनक्षत्रमपिजन्मनः॥विनायकोपसृष्टेनपूज्यो ॥१९६॥

पायसंस्थापयेद्बुधि। अष्टादशप्रमाणेध्मान्दध्यादश्वत्थमीमयान्। पालाशीः समिधः सप्त
सप्ततेइति स्थापयेत्। आघाराबाज्यभागौ तु हुत्वा पूर्वक्रमेण तु। जुहुयाद्दाहुतीः सप्त जात
वेदस इत्यृचा। स्थालीपाकस्य जुहुयात्पुनर्वै जातवेदसे। तरत्समंदी सूक्तेन चतस्रो जुहुयात्त
तः। धमायेति च सप्तान्याः स्वाहांता जुहुयात्ततः। इदं विष्णुस्ततः सप्त जुहुयाद्दाहुतीर्नृप।
नक्षत्रेभ्यस्ततः स्वाहा सप्तविंशतिराहुतीः। नक्षत्राहुतयः कृत्तिकाभ्यः स्वाहेत्यादिभिर्मं
त्रैः कार्याः। तत्ररोहिणी इत्यपुष्यहस्तत्रयानुराधादित्रयाभिजिद्वयशतभिषग्रेवतीष्वेक
वचनं। पुनर्वसुफाल्गुनी इत्यविशाखाश्विनीषु द्विवचनं। शेषेषु बहुवचनं। यत्कर्मणेति
जुहुयात्ततः स्विष्टकृतं पुनः। ग्रहहोमस्ततः कार्यस्तिलै राज्यपरिप्लुतैः। प्रायश्चित्तं ततो हुत्वा
होमकर्म समापयेत्। ततस्तु तूर्यनिर्घोषैः काहलाशंखनिःस्वनैः। यजमानस्य कर्त्तव्यो

स्यभिषेको द्विजोत्तमैः। काश्मर्यवृक्षसंभूते समे भद्रासने स्थितं। काश्मर्यः श्रीपर्णी निर्मिते। वे
दीमध्यगतं कृत्वा दुर्निमित्तप्रशांतये। पंचभिः कलशैः पूर्णैर्मंत्रैरेतैर्यथाक्रमं। सहस्राक्षेण
प्रथमं ततश्चैव शतायुषा। सज्जोषसा चेंद्रश्रुतिविश्वाभिर्वरुणेति च। द्रुपदादिवेति च ततः
स्नापयेयुः समाहिताः। ततो बलिं प्रतिदिशं विचित्रान्नसमन्वितं। नमोस्तु सर्वभूतेभ्य इति मं
त्रमुदाहरेत्। स्नातस्य ब्राह्मणाः सर्वे पठेयुः शांतिमुत्तमं। शांति तोयेन धारां च पातयित्वा स
मंततः पुण्याहवाचनं कृत्वा शांतिकर्म समाचरेत्। तीर्थे देवालये वापि गोदोहं कारयेद्बुधः।
क्षितिं हिरण्यवासांसि शयनान्यासनानि च। विप्रेभ्यो दक्षिणां दद्याद्यथाशक्त्या वि
मत्सरः। दीनानाथविशिष्टेभ्यो दद्याच्चैव युधिष्ठिर। भोजनं चानिशं दत्वा ततः सर्वं प्रसिध्य
ति। आयुश्च लभते दीर्घं शत्रून्विजयते क्षणात्। दुर्गाणि चास्य सिध्यंति पुत्रांश्च लभते ॥१९६॥

त्रे
राम

गणपतिर्भवेत्। हयमारे समुत्पन्ने हयानां चाप्युपद्रवे। इमां शांतिं प्रवक्ष्यामि तन्मे निगदितः
शृणु। अहोरात्रोषितो भूत्वा शांतिं कुर्यात्पुरोहितः। चत्वारो ब्राह्मणास्तस्य सहायास्स्युर्जितेंद्रि
याः। ऋग्वेदपारगश्चैको द्वितीयो यजुषां वरः। तृतीयः सामविन्मुख्यश्चतुर्थश्चाथर्ववित्।
मध्येग्निकुंडं कुर्वीत मंडपं तु समंततः। विदिक्षु विन्यसेत्कुंभान्पूर्णान्नोषधिवारिणा। रसपात्रं
न्यसेत्तेषु ईशानादिक्रमेण तु। सर्पिषः पयसो दध्नो मधुनश्च यथाक्रमं। कुंभस्थं पूर्वभागे तु
यजेद्देवेश्वरं विभुं॥ दक्षिणे तु यमं कुर्यात्पश्चिमे वरुणं तथा। उत्तरे तु तथा भागे यजेद्देश्चव
णं विभुं। देवाश्च पूज्या विधिवदाज्यहोमस्ततो भवेत्। ततः पूर्ववद्देवतामंत्रजपश्चाभिषेक
श्च॥ ॥इति शालिहोत्रोक्ताश्वशांतिः॥ ॥अथ खरशांतिः॥ परशुरामप्रतापे स्कांदगा
रुडयोः। अष्टोत्तरायुतं कुर्यादग्निसूक्तेन वैद्विजः। जपं होमं च रुघतात्खराणां शांतिका

रणं।अग्निंदूतमितिसूक्तेन॥ ॥अथसारमेयशांतिः॥ ॥तत्रैव॥एवमेवप्रकर्त्तव्यासारमेयरुजापहा।शांतिःशांतिविधानज्ञैःपूर्वदृष्टेनवर्त्मना॥इतिसारमेयशांतिः॥ ॥रुद्रउवाच॥महाशांतिंप्रवक्ष्यामिमहादेवेनभाषितां।पार्थिवानांहितार्थायमहादुस्तरतारिणीं।नृपाभिषेकेसाकार्यामहादुस्तरतारिणी।नृपाभिषेसाकार्यायात्राकालेनृपस्यच।दुःस्वप्नेदुर्निमित्तेचग्रहवैगुण्यसंभवे।छत्राकविद्रुमानांचस्वस्थानात्पतनेभुवि।काकोलूककपोतानांप्रवेशोवेश्मनस्तथा।क्रूरग्रहाणांचक्रेषुजन्मादिषुविशेषतः।जन्मनिद्वादशेचैवचतुर्थेवाष्टमेतथा।यदास्युर्गुरुमंदाराःसूर्योपिचविशेषतः।आरोभौमः॥युद्धेग्रहाणांसर्वेषांसूर्यशीतांशुकीलके।वस्त्रायुधगवाश्वेषुमस्तकेशायनासने।यद्यग्निःपरिदृश्येतरात्राविंद्रधनुस्तथा॥ रामतां।कुर्युर्ब्राह्मणाःपंचकुलशीलसमन्विताः॥चतुर्वेदास्त्रिवेदाश्चद्विवेदाश्चापिपांडव।आ॥१९॥

हस्तमात्रं ३

थर्वणा विशेषेण बद्धा चाश्व सुसंयताः। कृच्छ्रोपवासनक्ताद्यैः कृतकाया विशोधनाः। पूर्वमारा
ध्य मंत्रांस्तु प्रारभेत ततः क्रियाः। कृत्वा द्वादश हस्तं वा मंडपं कारयेच्छुभं। तन्मध्ये वेदिकां कुर्याच्च
तुर्हस्तप्रमाणतः। आग्नेय्यां कारयेत्कुंडं सप्तहस्तं सुशोभनं। मेखलात्रयसंयुक्तं योन्या वापि
समन्वितं। रवींद्वोरुपरागेषु महोल्कापातनेषु च। उत्पातेषु तथान्येषु निमित्तेषु च सर्वशः। स
र्वरिष्टोपशमनी महाशांतिः प्रशस्यते। चारुवंदनमालांश्च तोरणालंकृतेषु च। गोमयेनोप
लिप्य च मंडपे तेद्विजातयः। कर्म कुर्युः इति शेषः॥ ततस्तु पंच कलशांस्तस्यां वेद्यां निवेशयेत्।
आग्नेयादिषु कोणेषु पंचमं मध्यतस्तथा। अष्टपत्रेषु मध्ये चूतपल्लवधारिणः। ब्रह्मकूर्चविधा
नेन पंचगव्यं तु कारयेत्। गोमूत्रं ताम्रवर्णायाः इत्यादिना मंत्रवत्पंचगव्यं कुर्वीतेत्यर्थः॥ औ
षधीः पंचरत्नानि रोचनां चंदनं तथा। सिद्धार्थकान् शमी दूर्वा कुशान्व्रीहियवांस्तथा। अपामा

र्गंफलवतीं न्यग्रोधोदुंबरौ तथा। प्लक्षाश्वत्थकपित्थाश्च प्रियंगूंश्चूतपल्लवान्। हस्तिदंतमृदं
चैव कोणकुंभेषु विन्यसेत्। फलवती गंधा प्रियंगुः। प्रियंगुः कंगुः पुष्पती। थैदिकोपेतं पंचगव्यं
च मध्यमे। ऋचं वाचमिति दं च वह्निकुंभाभिमंत्रणं। आप्तुः शिशानं नैर्ऋत्यां यद्देवा नायुगेऽथ च
रे। ईशावास्यं चतुर्थस्य कुंभस्य त्वभिमंत्रणं। मध्यमे त्वथ जसव्या रुद्राः कुंभमनुस्मृताः। गं
धपुष्पाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः। फलैश्च नारिकेलाद्यैर्दीपकैः कुंभपूजनं। स्वस्तिवाच
नकं चैव कारयेत्तदनंतरं। क्रमेणानेन शनकैरग्निकार्यं प्रयोजयेत्। मंत्रानीत्तभिराग्निं च
पूर्वमेव निधापयेत्। पूर्वं कलशस्थापनात्। हिरण्यगर्भः समितिब्रह्मासननियोजने। कया
नसाप्रणीयापो मंत्रेण विनिवेशयेत्। हव्यसंस्करणं वह्नेराज्यसंस्कारमेव च। अथवा सार
येदत्र द्रव्यं यस्य प्रयोजनं। ततः पुरुषसूक्तेन पायसश्रपणं भवेत्। अभिघार्याथ संसिद्धं ॥१९७॥

राम

शुभान्॥उत्साताः प्रशमं यांति ग्रहपीडाश्च दारुणाः॥यथा शस्त्रप्रहाराणां कवचं वारणं भवेत्॥तथा दैवोपघातानां शांतिर्भवति वारणं॥अहिंसकस्य दांतस्य धर्मार्जितधनस्य च॥दयादाक्षिण्ययुक्तस्य सर्वे सानुग्रहा ग्रहाः॥अर्थान्समर्धयति वर्द्धयते च धर्मं कामं प्रसाधयति तस्य विनष्टिपापं॥यः कारयेत्सकलदोषहरीं महार्थां शांतिं प्रशांतहृदयः पुरुषः सदैव॥
॥ ॥इति कमलाकरभट्टकृते शांतिरत्ने भविष्योक्ता शांतिः॥ ॥अथापमृत्युनिवारणं॥
मदनरत्ने बोधायनः॥अथ मृत्युंजयकल्पं व्याख्यास्यामो जन्मनक्षत्रे पुण्यनक्षत्रे त्रिजन्मनि वा ब्राह्मणानन्नेषु परिविष्य पुण्याहं स्वस्ति ऋद्धिं वाचयित्वा देवयजनोल्लेखनाद्यग्निमुखांतं कृत्वा सावित्र्याय यथान्यकान्जुहोति॥प्रादेशमात्रीस्समिधो द्वादशभिर्धोष्ट सहस्रमष्टशतं वा दधिमधुघृतपयांसि संभेत्याभ्यज्यादधाति॥अपैतु मृत्युरमृतं म आगान्वैवस्वतो नो अभयं कृणोतु॥परं मृत्यो॰मा

नोमहांतं॰।भानुस्तोके॰।त्र्यंबकं॰।येते सहस्रमित्यथाऽऽज्याहुतीर्मृत्युर्नश्यत्वायुर्वर्द्धतां भूः स्वा
हा मृत्युर्नश्यत्वायुर्वर्द्धतां भुवः स्वाहेति मृत्युर्नश्यत्वायुर्वर्द्धतां सुवः स्वाहेति स्विष्टकृत्स्त्रकृति
स्विष्टमाधेनुवरप्रदानादथायेणाग्निं हूर्वास्तं बेकृतशेषं निदधाति।तच्छंयोरारणीमहृत्य
यद्दक्षिणां ददाति धेनुं वृषभमनड्वाहं हयं हिरण्यं कांस्यं वासो वेत्याह बोधायनः॥अत्र क्रमः।कं
र्ताष्टौ चतुरो वा विप्रान्संभोज्य पुण्याहादि वाचयित्वा संकल्प्याग्निं प्रतिष्ठाप्यानिर्वापादिना
सवित्रेयवमयं चरुं श्रपयित्वाऽऽज्यभागांते चरुमवदाय सावित्रीमनूच्य तथैव हुत्वा तिस्रो हूर्वा
गव्यदध्याघृताक्ता अपेतु मृत्युरिति षड्भिः षड्जुहाभाज्येनाग्न्यादिनाम मृत्युर्नश्यत्विति तिस्रीन् उपहोमा
न्हुत्वा यदस्येति स्विष्टकृतं हुत्वा ब्रह्मविसर्जनांते येणाग्निं हूर्वास्तंभेत तच्छंयोरितिहुतशेषं राम
चरुं निधाय संपूज्य सूर्यं नमस्कृत्य विप्रान्भोजयेत्।एवं स्वकर्तृके।आचार्यपक्षे दक्षिणा॥२०॥

ग्रहयज्ञायुतं॰ दिनत्रयं रोगिणा कार्यं। प्रबलरोगे यावद्रोगनिवृत्तिः प्रत्यहं कार्यं॥ ॥ अथ दू
र्वागुडूचीहोमः॥ अथ महामृत्युंजयहोमं व्याख्यास्यामः॥ कृत्याद्रोहेभिचारे दीर्घरोगे ग्रहपी
डायां मृत्युकष्टे सौमहाव्याधौ महापदि चंद्रसूर्यग्रहणदोषे जन्मनक्षत्रे विषनाड्यां कुहूव्रजे वा अ
न्येषु महाभयेषु परिहारार्थं मासि मासि जन्मनक्षत्रे प्रोक्ते काले वा वत्सरे वा आचार्येण वा स्व
यं वा आयुष्कामः कर्त्तव्यः। स्नात्वा पुण्याहं वाचयित्वा प्राणानायम्य अमुककर्मण आयुष्का
मार्थं महामृत्युंजयहोमं करिष्य इति संकल्प्याग्नेरुपसमाधानादि पात्रप्रयोगकाले दूर्वा त्रि
कस्य षड्विंशदधिकं शतत्रयमासादयेत्। गुडूचीखंडानि चतुरंगुलप्रमाणानि। ब्राह्मणो दक्षि
णतो दर्भेषु निष्पाद्य व्रीहितंडुलान्वा निर्वपति। मृत्यवे त्वा जुष्टं निर्वपामीति। तूष्णीमवहन
नांतं कृत्वा प्रक्षाल्योत्पूय आज्यं संस्कृत्य चरुणा सह पर्यग्निकरणं कृत्वा स्रुक्स्रुवयोर्मार्जनं कृ

त्वा चरुमभिघार्योदगुद्वास्य प्रतिष्ठितमभिघार्य परिधिपरिधानप्रभृत्याग्निमुखान्कृत्वाथ
पक्वांजुहोति। दर्व्यांमुपस्तीर्य मध्यात् द्विरवदाय त्रिः पंचावत्तिनो भिघार्य· अपेतिमृत्यः· शचीपतिमि
रिति पुरोनुवाक्यामनूच्य परंमृत्योरनुपरेहि· वीरानिति याज्यया जुहोति। मृत्यव इदं·। पूर्ववद
दुपस्तीर्य· हरिंहरंतमनुविक्रमस्वेति पुरोनुवाक्यामनूच्य माच्छिदोमृत्योमावधीन्मामेबलं
विधेमेति याज्यया जुहोति। मृत्यव इति त्यागः॥ आज्येन महाव्याहृतीभिश्च जुहोति। भूरग्नये
च पृथिव्ये च महते च स्वाहेत्याद्यैः पंचभिः पंचाहुतीर्हुत्वाथ दूर्वात्रिकंगुडूचीखंडानि पयसा
क्तानि जुहोति। षट्त्रिंशदधिकशतत्रयं प्रत्येकं अपैतु मृत्युरमृतंन आगन्· शचीपतिः स्वाहा। परं
मृत्यो अनु· वीरान्स्वाहा। वातं प्राणं जरामशीमहि स्वाहा। अमुत्रभूयादथ पद्यमस्य· शची राम
भिः स्वाहा। त्र्यम्बकेरग्निं· म्यहं स्वाहा। हरिंहरंतं· विक्रमस्व स्वाहा। देवेभ्य इदं। माच्छिदोम॥२०॥

स्योमावा॥धी॰विधेमस्वाहा।मानोमहांतं॰रीरिषःस्वाहा।मानेस्तोके॰विधेमतेस्वाहा।रुद्रायेदं॰।
प्रजापतेनत्व॰रथीएणांस्वाहा।यतइंद्रभयामहे॰अहिस्वाहा।स्वस्तिदा॰भयंकरःस्वाहा।त्र्यंबकं॰य
मामृतात्स्वाहा।अपमृत्यः॰सहस्रिणांस्वाहा।येतेसहस्रमयु॰यज्ञामहेस्वाहा।जातवेदसे॰त्यग्निः
स्वाहा।भूर्भुवःस्वःॐजोबलं।ददद्स्थाववत्वस्वाहा।अमुकस्यमृत्युर्नश्यत्वायुर्वर्द्धतांभूःस्वा
हा।अमु॰भुवःस्वाहा।अमु॰सुवःस्वाहा।अमु॰भूर्भुवःसुवःस्वाहा।इत्येतैरेकविंशतिमंत्रैःषो
डशपर्यायंप्रतिमंत्रंजुहुयात्।षट्त्रिंशदधिकंशतत्रयाहुतीर्भवंति।अथाज्येनाष्टपर्यायंएक
विंशतिर्मंत्रैःप्रतिमंत्रंजुहुयात्।अष्टाधिकंषष्टिशताहुतीर्भवंति।पुनरनेनगुडूच्याषोडश
पर्यायंएकविंशतिमंत्रैःप्रतिमंत्रंजुहुयात्।षट्त्रिंशदधिकंशतत्रयाहुतीर्भवंति।पुनरनेना
ष्टपर्यायैःएकविंशतिमंत्रैःप्रत्यचंचरुंजुहुयात्।अष्टाधिकंषष्टिशताहुतीर्भवंति॥

एवंक्रमेणाष्टाधिकसहस्राहुती।सर्वांति।पुनराज्येनमृत्यवेस्वाहा।मृत्यवेस्वाहेत्यष्टवारंजुहुयात्॥
पुनर्महाव्याहृतिभिर्हुत्वा ततःस्विष्टकृतमवदायहव्यवाहमभिमातिषाहं।हुवेमस्विष्टमग्नेःस्वा
हेतिस्विष्टकृद्धोमंजुहोति।अनंतरंपरिध्यंजनंकृत्वाजपादिपरिषेचनांतंकृत्वाग्रेणाग्निंहविःस्तंबेषु
हुतशेषंनिदधाति।सर्वोवैरुद्रस्तस्मैरुद्रायनमोअस्तु।नमः।विश्वंभूतं०अस्तु॥इतिद्वाभ्यांमंत्राभ्यां
निवेदयेत्।आयुर्दाअग्ने०रक्षतादिमंस्वाहा।इतिअग्नौसमिधमादधाति।जातवेदायदिवा०वद
स्व॥इत्युपस्थायहुतशेषेहविषितुराज्यशेषंनिवेदयेत्।अग्निरायुष्मानितिपंचभिःपुनरेकविं
शतिकुम्भिश्चरुमभिमंत्र्य।आयुरसिविश्वायुरसि०।गेषीइतिसर्वचरुशेषंप्राश्याचम्यजठरम
भिमृशति।यतइंद्रस्वस्तिदाविशइत्येताभ्यां।गुरवेगुरुवरंदत्वादशदानंकृत्वाअवेक्ष्याज्यंदत्वाकृ
त्विग्भ्योदक्षिणांदत्वाब्राह्मणान्भोजयेत्।अपूपैर्घृतपायसैः॥एवंकृत्वायुष्मान्भवति।अयुत

राम

होमाद्दीर्घायुर्भवति ॥ लक्षहोमात्सहस्रायुर्भवति ॥ ॥इति बोधायनोक्तमृत्युंजयशांतिः ॥ ॥०॥
अस्मिन्नन्वाहिते अग्नौ जातवेदसेत्यादि चक्षुषी आज्येनेत्यंते अत्र प्रधानं मृत्युं द्विवारं चरुद्रव्येण
अग्निं पृथिवी महतः वाय्वंतरिक्षं महतः आदित्य द्युमहतः । चंद्रमा नक्षत्र द्युमहतः । देवपितृमराद
यः । आज्येन पुनरत्र प्रधानं वैवस्वतं शचीपतिं । मृत्युं प्रजापतिं अश्विनौ अग्निं हरिं मृत्युं रुद्रं द्वि
वारं । प्रजापतिं इंद्रं मघवंतं । इंद्रमभयंकरं । त्र्यंबकं अग्निं मृत्युं जातवेदसमग्निं जातवेदसं पा
वकं वैश्वानरं । वैद्युतं । अग्निं वायुं सूर्यं प्रजापतिं प्रत्येकं षोडशपर्यायं दूर्वात्रिकयुक्तगुडूचीखंडः ।
पुनस्ता एव प्रत्येकं अष्टपर्यायमाज्येन । पुनरत्र प्रधानं । मृत्युमष्टवारमाज्येन । पुनरत्र प्रधानं ।
अग्निपृथिवी महतः । वाय्वंतरिक्षमहतः । आदित्य द्युमहतः । चंद्रमानक्षत्र द्युमहतः । देवपितृम
रादयः आज्येन । शेषेण स्विष्टकृतमि [illegible] सन्न्वहनेन रुद्रं । चित्तं । चित्तिं । आकूतं । आकूतिं । विज्ञा

तं।विज्ञानं।मनःशाक्करीः।दर्शपौर्णमासौबृहतं।रथंतरं।प्रजापतिं।अग्निंभूतानामधिपतिं।इं
द्रंज्येष्ठानामधिपतिं।यमंपृथिव्याधिपतिं।वायुमंतरिक्षाधिपतिं।सूर्यंदिवोधिपतिं।चंद्रमसं॰।
ब्रह्मस्पतिंब्रह्मणोधिपतिं।मित्रंसत्यानामधिपतिं।वरुणमपामधिपतिं।समुद्रंस्रोतानामधि
पतिं।अन्न१ँ साम्राज्यानामधिपतिं।सोममोषधीनामधिपतिं।सवितारंप्रसवानामधिपतिं।
रुद्रंपशूनामधिपतिं।त्वष्टारंरूपाणामधिपतिं।विष्णुंपर्वतानामधिपतिं।मरुतोगणानामधि
पतीन्।पितृन्पितामहान्परावरान्ततान्ततामहान्।ऋतसहंऋतधामानं।अग्निगंधर्वं॰
षधीनप्सरसःऊर्जुः।सहितंविश्वसामानं।सूर्यंगंधर्वं॰मरीचीनप्सरसः।आयुंषि।सुषुम्नं।सूर्य
रश्मिंचंद्रमसंगंधर्वंनक्षत्राण्यप्सरसःतेकुरयः।भुज्युंसुपर्णंयज्ञंगंधर्वंदक्षिणाप्सरसःतावाः राम
प्रजापतिंविश्वकर्माणंमनसं।गंधर्वंऋचःसामानि॰अप्सरसः।वह्नयः।इषिरं।विश्वव्यचसं।वा ॥२०३॥

तंगंधर्वआपः अप्सरसः। मुदाः भुवनस्यपतिं। परमेष्ठिनमधिपतिंमत्स्यंगंधर्वंविश्वमप्सरस
भुवः। सुक्षितिंसुभूतिं भद्रकृतंसुपर्वतंपर्जन्यंगंधर्वंविद्युतः। अप्सरसः। रुचः। दूरेहेतिममृडयं।
मत्स्यंगंधर्वं। प्रजा अप्सरसः। भीरुवः। चारुंकृपणकाशिवंकामंगंधर्वआधीनप्सरसः। शोचयं
तीं ब्राह्मणीं। प्रजापतिं। अग्निं वायुंसूर्यं प्रजापतिंअग्निंस्विष्टकृतंअयासमग्निंदेवान्‌‌ःअग्निं
वायुंसूर्यंमरुतः आज्येनेत्यंतंकुर्यात्। इत्यन्वाधानेविशेषः॥ इत्यायुष्यहोमेरुद्रचीशांतिः॥
॥ ॥ ऋग्विधाने॥ व्याधिनायोभिभूतः स्याद्घोरेणप्राणहारिणा। चतुर्दशीमुपोष्यैकोहस्तस्य
कुर्याच्चरुं। आतेसूक्तेनरौद्रेणप्रत्यचंवाग्यतः शुचिः। पूर्वमाज्याहुतीर्हुत्वा अथोपस्थायशंक
रं। हविःशेषेणवर्त्तेतएकांतरमतंद्रितः। पूर्णेमासत्रयेमर्त्यः रोगेभ्यश्चप्रमुच्यते। तत्रैव। उपति
ष्ठेनराजानंयमंसूक्तेनवैद्विजः। स्थालीपाकंचकुर्वीतपक्षयोर्यमदेवतं। अष्टम्यांचचतुर्दश्यांच

जेतद्धविषायमं।परेयिवांसमित्येतन्मंत्रमत्रप्रयोजयेत्।पुरायुषःप्रमीयेतनजातुसकथंच
न।धर्मराजायस्वाहेतिमंत्रांतेजुहुयाद्धविः।वैशाख्यांपौर्णिमास्यांतुकर्मनित्यंप्रयोजयेत्।तत्रैव।
मृत्युमेवप्रपद्येतपरंमृत्योजयंद्विजः।नक्तभोजीमिताहारःपरिसंवत्सरंसदा।नैवंपुरायुषोमृत्यु
र्नयतेससुतप्रजं।फलाहारोजपेन्मंत्रंत्रिभिर्वर्षैर्मिताशनः।यद्वातत्रैव॥क्षीणायुरितिमन्येतयं
कंचित्सुहृदंप्रियं।यत्तेयममितिस्नातस्तस्यमूर्द्धानमालभेत्।सहस्रसंख्यःपंचाहंजपेदायुर्लभे
तसः।घृतेनसिंधुद्वीपस्यसूक्तेनैतंचलेपयेत्।संविशन्शयनेनित्यमेतन्मंत्रंजपेतवै।जीवारनि
प्रयुंजीतनित्यमेतांघृतेनतु।~~स्नातांस्यात्यभ्यसर्वाणिसुखीभवतिविज्वरः॥~~स्रोतांस्यभ्यज्य
सर्वाणिसुखीभवतिविज्वरः॥अन्येचलक्षकोटिपार्थिवलिंगपूजादयोमत्कृतपूर्त्तकमला
करेज्ञेयाः॥अथरुद्रेणतिलतैलेनरुद्राभिषेकोप्यपमृत्युहरः।रुद्रविधानंचवक्ष्यामः॥

॥ ॥अथाऽनावृष्टिशांतिः॥ ॥ऋग्विधाने॥ अच्छावदेतिसूक्तं तु वृष्टिकामः प्रयोजयेत्॥ निरा
हारः क्लिन्नवासाश्च अचिरेण प्रवर्षति॥ कृत्वायुतं वैतसीनां सक्षीराणां हुताशने॥ महद्वर्षमवाप्नो
ति सूक्तेनाच्छावदेन हि॥ तत्रैव॥ आस्य दग्धं विगाह्यांभः प्राङ्मुखः प्रयतः शुचिः॥ सूक्ताभ्यां ति
सृणेताभ्यामुपतिष्ठेद्दिवाकरं॥ तिस्रो वाचः॥ पर्जन्याय प्रगायतेत्याभ्यामित्यर्थः॥ अन अश्नतां तु
जप्तव्यं वृष्टिकामेन यत्नतः॥ पंचरात्रे व्यतीते तु महद्वर्षमवाप्नुयात्॥ पद्मपुराणे तत्रैव॥ वृष्टिकामो यताहा
रः प्रपद्येत बृहस्पतिं॥ पायसेनोपहारेण होमेन च समन्वितः॥ बृहस्पते प्रतीत्येतद्वृष्टिकामः
प्रयोजयेत्॥ पर्जन्यं च नमस्कृत्य वृष्टिं विंदति शोभनां॥ मात्स्ये याज्ञवल्क्ये॥ श्रीकामः शांतिका
मो वा ग्रहयज्ञं समाचरेत्॥ वृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन्नपि॥ ग्रहस्य यज्ञोऽयुतहोमो
लक्षहोमः कोटिहोमश्चेति त्रिविधः अन्यतरः शक्त्या कार्यः॥ पद्मपुराणे॥ एवं विनायकं पूज्य ग्रहांश्चैव वि

यानतः। कर्मणां फलमाप्नोति श्रियं आप्नोत्यनुत्तमामित्युक्ते विनायकशांतिपूर्वकं पर्जन्यशां
त्यंगत्वेन समानतंत्रो वा ग्रहयज्ञः कार्यः॥ ॥इत्यनावृष्टिशांतिः॥ ॥बोधायनः॥ अथातःप
र्जन्यविधिं व्याख्यास्यामो ब्राह्मणान्वरणपूर्वकमभ्यर्च्य वरुणप्रतिमां पूजयित्वोदके स्थित्वा
तत्सवितुरितिपंक्तोर्द्धचं शंनोवानंजपतीमंमेवरुणेतिपंचर्चं उदुत्तममितिषडर्चं सदस्यंतं सा
यउदंतस्सयुषामहांइंद्रोय अंजसा। वाचामेंद्रियेणभोवेसप्तदशं मैत्रावरुणीं द्विरूपामालभे
ता सावादित्यो ससौरीवरुणं। सुष्टुवाणं। प्रजापतिर्वरुणाययावामिंद्रावरुणामेतद्वा अपां
नामधेयं। हिरण्यवर्णाः। पवमानः। वृषावोअंशुः। सिंहेव्याघ्रे। सर्वेषु वा एषु लोकेषु। योसौत
पन्नुदेति। योपांपुष्पंवेदइतिसर्वाननुवाकान्सुवर्णं घर्मं। सहस्रशीर्षा। अद्भ्यः संभृतः। आ राम
दित्यो वै एष एतन्मंडलं। पृथिवीसमित्यनुवाकाञ्जपित्वा। उत्ला दृहिः प्रत्यङ् मुखः पीवो ऽन्नां॥२०५॥

मित्यनुवाकानेकादशवारंजपित्वाऽग्निंप्रतिष्ठाप्याज्यभागांतेक्षीराज्यवेतससमिच्चरुभिः प्रत्ये
कमष्टशतमष्टाविंशतिवापुरोवातोवर्षन्निति जुहुयात्तूर्षयिपुरोवायेत्यादेशात्यागोऽयादीन्
पूर्णाहुतिंकृत्वाशृंगंतिपाठंकुर्यात्। वरुणप्रतिमाम्रत्विग्भ्योदक्षिणांदद्यादित्याहभगवान्बौ
धायनः॥ ॥अश्विनीयाम्यसंस्थेर्कैयदादेवोहिवर्षति।सुभिक्षंक्षेममतुलमीतिभीतिश्चवह्निभे।
ब्रह्मह्वितयगेभानोर्दृष्टिश्चेद्रुयदायिनी।रौद्रस्थेस्यादनर्घायस्वल्पाचेदीतिभीतिदा।रौद्रप्रवे
शोयदिवर्षातीद्रस्तत्सार्धमासंनहिवृष्टिरस्ति।दिवाप्रवेशोबहुसस्यहानी।रात्रौसुभिक्षंनचरो
गपीडा।सायंकालेर्द्धरात्रेचेत्प्रवेशस्तुमहार्घदः। आर्द्रायांरविसंयोगेफलमेतदुदीरि
तं। आदित्यादिदशर्क्षेषुवृष्टिः सूर्येसुभिक्षदा।सिंहप्रवेशानंहित्वाकर्कटेव्यत्ययःशुभः॥ बौ
धायनः॥मारुतमसिमरुतामोजइतिदेवांवसंव्याःदेवाःशर्मण्याःकृष्णोर्जुहुयात्।

नार

प्रयाता वांति पतयंति· गायत्रीजपयुक्तस्तु महामृत्युंजयं जपेत्। सहस्रजपसंख्या प्रत्येकं शतं।
कूष्मांडहोमः। आवृत्तित्रयं। गायत्रीजपः लक्षं। महामृत्युंजयजपो दशसहस्रं। रुद्राभिषेकः॥
॥१२३॥ ॥ अथ ऋग्विधाने नियुक्तमंत्राणां सामान्यविधिः॥ ॥ ऋग्विधाने॥ पुरश्चरण
मादौ तु कर्मणां सिद्धिकारकं। स्वाध्यायाभ्यसनस्यादौ प्राजापत्यं चरेद्द्विजः। केशश्मश्रुलोम
नखानि वापयित्वा पुतः शुचिः। तिष्ठेदहनि रात्रौ तु शुचिरासीत वाग्यतः। सत्यवादी पवित्राणि
जपेच्च व्याहृतीस्तथा। ओंकारायास्तु ताजस्त्वा सावित्रीं च तदित्यृचं। आपो हि ष्ठेति सूक्तं तु शु
द्धवत्योघमर्षणं। शंवत्यः स्वस्तिमत्यश्च पावमान्यस्तथैव च। सर्वत्रैतत्त्रयोक्तव्यमादावंते
च कर्मणां। आसहस्रादाशताद्वा दशांतमथवा जपेत्। ॐकारं व्याहृती तिस्रः सावित्रीमथवा राम
युतं। तर्पयित्वांगिराचार्यान् ऋषिछंदांसि देवताः। प्रपद्येत विरूपाक्षं रौद्रं मंत्रगणं जपन्। अ ॥२०६॥

नार्यैर्नचभाषेतनशूद्रैर्नापिगर्हितैः।नरजस्वलयानार्यापतितैर्नांत्यजैर्नृभिः॥मंगलाचारयु
क्तःस्यात्त्रिरह्नोभ्युपयेन्नयः।अंतेद्वादशरात्रस्यस्थालीपाकंप्रकल्पयेत्।अग्नयेचाथसोमाय
तृतीयांचतयोःसह।वैश्वदेवींचरौद्रींचजुहुयादुत्तरेततः।अवसानस्यपतयेतथानुमतयेपि
च।धन्वंतरयइत्यन्यांगंधर्वाप्सरसामपि।दशमीब्राह्मणस्पत्यापष्ठौरौब्रह्मणोस्मृतः।सरस्व
त्यैतथाविष्णोरंत्यासौविश्वकृत्यपि।आज्याहुतयएवादौस्थालीपाकेहुतेपुनः।हुत्वाग्निंत
र्पयेद्विद्वान्पितृभ्यश्चप्रकल्पयेत्।हुतशेषंविधानेनशुचिर्भुंजीतवाग्यतः।तथा।प्राजाप
त्यादिकृच्छ्रंचांद्रायणादीनुक्तान्एभिर्व्रतैर्विधूतात्माकुर्यात्कर्माण्यतंद्रितः।इष्टान्कामांस्ततः
सर्वानवाप्नोतिनसंशयः।कणपिण्याकतक्राणामेकैकंशोभनंभवेत्।एवंशुद्धस्यकर्मा
णिमंत्रैर्वक्ष्यामितद्यथा।त्रिरात्रमेवोपवसेदादितःसर्वकर्मणां।त्रीणिनक्तानिवाकुर्यात्त

तः कर्म समाचरेत्॥ तथा॥ सर्वत्र दक्षिणां दद्याद्दानं वा कर्मसिद्धये। न त्वेवां दक्षिणीकर्म किं
चिदस्तीति शौनकः। शक्त्या हि पूर्णपात्रेण संमितां थ ततो भवेत्। ऋषभे काद्दशगा दद्याद्धेन
वा गुरुः॥ ॥इति ऋग्विधानोक्तं मंत्रसाधनं॥ ॥अथ श्रीसूक्तविधिः॥ ॥ऋग्विधाने॥ ॥
×तुष्यते×॥ यद्देवं ह्रदां देवीं नित्यं कुले स्थितां। स शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहं॥ श्रियं४
श्रियः पंचदशर्चं च श्रीकामः सततं जपेत्। आवाहयेच्छ्रियं पद्मे पंचभिः कनकेपि वा। उपहा
रानुपहरेच्चुल्का भक्षान्पयो दधि। स्थालीपाकं च शालीनां पयसा संप्रकल्पयेत्। चांद्राय
णाविणाक्षाम्लुप्रपद्ये त्वयतः श्रियै। सर्वौषधीभिः पिष्टाभिः स्नात्वा श्वाभिः पावनैरपि। उपैतु
मां देवसख इति राज्ञोभिषेचनी। मनसः काममित्येषा पशुकामाभिषेचनी। कर्दमेनेति य० राम
स्नायात्प्रजाकामः शुचिव्रतः। अश्वपूर्णामिति स्नायाद्राज्यकामः शुचिव्रतः। रोहितेन ॥२०७॥

र्मणिस्नाप्याब्राह्मणस्तुयथाविधि।राजाचर्मणिवैय्याघ्रेक्षत्रियस्त्वपरोरवे।बस्तचर्मणिवै
श्यस्तुहोमःकार्यस्त्वनंतरं।वंशभितिलुपद्मानिजुहुयात्सर्पिषाद्विजः।आदित्यवर्णइत्यन
याबिल्वहोमोविधीयते।बिल्वेष्मएवचाग्निःस्यात्स्थालीपाकेहुनेद्द्विजः।दशसाहस्त्रिको
होमःश्रीकामःप्रथमोविधिः॥हुत्वांतुप्रयतःसम्यगनंतांविंदतेश्रियं।अयुतंशतहुत्वस्तु
हुत्वाशुक्लानिसर्पिषा।अनंतामव्यवछिन्नांशश्वतींविंदतेश्रियं।अशक्तोजपएवोक्तो
दशसाहस्त्रिकोवरः।जप्त्वातुप्रयुतंसम्यगनंतांविंदतेश्रियं।अयुतंशतत्वस्त्कजप्त्वाश्रि
यमुपाश्नुते।अनेनजुहुयान्नित्यंपद्मान्ययुतशोनिशि।दृष्ट्वाश्रियंतूपरमेत्किलासत्वा
द्विधेतकौ।बिल्वाशीबिल्वनिलयेजुहुयाद्बिल्वानिसर्पिषा।एकविंशतिरात्रेणपरांसिद्धिंनि
यच्छति।येनकेनचकामेनजुहोतिप्रयतःश्रिये।पद्मान्यथापिबिल्वानिससकामःसमृध्यति॥७॥

॥ ॥अथ विष्णुधर्मोत्तरे ॥पुष्कर उ॰॥ हिरण्यवर्णां हरिणीमृचः पंचदश द्विज ॥ श्रीसूक्तं कथितं पुण्य
ऋग्वेदे पुष्टिवर्द्धनं ॥ रथेअक्षेति वाजेति च तस्याश्च तथा ऋचः ॥ श्रीसूक्तं तु यजुर्वेदे कथितं पुष्टिवर्द्धनं ॥
श्रायंतीयं तथा साम सामवेदे प्रकीर्त्तितं ॥ श्रियं धातुर्मयि धेहि प्रोक्तमाथर्वणे तथा ॥ श्रीसूक्तं यो
जपेद्भक्त्या तस्यां लक्ष्मीर्विनश्यति ॥ जुहुयाद्यश्च धर्मज्ञो हविषेण विशेषतः ॥ श्रीसूक्तेन तु पद्मानां
घृताक्तानां भृगूत्तम ॥ अयुतं होमयेद्यस्तु वह्नौ सक्तियुतो नरः ॥ पद्महस्ता तथा लक्ष्मीर्न दत्तमुपतिष्ठ
ति दशायुतं तु पद्मानां जुहुयाद्यस्तथानले ॥ नापैति तत्कुलाल्लक्ष्मीर्विष्णोर्वक्षोगता यथा ॥ घृता
तु क्तानां बिल्वानां कृत्वा रामायुतं तथा ॥ बहुवित्तमवाप्नोति स यथा वन्मनसेछति ॥ बिल्वानां लक्ष
होमेन कुले लक्ष्मीमुपाश्नुते ॥ पद्मानामथ बिल्वानां कोटिहोमं समाचरेत् ॥ श्रद्धानः समा राम
प्नोति देवेंद्रत्वमपि ध्रुवं ॥ संपूज्य देवीं वरदीं यथावत्पद्मैः सितैर्वा कुसुमैस्तथान्यैः ॥ क्षीरेण धृ ॥२०९॥

पेः परमान्नभक्ष्येर्लक्ष्मीमवाप्नोति विधानतश्च ॥ ॥ इति विष्णुधर्मे निरेपृज्ञाविधिः ॥ ॥ ७ ॥
अथ नीराजनी । तत्रैव पुष्करउ० । पूर्वोत्तरे तु दिग्भागे नगरात्सुमनोहरे । विस्तीर्णं कारयेत्प्राज्ञः सु
मनोहरमंडपं । कृत्वेर्गुप्तं कुशास्तीर्णं पताकाध्वजशोभितं । तोरणत्रितयंरास्तंप्राङ्मुखं कारयेच्छुभं ॥
कार्यं षोडशहस्तं तु तत्र कार्यं सुरूत्तम । तोरणाद्दक्षिणे भागे तत्र कार्यमथाश्रमं । देवतार्चा भवेत्तत्र त
थाग्निहवनक्रिया । पंचरंकैर्गसूत्रेणाशातन्यीथिं मनोरमां । मध्यमे तोरणे कुर्याच्छत्रपाशीं तु मध्यगां ।
क्षादयित्वा कुशैस्तां तु महासंछादयेत्तुनः । तस्याश्च लंघनं वर्ज्यं प्रयत्नात्सर्वजंतुभिः । न लंघिता
सा यावत्स्यात्तथ धर्मराजहस्तिना । चित्रीत्यक्ता यदा स्याती संधिता प्रति पद्यते । ततः प्रभृति कर्त्त
व्या यावत्स्वातौ रविस्थितः । मंडपे प्रत्यहं देवाः पूजनीया द्विजोत्तम । ब्रह्मा विष्णुश्च शंभुश्च शक्र
श्चैवानिलानलौ । विनायकः कुमारश्च धनदो वरुणो यमः । विश्वान्देवान्महाभागरुद्रैः श्च व

समेवच।अष्टौमहागजाःपूज्यास्तेषांनामानिमेशृणु।कुमुदैरावणोपद्मःपुष्पदंतोथवामनः॥
सुप्रतीकोंजनोनीलएतेष्टौदेवयोनयः॥पूजाकार्याग्रहर्क्षाणांतथैवचपुरोधसा।ततश्चमनुजुऊ
याद्धहोपुरोधाःसुसमाहितः।यथाभिमतदेवानांमंत्रैस्तल्लिंगसंज्ञकैः।तथाचमंत्रहीनानांतत्सन्ना
म्नांमहाभुज।समिधःक्षीरवृक्षाणांतथासिद्धार्थकानिच।घृतंतिलाश्चधर्मज्ञतथाचैवाक्षतानि
चाहुत्वाचकलशान्कुर्यात्सोदकान्गंधसंयुतान्।भल्लातशल्यसिद्धार्थवचाकुष्ठप्रियंगवः।तो
रणस्यदक्षिणेभागेकलशैःपूर्वकल्पितैः।ततःसंस्नापनीयास्युर्मंत्रपूतोत्तमाः।तुरंगाश्चमहा
भागस्रलंकृत्यततस्ततान्।ततोभिषेकंनागस्यतथातत्तुरगस्यच।पिंडान्नैतुततोदेयमभि
मंत्र्यपुरोधसा।तस्याभिवंदनेराज्ञोविजयःपरिकीर्तितः।त्यागेचतस्यविज्ञेयमहद्भयमुपस्थि
तं।निष्काशयेत्तोरणाद्यस्ततोहिप्रथमंगजान्।तत्रापिप्रथमेरामभ्भिषिक्तंगजोत्तमं।तस्यादौ

शतपार्शितुनरःपंचनखोपिवा।यद्यन्योलंघयेत्तांतुराज्ञोमरणमादिशेत्।लंघयेद्वामपादेनय
दितांनपर्कुंजरः।राजपुरोहितामात्यराजपुत्रादिलंभवेत्।राज्ञस्तुमरणंब्रूयाद्वाक्रामेत्तांयदाय
दा।राज्ञोविजयमाचष्टेलंघयेद्दक्षिणेनतां।निष्क्रामेयुस्ततःसर्वेप्राङ्मुखास्तोरणेर्गजाः।ततो
श्वाःसुमहाभागततस्तुनरसत्तमाः।ततश्छत्रंध्वजंचैवराजलिंगानियानिच।मंडपेतानिसंस्थाप्य
पूजयेदायुधानिच।पंचरंगकसूत्रेणयास्ताःप्रतिसराःकृताः।दृष्ट्वातुद्येतिमंत्रेणनिबध्नीयात्पु
रोहितः।सर्वेषांनृपनागानांनीलुरंगानांचभार्गव।स्वगृहेषुततोनेयाःकुंजरास्तुरगैःसह।स्वातिस्थः
सवितायावत्तावच्छायासुसंस्थितान्।पूजयेत्सततंरामनाक्रोशेन्नचताडयेत्।राजचिह्नानिसर्वा
णिपूजयेन्मंडपेसदा।वरुणेज्याचभूतेज्यारात्रौचबलिरुत्तमैः।वसेतामाश्रमेनित्यंसौवत्सरपु
रोहितौ।अश्ववैद्यप्रधानश्चतथानागभिषग्वरः।दीक्षितैस्तैस्तथाभाव्यंब्रह्मचारिभिरेववा।स्वा

सर्वनि

तींयत्कायदासूर्येविशाखाप्रतिपद्यते। अलंकुर्याद्दिनेतस्मिन्वाहनंत्वविशेषतः। हस्तिनंतुरगंछ
त्रंखड्गंचापंचदुंदुभिंः। ध्वजंपताकांधर्मज्ञकालज्ञस्त्वभिमंत्रयेत्। अत्रछत्रादिमंत्राज्ञेयाः। अभिमं
त्र्यततःकुर्यात्कुंजरधूर्गतान्। निष्क्रम्यत्तोरणेनाग्रमभिमंत्रितमारुहेत्। तोरणेनविनिष्क्रम्यकुर्या
त्सुरविसर्जनं। बलिंविसृज्यविधिवद्राजाकुंजरधूर्गतः। उल्मुकानांतुनिचयमादीपितमनंतरं।
राजाप्रदक्षिणीकुर्यात्त्रीन्वारान्सुसमाहितः। चतुरंगबलोपेतः सर्वसैन्यसमन्वितः। एवंकृत्वागृ
हंगछेद्राजासैन्यपुरःसरः। वनंसंपूज्यचततःसर्वमेवविसर्जयेत्। शांतिनीराजनाख्येयंक्षेम्यावृ
द्धिकरीतथा॥ ॥इतिनीराजनं॥ ॥अथघृतकंबलः॥ ॥विष्णुधर्मोत्तरेरामउ०॥ शांतिमाचक्ष्वमे
देवघृतकंबलसंज्ञितां। पुष्करउवाच०। पूर्वोत्तरेतुदिग्भागेशांत्यगारंतुकारयेत्। अभिषेचनकर्मं राम
त्रायेमयाभिहिताःपुरा। देवादयस्तुतेषांयेस्थानंतत्रप्रकल्पयेत्। आवाहनंततःकुर्यात्स्नातस्तत्र ॥२१०॥

उपोषितः॥आवाहितानीसर्वेषांगंधमाल्यानुलेपनैःसंपदा।देवविल्लूजनंकुर्यात्तथानृपपुरोहि
तौ।एवंसंपूजनंकृत्वासोपवासास्तुतेत्रयः।ततस्त्रिभागशेषायांरात्रौकुर्यात्तुशांतिकं।कृत्वादश
गुणगनत्रस्नापयेत्तंनराधिपं।पूर्वमेवतथास्नानंसिद्धार्थैस्साधितंतथा।पूर्णेनघृतकुंभेनमंत्रे
णानेनकालवित्।आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंपरं।आज्यंसुराणामाहारआज्येलोकाःप्रति
ष्ठिताः।भौमांतरिक्षंदिव्यंवायत्तेकिल्बिषमागतं।सर्वंतदाज्यसंस्पर्शात्प्रनाशमुपगच्छतु।ततोवि
रूक्षितंस्नानंस्नानवेदींनराधिपं।गच्छेतांतुपुरस्कृत्यसांवत्सरपुरोहितौ।स्नावेदीतुकर्तव्याळाजा
कुसुममंडिता।चतुर्भिःपूर्णकुंभैश्चविदिक्षूपशोभिता।चत्वारित्तस्यांचर्माणिप्राग्ग्रीवा
णिसमास्तरेत्।वृषस्यद्वीपिनश्चैवसिंहशार्दूलयोस्तथा।भद्रासनंन्यसेत्तामतेषामुपरिचर्मणां।
स्यासीनंन्टपतिंतत्रवस्त्रेराछादयेन्नवैः।कार्पासकैस्ततःपश्चात्तविकैःकृमिजैस्ततः।ततस्कृस

पिषिः कुंभैः पूर्णैस्तमभिषिंचयेत्॥ कुंभाष्टकं तु कर्त्तव्यमष्टाविंशतिरेव वा। अथवाष्टशतं राम व
ह्निरेषा गुणोत्तरा। ततोपनीयवस्त्राणि तस्यांवेधां पुरोहितः। शूलेनम्रन्मयं पिंध्या चतुं क्रोधसम
न्वितः। राज्ञस्तु कलशं दद्यात्स्वयं सांवत्सरस्ततः। राज्ञाभिषेकमंत्रेण स्वर्चितं कल्पितं दृढं। ज्योतिष्म
तीं त्रायमाणामभयामपराजितां। जीवंतिं चेश्वरीं पाठां समंगामभयां तथा। सहां च सहदेवीं च पूर्ण
कोशां शतावरीं। अरिष्टिकां शिवां भद्रां कलशे तत्र विन्यसेत्। ब्राह्मीं क्षमां वचां चैव सर्वबीजानि कां
चनं। मंगल्याश्च यथालाभं सर्वौषध्यो रसांस्तथा। रत्नानि सर्वगंधांश्च बिल्वं च सविकंकतं। एवं
स्नातो घृते दृष्ट्वा वंदनं तर्पणं तथा। मंगलालंभनं कृत्वा धौतवासाः समाहितः। अभ्यर्चनं तथा कु
र्याद्देवादीनां पृथक्पृथक्। तेषामेव ततो वह्नौ चतुर्थ्यंतैस्तु नामभिः। ॐकारपूर्वं जुहुयाद्घृतं बहु राम
पुरोहितः। आयुधाभ्यर्चनं कार्यं वाहनाभ्यर्चनं तथा। राजचिह्नार्चनं कृत्वा यत्नं कृत्वा स्वकां तनुं॥ २९३।

अनुलेपनमादद्याद्गंधद्वारेतिमंत्रितं।शुभ्रंवसनमादद्याद्बृहस्पतेनाभिमंत्रितं।श्रियंधातुर्मयि
देहिमंत्रःसुमनसांभवेत्।रायस्पोषेपिचतथामंत्रोलंकरणेस्मृतः।कैंशैंवाभ्यर्चनंकृत्वावह्नि कर्त्तरि
स्थानंततोव्रजेत्।वह्नेरुत्तरदिग्भागेप्राग्ग्रीवप्रोक्तकर्मणां।सिंहासनंन्यसेत्स्पष्टेपरार्ध्यास्तरणा
न्वितं।वृषस्यवृषदंशस्यकरेणोःपृतस्यच।तेषामुपरिसिंहस्यव्याघ्रस्यचततःपरं।एषांतुरा
मचर्माणिप्राग्ग्रीवाणितुविन्यसेत्।ऋवाथोरितिमंत्रेणनृपंतत्रोपवेशयेत्।ततःपुरोधाजु
हुयाद्ब्राह्मैर्मंत्रैर्घृतंशुचिः।रौद्रैर्वैष्णवैर्वायव्यैःशाक्रैःसौम्यैःसवारुणैः।बार्हस्पत्यैस्तथाकुर्यात्तंत्र
मुत्तरसंज्ञितं दैवज्ञःप्रयतःकुर्याद्देवतानांविसर्जनं।अन्नेनब्राह्मणान्भोज्यततोदद्याच्चदक्षि
णां॥ ॥इतिविष्णुधर्मोत्तरेघृतकंबलविधिः॥ ॥अथश्रीसूक्तमंत्रकोशोक्तःप्रयोगः॥ ॥मूर्धाक्षि स्वर
कर्णनासामुखगलदोर्हृदयनाभिगुह्येषु।पायूरुजानु जंघाचरणेषुन्यसेद्दृचःक्रमशः।आवाह

शांति॰ ७

ना सनार्घपाद्याचमनमधुपर्काभिषेकान्। वासोभूषणगंधाः सुमनोयुतधूपदीपभोज्यानि। सोऽशासना
निकुर्याद्भक्तियुतः पंचदशभिरथमनुभिः। हिरण्येतिपंचदशानामाद्यायाः श्रीः ततआनंदकर्दमचि
क्लीतश्रीपुत्रा ऋषयः। आद्यास्तिस्रोनुष्टुभः ततोबृहती ततस्त्रिष्टुभोततोष्टावनुष्टुभोंत्याः प्रस्तारपं
क्तिराद्यापाः श्रीरग्निरन्यासांश्रीर्जपेवि॰।। ततः क्रमेणमूर्द्धाक्षिकर्णनासामुखकंठबाहुहृदय
नाभिगुह्यगुदोरुजंघाचरणेषु पंचदशार्चोन्यसेत। प्रणवेनत्रिः कुर्यात्प्रक्षाल्यॐ हिरण्यायैनमोंगुष्ठा
भ्यां।ॐ चंद्रायैतर्जनीभ्यां।ॐ रजतस्रजेमध्यमाभ्यां।ॐ हिरण्यस्रजायैअना॰।ॐ हिरण्याक्षायैकनि
ष्ठिकाभ्यांनमः।।ॐ हिरण्यवर्णायैकरतलकरपृष्ठाभ्यांनमः।। एवंषडंगः।। ध्यानं।। अरुणकमल
संस्थातद्रजःपुंजवर्णाकरकमलधृतेष्टाभीतियुग्मांबुजाच।। मणिमुकुटविचित्रालंकृता
कल्पजालैर्भवतुभुवनमातासंततंश्रीः श्रियेनः।। चतुर्भुजेपूर्धयोः पद्मे। अधोवराभये। ततः षट्।।२९२।।

स्त्रजा॰४

राम

कोण गर्भमष्टदलं कृत्वा आं आधारशक्त्यै । मूलप्रकृत्यै । मं कूर्माय । कूर्माय । अनंताय । महाव
राहाय । भूम्यै । क्षीरोदार्णवाय । रत्नमंडपाय । ततः पीठे । धर्माय । ज्ञानाय । वैराग्याय । ऐश्वर्या
य । पूर्वादि अधर्माय अज्ञानाय । अवैराग्याय अनैश्वर्याय । तं तमसे । रं रजसे । सं सत्वाय । मां मा
यायै । विं विद्यायै । आं आत्मने । पं परमात्मने । ज्ञां ज्ञानात्मने । वह्निमंडलाय । सूर्यमंडलाय । सोम
मंडलाय । विभूत्यै । उन्नत्यै । कीर्त्यै । संतान्यै । बुध्यै । उत्कर्षिण्यै । ऋध्यै । इत्यष्टदलेषु ॥ ततो मध्ये ।
हिरण्यवर्णामित्यावाह्याग्नीशासुरवायुपुरःपृष्टेषु हृदयादीनि । आग्नेयादिदिक्षु । वासुदेवाय । सं
कर्षणाय । प्रद्युम्नाय । अनिरुद्धाय । पुनः पूर्वादि । दमनकाय । संतानाय । गुल्गुलाय । कुरंटका
य । शंखनिधये । दक्षिणे । पद्मनिधये वामे । ततो बलाकायै । विमलायै । वनमालिन्यै । विनीषका
यै । मल्लिकायै । शांकर्यै । वसुमालिकायै । इत्यष्टदलेषु ॥ केचित्तु हिरण्यायै । चंद्रायै । रजतस्रजायै ।

पद्मवर्णायै॰पद्मस्थायै॰हिरण्यवर्णायै॰इतिषट्कोणेष्वाग्नेयादि॥तद्बहिरष्टदलेषु॥पद्मायै॰प
द्मवर्णायै॰पद्मस्थायै॰आर्द्रपद्मायै॰तर्पयंत्यै॰तृप्त्यै॰स्वर्णप्राकारायै॰ततोलोकपालांस्तदायुधा
नि च। ततस्तांमआवहेत्यासनं।अश्वपूर्वामित्यर्घ्यं।कांसोस्मितांपाद्यं।चंद्रांप्रभासामाचमनी
यं।मधुपर्कस्नानंभूषणं।मनसःकामंगंधं।कर्दमेनपुष्पं।पद्मवर्णायै॰पद्मस्थायै॰आर्द्रायै॰तर्प
यंत्यै।तत्सायेऽज्वलि न्यै॰स्वर्णप्राकारायै॰पुनर्लोकपालांस्तदस्त्राणि च।आपःस्रजंतुधूपं।आ
र्द्रांपुष्करिणींदीपं।आर्द्रांपुष्करिणींनैवेद्यं।तथैववह्नेर्नवांजलिरेका।तांमआवहेतिफलंतांबू
लंदक्षिणांनीराजनंपुष्पांजलिश्च ततःपंचदशाग्भिराज्यंहुत्वातांमआवहेत्यध्यासनंच।एवं
शुक्लप्रतिपदाद्येकादशीपर्यंतं द्वादशसहस्रं जप्त्वा द्वादश्यां घृतमधुशर्करेतित्रिमधुराक्तैःप राम
द्मैर्बिल्वसमिद्भिःपायसेनघृतेनत्रिशतमेकैकेनहोमः।द्वादशविप्रभोजनं।एवंमंत्रःसिद्धोभ ॥२३३॥

वति। परिषिंचेच्छिरोनित्यं श्रीसूक्तैः स्नानकर्मणि। आदित्याभिमुखो जप्येथावत्तावच्च तर्पयेत्।
चत्वारिंशच्चतुष्कं वा रेषु अंत्याम्रचमष्टोत्तरशतं जपित्वानवनीतात्कपद्मानि तत्संख्ययैव जुहुयात्।
कांस्यो स्मितामिति च दशाहुतीर्घृतात्केवलेन जुहुयान्नित्यं। एवं षण्मासान्। प्रत्यहं तर्पणं तु। ॐ श्रि
यं तर्प्पयामि। लक्ष्मीं त· वरदां· विष्णुपत्नीं· वल्लभां· हिरण्यरूपां· स्वर्णमालिनीं· पद्मवासिनीं·
पद्महस्तां· पद्मप्रियां· मुक्तालंकारां· सूर्यां· चंद्रां· विश्वप्रियां· ईश्वरीं· भुक्तिं· प्रमुक्तिं· विश्वभू
तिं· ऋद्धिं· समृद्धिं· तुष्टिं· धनेश्वरीं· शुद्धां· भोगिनीं· भोगदां· धात्रीमिति॥ ॥इति मंत्रकोशे श्री
सूक्तविधिः॥ ॥अथाग्निपुराणे शांतिस्नानं॥ ॥सर्वार्थसाधनं स्नानं वक्ष्ये शांतिकरं शृणु॥
स्नापयेच्च सरित्तीरे ग्रहाविष्टो विचक्षणः। देवालये ज्वरोत्पादे विनायकग्रहार्दिते। त्रिधाती
र्थे हृदे गेहे जपकामस्य तीर्थके। पद्मिन्याः स्नापयेत्तीरे गर्भो यस्या विपद्यते। अनेकसन्नि

धोभाग्यशतोयस्यविनश्यति।पुष्पार्थिनी च पुष्पाद्येपुत्रिणीचैवसागरे।गेहेसौभाग्यरूपा
यांसर्वेषांविष्णुसंनिधौ।विष्णूर्सदेवतापुष्येसर्वेषांस्नानमुत्तमं।स्नानकामस्यसप्ताहंपूर्वमुत्सा
दनंशृणु।पुनर्नवारोचनाशतावरीमुरुगांत्वचं।मधुकरंनिद्ववतगरंनागकेसरं।आसुरी
चैवमंजिष्ठामांसीयवसमर्दकैः।प्रियंगुसर्षपापुष्पीवचाब्राह्मीचकंकुमं।पंचगव्यंसक्तुभिश्च
उद्वर्त्यस्नानमाचरेत्।मंडलेकर्णिकायांचविष्णुंब्रह्माणमर्चयेत्।पश्चिकामंहरंपूर्वमत्रपूर्वा
दिदिक्रमात्।लिखेद्दिक्ष्वादिकान्देवान्सायुधान्सहवाहनान्।स्नानमंडलकान्दिक्षुकुर्याच्चै
वविदिक्षुच।विष्णुब्रह्मेशशक्रादीन्सहस्राण्यपिहोमयेत्।एकैकस्यत्वष्टशतंसमिधस्तु
तिलैःसह।भद्रःसुभद्रःसिद्धार्थःकलिहापुष्टिवर्द्धनः।अमोघंचित्रभानुश्चपर्जन्योथसुदर्शनः। राम
स्थापयेच्चघटानेतान्माश्विरुद्रमरुद्गणान्।विश्वेदेवास्तथादित्यासर्वेचमुनयस्तथा।श्रा ॥२३४॥

द्रेशाः सुतसुप्री ताया अन्यापि च देवताः। ओषधीर्निक्षिपेत्कुंभे जयतीं विजयां जयां। शतावरीं
शतपुष्पां विष्णुक्रांतां नापराजितां। ज्योतिष्मतीं बलां चैव चंदनोशीरकेसरां। कस्तूरिकां च कर्पूरं
वालुकं पत्रकं त्वचं। जातीफलं सुगंधं च मृत्तिकाः पंचगव्यकं। भद्रपीठे स्थितं पश्चात् स्नापयेत् बुद्धि
जो ॰नमाः। राजाभिषेकमंत्रोक्तदेवनो होमकः पृथक्। पूर्णाहुतिं ततो दत्वा गुरवे दक्षिणां ददेत्।
इंद्रो भिषिक्तो गुरुणा पुरा दैत्यान् जघान ह। दिक्पालस्नानं कथितं संग्रामादौ जयावहं॥ ॥७॥
इति अग्निपुराणे सर्वार्थसाधनशांतिः॥ ॥अथैकवस्त्रस्नानं॥ वीरसिंहावलोके रुद्रयाम
ले॥ शुक्रेण प्रार्थितः शंभुः प्रणिपत्य जगद्गुरुः। एकवासो विधिं ब्रूहि स्वामिन् विस्तरतो मम॥
॥ ॥शिव उवाच॥ शृणु भार्गव यत्नेन दुःखवैधव्यनाशनं। वंध्यात्वं विलयं याति यस्मिन्व
स्त्रविधौ कृते। शिवो नामेति मंत्रेण दंपती परिधापयेत्। स्नापयेदेकवस्त्रेण भानावनुदि

तेसति। अष्टपत्रंलिखेत्सम्यंक्रमतः शुक्लतंदुलैः। वेदोक्तविधिनामंत्रैः सूक्तैर्वेदविधानतः। पंच
वक्त्रंदशभुजंत्रिनेत्रंपार्वतीपतिं। अथमध्येन्यसेद्देवंशिवोनामेतिमंत्रतः। इंद्रंविश्वेतिमंत्रेणइं
द्रमाग्नेयकोणके। येचेहमितिमंत्रेण दक्षिणेदिग्यपूर्वजाः। येदेवासस्तुमंत्रेणनैर्ऋत्येसन
कादयः। वरुणःप्राविताम्मंत्रात्पश्चिमेवरुणंन्यसेत्। गणानांत्वेतिवायव्यांचगणेश्वरं। अ
भिगोत्राणिमंत्रेणउत्तरेगर्भमातरः। ईशान्यांचमहान्सर्वन्स्वाप्येत्वचस्वमंत्रतः। कृतवस्व
ऋ० तान्मंत्रान्पूर्वस्यांविन्यसेत्स्वयं। तन्मध्येविन्यसेत्कुंभंपूरितंतीर्थवारिणा। पूर्णपात्रयुतं
मध्येसर्वौषधिसमन्वितं। सहिरण्यंसवस्त्रंचनारिकेलेनसंयुतं। प्रतिष्ठांचविधेःपादेमंत्रैः
पूजनमारभेत्। रुद्रंजपेत्तत्रषडंगंविधिपूर्वकं। स्त्रीपुंसाभ्यांविधातव्यंपूजनंविधिवत्ततः।
अभ्यर्चकेवलंसम्यक्कृत्वास्नानंविधानतः। नांदीमुखाभिधंश्राद्धंविधेयंविधिवत्पुनः। गर्भेऽ॥२१५॥

मंत्रेण४

राम

सीतिमंत्रेणप्राशयेत्सिंउ [illegible] मध्यमं।जलप्रार्थना।प्रत्यग्गाशपतेराजन्जलानामधिपप्रभो।न
ष्टानष्टप्रसृष्टात्वंगर्भंधेहिममेप्सितं।नदीनदतडागानिक्रमादन्यजलाश्रयाः॥तुभ्यंविनानशोभंतेग
र्भंधेहिजलेश्वर।पूर्वजन्मनियत्पापंकुसंसर्गात्स्वयंकृतं।इहापिसलिलेस्छित्वागर्भंधेहिप्रसीदमे।
अष्टषष्टिषुतीर्थानांनदीनामाधिपोभवेत्।सप्तानामपिचाब्धीनांरात्रगर्भंददस्वमे।त्वमेवपा
शपाणिस्त्वत्वमेववरुणंप्रसांपतिः।आपस्तुप्राणिनांजीवोगर्भंधेहिप्रसीदमे।तवहस्तेजलंवा
मेदक्षिणेजीवजीवनं।मस्तकेचजलाधिपागर्भंधेहिदयापर।भूतप्रेतादिदोषाणांरोगाणा
मितरस्यच।अंतरायंप्रभोछित्वागर्भं [illegible] धेहिदयांकुरु॥ ॥इतिजलप्रार्थना॥ ॥अथौषधी
स्नानं॥सर्वेषांजगतांसोमोग्रहाणामधिपःसदा।तवस्वामीसदासोमदेहिगर्भंमहौषधि।औ
दुंबरीफलवतिशाखायासर्वमंत्रवित्।ॐषधयःसमित्येवंकामिन्याःस्नापयेद्बुधः।शाखाया

लंबनंकार्यंहदिवेतस्मिनिर्मले। समालंब्यकरेहूर्वानालिकेराक्षतानपि। वरुणेपासनंकुर्यात्स्तु
तिपाठपरायणः। ब्रह्माविष्णुश्चसोमश्चकंदर्पोवृषवाहनः। पार्वतीसुभगाभद्रासावित्रीवस्त्रदे
वता। एतेहिवाससीश्रुत्रेअथांगेगुरुदेवते। सर्वभूषणरम्येचगर्भेमेधत्तवांछितं। मुद्गतंडुलगोधू
मयवतंडुलशालिभिः। राजमाषादिभिर्विद्वान्वंशपात्रंप्रपूरयेत्। विन्यस्यदीपकंतत्रफलानांस
प्तकंतथा। धातावलेतिमंत्रेणधान्यस्थानंतुकारयेत्। नालिकेरंगंचनारंगंदाडिमीबीजपूरकं।

गोस्तनी जंबीरंथपूगंचसप्तमंमदनंस्मृतं। कूर्मपृष्ठनिभंपृष्ठेक्षीरनीरप्रपूरितं। त्रिनेत्रदैवत्यं
नालिकेरंसुतप्रदं। पीतंकनकवर्णाभंसुबीजंसुमनोहरं। फलंयच्छक्रदैवत्यंसूत्रंवैसदृशोप
मं। ज्ञानयोनिप्रपूर्णंतुदेहित्वंगर्भमुत्तमममिति। पूगश्चसूर्यदैवत्योक्षाक्षारससमप्रभः। आ
२× तुहिनेनसमंशीतंनारंगंगर्भदंमम। फलंतच्छक्रदैवत्यंसस्त्रंवैसुपरितं। सुरंगंसोमदैवत्यंगर्भदंबीजपूरकं। ×
× उग्रयदर्कसमंपुष्पफलं सिंहरसन्निभं। बीजपूरयुतंयत्स्याद्गर्भदंदाडिमंमम। २×

गं२

द्रं:फलानांप्रसवोगर्संदधात्मदामम॥ उत्सवेषुचसर्वेषुभुसदसर्वदैवतं। गोरोचनसमा
भासंगर्भदंमदनंफलं॥ इतिफलैःस्नानं॥ ॥अथोषधीस्नानं॥ वर्द्धकरश्वरास्नाचएलाविव
चकेतथा॥ धान्यानिशगचबऊलासर्वौषध्यइमाःस्मृताः॥ याॐषधीतिमंत्रेणसर्वौषध्याभिषे
चनं। करेणमूर्ध्निविन्यस्यवंशपात्रंतुभार्गव। ऋग्वेदोक्तासप्तमंत्रान्नत्वायाभीतिपूर्वकान्। धी
मान्प्रत्येकमुच्चार्यदंपतीस्नापयेत्ततः। वरुणःप्राविता मंत्रंवरुणस्योत्तंभनंततः। येतेशातमि
मंमेचइदमापःपुनंतुमांइमान्वेयाजुषामंत्रान्शिरोमेत्यनुरूक्तया। घृतवतीभुवनानीपावमा
नीःपुनः। सामोवरुणसाम्नाथपावमानःसरस्वति। शन्नोदेवीत्याथर्वणैर्मंत्रैःस्नानमुदाहृतं।
ततोरुद्रजपस्नानंकर्त्तव्यंसुतमिच्छता। अथभार्गवसंस्थाप्यस्थंडिलेपावकंशुभं। गृह्योक्तेन
विधानेनपायसंश्रपयेच्चरुं। आघारावाज्यभागौचदेयात्तत्रघृताहुतीः। आद्यांपर्ष्णीनिहोता।

चपुनस्त्वाथतथात्वमितृ।वाजः पुरस्त्वादग्येत्वं आदित्यंगर्भमेवच।ततः सरस्वतीयोन्यांतत्पत्नीभि
रतःपरं।आदित्योरास्नामंत्रेणयेनक्षत्रयोपिच। गर्भेभिस्योषधीनांचमंत्राकार्येउक्तयः॥क्रमात्॥
एभिर्मंत्रैश्चरुंकृत्वाततःस्विष्टकृतंहुनेत्।ऋषभंब्रह्मणेदद्यात्ताचार्येसुरभिंतथा।इतरेभ्योपि
विप्रेभ्योदक्षिणांस्वेच्छयापुनः।अभिषेकंततःकुर्यात्पवित्रंकुंभवारिणा।सुरास्त्वामितिमंत्राद्यैः
पवित्रैर्ब्राह्मणैस्ततः।आशास्याःकामहेमितितुहृयेत्यसप्तकं।सद्रंपवंशपात्रंचनीत्वापाया
च्छिवालयं।शिवस्यपुरतोमुक्त्वावंशपात्रंप्रणम्यच।देवदेवजगन्नाथगौरीनाथमहेश्वर।भ
वेशानमहादेवनमोस्तुसुतदोभव।अष्टौदोषाश्चयेस्त्रीणांनवमःपुरुषस्यच।तत्तद्दोषविना
शायसस्त्रीकःस्नानमाचरेत्।विकृतंयच्चमेदेहेसंतानपरिपीडनं।तत्सर्वंवरुणमायात्वनिर्दो राम
षास्यांसुपुत्रिणी।वरुणत्वंचभूतानामुच्यसेकारकःप्रभुः।तवतीर्थप्रभावेनसंतानंकुरु ॥२७॥

मेवकुं। ततश्च सूर्यप्रोक्ताशमादधत्तेत्यादिनाशयेत्। गर्भं देहि भगं देहि आयुर्दत्तु नः पितरस्तथा। ब्रा
ह्मणान्भोजयित्वा च वरं दत्वा विसर्जयेत्। इदं निर्मूलमपि गुर्जरेषु प्रचारादत्तं॥ ॥ इति वीरमित्रोद
ये लोकोक्तमेकवस्त्रस्नानं॥ ॥ अथ सूर्यारुणसंवादोक्तमेकवस्त्रस्नानं॥ अरुण उ०॥ यत्त्वयाक
थितं स्नानमेकवस्त्राभिषेचनं। दंपत्योरनपत्यादिदौर्भाग्यशमनं परं। विधिं तस्याखिलं ब्रूहि
यथाश्रुति निरूपितं। देवता कात्र के मंत्राः को विधिः किं फलं ततः। कीदृग्वस्त्रं कथं धार्यमुभाभ्यां मे
वद त्वं पुनः। तत्कृते कथयापत्यसिद्धिः स्यान्नरयोषितोः॥ श्रीसूर्य उ०॥ पुरा कल्पावसाने तु कल्प
स्यास्य समुद्भवे। अरिरिक्षुर्यदा सृष्टिं श्रुतिश्रुतविधेर्विधिः। स स्मारतनयान्सप्त मनसा न्सप्र
जापतिः। ते यदा तपसा क्लिष्टा नशेकुः सृष्टिसाधने। शिवमाराध्य तपसा प्रसन्नं समयाचत॥
प्रजामिव प्रजाकामाः प्रजापतिसुतास्तु ते। भगवंस्तपसा खिन्नाः प्रजाहेतोः प्रजापते। अका

र्षवचनाद्दारान्भर्तोदारान्सुलक्षणान्। ततोपिनप्रजासिद्धिरस्माकंशिवजायते। प्रजार्थंत्वीप्र
पन्नास्मोब्रूहितत्सिद्धिरूद्विधिं। प्रार्थितस्तैस्तदाशांसुःक्षणंध्यात्वाब्रवीद्वचतान्। शृणुध्वंमुनयःसर्वे
प्रजायायदसंभवे। कारणंमुनयःसर्वेयदृष्टंज्ञानचक्षुषा॥ अनपत्यकरंकर्मचक्रेयत्पूर्वसंप्लवे।
कालाद्भुक्तावशेषंयद्दौर्भाग्यंतद्भवेत्तनौ॥ विलिप्तमनुमंत्राद्यैर्पिदधिभिर्न्नौद्वयोरपि। वाससैकेनतत्
देहयुगलंपरिधायच। कुरुध्वंविधिवत्स्नानंतत्तद्दौर्भाग्यनाशनं। आनखाग्राच्चकेशांतंयाव
दंगविशुद्धिःकृता। एवमापत्यदौर्भाग्यंपंचधायत्नकीर्तितं। तस्यनाशायविधिवत्सहपत्न्यैक
वाससा। स्नात्वासम्यग्विधेःपुत्राःसंततेःश्रेयआप्स्यथ। इत्युक्त्वांतर्हितेशौरौअकुर्वन्मुनयश्च
हे। यथैकवसनस्नानंविधिंतंतेवदाम्यहं। यथाश्रुतंयथादृष्टंश्रुतिभ्योज्ञानमंडलात्। शुभे
मासेसितेपक्षेसानुकूलग्रहेदिने। नक्षत्रयोःसमायोगेमहानद्योर्द्वयोरपि। प्रत्यूषेशुद्धिमा

राम

स्छायशरीरस्ययथाविधि।विधिंविविधमाधायपत्न्यासहममार्हणं।विधायश्रद्धयायुक्तोमं
त्रमेतमुदीरयेत्।।०।।कर्मसाक्षिन्जगन्नाथयन्मयापूर्वजन्मनि।पंचधापत्यदुःखाख्यंदोषमग्य
मतुलंमहत्।प्राप्तंतस्यविनाशायाविधिवद्विधिमुत्तमं।सहपत्न्यादिवानाथतत्रसिद्धिंप्रयच्छमे।
एवमुच्चार्यतद्वस्त्रमहतंद्विरंगात्मकं।सार्द्धद्वयकरायामंपंचविंशकरोन्मितं।विततंतंतुभिश्श्ल
क्ष्णैतन्मध्येतद्भुतंघनैः।सुवासुवासामंत्रेणमंत्रितंदैववेदिना।सम्यग्दत्तंतदादायपरिदध्यात्स
कंसकं।दृढनीविकंनाभिदेशेत्रिर्द्विगुणीकृतं।तच्छेषंदक्षिणांगस्थापत्नीसकंचुपट्टिका।परि
दध्यात्स्वयत्नेनतेनसंवृतमस्तका।केशान्संमृज्यसंगोप्यपतिहस्तानुयायिनी।उपविश्यजलस्था
ग्रेतावुभौशुभदंपती।प्रक्षाल्यपाणिपादौचस्वाचांतौममसंन्मुखौ।कुशपुष्पफलस्वर्णतोय
पूर्णांजलीस्थितौ।दैवज्ञेनोदितामंत्रान्पठेयातांसलिलोन्मुखौ।वैदिकांल्लौकिकांश्चापिसा।

वर्थानो जितेंद्रियौ ।। आपस्त्वमसि सर्वेषां देवानामग्रणीः प्रभो । जीवनं सर्वजंतूनां गर्भं धेहि म
म प्रभो । यानि यानीह पापानि अनपत्यकराणि नौ । हत्वा तान्यखिलानीश गर्भं धेहि मम प्रभो । य
स्त्वाभ्यां महत्पापं पुराजन्मनि दुःखकृत् । कृतं तन्मे विनिर्धूय गर्भं० । त्वयैवाधिष्ठिताः सर्वे नदी
नदजलाश्रयाः । पुनंति पापिनः सर्वान्गर्भं० । यानि कानीह तीर्थानि ये च ये च जलाशयाः । त्वयैव
पावितास्तस्मात् गर्भं० । त्वमावाभ्यां प्रपन्नाभ्यां शरणं दुःखशांतये । प्रार्थितः परमेशान गर्भं० । त्रा
ण समर्थ हे महाभाग संततिं लोकपावनीं । प्रसन्नो भव तः स्वामिन् गर्भं० । भूतप्रेतपिशाचाद्या ये नो
संततिघातकाः । पाशेनायम्यतान्सर्वान्गर्भं० ।७। स सैते तांत्रिका मंत्रा श्छीदसाः पंचवारुणाः ।
त्वन्नः प्रख्त योद्वौ च वारुणाव परावपि । त्वन्नो अग्ने स त्वं नो अग्ने इदं मे वरुण श्चेति अर्घ्यं द
त्वा समंतुतैः इमं मे तत्त्वायामि दो । एवं तज्जलमामंत्र्य सक्तु त्वा मंत्रैः प्रणम्य च । निमज्यो न्मज्य ।। २१६ ।।

राम

च्चपुनस्तत्रस्नानंसमाचरेत्।प्रयोगंविधिवत्कृत्वापुत्रकामसमृद्धये।स्नास्यामहेसभगवन्म्र
चेतानेप्रसीदतु।स्नापीयातीततःस्नानद्रव्यैर्मंत्राभिमंत्रितैः।मृत्स्नागोमयगोमूत्रैर्द्रव्ये दधि
पयोघृतैः।तिलामलकपिष्टैश्चसर्वौषधिकुशोदकैः।निर्वर्त्यविधिवत्स्नानंदंपती।तावुभावपि।
स्नायीतैवततःपत्नीएकैकद्रव्यसंचयेः।औदुंबरीं।बहुफलांबिभ्रती।निजमूर्द्धनि।मंत्रपर्वंस्वप
तिनादत्तांरगरवीस्त्रजान्वितां।सप्तौषध्यंबुसंपूर्णैःकलशैरथसप्तभिः।मंत्रपूतैःसदेवज्ञःस्ना
पयेत्तांविधानतः।वर्धाकिरश्चरास्नाचसहदेवी।शतावरी।वचैलालक्ष्मणाचेतिसप्तौषध्योभि
षेचने।याओषधीध्यनुवाकेनसप्तौषध्यभिषेचनं।ततस्तुवेणवंपात्रंसप्तधान्योपसंभृत।
मुद्गतंदुलगोधूमयवशालिसमन्वितैः।सकंगुसहमाषैश्चधान्यैरितिचसप्तभिः।फलानि
विन्यसेत्तत्रयाःफलिनीतिमंत्रतः।नालिकेरंचनारिंगंदाडिमीबीजपूरकं।उन्नतीमथपूगंच

तथालंकृतसर्वांगंवृषभंशुभलक्षणं।दत्वातौदंपतीपश्चाद्देवज्ञेनानुमोदितौ।मंत्रमुच्चारयेया
तांविधिवद्विहितार्हणैः।देवदेवजगन्नाथसर्वपापौघनाशन।कर्मणानेनदानेनतथागोयुग्मलस्य
तु।संतुष्टःशंकरोभूत्वासंततिंदेहिनौप्रभो।ततस्तुवेणवंपात्रंशिवस्याग्रेनिवेदयेत्।आचा
तः र्यायप्रदेयानिदानानिनिजशक्तिं।गुरवेवाससीदद्यात्कर्मशेषंसमापयेत्।प्रणम्यदेवतासा
श्चविसृज्यविधिवत्ततः।ततःकुंभांभसाविप्राअभिषिंचेयुरादृताः।मंत्रैश्चवारुणैःसौरैः
शांतिस्वस्त्ययनादिभिः।पुराणैरागमोक्तैस्तानानाफलविधायिभिः।नांदीमुखेनविधिनाततः
श्राद्धंसमाचरेत्।नमोवःपितरइतिमंत्रेणनमस्कृत्यमुहुर्मुहुः।मध्यमंपिंडमश्नातिपत्नीदैवज्ञनोदि ॥२२९॥
ता।आधत्तपितरोगर्भमितिमंत्रेणमंत्रितं।आचम्यविधिवत्सम्यक्कर्मशे॰त्।शतंभोजयेदन्यान्द्वि राम चं
जान्संतोष्यशक्तितः।कृतकृत्यौचतौस्यातांपुत्रपौत्रसुखान्वितौ॥ ॥इतिसह॰देएकवस्त्रस्नानविधिः॥ ॥

॥ ॥अथाऽकालेगजमदशांतिः॥ ॥अद्भुतसागरेगर्गः॥ऊर्ध्वविंशतिवर्षात्तुमदोभवतिवा
रणे। तस्वर्ग्यद्दिमाद्येत स्वामिनोमरणं दिशेत्। कारयेत्तत्रशांतिंचब्राह्मणंश्चापितर्पयेत्।
एकरात्रोषितःस्नात्वाध्रियःश्रयतमानसः। अष्टोत्तरसहस्रंतुमंत्रंवापिजपेच्छुचिः। ततःप्रज
प्तमंत्रैस्तुसलिलंचाभिमंत्रयेत्। गजानांगजतत्वज्ञः सर्वदोषहरंशुभं। राजस्नानंप्रकुर्वीत
तद्दिनेतूर्यनिःस्वनैः। पूर्वह्निचाग्निकार्यंतुकृत्वाकुंभशातेनहि। ततोहोमंप्रकुर्वीतविधिद
ष्टेनहोमवित्। अग्नयेस्वाहा। रुद्राय·गणपतये·वरुणाय·बृहस्पतये·शुक्राय·इंद्रायेति॥
स्नानंकुंभशतेनेहसर्वोपद्रवनाशनं। द्विजपूजनपूर्वंस्यात्सलिलंमिश्रितंततः। यवयावक
संयुक्तंपिंडंमधुपयेद्बुधः। कृतपूजासंस्कारंगणाधिपंवंदयेत्तरां। ईश्वरस्यमहासैध्यमु
माललाटसंभवाइदंकलोपनीतंतुनैवेद्यंभक्षयस्वनः॥नैवेद्यमंत्रः॥ ॥अथगोकर्णी

मदशांतिः॥ ॥मत्ता मूत्रपुरीषाणि यस्तु संत्राप्य तिष्ठति। मत्तया भज्यते युद्धे हस्तिन्या यदि वारणः।
महद्भयं तत्र भवेद्देशस्य नगरस्य च। उपोष्य वीथ वैस्तत्र सामात्यः सपुरोहितः। हस्तिवत्कल्पितां धे
नुं विषाणाभ्यां च योजितां। अथैनां हस्तिनीं नीत्वा राजा तु राष्ट्रे विमोक्षयेत्। इत्येवमेतां कुर्वीत रात्रौ च
न निवासिनीं। अथवा पूर्ववत्कृत्वा शांतिं कृत्वा वनेद्वयं। सुवर्णेन सुतप्तेन वनमेचु विधारयेत्॥ ॥
इति गोकरिणी मदशांतिः॥ ॥अथ पंचकम तोशांतिः॥ ॥मदनरत्ने गारुडे। आदौ कृत्वा धनिष्ठार्द्ध
मेतन्नक्षत्रपंचकं। रेवत्यंतं सदा हूयम शुभं दाहकर्मणि। शवस्य तु समीपे तु क्षेप्तव्याः पुत्तलास्त
दा। दर्भमय्यास्तु चत्वारः ऋक्षमंत्रेण मंत्रिताः। ततो दाहः प्रकर्तव्यस्तैश्च पुत्तलकैः सह। सूतकांते
ततः पुत्रैः कार्यं शांतिकपौष्टिकं। पंचकेषु मृतो यो वै गतिं न लभते नरः। तिलांश्चैव हिरण्यं च घृत राम
मुद्दिश्य घृतं दहेत्। क्रियानिबंधे। भाजनोपानहौ छत्रं हेममुद्रा च वाससी। दक्षिणा दीयते विप्रे सा तु र२१।

र्वपापविमोचनं। मरनरत्नेगर्गः। यद्विभद्रातिथीनीत्याद्भानुभौमशनैश्चरैः। त्रिपादृक्षैश्च सं
योगोद्वयोर्योगेत्रिपुष्करः। द्वित्रिपुष्करयोगेतु मृतिर्भर्तृकं तरावहा। दहनेमरणेचैवत्रिगुणंस्यात्त्रिपु
ष्करे। खननेप्येवमेवस्याद्दैनदोषोपशांतये।। तिलपिष्टैर्यवैर्वापिशरीरेकारयेत्ततः। शूर्पेनिधाया
लंकृत्यदाहयेत्सैतकोपरि। बोधायनः। अस्मान्त्वमितिमंत्रेणतिलठपिंडंप्रदापयेत्।। द्वित्रिपुष्करयो
र्योगेत्रिभिःकृच्छ्रैर्व्यपोहति।। वासवेमरणेचेत्स्यात्कृहेवासयितुर्मतिः। सुवर्णंदक्षिणांदद्यात्कृच्छ्रव
त्रमथापिवा। वासवैधनिष्ठा। ब्राह्मेकुंभमीनस्थितेचंद्रेमरणंयस्यजायते। नतस्योर्ध्वगतिर्दृष्टा
संततोनस्तुशुभंभवेत्। नतस्यदाहःकर्त्तव्योविनाशात्स्वेषुजंतुषु। अथवातद्दिनेकुर्याद्दाहस्यविधिपू
र्वकं। धनिष्ठापंचकेजीवोमृतोयदिकथंचन। त्रिपुष्करेयाम्यभेवाकुलेजन्मारयेद्ध्रुवं। तत्रानिष्टवि
नाशार्थंविधानंसमुदीर्यते। दर्भाणांप्रतिमाःकार्याःपंचोर्णासूत्रवेष्टिताः। यवपिष्टेनानुलिप्ताः

रव:१

स्ताभिः सह शवं दहेत्। प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः। प्रेतहर्त्ता पंचमस्तु नामान्येतानि च
क्रमात्। अत्र प्रतिमाः संपूज्य शिरो नेत्र वामकुक्षि नाभि पादेषु क्रमेण न्यस्य तन्नामभिर्घृतं हुत्वा यु
मायसोमे त्र्यंबकमिति मंत्राभ्यां प्रत्येकं तास्वाज्यं हुनेदिति मदाः॥ सूतकांते तथा कुर्यात् सुत्राः शां
तिकपौष्टिकं। कांस्यपात्रस्थिते तैले वीक्ष्य दद्याद्द्विजन्मने। ब्रह्मविष्णुमहेशेंद्रवरुणप्रीतये ततः। मा
षमुद्गयवव्रीहित्रियंग्वादिसप्तकं। स्वर्णदानं रुद्रजाप्यं लक्षहोमो द्विजार्चनं। गोभूदानं षडंशेन
कुर्याद्दोषोपशांतये। अपरार्के स्मृत्यंतरे। धनिष्ठापंचके मृते पंचरत्नानि तन्मुखे। प्रास्याहुतित्रयं तत्र
हुनेद्दहवपामिति। ततो निर्हरणं कुर्याद्देषसाग्नेर्विधिः स्मृतः। इतरं निखनेद्देवजले वा प्रतिपादयेत्।
त्रिपाद्दक्षमृते तद्वद्धिरण्यशकलं मुखे। तस्य पिष्टमयं कुर्यात्पुरुषत्रितयं ततः। होमं प्रागिव सर्वं कुर्यात्त
था वह वपामिति। कार्ष्णायसं च कार्पासं कुसुंभं प्रतिपादयेच्च। निर्याल्य साग्निं संस्कुर्याद्धुत्यग्नौ वा

राम

॥२२५

न्समुत्सृजेत्। तत्रैव। कनकं हीरकं नीलं पद्मरागं च मौक्तिकं। पंचरत्नमिदं प्रोक्तं ऋषिभिः पूर्वदर्शिभिः। र
त्नानां वाप्यभावे तु स्वर्णं कर्षार्धमेव वा। सुवर्णस्याप्यभावे तु आज्यं ज्ञेयं विचक्षणैः॥ भद्रे नरत्ने प्येवं।
तथा। एकाशीतिपलैः कांस्यं तदर्द्धं वा तदर्धकं। नव षट्त्रिपलैर्वापि दद्याद्विप्राय शक्तितः। अन्यत्रापि।
स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनं ततः। अन्वाधानं निर्वपणं देवतानां तथाहुतिः। यमाय धर्म
राजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। औदुंबराय दध्नाय नीलाय प
रमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै क्रमात्। विधानाश्रयणं कृत्वा एकैकामाहुतिं हुनेत्। कृष्णां
गां कृष्णवस्त्रं च निष्कद्वयसमन्वितां। दद्याद्विप्राय शांताय प्रीतो भवतु मे यमः॥ त्रिपादृक्षेप्येतदेव।
अपरार्के। पुनर्वसूत्तराषाढाकृत्तिकोत्तरफाल्गुनी॥ पूर्वाभाद्र विशाखा च ज्ञेयमेतत्त्रिपादृक्षं। ब्र
ह्मचारिमरणे कुष्ठिमरणे गर्भिणीरजस्वलासूतिकामरणे विधानान्यन्यश्च विशेषो मत्कृते निर्ण

यसिंधोज्ञेयः॥ ॥अथमृत्युंजयविधानंवसिष्ठकल्पोक्तंसंक्षेपेणोच्यते॥ ॥त्र्यंबकस्यविधानंतु
कथयिष्येमुनीश्वराः।यथोक्तविधिनायुक्तंसंस्मृतंब्रह्मणापुरा।मृत्युंजयस्त्रिधाप्रोक्तआद्योमृत्युं
जयःस्मृतः।मृतसंजीविनीचैवमहामृत्युंजयस्ततः।मृत्युंजयःकेवलस्यात्पूरितोव्याहृतित्रयः।ता
रंत्रिबीजंव्याहृत्यःपुटितोमृतजीविनी।तारंत्रिबीजंव्याहृत्यःपुटितस्तेत्रियंबकः।महामृत्युंजयः
प्रोक्तःसर्वमंत्रविशारदैः।मृतसंजीविनीतारंप्रणवाव्याहृतीःपुरा।ततस्त्रेयंबकोमंत्रःपुनरंते
तथोच्चरेत्।मृत्युंजयोयमेवात्रकथितोमंत्रवित्तमैः।मायातारादिकाच्चैवव्याहृतित्रितयंततः।पुटि
तस्त्र्यंबकमनुर्मृतसंजिविनीमता।सबीजोयस्तुमंत्रोवैमहामृत्युंजयःस्मृतः।प्रणवव्याहृतीश्चैव
प्रणवायाःपठेत्पुरा।ततस्त्रेय्यंबकमनुरंतेव्याहृतयश्चताः।त्रिबीजप्रणवांतेचववहृिजायाम
योच्चरेत्।प्रणवांतेप्रासादश्चमतिहारकएवच।भूरादिव्याहृतयश्चत्र्यंबकेतिचक्रमात्ततः।वि

राम

॥२३४॥

पर्यायेणत्रिबीजंतद्व्याहृतीत्रयं।स्वाहांतोमनुरेषोत्रशुक्रेणाराधितःपुरा।मृत्युंजयइतिवि
श्रुतोभुवनत्रये।ॐकारैःसंयुतःषड्भिश्चतुर्दशभिरेवच।मृत्युंजयंतंविधिवदुपास्येप्सितमाप्नु
यात्॥तथा॥विभक्तैर्मंत्रवर्णैर्वाषडंगानांप्रकल्पना।हृदयंत्रिभिराख्यातंचतुर्भिःशिरउच्यते।
शिखाष्टभिःसमुद्दिष्टानवभिःकवचंमतं।पंचभिर्नेत्रमाख्यातमस्त्रंत्रिभिरुदाहृतं।पूर्वपश्चि
मयाम्येंदुवक्त्रेषुतदनंतरं।पूर्णमंत्रंन्यसेदूर्ध्वमुखेप्यंबकसंज्ञकं।शिरोगलास्याक्षियुगनाभि
हृत्पृष्ठकुक्षिषु।लिंगपायूरुमूलांतर्जानुयुग्मेततःपरं।तद्वृत्तयुग्मेस्तनयोश्चपार्श्वयोःपादयोः
पुनः।पाण्योर्नासिकयोःशीर्षेमंत्रवर्णान्न्यसेत्क्रमात्।पदान्येकादशान्यस्यशिरोभ्रूयुगलाक्षि
षु।वक्त्रेगंडयुगेकर्णयोर्हृदयेजठरेपुनः।गुह्योरुजानुपादेषुन्यासमेवंसमाचरेत्।एतत्प्रयोगेवक्ष्यामी
त्यभविष्यति।आदौप्रासादबीजंतदनुमृतिहरंतारकंव्याहृतीश्चप्रोच्चार्यत्र्यंबकंयोजपतिमृतिह

रंभ्रयएवैनमार्थी। कृत्वान्यासं षडंगंस्त्रव स्मृतकरं मंडलीतः प्रविष्टं ध्यात्वायोगीशरुद्रंसज्यतिम
रणंश्रुक्त्विधाप्रसादात्। वेदादिभूरादिपुरस्त्रयंच मध्येजपेन्मृत्युहरंचत्र्यंबकंजपेत्फलार्थीविधिव
त्सपुत्कंप्रासादमृत्युंजयसंपुटेन। ॐकारत्रितयायाश्चॐकारत्रितयांतकाः। व्याहृतित्रितयंचैवप्रासा
दत्रितयंतथा। ॐकारैर्मनुसंख्यातेजनीयात्सर्वसिद्धये। महामृत्युंजयश्चैवमृत्युंजयस्त्रियंबकः॥

त्र्यंबमनुर्युक्तः पूर्वंचांतेद्वयेनच। महामृत्युंजयोलोकेप्रकाख्यामापगांध्रुवं। बीजं विनाचशुद्धस्तुम
त्युंजयसमाख्यकः। अन्योमहामृत्युंजयइतिविद्यात्रिधाह्यसौमनुः॥ तथान्यत्र। चतुर्दशः स्वरोयुक्तोह
कारेणचबिंदुना। प्रासादाख्यंभवेद्बीजं सुप्रसन्नकरंमहत्। षष्ठः स्वरश्चसंयुक्तोजकारेणचबिंदुना। म
त्युंजयंसमाख्यातंबीजंमृत्युहरंपरं। सविसर्गः सकारश्चतारकंपरिकीर्त्तितं। तारीस्त्रिरासकर्णेंडुपर राम
गुःसर्गसमन्वितः। अक्षरात्मानिगदितोमंत्रोमृत्युंजयात्मकः॥ ॥इतिमृत्युंजयविधिः॥ ॥ ॥१२५॥

स्य

॥वसिष्ठप्रोक्ते॥कुंडेपूर्वदिग्भागेकालीजिह्वाप्रकीर्त्तिता।आग्नेयांतुकरालीस्याद्दक्षिणेतुसलो
हिता।मनोजयातुनैर्ऋत्यांधूम्रवर्णातुवारुणे।स्फुलिंगिनीतुवायव्यांसौम्येविश्वरुचिस्तथा।
काल्यांकराल्यांवाकुर्याच्छांतिकंपौष्टिकंतथा।भूतप्रेतपिशाचादिशंनिर्लोहितजिह्वया।मनोजया
यांजिह्वायामभिचारोविधीयते।कुंडेयाधूम्रवर्णायांवष्टिकामोपदाभवेत्।स्फुलिंगिनीतुया
जिह्वातस्यामुच्चाटनंविदुः।यातुविश्वरुचिर्जिह्वाकुंडस्योत्तरभागतः।सर्वार्थसाधकामेतिप्रोच्य
तेमंत्रवित्तमैः।अपरेवसुधारेतिजिह्वाप्रवर्त्तिरेविदुः।कुंडेषुमध्यमेभागमग्नेरास्यंप्रचक्षते।तस्मि
न्कार्याणिसर्वाणिकारयेन्मारणंविना।औपासनाग्निमानीयतस्मिन्कुंडेविनिक्षिपेत्।अथवा
श्रोत्रियागाराभ्यर्थितंवासमानयेत्।अर्चयेल्लोकपालांश्चप्रागारभ्यप्रदक्षिणं।कुंडेकृत्वाज्यभा
गांतंसर्वमुल्लेखनादिकं।स्वगृह्योक्तविधानेनपायसेनैवहोमयेत्।आयुःकामोघृतेनाग्नौजु

हुयाल्लक्षसंख्यया।अयुतंवासहस्रंवाशतमष्टोत्तरंतुवा।दूर्वाष्टकैर्वाजुहुयान्मधुरत्रयसंयुतैः।
गुडूचीखंडकैर्वापिचतुरंगुलमायतैः।अथवाजुहुयाद्द्राक्षान्मिश्रितैस्तिलतंडुलैः।प्रक्षालितैस्ति
लैर्वापिजुहुयाद्घृतप्लुतैः।पालाशासमिधोहुत्वासर्वमायुरवाप्नुयात्।अथवातर्पयेद्देवमुद
केनसमाहितः।आरोग्यकामोजुहुयादर्ककाष्ठैर्घृतप्लुतैः।पयसावापिजुहुयाद्द्रव्येनाज्येनवा
पुनः।पलाशासमिधावापिसर्वरोगप्रशांतये।अछिन्नैराम्रपर्णैस्तुपयोक्तैर्जुहुयाज्ज्वरे।गुडूचीखं
डकैर्वापिखादिरैर्वाघृतप्लुतैः।प्रमेहमधुनाहोमःपयसाघृतेनवा।औदुंबरसमिद्भिर्वाहोममाम्र वा४
लकेनवा।गुल्मेशगल्मलिहोमःस्यात्तिलैःहुल्लेर्घृतेनवा।कर्दमानसमिद्धोमःसद्यःशूलहरोभ
वेत्।करंजसमिधोवापिनिर्गुंडीसमिधोपिवा।तैलेनाज्येनजुहुयाद्वातरोगप्रशांतये।शमीस राम
मिद्भिर्जुहुयादतीसारप्रशांतये।शांत्यर्थमक्षिरोगस्यपलाशासमिधःस्मृतः।उन्मत्तसमिधो ॥२२६॥

हुत्वा अपस्मारात्प्रमुच्यते। कुबेराक्षेंद्रवल्लीभ्यां नेत्रश्लेषु होमयेत्। तैलेनाभ्यज्य जुहुयाद्धज्र
खंडैस्तथैव च। मातुलिंगशुचीनां होमः कामलनाशनः। मधुरत्रयहोमेन शांतिः स्याद्राजयक्ष्मणः।
होमाद्व्रफलमूलानां गर्भरोगः प्रशाम्यति। कुष्ठमसूरिके होमो मधुत्रितयसंयुतैः। छिन्नोत्पलै
स्तु जुहुयात्सालाशैर्वा घृतप्लुतैः। अथवा तैलसंयुक्तैर्जुहुयाद्गौरसर्षपैः। ये चान्ये मुखरोगाः
स्युः शिरोरोगास्तथैव च। ते सर्वे प्रशमं यांति तिलैर्होमाद्घृतप्लुतैः। औदराणां तु रोगाणां सर्वे
षां शांतिमिच्छता। बिल्ववृक्षसमिद्धोमः कर्त्तव्यो द्विजसत्तम। अथः स्वावित्तु जुहुयात्पद्मपत्रैर्घृतप्लु
तैः। पूर्वाक्षिर्वा यथोक्ताभिर्जुहुयाच्चंदनेन वा। निश्यश्वत्थसमिद्भिश्च रक्तस्रावे तु होमयेत्। अ
पवा गो घृतेनैव रक्तातीसारशांतये। अन्यरोगे सर्वेषु कंठरोगे महोदरे। त्रिभिः फलैस्तु जुहु
यान्मधुक्षीरघृतप्लुतैः। मधुरत्रयहोमस्तु सर्वरोगप्रशांतिदः। आयुर्वेदे तु यत्प्रोक्तं यस्य रोग

स्यभेषजं।तत्ररोगस्यशांत्यर्थं तेनतेनवहोमयेत्॥अथवातेनमंत्रेणपावमानीभिरेववा।तीर्थतो
येनदेवेशमभिषिंचेत्समाहितः।भूतप्रेतज्वरादीनांसर्वेषामपिशांतये।अथवातर्पणंकुर्यान्मंत्रैः
पूर्वोक्तसंख्यया।अथवानियताहारोजपेन्मंत्रंसमाहितः।एवंहोमंद्विजःकुर्यात्तर्पणंजपमेववा।
आयुरारोग्यसिध्यर्थंमात्मनोवापरस्यच।एकाहंवाद्व्यहंवापिदशाहंद्वादशाहकं।पक्षंमासं
द्विमासंवामासत्रयमथापिवा।अथवाचतुरोमासान्षण्मासानेकहायनं।भयेमहतिसंजाते
दीर्घकालंसमाहितः।अल्पेल्पकालंकुर्वीतजपहोमादिकंत्रयं।रोगकालोपयुक्तंयद्द्रव्यंशय्या
सनादिकं।रोगमुक्तस्तुतत्सर्वंनोपयुंज्यात्कदाचन।अपमृत्युजयोपायमहंवक्ष्याम्यतःपरं॥
मधुरत्रययुक्ताभिर्दूर्वाभिर्जुहुयाद्बुधः।सहस्रमयुतंवापिशतमष्टोत्तरंतुवा।श्वेतार्ककुसुमैर्वा राम
पिजुहुयाद्रोयतेनवा।अपामार्गसमिद्भिर्वातिलैःकृष्णैर्यवैरपि।अथवागोघृतेनैवपयसावा॥२२५॥

पिहोमयेत्॥ कपिलागोघृतंक्षीरं प्रशंसंतिमनीषिणः॥ शनैश्चरादिनेश्वत्थं स्पृष्ट्वा मंत्रमिमंजपेत्॥
साक्षान्मलेपि मुक्तः स्यात् किंपुनस्त्वपमृत्युभिः॥ अथवापयसादेवमभिषिच्य घृतेनवा॥ पलाशख
दिराश्वत्थसमिद्भिर्जुहुयात्सुवा॥ बिल्ववृक्षो द्रुवैवापि सोपमृत्यो विमुच्यते॥ अथवा श्वपचिलाालुच
रुं रौद्रं द्विजोत्तमः॥ अष्टोत्तरशतं हुत्वामृत्युंजयतिमानवः॥ अथोपा[illegible]यांतरं वक्ष्येसाक्षान्मृत्युनिवर्त
नी॥ हस्तमात्रप्रमाणेन वेदिं कुर्याद्विचक्षणः॥ तन्मध्येस्थापयेत्कुंभं सितसूत्रेणवेष्टितं॥ तंडुलैर्व्रीहिभि
र्वापिचतुरस्रं समंततः॥ वासोयुग्मेन संवेष्ट्य तीर्थतोयेन पूरितं॥ पल्लवान्क्षीरवृक्षाणामथवा चूत
पल्लवान्॥ प्रक्षिप्य तत्रालंकृत्य गंधमाल्याक्षतादिभिः॥ तत्रावाह्य महादेवं देवदेवं त्रियंबकं॥ पूजयेद्गं
धपुष्पाद्यैस्त्र्यंबकेत्यनया ऋचा॥ ततोभिमंत्रयेत्कुंभं मंत्रेणानेन मंत्रवित्॥ अष्टोत्तरसहस्रं तु अभिषि
चेत्ततो निशि॥ प्रोक्षयेच्चाथ कूर्चेन राजानं तु विशेषतः॥ नापमृत्युभयं तस्य नचव्याधिकृतं भयं॥ प

रार्थे धनलोभेनमोहादज्ञानतोपिवा। मृत्युंजयजपंकुर्वन्स्वयंमृत्युमवाप्नुयात्। मातरंपितरंपुत्रं
राजाचार्यौविनासदा। अथरक्षाविधिंवक्ष्येसर्वभूतभयापहं। औपासनाग्निहोत्रोत्थंगृहीत्वाभस्म
वेसितं। ततोभिमंत्र्यतद्भस्म तेनांगानिचसंस्पृशेत्। अथापरंप्रवक्ष्याभिरोगमृत्युभयापहं। ग्रह
प्रेतोरगादिभ्योभयंयेननजायते। यथेष्टेनसुवर्णेनकारयेदंगुलीयकं। पंचलोहेनवाकुर्यात्त्रिलो
हेनैववापुनः। ततःसंपूजयेद्देवंगंधपुष्पाक्षतादिभिः। त्र्यंबकेनैवमंत्रेणमनसैवसमाहितः। कुं
डेवास्थंडिलेवापिविधिवन्मंत्रकोविदः। गोघृतेनैवजुहुयाद्ध्यात्वादेवंनिरंजनं। शतंसहस्रमयु
तंनियुतंवापितत्वतः। होतुश्चदक्षिणेपार्श्वेहेमेवाराजतेपिवा। कांस्येवाम्मृन्मयेवापिपात्रेन्य
स्यांगुलीयकं। सर्वाहुतिषुसंपातंतस्मिन्नापिनयेद्बुधः। अंगुलीयंस्पृशन्मंत्रंशतमष्टोत्तरंजपेत्।
अंगुल्यांसर्वरक्षार्थंधारयेदंगुलीयकं। अनेनैवविधानेनसर्वाण्याभरणानिच। नवानिधारये

न्नित्यं जीवेद्वर्षशतं सुखी ॥ अथ शांतिं प्रवक्ष्यामि सर्वोपद्रवनाशिनीं । अद्भुतेषु च सर्वेषु दुःस्वप्ने बुद्धि
सत्तमः । दिव्यांतरिक्षभौमानामद्भुतानां च दर्शने । प्रत्यक्ष प्रतिभानेषु नानारूपेषु सर्वशः । भूतप्रेतपि
शाचानामावेशे शंकिते तथा । गृहमध्येऽग्निमाधाय श्रपयेत्पायसं चरुं । तेनैव जुहुयाद्वग्नो मंत्रेणानेन
संयतः । तिलोदनं वा जुहुयात् शुद्धोदनमथापि वा । अष्टोत्तरशतं मंत्री जुहुयाद्धोघृतेन वा । पालाशख
दिराश्वत्थबिल्वन्यग्रोधपल्लवैः । अपामार्गसमिद्भिर्वा जुहुयादथवा तिलैः । अथवानेन मंत्रेण कोटि
होमं तु कारयेत् । गव्येन सर्पिषा विद्वान्यवव्रीहितिलैः स्रुवा । अग्निमाधाय जुहुयात् समिद्भिरुप
तादिकं । भूतप्रेतपिशाचाश्च ये चान्ये च ग्रहादयः । ते सर्वे होमगंधेन धूमसंस्पर्शनेन च । मंत्रस्या
स्य प्रभावेन निर्गच्छंति गृहात्ततः । अथवानेन मंत्रेण पूर्णकुंभं समाहितः । अभिमंत्र्य गृहं सर्वं प्रोक्ष
येत्तेन वारिणा ॥ ॥ अथ न्यासविधिं वक्ष्ये मंत्रस्यास्य महामुने । अक्षराणि त्रयस्त्रिंशदस्मिन्मंत्रे

तुदेवताः। आद्यवर्ष्टोवसून्विद्यारुद्रानेकादशोत्तरे। ततश्चद्वादशादित्याः प्रजापतिरनंतरं। वषट्कारस्ततमेतुसर्वाक्षरमयः शिवः। एवमेतानिरूपाणिदेवताकथितानिवै। अक्षराणिन्यसेन्मंत्रीसर्वांगेषुसमाहितः। मूर्द्धादिपंचस्थानेषुप्रथमंपंचकंन्यसेत्। दक्षिणस्यकरस्यापिसंधिस्थानेषुपंचसु। ततःपराणिपंचैववामहस्तेन्यसेत्ततः। ततस्तुदक्षिणेपादेसंधिस्थानेषुपंचसु। पराणिपंचविन्यस्यवामपादेतथान्यसेत्। ततश्चदक्षिणेपार्श्वेवामपार्श्वेन्यसेत्क्रमात्। पृष्ठेनाभ्यांचगुह्येचकुक्षौचततीयेन्यसेत्। भ्रूमध्येशिरसिगलेहृदयेमातृकान्यसेत्। एवंविन्यस्यसर्वाणिततोंतेप्रणवंयजेत्। स्वस्यांगेषुन्यसेदेवंमंत्रीमंत्रंसमाहितः।

एवंद्रष्टुमशक्तास्तुकृत्यारक्षोग्रहादयः॥ अथकाम्यानिकर्माणिप्रवक्ष्यामिसमाहितः। श्रीकामोबिल्ववृक्षस्यसमिद्भिरथवाफलैः। पत्रैर्वाप्यस्यजुहुयान्महतींश्रियमाप्नुयात्। गोकामःप

राम

पसाहेमाल्लभते गाः पयस्विनीः। विद्यार्थी जुहुयाद्यस्तु रुद्राक्षैर्गोघृतप्लुतैः। विद्यां वा पुस्तथा वि
त्तं लभते नात्र संशयः। अन्नाद्यकामो जुहुयाद्रन्नमेव घृतप्लुतं। पलाशसमिधो हुत्वा ब्रह्मवर्चसमाप्नु
यात्। वृष्टिकामस्तु संपूज्य देवदेवं च त्र्यंबकं। अर्घ्यपात्रादिभिर्देवं प्रसंगैरभिषेचयेत्। आपो हि
ष्ठेति तिसृभिर्हिरण्यवर्णाद्भिस्तथा। पवमानानुवाकेन त्र्यंबकेत्यनया ऋचा। वेतसीभिः स
मिद्भिस्तु जुहुयात्पायसाप्लुतैः। अयुतं वा सहस्रं वा जुहुयात्पयसापि वा। पुण्याहं वाचयेच्चैव ब्राह्म
णान्भोजयेत्ततः। दशाहाभ्यंतरे वृष्टिर्भवत्येव न संशयः। वृष्टिकामश्चार्द्रवासो वटवृक्षसमुद्भवैः।
समिद्भिर्जुहुयान्मंत्री सद्यो वृष्टिमवाप्नुयात्। नाभिमात्रे जले स्थित्वा ध्यायन्वै पुष्टिवर्द्धनं। जपेत्त्रि
यंबकं मंत्रं महतीं वृष्टिमाप्नुयात्। अग्निहोत्रात्समादाय सितं भस्म सनुत्तमं। अनया तु ऋचा
हुत्वा तिलैर्वृष्टिं निवारयेत्। पुत्रकामस्तु जुहुयात्पायसं घृतसंयुतं। चरुशेषं स्वयं भुक्त्वा पुत्रं

प्राप्नोति मानवः। पौर्णमास्यां तिलान् कृत्वा घृताक्तान् विंदते सुतं। गोचर्ममात्रमालिप्य गोमये
नाथ भूतलं। धान्यराशौ विनिक्षिप्य तन्मध्ये स्थापयेद्बुधः। विंशति कलशांस्तत्र क्षिप्त सूत्रेण वेष्टि
तान्। तीर्थतोयेन संपूर्णान् भूषणान्पल्लवादिभिः। त्र्यंबकेन मंत्रेण ततस्तानभिमंत्र्य च। अथ
वंध्यां स्त्रियं तैस्तु कलशैरभिषेचयेत्। अचिराल्लभते पुत्रमायुष्मंतं यशस्विनं। वस्त्रकामस्तु
जुहुयात् कुसुमैः कालसंभवैः। यद्वर्णं जुहुयात् पुष्पं तद्वस्त्रं वस्त्रमाप्नुयात्। धान्यं तिलाज्यसंयुक्तं
हुत्वा कन्यामवाप्नुयात्। देवतावशकामस्तु कुसरं घृतसंयुतं। अष्टोत्तरसहस्रं तु जुहुयात् पाय
सेन वा। हविःशेषं स्वयं भुक्त्वा जपेन्मंत्रमिमं पुनः। यां देवतां समुद्दिश्य करोत्येवमतंद्रितः। प्र
त्यक्षभूता सा देवी वरमिष्टं प्रयच्छति। इत्थं लोकवशी कुर्यान्नक्षत्रे रुद्रदैवते। करवीरसमिद्भि
स्तु तैलेनाक्तैर्घृतेन वा। अष्टोत्तरसहस्रं तु हुत्वे वोच्चाटयेद्रिपून्। निर्गुंडिकासमिद्भिस्तु

श्वेतार्कक्षीरसंपुतैः। कालपंजरहोमं तु कुर्वतोभ्र्मते रिपुः। उन्मत्तसमिधो होमात्परस्योच्चा
टनं भवेत्। अथान्यदपि यत्क्रूरं कल्पोक्तं मारणादिकं। तत्सर्वं नैव कर्त्तव्यं ब्राह्मणेन पतेतोतथा
॥ लैंगे उत्तरार्द्धे त्रिपंचाशदध्याये। सूत उवाच। त्र्यंबकेन तु मंत्रेण देवदेवं त्रियंबकं। पूजयेद्वा
णलिंगे वा स्वयंभूते पि वा पुनः। ऋषितीर्थे देवतीर्थे यथावदनुपूर्वशः। अष्टोत्तरसहस्रेण पुं
डरीकेण शंकरं। रक्तोत्पलसहस्रेण यथा नीलोत्पलेन च। संपूज्य पायसं दत्वा घृतं वा रनिकं
पुनः। मुद्गान्नं मधुसंयुक्तं भक्ष्याणि सुरभीणि च। अग्नौ होमश्च विपुलो यथावदनुपूर्वशः।
पूर्वोक्तैरपि पुष्पैश्च वरुणाय विशेषतः। जपेद्वै नियुतं सम्यक्कालमृत्युपशांतये। जातीपुष्पे
ण वश्याय शृणु श्रयाद्युतत्रयं। घृतेन करवीरेण कुर्यादाकर्षणं द्विजः। विद्वेषणं विषेणैव कु
र्यात्क्रूराहलस्य चा तैलेनोच्चाटनं प्रोक्तं स्तंभनं मधुना स्मृतं। तिलेन मोहनं प्रोक्तं ताडनं स

धिरेण च। खरस्य चर्जंगे स्याथ उष्ट्रस्य च यथाक्रमं। स्तंभनं सर्षपैश्चापि पाठनं लसुनेन च। मा
रणे चोच्चाटनं चैव द्रोही बीजेन सुव्रताः। बंधनं तु हिपत्रेण सेना स्तंभमतः परं। घृतेन सर्वसिद्धिः
स्यात्पयसा ऋद्धिरुच्यते। तिलेन रोगनाशश्च कमलेन धनं लभेत्। कांतिं मधूकपुष्पेण सावित्र्या
वायुतत्रयं। जपादि प्रभृतीन् कुर्यात्त्विषांते पूर्ववत्स्मृतं। रुध्यो द्रोये पेप्येवं॥ ॥इति व सिष्ठकल्पः॥
दानहेमाद्रौ शौनकः॥ त्र्यंबकं यजामह इति शिखायां न्यसेत्। सुगंधिं पुष्टिवर्द्धनमिति हृदये। उर्वारु
कमिव बंधनादिति मणिबंधने। मृत्यो रिति गुह्ये। मुक्षीय मामृतादिति नाभौ। पाद गुल्फे च जंघो
रूजघने कटिमेढ्रयोः। नाभौ कुक्षिद्वये पार्श्वे कक्षयोः कुचयोर्हृदि। स्कंधे स्फाटिकायां तु कूर्परे म
णिबंधके। कनिष्ठानामिकामध्यतर्जन्यंगुष्ठपाणिषु। कंठे च चिबुके वक्रे नासिका कर्ण चक्षुषि॥ राम
ललाटे मूर्ध्नि चूडायां वर्णान्मंत्रस्य विन्यसेत्। देवीपुराणे। ॐ जूं स इति मंत्रोयं ख्यातो मृत्युं ॥२३१॥

जयः परः। मृत्युंजयस्तु देवोयं चतुर्भुजस्त्रिनेत्रकः। अक्षमालाधरो देवो दक्षिणेन तु पाणिना॥
वामेनामृतकुंडीं च धारयन्नमृतान्वितां। वरदाभयपाणिश्च दिव्याभरणभूषितः। शुक्लः सुनील
वासाश्च यमस्योपरि संस्थितः। ॐ जूं तस्य शिरो ज्ञेयं हौं जूं सश्च शिखार्चने। अष्टौ तु शक्तयः पूज्याः
पंचाक्षरसमन्विताः। जया च विजया चैव अजिता चापराजिताः। भद्रकाली कपाली च क्षेम्या मृत्यु
पराजिता। ॐ जूं स इति मंत्रेण पूज्यो मृत्युंजयः शिव इति॥ ॥अथ प्रयोगः॥ ॥कर्ता देशकाला
लौ स्मृत्वा मम जीवच्छरीराविरोधेनाऽमुकरोगस्य समूल नाशनापमृत्यु निवारणद्वारा क्षि
प्रारोग्यार्थममुकसंख्यया महामृत्युंजयमंत्रजपं करिष्ये विप्रद्वारा करिष्ये इति वा संक
ल्प्य गणेशपूजा पुण्याहवाचन मातृकापूजा वृद्धिश्राद्धानि कृत्वा चार्यं वस्त्राद्यैर्वृणुयात्। अ
पाचार्यश्चाचम्य प्राणानायम्य देशकालौ स्मृत्वाऽमुकस्यारोग्यार्थममुकाज्ञया त्र्यंबकमंत्र

उपादिकरिष्य इत्युक्त्वा पृथ्वीतिमंत्रेणासनं कृत्वा ऽपसर्पंत्विति भूतान्युत्साध्य तालत्रयं कृत्वा मूले
न लमितिवा १२ वामनासाभ्यां पूर्यं मूलं यमितिवा १६ कुंभकं कृत्वा मूलेन १२ रेचयेत् ।यमिति १२ देहं
संशोष्य रमित्यग्निबीजेन दग्ध्वा वमित्यमृतबीजेनाप्लाव्य आत्मनश्चाकाशः आकाशाद्वायुः वा
योरग्निः अग्नेरापो ऽद्भ्यः पृथिवी ।तस्या देहोत्पत्तिं विभाव्य हमित्यमृतं स्त्रावयित्वा ।प्राणप्रतिष्ठां कृ
त्वा शिवोहमिति भाव्येष्टदेवं नत्वा वामे गुरुं परमगुरुं परापरगुरून् परमेष्ठीगुरून् स्वबीजनाम
भिर्नत्वा दक्षिणे गणेशदुर्गाक्षेत्रपालान्नत्वा मूलेन करशुद्धिं कृत्वा मूलेन प्राणानायम्य· अस्य श्री
महामृत्युंजयमंत्रस्य वसिष्ठऋषिः अनुष्टुप् छंदः मृत्युंजयो रुद्रो देवता· ह्रौं बीजं जूं शक्तिः ओं की
लकं जपे वि· ।स्रुद्रत्र्यंबके त्र्यं बीजं ।जं शक्तिः ।वं कीलकमिति मंत्रकोशे ।शिरोमुखहृदयगुह्यपा
दुपादेषु ऋष्यादीन्वि न्यस्य मूलेन करशुद्धिं कृत्वा ।प्रणवं करतलयोर्न्यस्य ।ॐ अग्नये हृदया ।।२३२ राम

यनमः।त्र्यंबकायशिरसेस्वाहा।त्रिनेत्रायशिखायैवषट्।वसिष्ठायकवचायहुं।अनुष्टुप्छंद
सेनेत्रत्रयायवौषट्।रुद्रदेवताअस्त्रायफट्॥अथषडंगः॥त्र्यंबकंहृदयायनमः।यजामहेइतिशि
रसेस्वाहा।सुगंधिंपुष्टिवर्द्धनंशिखायैवषट्।उर्वारुकमिवबंधनात्कवचायहुं।मृत्योर्मुक्षीयने
त्रयायवौषट्।मामृतात्अस्त्रायफट्॥ ॥अथाक्षरन्यासः॥सर्वत्रप्रणवादिनमोंतत्वं।त्र्यंद
क्षपादमूले।बंदक्षजानुनि।कंदक्षगुल्फे।यंदक्षपादांगुलिमूले।जांतद्दयेषु।मंवामपादमूले।हें
वामजानुनि।सुंवामगुल्फे।गंवामपादांगुलिमूले।धिंतद्दयेषु।पुंगुह्ये।ष्टिंआधारे।वंउदरे।र्धं
हृदये।नंकंठे।उर्वारुकमिइत्येतानिदक्षबाहुसंधिषु।वबंधनान्मृंवामबाहुसंधिषु।त्योंमुखे।
मुक्षीदक्षवामनासयोः।यंनेत्रयोरावृत्या।मांकर्णयोः।मृभ्रुवोः।तात्शिरसि॥ ॥अथपा
दन्यासः।त्र्यंबकंयजामहेपूर्ववक्त्रायनमः।ॐसुगंधिंपुष्टिवर्द्धनंपश्चिमवक्त्राय।ॐउर्वारु

कमिव बंधनात्। दक्षिणवक्त्राय। मृत्योर्मुक्षीय मामृतात् उत्तरवक्त्राय॰ सर्वं चोर्ध्ववक्त्राय।
॥ ॥अथाक्षरन्यासः॥ त्र्यं शिरसि। बं कंठे। कं मुखे। यं ज्ञां नेत्रयोः। मं नाभौ। हे हृदि। सुं पृष्ठे। गंधिं
कुक्ष्योः। पुं लिंगे। ष्टिं पायौ। वं र्धं ऊर्वोः। नं वस्तौ। उं तन्मूले। वं आंत्रे। रुं कं जान्वोः। इ वं जंघयोः।
बंधं स्तनयोः। नान्मृ पार्श्वयोः। त्योर्मु पाद्योः। क्षी यपाण्योः। मामृ नासयोः। तात् शिरसि॥ ॥
अथ पदन्यासः। सर्वत्र नमोंते। त्र्यंबकं शिरसि। यजामहे भ्रुवोः। सुगंधिं नेत्रयोः। पुष्टिवर्द्धनं मुखे।
उर्वारुकं कंठयोः। इव हृदयाय। बंधनात् उदराय। मृत्योः गुह्याय। मुक्षीय ऊरुभ्यां॰ माजानुभ्यां।
अमृतात् पादाभ्यां॥ एते न्यासा मंत्रकोशेपि तुल्याः॥ ॥अथाक्षरवस्वादिन्यासः। ॐ त्रिं धरा
य शिरसे नमः। यं ध्रुवाय नेत्राभ्यां। बं सोमाय कर्णाभ्यां। कं आपाय नासयोः। यं अनिलाय मु राम
खे। ज्ञां अनलाय दक्षबाहुमूले। मं प्रत्यूषाय दक्षकूर्परे। हे प्रभासाय दक्षमणिबंधे। सुं वी ॥२३२॥

रभद्राय दक्षांगुलीमूले। गं शंभवे तदग्रेषु। धिं गिरीशाय वामबाहुमूले। पुं अजैकपदे वाम
कूर्परे। त्विं अहिर्बुध्न्याय वाममणिबंधे। वं पिनाकिने वामांगुलिमूले। धं अपराजिताय तद
ग्रेषु। नं भुवना   धीश्वराय दक्षपादमूले। उं कपालिने दक्षजानौ। वं स्थाणवे दक्षगु
ल्फे। रुं भर्गाय दक्षपादांगुलिमूले। कं धात्रे तदग्रेषु। मिं अर्यम्णे वामोरुमूले। वं मित्राय वामजानौ।
वं वरुणाय वामगुल्फे। धं अंशाय वामपादांगुलिमूले। नां भगाय तदग्रेषु। मइं इंद्राय दक्षपा
र्श्वे। त्यों यमाय वामपार्श्वे। मुं पूष्णे पृष्ठे। क्षीं पर्जन्याय भ्रूमध्ये। यं त्वष्ट्रे ललाटे। मां विष्णवे शि
रसि। मं प्रजापतये गले। तां तत्पुरुषाय हृदये। प्रणवं जपेत्॥ ॥अथापरः॥ त्र्यंबकं यजाम हे ता
मुखस्य पूर्वपश्चिमदक्षिणोत्तरे न्यसेत्। जां उरसि। मं गले। हें मुखे। सुं नेत्रयोः। धिं नाभौ।
पुं हृदि। ष्टिं पृष्ठे। वं कुक्ष्योः। नं लिंगे। उं पायौ। वं ऊर्वोः। रुं जानुनोः। मिं जंघयोः। बं धं स्त

नयोः। नं म्रं पार्श्वयोः। स्योर्मुं पादयोः। क्षीं यं पाण्योः। मां म्रं नासयोः। तात् शिरसि॥ ॥अथ हेमा
द्रोरीणेन को ऽन्यासाः। त्र्यंबकं यजामहे शिखायां। सुगंधिं पुष्टिवर्द्धनं हृदये। उर्वारुकमिव बंधना-
त्। बाह्वोः। मृत्योर्मुक्षीय मामृतात् नाभौ। अं पादयोः। बं गुल्फयोः। कं जंघयोः। यं ऊर्वोः। जां जंघयोः। जान्वोः
मं कट्यो। हें मेढ्रे। सुं जान्वो। गं कुक्ष्योः। धिं पार्श्वयोः। पुं कक्षयोः। ष्टिं स्तनयोः। वं हृदि। र्द्धं स्कंधे। नं कं
ठे। उं कूर्परयोः। रुं कनिष्ठयोः। कं अनामिकयोः। मिं मध्यमयोः। वं तर्जन्योः। बं अंगुष्ठयोः। धं पा
ण्योः। नां कंठे। मृं चिबुके। त्यों मुखे। र्मुं नासयोः। क्षीं कर्णयोः। यं नेत्रयोः। मां ललाटे। मृं मूर्द्धि।
तात् शिखायां॥ एते केवलमृत्युंजयन्यासाः॥ ॥महामृत्युंजयेप्येत एव॥ किंतु प्रत्यक्षरं व्या-
हृतित्रयं सप्रणवं पूर्ववदेत्। ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यं दक्षपादमूले इत्यादि॥ ॐ हौं ॐ जूं सः
इति वा प्रतिवर्णं प्रतिपदमादौ वदेत्॥ ॥अथ नाम षडंगः॥ ॐ हौं ॐ जूं सः ॐ नमो भगवते रु ॥ २३४॥

वं मणिबंधयोः

राम

द्राय शूलपाणये स्वाहा। हृदयाय नमः। ॐ हौं ॐ जूं सः ॐ नमो भगवते रुद्रायामृतमूर्त्तये मां जीवय
शिरसे स्वाहा। ॐ हौं ॐ जूं सः ॐ नमो भगवते रुद्राय चंद्रशिरसे जटिने शिखायै वषट्। ॐ हौं ॐ जूं सः ॐ
नमो भ॰ य त्रिपुरांतकाय ह्रां ह्रीं कवचाय हुं। ॐ हौं ॐ जूं सः ओ नमो भ॰ य त्रिलोचनाय ऋग्यजुः साममंत्रा
य स्वाहा नेत्रत्रयाय वौषट्। ॐ हौं ॐ जूं सः ॐ नमो भ॰ य प्रज्वलयाग्नित्रयाय ज्वल २ मां रक्ष २ अघोरमू
र्तये अस्त्राय फट् स्वाहा॥ ॥अथ द्वितीयः षडंगः॥ ॐ हौं ॐ जूं सः ॐ नमो भ॰ द्राय त्र्यंबकाय त्रिनेत्राय
त्रिपुरांतकाय त्र्यंबकं हृदयाय नमः। ॐ हौं ॐ जूं सः ॐ नमो भ॰ द्राय नीलग्रीवाय शार्ङ्गकधृतशेख
रायामृतवर्षिणे यजामहे शिरसे स्वाहा। ॐ हौं ॐ जूं सः ॐ नमो भ॰ द्राय व्याघ्रचर्मपरिधानाय कप
र्दिने सुगंधिं पुष्टिवर्द्धनं शिखायै वषट्। ॐ हौं ॐ जूं सः ॐ नमो भ॰ द्राय स्त्रवदमृतचंद्रबिंबकलाधराय
कर्पूरगौराय शांताय उर्वारुकमिव बंधनात् कवचाय हुं। ॐ हौं ॐ जूं सः ॐ नमो भ॰ य ऋग्यजुः साम

रुद्र

मंत्रायज्योतिरूपायज्ञानात्मनेमृत्योर्मुक्षीयनेत्रत्रयायवौषट्।ॐहौंॐजूंसःॐनमोभ·याग्नि
वीर्यायदुष्टग्रहनिवारणायधूर्जटयेऽघोरमूर्त्तयेरुद्रशक्तिशूलधरनित्यंमांरक्ष२सर्वतोदिशोअ
घोरायमामृतात्अस्त्रायफट्॥ततःपीठादौमध्येवृत्तंतद्बहिश्चतुरस्रंतद्बहिःषट्कोणंतद्बहिरष्टद
मलद्वयंततश्चतुष्कोणमितियंत्रंविलि[illegible]।धर्माय·ज्ञानाय·वैराग्याय·ऐश्वर्याय·अधर्माय·अ
ज्ञानाय·अवैराग्याय·अनैश्वर्याय।तंतमसे·रंरजसे·रजसेतमसेसूर्यमंडलाय·सोममंडलाय·
वह्निमंडलायइतिसंपूज्य।मृत्युंजयस्तुदेवोयंचतुर्भुजस्त्रिनेत्रकः।अक्षमालाधरोदेवदक्षिणेनतु
पाणिना।वामेनामृतकुंडींचधारयन्नमृतान्वितां।वरदाभयपाणिश्चदिव्यभूषणभूषितः।शु
क्लःसुनीलवासाश्चपद्मस्योपरिसंस्थितः।इतिहेमाद्याकरीत्या॥ ॥अथस्वच्छारविंदस्थित उम
रुकरावस्थितंपूर्णकुंभेदाभ्यांवेदाक्षमालेनिजकरकमलाभ्यांघटौनित्यपूर्णौ।दाभ्यांतौचस्त्र

राम

॥२३५॥

वंतौशिरसिशशिकलाबंधुरेप्लावयंतौसोयंदेवोदधानःप्रदिशतुविशदाकल्पजालश्रियंवः॥
इतिप्रपंचसारमंत्रकोशरीत्या॥बद्धपिंगजटाजूटंनागभूषणभूषितं।द्वादशाक्षंपंचवक्त्रमष्टा
दशभुजंविभुमितिवा।हस्ताभ्यांकलशद्वयामृतरसैराप्लावयंतंशिरोद्वाभ्यांतौदधतंमृगाक्ष
वलयंद्वाभ्यांवहंतंपरं।अंकन्यस्तकरद्वयामृतघटंकैलाससंस्थंशिवंस्वच्छांभोजगतंनवेंदुमु
कुटंदेवंत्रिनेत्रंभजे।इतिवाध्यात्वा।मूलेननासाग्रमार्गेणमध्येदेवमावाह्यस्थापनीसन्निधा
पनीसन्निरोधिनीमुद्राःप्रदर्श्यमूलेनासनपाद्यार्घ्याचमनमधुपर्कस्नानवस्त्रयज्ञोपवीतगं
धपुष्पाणिसमर्प्यावरणपूजांकुर्यात्।मध्येईशानं।पूर्ववक्त्रेतत्पुरुषं।दक्षिणेवामदेवं।पश्चि
मेऽघोरं।उत्तरवक्त्रेसद्योजातं।ततःषट्कोणेआग्नेयादिकोणेषुह्रांहृदयायनमः।ह्रींशिरसे
स्वाहा।ह्रूंशिखायैवषट्।ह्रैंकवचायहुं।ह्रौंनेत्रत्रयायवौषट्।पूर्वे।ह्रःअस्त्रायफट्।परितःनि

ऋत्यै॰प्रतिष्ठायै॰विद्यायै॰शांत्यै॰इतिचतुःकोणे॥गंगणपतये॰मंमृत्यवे॰दुंदुर्गायै॥अथाष्टद
ले॥ब्राह्म्यै॰माहेश्वर्यै॰कौमार्यै॰वैष्णव्यै॰ऐंद्र्यै॰नारसिंह्यै॰चामुंडायै॰वाराह्यै॰।तद्बहिः।चंडभैर
वाय॰क्रोधभैरवाय॰उन्मत्तभैरवाय॰कपालभैरवाय॰संहारभैरवाय॰आपदुद्धारभैरवाय॰
कालभैरवाय॰घोरभैरवाय॰तद्बहिः।जयायै॰विजयायै॰अजितायै॰अपराजितायै॰भद्रका
ल्यै॰कपाल्यै॰क्षेम्यायै॰मृत्युपराजितायै॰।तद्बहिः।लंइंद्राय॰रंअग्नये॰यंयमाय॰निंनिर्ऋतये॰
वंवरुणाय॰वांवायवे॰सांसोमाय॰ईंईशानाय॰ब्रह्मणे॰विष्णवे॰।इतिसंपूज्य॥मंत्रकोशेतुष
डंगैः प्रथमावरणे।सूर्याय।इदंवैभूम्यै॰तोयं।अग्नये आकाशाय आत्मनेनमइतिद्वितीयं॥
रामायै॰राकायै॰प्रभायै॰ज्योत्स्नायै॰पूर्णायै॰उषायै॰पूरिण्यैनमइतितृतीयं॥॥विश्वायै॰ राम
विद्यायै॰सितायै॰पुष्ट्यै॰संध्यायै॰दारायै॰शिवायै॰निशायै॰इतिचतुर्थं॥लोकपालैःपंचमं॥ २३६॥

तदस्त्रैः षष्ठमित्यावरणानि ॥ ततो धूपदीपनैवेद्यफलतांबूलदक्षिणानीराजनप्रदक्षिणानम
स्कारान्कृत्वा । मृत्युंजय महारुद्र त्राहि मां शरणागतं । जन्ममृत्युजरारोगैः पीडितं कर्मबंधनैः । ता
वकस्त्वद्गतप्राणस्त्वच्चित्तोहं सदा मृड । इति विज्ञाप्य देवेशं जपेन्मृत्युंजयं परं । ततो जपं कृत्वा पुनः ष
डंगं कृत्वा जपं निवेदयेत् । अयुतं पुरश्चरणं । ततः प्रयोगः ॥ अथ मंत्रोद्धारः ॥ ॐ भूः ॐ भुवः ॐ
स्वः ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॐ स्वः
ॐ भुवः ॐ भूः ॐ इति मृत्युंजयः ॥ केवलो त्र्यक्षरो वा ॐ जूं सः इति पूर्वा । ॐ हौं जूं सः ॐ भूर्भुवः स्वः इति पू
र्वा । अंते प्रतिलोमं सर्वं इति वा । महामृत्युंजयस्तु यथा । ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ
त्र्यंबकं० मृतात् ॐ स्वः ॐ भुवः ॐ भूः ॐ सः ॐ जूं ॐ हौं ॐ स्वाहा ॥ इति चतुर्दशप्रणवः ॥ ॥ ६ ॥
कृच्छ्रविधाने । त्रिरात्रं नियतोनश्नन्श्रपयेत्साय संचरुं । तेनाहुतिशतं पूर्णं जुहुयात्स पिषाद्द्विजः ॥

समुद्दिश्यमहादेवंत्र्यंबकंत्र्यंबकेत्यृचा। एतत्सर्वशतंहुत्वाजीवेद्वर्षशतंसुखी॥ ॥इतिकमलाकर
भट्टकृतेशांतिरत्नेमृत्युंजयविधिः॥ ॥अथपुरुषसूक्तविधिः॥ विष्णुधर्मोत्तरेपुष्करउवाच॥ प्रति
वेदंमहाभागयत्सूक्तंपौरुषंस्मृतं। सर्वकामकरंज्ञेयंपवित्रमघसूदनं। एकैकयार्चारामस्नातो
दत्वाजलांजलीन्। पौरुषेणतुसूक्तेनमुच्यतेसर्वकिल्बिषैः। अंतर्जलगतोजप्त्वासूक्तमेतत्तुपौरुषं।
सर्वकल्मषनिर्मुक्तोयायथेष्टांलभतेगतिं। एकैकयार्चास्नातःपुष्पंपुष्पंनिवेदयेत्। पुरुषार्थंज
लेरामसर्वपापैर्विमुच्यते। एकैकयार्चास्नातोदत्वारामफलं२॥ सर्वान्कामानवाप्नोतियान्की
र्त्तिन्मनसेच्छति। पौरुषेणतुसूक्तेनधारणयाभोमहाफलः। जपहोमौतथारामसर्वकल्मषना
शनौ। सुरापोब्रह्महास्तेनस्तथैवगुरुतल्पगः। पापेभ्योविप्रमुच्येतजप्त्वासूक्तंतुपौरुषं। कृच्छ्रै राम
र्विशोधितःपूर्वंमध्याह्नेसलिलोपगः। स्नातस्तुपौरुषंसूक्तंजपेन्नित्यमतंद्रितः। संवत्सरेण ॥२३१॥

देवेशं वासुदेवं प्रपश्यति। स्वयमेव महाभागः शाकमूलफलाशनः। तस्मात्काममवाप्नोति यं
राममनसेच्छति। श्रियमग्र्यां तथारूपं जीवितं दीर्घमेव च। अणिमां लघिमां प्राप्तिं महिमां च भ
गृहद्दुःखापगमम् अन्यद्वा यत्किंचिन्मनसेच्छति। अकामः पौरुषं जप्त्वा याति विष्णोः परं पदं। मं
गल्यमेतत्परमं पवित्रं संसारदुःखौघविनाशकारि। सुखप्रदं धर्मविशां नराणां मनोरथावा
प्तिकरं प्रदिष्टं॥ महार्णवे। ऋग्विधाने॥ वक्ष्ये पुरुषसूक्तस्य विधानं लर्चनं प्रति। अग्निकार्यं
जपविधिं स्तोत्रं चैव तदात्मकं। स्नात्वा यथोक्तविधिना प्राङ्मुखः शुद्धमानसः। प्रथमां विन्य
सेद्वामे द्वितीयां दक्षिणे करे। तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत्। पंचमीं वामजानौ तु
षष्ठीं वै दक्षिणे तथा। सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा। नवमीं नाभिमध्ये तु दशमीं
हृदये तथा। एकादशीं कंठदेशे द्वादशीं वामबाहुके। त्रयोदशीं दक्षिणे च मुखदेशे चतुर्दशीं॥

अस्णोः पंचदशी चैव षोडशीं मूर्द्धि विन्यसेत्। एवं न्यासविधिं कृत्वा पंचांगानि समाचरेत्। ब्राह्मणोस्येत्यादिकाभिर्ऋग्भिः पंचांगकल्पना। हृदयं शिरः शिखा कवचमस्त्रं चेति पंचांगानि। यथा देहे तथा देवे न्यासं कृत्वा विधानतः। मंत्रन्यासं पुरा कृत्वा स्वदेहे देवतासु च। गायत्र्योंकारन्यस्तांगः पूजयेद्विष्णुमव्ययं। तदादौ संकल्पं कृत्वा न्यासद्वयं कुर्यात्। अस्य नारायणऋषिः पुरुषो देवता अनुष्टुप् छंदः। जपादौ विनियोगः॥ तत्र जपे होमे चार्चनं नियतमिति। तदेवाह। आद्यया वाहयेद्देवम् चा तु पुरुषोत्तमं। द्वितीयासनं दद्यात् पाद्यं दद्यात्तृतीयया। चतुर्थ्यार्घ्यं प्रदातव्यं पंचम्याचमनं तथा। षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च। यज्ञोपवीतमष्टम्या नवम्याभरणं तथा। दशम्या गंधदानं स्यादेकादश्या च माल्यकं। द्वादश्या धूपदानं स्यात् त्रयोदश्या च दीपकं। चतुर्दश्या तु नैवेद्यं पंचदश्यां नमस्क्रिया। उद्वासनं तु षोडश्या उपचारास्तु षोड-

य

२ पाठांतरं। पुष्पं दशम्या दातव्यमेकादश्यां तु धूपकं। द्वादश्या दीपकं दद्यात् त्रयोदश्यां निवेदनं।
चतुर्दश्या नमस्कारः पंचदश्या प्रदक्षिणा॥२

नैवेद्यं २

शा।स्नानेवस्त्रेचनैवेद्येदद्यादाचमनीयकं।दद्याद्गुरुपसृक्केनयः पुष्पाण्यपएववा।अर्चितेने
नैवेसर्वंत्रैलोक्यंसचराचरं।दक्षिणांतुयथाशक्त्याषोडश्यर्चांप्रदापयेत्।ततःप्रदक्षिणांकु
र्याज्जपंकुर्यात्समाहितः।यथाशक्तिजपित्वातुसूक्तंचास्मैनिवेदयेत्।देवस्यदक्षिणेपार्श्वे
कुंडंस्थंडिलमेववा।कारयेत्प्रथमर्चातुप्रोक्षणंतुद्वितीयया।तृतीययाग्निमादद्याच्चतुर्थ्यातु
सन्निधानं।पंचम्याचाज्यसंस्कारंचरोश्चश्रपणंतथा।षष्ठ्यानलस्यमध्येतुकल्पयेत्पद्ममा
सनं।चिंतयेत्तत्रदेवेशंकालानलसमप्रभं।विवृतास्यंवाहशीर्षंरक्तास्यंरक्तलोचनं।वाहशी
र्षंहयग्रीवं।ततोगंधंचपुष्पंचधूपदीपनिवेदनं।पंचभिर्ऋग्भिश्चततःकुर्यात्सप्तम्यादियथाक्र
मं।वह्नेःपूजयेदित्यर्थः।समिधःप्रत्यृचंपूर्वंजुहुयादभिघारिताः।ततोघृतेनजुहुयाच्चरुणा
चततःपुनः।एवंकृत्वाततस्तस्यसमीपेस्तोत्रमुच्चरेत्।जितंतेपुंडरीकाक्षनमस्तेविश्वभा

वन।नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज।नमोहिरण्यगर्भायप्रधानाव्यक्तरूपिणे।ॐनमो
वासुदेवायशुद्धज्ञानस्वरूपिणे।देवानांदानवानांचसामान्यमधिदैवतं।सर्वदाचरणद्वंद्वंव्रजा
मिशरणंतव।एकस्त्वमसिलोकस्यस्रष्टासंहारकस्तथा।अध्यक्षश्चानुमंताचगुणमायासमाव क्ष२
तः।संसारसागरंघोरमनंतंक्लेशसाधनं।त्वामेवशरणंप्राप्यनिस्तरंतिमनीषिणः।नतेरू
पंनचाकारोनायुधानिनचास्पदं।तथापिपुरुषाकारोभक्तानांत्वंप्रकाशसे।नैवकिंचित्परो
क्षंतेप्रत्यक्षोसिनकस्यचित्।नैवकिंचिदसिद्धंतेनत्वंसाध्योसिकस्यचित्।कार्याणांकारणं
पूर्वंवचसांवाच्यमुत्तमं।योगिनांपरमांसिद्धिंवदंतिपरमंविदुः।अहंभीतोस्मिदेवेशसंसारे
स्मिन्भयावहे।पाहिमांपुंडरीकाक्षनजानेशरणंपरं।कालेष्वपिचसर्वेषुदिक्षुसर्वासुचाच्युत। राम
शरीरेपिगतोवापिवर्ततेमेमहद्भयं।त्वत्पादकमलादन्यंनमेजन्मांतरेष्वपि।निमित्तंकुशलस्य।।२३९।।

वास्तियेनगछामिसद्गतिं।विज्ञानंयदिदंप्राप्तंयदिदंज्ञानमर्जितं।जन्मांतरेपिदेवेशयाभूदस्य
परिक्षयः।दुर्गतावपिजातायांतावतास्मिरतीसदा।अकामेकलुषंचित्तंममतेपादयोस्थितं।का
मयेवेत्स्ववंतत्वंसर्वज्ञनमस्तुकेवलं।इत्येवमनयास्तुत्यास्तुत्वादेवंदिनेदिने।किंकरोस्मीतिचात्मा
नंदेवायविनिवेदयेत्।पुरुषस्यहरेःसूक्तंस्वर्ग्यंधन्यंयशस्करं।फलाहारोपिजेन्नित्यंपश्यन्नात्मा
नमात्मनि।फलानिभुक्तोपवसेन्मासमद्भिश्चवर्त्तयेत्।अरण्येनिवसन्नित्यंजपन्निममृषिमु
निः।ऋषिमंत्रं।ऋग्भिस्त्रिषवणंकालेस्नायादप्सुसमाहितः।स्नानेएताभिर्मार्जनमघमर्ष
णंचेत्यर्थः।आदित्यमुपतिष्ठेतसूक्तेनानेननित्यशः।आज्याहुतीरनेनैवहुत्वेवंचिंतयेदृषिं॥
ऋषिःसूक्तद्रष्टानारायणः।ऊर्द्ध्वंमासात्फलाहारस्त्रिभिर्वर्षैर्जपेदिदं।तद्भक्तस्तन्मनायु
क्तोदशवर्षाण्यनन्यभाक्।साक्षात्पश्यतितंदेवंनारायणमनामयं।अनासाद्यमानोपिभ

त्किंनपरिहारयेत्।भक्तानुकंपी भगवाञ्जायतेपुरुषोत्तमः।येनकेनचकामेनजपेतप्रयतःसदा।
ससकामःसमृद्धःस्यात्कुद्धधानस्यकुर्वतः।होमंवाप्यथवाजप्यमुपहारमथोचरुं।कुर्वतियेनकामे
नतत्सिद्धिमुपधारयेत्।शांतिश्रैष्ठ्यंमहद्धित्तंयशोलोकेपरांगतिं।पापेनविप्रमोक्षश्चभवेत्सर्वं
नसंशयः।अथाभिधीयतेकर्मपुत्रकामस्यवैष्णवं।शुक्लपक्षेशुभेवारेसुनक्षत्रेसुगोचरे।द्वाद
श्यांपुत्रकामस्तुचरुंकुर्वीतवैष्णवं।दंपत्योरुपवासःस्यादेकादश्यांसुरालये।ऋग्भिःषोडशभिः
सम्यगर्चयित्वाजनार्दनं।चरुंपुरुषसूक्तेनश्रपयेत्पुत्रकाम्यया।आप्नुयाद्वैष्णवंपुत्रमचिरात्संतति
क्षमं।द्वादशद्वादशीःसम्यक्पयसानिर्वपेच्चरुं।यःकरोतिसहस्त्रीतुयातिविष्णोःपरंपदं।हुत्वाग्निं
विधिवत्सम्यगृग्भिःषोडशभिर्बुधः।कृतांजलिपुटोभूत्वास्तवैस्ताभिःप्रयोजयेत्।केशवंमार्ग
शीर्षेतुपौषेनारायणंविदुः।माधवंमाघमासेतुगोविंदंफाल्गुनेतथा।चैत्रेचैवतथाविष्णुंवैशाखेम

राम

॥२४०॥

धुसूदनं।ज्येष्ठे त्रिविक्रमं विद्यादाषाढे वामनं विदुः।श्रावणे श्रीधरं विद्यात्कृष्णे केशवं ततः परं।आश्वि
ने पद्मनाभं तु दामोदरमतः परं।द्वादशैतानि नामानि प्रतिमासं तु पूजयेत्।आयुर्धर्मसुतं स तेय
शोमेधासमन्वितं।स्वगृह्योक्तविधिना पयसि चरुः कार्यः।अपरेसमये सूक्तमावर्त्तयेत्।।स
कलसूक्तेनैकाहुतिः।एवं सहस्रहोमः।स चायुतजपोत्तरं कार्यः।तद्वैकादश्यामुपक्रम्यायुतं जप्त्वा
भुक्त्वैकादश्यां दंपती उपोष्य द्वादश्यां चरुसहस्रं जुहुयादिति महार्णवः।। ।।अथातोस्य प्रकारो य
मेकादश्यामभोजनं।दंपत्योः पुरुषस्तत्र नित्यकर्माविरोधिनि।काले जपन्निदं सूक्तमेकादश्यां नि
रंतरं।द्वादश्यां प्रयतो भूत्वा पयसा निर्वपेच्चरुं।शुक्लद्वादशीष्वेव पयसि चरुनिर्वापः।एवमेकादशसु
पवासादि।हुत्वाज्यं विधिवद्वाग्नौ ऋग्भिः षोडशभिर्बुधः।कृतांजलिपुटो भूत्वा सर्वं चैभिः प्रयोजयेत्
सन्निधौ श्वेत्थरक्षस्य कृत्वाज्यं जुहुयात्पुनः।उपस्थानं कृतार्थस्य ध्यात्वा च मधुसूदनं।आग्ने

येमंत्रैरुपस्थानमिति महार्णवः ॥ सुक्तंतु पुरुषसूक्तेनैव ॥ हविर्होमं ततः कुर्यात्तत्सर्वं वाग्यतः
शुचिः ॥ सूक्तेनजुहुयादाज्यमाशावंते चरुं तथा ॥ हविःशेषंनमस्कृत्यनरंनारायणंपतिं ॥ भक्षयि
त्वाहविःशेषंलघ्वाशीसंविशेत्क्षणं ॥ आहारांतरत्यागेनहविःशेषंभुक्त्वावामशायिनीस्यादित्य
र्थः ॥ ततः कृत्वाखिलंकर्मकर्त्तव्यंद्विजतर्पणं ॥ द्वितीयास्त्रीनिवर्त्तेतयावज्जन्मनविंदति ॥ यया
सहेदंकर्मकृतं तां विहायान्याम्नतामपिनोपेयात् ॥ सर्वाभिः सहकर्त्तृत्वेनदोषः ॥ ऋतावन्य
स्त्रियाअगमनेनियमातिक्रमेदोषोस्त्येव ॥ किंत्वल्पः ॥ तत्र शक्तो एकः प्राजापत्यः ॥
अशक्तौत्रिरात्रद्विरात्रादि ॥ अपुत्रामृतपुत्राचयाचकन्यांप्रसूयते ॥ क्षिप्रंसाजनयेत्
पुत्रमृष्यशृंगोयथाब्रवीत् ॥ रहस्यराशरोप्येतंविधिमुक्त्वाह ॥ होमांते दक्षिणांदद्यात्क्लिन्नंवास ॥ राम ॥
स्तथातिलान् ॥ भूमिंहिरण्यवस्त्राणियथासंभवमेववा ॥ ॥ इतिशांतिरत्ने पुरुषसूक्तविधिः ॥ ७ ॥
॥ २४३ ॥

॥ ॥अथरुद्रविधिः॥ ॥सचरावणभाष्यभट्टभास्करविद्यारण्यभाष्यहेमाद्रिमहार्णवाधा
लोचनेनोच्यते॥ तत्ररुद्रस्यजपेहोमेभिषेकेचश्रुतिस्मृत्याद्योविनियोगोदृश्यते॥तत्रजाबा
लश्रुतिः॥किंजप्येनामृतत्वंनोब्रूहिशतरुद्रियेणेत्येतानिहवाअमृतनामधेयान्येतैर्हवाअमृ
तोभवतीति।कैवल्योपनिषदि।यःशतरुद्रियमधीतेसोऽग्निपूतोभवतिस्वर्णस्तेयात्पूतोभव
तिब्रह्महत्यायाःपूतोभवति।कृत्याकृत्यात्पूतोभवति।अनेनज्ञानमाप्नोतिसंसारार्णवनाश
नं।तस्मादेनंविदित्वैवकैवल्यफलमश्नुतइति।हेमाद्रौबोधायनः।अथातःपंचांगरुद्राणांजप
होमार्चनविधिंव्याख्यास्यामः।विधिशाद्रस्यजपाद्येःप्रत्येक मन्वयः।अर्चनमभिषे
कइतिमहार्णवः।शतातपपराशरौ।मद्यंपीत्वागुरुदारांश्चगत्वास्तेयंकृत्वाब्रह्महत्यांच
कृत्वा।भस्मच्छन्नोभस्मशय्याशयानोरुद्राध्यायीमुच्यतेसर्वपापैः।इदंरहःकृतेमासमात्रं

ज्ञेयं। रुद्राध्यायी स वेद्भक्त्या मासमेकमतंद्रितः। प्रायश्चित्तं स वेदेतद्रहस्यस्य न संशय इति पराश
र पुराणात्। पाद्मे शिवगीतासु। यस्तु रुद्रं जपेन्नित्यं ध्यायमानो महाकृतिं। षडक्षरं वा प्रणवं निष्का
मो विजितेंद्रियः। यथाथर्वशिरोमंत्रं कैवल्यं वा रघूत्तम। स तेनैव च देहेन शिवः संजायते ध्रुवं। वा
यवीये। सर्वेषु ग्रहदोषेषु दुःस्वप्नाद्भुतदर्शने। जपन्रुद्रं स्वसंसिद्धिः सर्वदोषैः प्रमुच्यते। यमः। कृता
पं वा लिखित्वाप्यश्वं निविशेषात्त्वपाकृपिं। होत्रं रुद्रान्सकृज्जप्त्वा मुच्यते सर्वपातकैः। प्रभुक्तिया र
रायकजपो गायत्र्याश्च विशेषतः। सर्वपापहरा ह्येते रुद्रैकादशिनी तथा॥ हेमाद्रौ कौशिकबोधा
यनौ। रुद्रैकादशिनी त्वेषा सर्वकामफलप्रदा। सर्वपापक्षयकरी सर्वशांतिप्रदायिनी॥ विष्णुधर्मो
त्तरेपि। रुद्राणां च तथा जप्यं सर्वाघविनिषूदनं। सर्वकामकरो होमस्तथा सर्वत्र शांतिदः। अजावि
कानामश्वानां कुंजराणां तथा गवां। मनुष्याणां नरेंद्राणां बालानां योषितामपि। ग्रामाणां न ॥२४२॥

गराणां च देशानामपि भार्गव। उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च। मरके समनुप्राप्ते रिपु
जे च तथा भये। रुद्रहोमः परा शांतिः पायसेन घृतेन वा। हेमाद्रौ कालिकापुराणे। यः पुनः सततं भ
क्त्या अभ्यर्च्य शशिशेखरं। जपेत् ध्यायेत्सदा रुद्रान्सोपि याति परं पदं। अथेहते फलं किंचिद्देहिकं
पुष्कलं तथा। तानेव हि जपेद्रुद्रान् शुचिर्भूत्वा समाहितः। अथवेदं जगत्सर्वं वशीकर्तुं समीहते॥
तदा रुद्रं जपेद्रूपो ध्यायमानो महेश्वरं। तेन जपरुद्रो होमरुद्रोभिषेकरुद्रश्चेति त्रिधा रुद्र उक्तः।
आद्यो द्विधा केवलजपात्मको होमात्मकश्च। अथांगिरसो। एकादशगुणान् वापि रुद्रानावर्त्य
धर्मवित्। महापापैरपि स्पृष्टो मुच्यते नात्र संशयः। सर्वपापानि नश्यंति रुद्रैकादशिनी जपादि
ति कालिकापुराणे। जपमात्रोक्तेः। जपाद्दशांशतो होमस्तथा होमाच्च तर्पणं। तर्पणस्य दशां
शेन मार्जनं कथितं किल। मार्जनस्य दशांशेन ब्राह्मणानपि भोजयेत्। जपो वा पूर्वको होमस्त

शांति॰।

रुद्राचं२

पणीवाभिषेचनंभूदेवपूजनंपंचप्रकारोक्तापुरश्चक्रिया।होमाशक्तौजपंकुर्याद्धोमसंख्याचतुर्गुणं।
एवंकृतेतुमंत्रस्यजायतेसिद्धिरुत्तमेति।पुरश्चर्याचंद्रिकादौजपमात्रेदशांशहोमोक्तेः।तेनतर्पणाद्य
पिसिद्धं।होमरुद्रेतुतर्पणाद्यभावांशस्यमेव।जपमात्रेतदुक्तेः।अन्येतुपुरश्चरणएवायंविधिः॥
अतएव हेमाद्रिमहार्णवादौतर्पणाद्यनुक्तिः।तेनतदुक्तेजपेहोमोविप्रभोजनंचेत्येवकार्य
मित्याहुर्वृद्धाः।वृद्धयाज्ञवल्क्यः।सुरापःस्वर्णहारीचरुद्रजापीजलेस्थिताः।सहस्रशीर्षाजा
पीचमुच्यतेसर्वकिल्बिषैः।सर्वपापहरात्येतेरुद्रैकादशिनीतथा।वेदमेकगुणंजप्त्वातदह्नैव
विशुध्यति।हेमाद्रौकालिकापुराणे।यद्दत्वामुष्मिकमीहितफलंलोकेधनल्पकं।तद्रुद्रान्जपेन्नि
त्यंध्यायमानोमहेश्वरं।यश्चसागरपर्यंतांदद्याद्भूमिंसकांचनां।तस्मादप्यधिकंतस्यसकृद्रुद्र
जपाद्भवेत्।वायुपुराणेप्येवं।तथा।नमकंचमकंचैवपौरुषंसूक्तमेवच।नित्यंत्रयंप्रयुंजानो॥२५३॥

राम

ब्रह्मलोके महीयते। चमकं नमकान्होतृश्च पुरुषसूक्तं च यो जपेत्। प्रविशेत्स महादेवं गृहं गृहपतिर्यथा। रोग
वान्पापवांश्चैव रुद्रान्जप्त्वा जितेंद्रियः। रोगात्पापात्प्रमुक्तो सावतुलं सुखमश्नुते। लैंगे उत्तरार्द्धे त्रिपंचा
शदध्याये। मृत्युंजय विधिं वक्ष्ये बकुनाकिं द्विजोत्तमाः। रुद्राध्यायेन विधिना घृतेन नियुतं क्रमात्।
सघृतेन तिलेनैव कमलेन च यत्नतः। दूर्वया घृतगोक्षीर मिश्रया मधुना तथा। चरुणा सघृतेनैव
केवलं पयसापि वा। जुहुयात्कालमृत्योस्तु प्रतीकारः प्रकीर्तितः। सूतसंहितायां। यः श्रद्धयायुतो नित्यं
शतरुद्रियमभ्यसेत्। स्वर्णस्तेयात्सुरापानाद्दुष्कृताचरणात्तथा। मुच्यते ब्रह्महत्यायाः इति कैवल्यशा
खिनः। वायुपुराणे।। तपस्तप्यति यो त्यर्थं सहस्राद्धनिसंयमी। गवां कोटिप्रदानं यः करोति विधिव
द्गुरौ। न स तत्फलमाप्नोति यः स रुद्रजापिनः। रुद्रेभ्यस्तु परं नास्ति जपो ध्यानं द्रुतं तपः। तथा। अ
नपत्यादिदोषेषु शाकिन्यादिग्रहेषु च। सर्वज्वरविनाशाय रुद्रजप्यान संशयः।। आपस्तंबः। य

स्यर्क्षे स्वभ्रजानां यष्टव्याधिगम्यते ।उदङ्मुखः परेत्य रुद्रजपं श्चरेदित्ययज्ञसंयुक्तं कल्पः इत्यादि रावण
भाष्येज्ञेयं ।तत्रादौ व्रतमुक्तं हेमाद्रौ कालिकापुराणे ।कृच्छ्रमादौ स्वयं चीर्त्वा पराकं च तथा पुनः ।कृत्वा
ध्यायन्महादेवमिदं भूयः समाचरेत् ।स्नात्वा ईशं समभ्यर्च्य उषित्वा स स शर्वरीः ।जपेद्रुद्रांस्तथाजस्त्रं
तदंते आशयेच्छ्रुतं ।अपरेहनि संजाते समाप्येत व्रतं पुनः ।भास्कराभिमुखो भूत्वा तद्दिने तान्जपेद्रु
न्द्रान् भूयश्चाग्निं परे रुद्रं संपूज्य विधिवत्कृतं ।घृताक्तैर्बिल्वपत्रैश्च रुद्रहोमं प्रकल्पयेत् ।एवं सम्यग्व्र
ते नूनं कृते सौ जायते द्विजः ।साक्षाद्रुद्रो महातेजास्ततः कामांस्तु साधयेत् ।शांतिहेमाद्रौ कौशिकः ।
बोधायनोक्तमेवाहं करिष्ये कौशिको द्विजः ।कामिनां सर्वकामार्थमकामानां च मुक्तये ।अकामः स
र्वकामो वा जपेद्यः शतरुद्रियं ।लिंगाभ्या [illegible] ।रक्षार्थं तु शिखायां ग्रंथिमू राम
र्धकेशेति मंत्रतः ।भूतानि प्रार्थयेत्त ४ रसे तथा तीर्थे स्नानं कृत्वा यथाविधि ।रुद्रजप्तं त्विति मे ॥२५४॥

त्रतः। सहस्राणीति मंत्रेण प्रार्थयेच्च ततो महीं। ककुभः प्रार्थयेत्तिष्ठन्स्येपथामिति मंत्रतः। उपविश्य सु
चोदेशे प्राणनायम्य वाग्यतः। संकल्प्य जपहोमौ तु यस्त्र्यैयेनवेति च। रुद्रप्रश्नस्य छंदोत्र स्यादनुष्टु
ब्विस्तथा अघोरः सर्वपापघ्न ऋषिरित्यो देवता परः। न्यासं भगवान्ऋषिभिः कृत्वा नमो तैः प्रणवान्वि
तैः। मंत्रैरष्टभिरीशानं बलायुक्तैः शुभप्रदैः। सर्वं च पादयोर्न्यस्य त्वावन्यस्य रुमध्यतः। ईशानं गु
ह्यदेशे तु नाभौ पशुपतिं न्यसेत्। भीमं ललाटदेशे तु महांतं शीर्ष्णि विन्यसेत्। सर्वैस्तु कवचं कार्य
मेकैकेनास्त्रमुत्तमं। तथैवांत्यानुवाकस्थैर्मंत्रैर्दशभिः शुचिः। न्यासं कृत्वानुलोम्येन वर्जयित्वा
भिचारकं। आद्यं तु पादयोर्न्यस्य द्वितीयं जानुदेशके। ऊर्वोस्तृतीयं विन्यस्य चतुर्थं गुह्यदेशतः।
पंचमं नाभिदेशे तु षष्ठं तु हृदये न्यसेत्। सप्तमं कंठदेशे तु मुखे चाष्टममुत्तमं। नवमं नासिकायां तु
दशमं नेत्रयोर्द्वयोः। एकादशं ललाटे तु द्वादशं शीर्ष्णि विन्यसेत्। त्रयोदशं तु कवचे ऊं कृत्वास्त्रे

लुफडूतथा।एवं न्यासविधिं कृत्वा ततो मुद्रां प्रदर्शयेत्।एषते रुद्रभाग इति मुद्राप्रदर्शनं।श्रीकामः
श्रीर्लिं कुर्वीत तेजस्कामस्तु नेत्रयोः।मुखे तत्वलाघकामस्तु ग्रीवायां रोगनाशने।हृदये सर्वकामस्तु ना
भौ स्थाने प्रदर्शयेत्।प्रजाकामो गुह्ये वै पशुकामस्तु जंघयोः।जानुभ्यां यामकामस्तु राष्ट्रकामस्तु पा
दयोः।वशीकरणकामस्तु वामहस्ते प्रदर्शयेत्।पापक्षयेभिचारे वा व्याधेरपगमे तथा।बहिःश
रीरात्कुर्वीत शिवस्याक्षेति च स्मरन्।एवं प्रदर्शयित्वा तु ततो ध्यानं समाचरेत्।त्रिलोचनं चतु
र्बाहुं सर्वाभरणभूषितं।नागयज्ञोपवीतं च व्याघ्रचर्मोत्तरीयकं।वृषस्कंधसमारूढमुमादेहा
र्द्धधारिणं।अमृतेनाप्लुतं शांतं चंद्रार्द्धकृतशेखरं।शुद्धस्फटिकसंकाशं जटामुकुटमंडितं।वरदा
भयहस्तं च सर्वकामफलप्रदं।एवं ध्यात्वा द्विजः सम्यग नं गांगकरं हरं।अंगानां यजनं कुर्या
त्सम्य ग्भक्तिपरायणः।हृदये हृदयं जप्त्वा मूर्ध्नि सूक्तं च पौरुषं।शिखायामुत्तरं चैव नाराय ॥२४५॥

राम

४

रामनुत्तमं।कवचेप्रतिरथं तद्वद्दस्त्रेचशतरुद्रियं।जप्त्वांगानिजपेच्छांतिं त्रिःशांतिरितिवोच्चरेत्॥
शंतिंशन्नोवातः।नैवंवाचमित्याद्यं।सत्रिविधोपिरुद्रः प्रत्येकंपंचधा।रूपं·रुद्रो·रुद्री·महारुद्रो
ऽतिरुद्रश्चेति।तत्रनमकंचमकंमात्रमुभयंरूपं।अन्येशातातपेनोक्ताः।षडंगैकादशीरुद्रोरुद्रैका
दशारुद्रतः।एकादशैभिरेताभिर्महारुद्रश्चकथ्यते।एकादशमहारुद्रैरतिरुद्रइतीरतः।तथा॥
विधितोनमकावृत्तीरुद्रएकादशात्मिका।रुद्रस्यैकादशावृत्त्यारुद्रैकादशिनीस्मृता।एकादशा
भिरेताभिर्महारुद्रश्चकथ्यते।एकादशमहारुद्रैरतिरुद्रइतीर्यते।अस्यार्थमाहमहार्णवः।पूर्वं
न्यासांतेएकादशनमकानुवाकान्पठित्वाऽथचमकानुवाकंपठेत्।पुनस्तान्पठित्वाद्वितीयंचमे
कानुवाकमित्येकादशावृत्त्यारुद्रइत्युते।एकादशिनीरुद्रइतिपर्यायः।तदाहबौधायनः।नु
मस्तेरुद्रमन्यवइत्येकादशानामनुवाकानामेकमेकंजपेदिति।सर्वनमकान्पठित्वाएके

कंचमकानुवाकंपठेदित्यर्थः।तेनैकरूपेण सर्वचमकजपोनतुविभागः।तैरेकादशरुद्रैरुद्रीत्यु
च्यते।सैवलघुरुद्रः।रुद्रैकादशिनीचोच्यते।ताभिरेकादशभिर्महारुद्रः।तैरेकादशगद्रैरतिरुद्र
रुद्रइति।एतदेवाहतुर्हिमाद्रौकौशिकबौधायनौ।सर्वाद्विपंचवक्त्रांश्चरुद्रानेकादशैवतुजं
पित्वासर्वंतद्ध्यश्चैनमकाधंततोजपेत्।पुनरेतज्जपेत्सर्वंद्वितीयंचमकंतथा।एवमेकादश
गुणान्क्रमेणचमकांस्तथा।रुद्रैकादशिनीत्वेषासर्वकामफलप्रदा।सर्वपापक्षयकरीसर्वशां
तिप्रदायिनी।एकादशगुणासैवरुद्रइत्यभिधीयते।रुद्रोलघुरुद्रः।रुद्रएकादशगुणोमहानि
त्यभिधीयते।महानेकादशगुणस्त्वतिरुद्रइहोच्यते।रुद्रंमहांतिरुद्रंचजपेत्कार्यस्यगौरवात्।।
अयंचरुद्रैकादशिनीत्रिरूप्यामहारुद्रादिप्रकारःसर्वशाखिनांजपेसर्वहोमेभिषेकेचसमानः।।
काएवकात्यायनीयैकादशधाचमकविभागंवक्ष्यामः।तथा।ततोहोमंप्रकुर्वीतनमःशंभ

वमंत्रतः। रुद्रैकादशिनी जप्येत्त्रयस्त्रिंशद्‌थाहुतीः। रुद्रैः शतत्रयं प्रोक्तं षष्ठ्याभ्यधिकयाधिकं। लघुरुद्रे १
महारुद्रे २ चत्वारश्च तथा रुद्रे सहस्राः सप्तवर्जिताः। सत्वारिंशत्सहस्राश्च होतव्याश्चतुरुत्तराः। शुनाश्चैवा
ष्टसप्तत्या त्वतिरुद्रे विनिश्चयः। पापक्षये भिचारे च तथा व्याधिविमोचने। पालाशस्य समिधः का
र्या नान्यत्रोत्पातदर्शनात्। औदुंबर्यश्च समिधो मधुक्ताश्च तथाक्षताः। ग्राह्यांश्चान्नाद्यकामे
न श्रियेशांत्यै च पायसं। सर्वकामेन वा यायमायुर्वृद्ध्यै तिलाः स्मृताः। घृताक्ताअथवा दूर्वा जि
ज्ञकामेन वै घृतं। व्रीहयः पशुकामेन राष्ट्रकामेन वै यवाः। उपविश्य प्रभुचोद्देशोदूर्वास्तंबे जपेद्य
दि। जुहुयाच्छ्वेतपुष्पाणि स विश्वं कुरुते वशी। एवं ज्ञात्वा यथार्थं यजेद्यस्तु रुद्रैकादशिनीं नरः। रोगान्ज्व
रातिसारादीन्नाशयेदुल्बणानपि। होमः पलाशसमिधा कर्त्तव्यो मधुसंयुतः। एकादशम
हारुद्रान्परचक्रागमे पुनः। जपेदे कादशगुरगान्होमस्तु विविधः स्मृतः। तिलैराज्येन संसि

क्तैर्विधिवत्तं निवर्त्तयेत्। रुद्रैकादशिनीजप्ये शतमेकोनमिष्यते॥ सहस्राश्चतथारुद्रेन वत्येको
नयाश्रुताः। एवं त्रिगुणिता कार्या महारुद्रातिरुद्रयोः। वृष्टिकामेन वायोज्याहस्त्यश्वामयशांतये।
उद्धवेत्प्रभुतानां च ग्रहाणां तु विपर्यये। ग्रहव्यामादिशांत्यै च तिलाश्चाज्येन संयुताः। होमांते सर्व
कामानां कूष्मांडैश्चापि वा जपः। होतव्यमाज्यं विधिवन्महाव्याहृतिभिस्तथा। परिषिच्य ततो वह्निं
तत्त्वा पामेति चार्च्यच। अभिषेकं ततः कुर्यान्मंत्रैस्तल्लिंगकैः शुचिः। आशावंते च संपूज्य पार्वतीस
हितं शिवं। लोकपालांश्च संपूज्य विधिवच्छिवसन्निधौ। गंगां दुर्गां च मंत्रेण विधिघ्नेश्वरदाननं। स्न
पनोक्तविधानेन त्वरितैर्नमस्कृतिः। तर्पयेद्विविधैरन्नैः पयसा पायसेन वा। प्रीयतां शंभुरित्युक्त्वा
भूमिदेवान् शुचिः शुचीन्। दत्त्वा तु दक्षिणां तेभ्यः प्रणिपत्य विसर्जयेत्। एवं कृते स भगवान् श्रीः कामा
न्प्रयच्छति। अकामस्य फलं मुक्तिर्नात्र कार्या विचारणा। बोधायनोक्तमंत्रोयं सर्वकामसमृद्धये। ॥२४७॥

न. २ राम· न. २

॥इतिहेमाद्रौरुद्रविधिः॥ ॥अथरुद्रैकादशिनीप्रकारआपस्तंबशाखीयरुद्रपरः।माध्यंदिन
काएवादिशाखिनांतुचमकेष्वेकादशानुवाकाभावाच्चमकानेकादशधाविभज्यैकैकंभागंन
मकेषुसंयोज्यैकादशिनींकुर्यात्।होमेप्येवं॥अत्रषडंगन्यासोवैकल्पिकः।पंचांगरुद्राणामित्यु
क्तेरितिकेचित्।अभिषेकेतदुक्तेःषट्।अन्यत्रपंचेतिमहार्णवः।बौधायनोक्तेस्तैत्तिरीयशाखी
यरुद्रेपंचांगन्यासः।षडंगेतिवाजसनेयादिपरा।बृहत्पराशरेणतथोक्तेरित्यन्ये।अभिषेकरु
द्रपरेत्यपरे।यत्तुछंदोगानांसामविधानब्राह्मणे।आवोराजातद्वोवर्गआज्यदोहानिदेवव्रता
निचैषारौद्रीनामसंहितेनांप्रयुंजन्रुद्रंप्रीणातीत्युक्तं।आवोराजेत्येकंसामतद्वोवर्गश्चत्वारि
।आज्यदोहानित्रीणि।देवव्रतानित्रीणि।एतत्फलांतरार्थंप्रयोगांतरं।नत्वेतैर्महारुद्रादिकरणे
प्रमाणमस्ति।तेनयजुर्वेदिनामेतद्गणात्सामभिर्महारुद्राद्याचरणं।यत्त्वृग्वेदिनांरुद्रसूक्ते

स्तन्निर्मलं भ्रांतिरहितमभिमानमात्रमित्युपेक्ष्यं। मंत्रस्य प्रतिनिध्यभावाच्च। अत एव बृहत्पराश
रेण। कुर्याद्द्विधानं रुद्राणां यजुर्वेदेन संमितमित्युक्तं। अथ बृहत्पराशरोक्तः कातीयानां विशेषः। इषेत्वा
दिषु मंत्रेषु रुद्रब्रह्मांतेषु याः क्रियाः। दशप्रणवसंयुक्तास्ता भूर्भुवः स्वरिति तीति च। दशप्रणवाः द्वेधा।
आदौ प्रणवमुच्चार्य व्याहृतीः प्रणवान्विताः। मंत्रादौ प्रणवः कार्यो मंत्रांते प्रणवस्तु सः। ततो व्याहृ
तिसंयुक्तस्त्वंते च प्रणवः स्मृत इत्येकः पक्षः। अन्यस्तु आदौ प्रणवमुच्चार्य सर्वा व्याहृतयस्ततः। मंत्रा
दौ प्रणवः कार्यो मंत्रांते प्रणवः पुनरिति। तथा। मनो ज्योतिरबोध्यग्निर्मूर्धानं च मर्माणि ते। मानस्तो
कइति ह्येतत्सप्रथमं पंचकं स्मरेत्। ततो यातेरुद्रेत्यध्येराद्यं न्यासं। दशाक्षरस्य वर्णे द्वितीयं। आतारश्मि
त्याद्यैः संपुटं च बौधायनवदुक्तोऽह। सुत्रामादिदिशां पालानाद्यादिषु स्मरेदथ। रौद्रीकरणमेतद्धि
कृत्वा पापात्प्रमुच्यते इत्याद्युक्त्वा। पंचास्यं सौम्यमात्मानं सर्वाभरणभूषितं। मृगलांछनमूर्धानं शु

द्धस्फटिकसन्निभं। फणासहस्रविस्फूर्जद्उरगेंद्रोपवीतिनं। सप्तार्चिर्विज्वलज्ज्वालजटाजूटकिरी
टिनं। सहस्रकरविभ्राजत्खट्वांगादिविभूषितं। दीदीप्यमानं चंद्रार्कज्वलदग्निं त्रिनेत्रिणं। जगद्वाधिर्य
लन्नादत्वं चतुर्मरुधारिणं। केयूरबद्धनागेंद्रमूर्धरत्नविराजितं। मेखलाकिंकिणीमालामुक्तारावव
विराजितं। घर्घराव्यक्तनिर्गच्छद्भीरारावनूपुरं। सहेमपद्मनीलाभं व्याघ्रचर्मोत्तरीयकं। दिग्देवतास
मायुक्तं सुरासुरनमस्कृतं। द्विजो ध्यात्वैवमात्मानं सम्यग्गुरुस्वरूपिणं। संप्रध्वस्तांतरायः सन्नंत
तोयजन्ममारभेत्। अनुलिप्ते सुगुप्ते च देशे गोचर्ममात्रके। स्थंडिले बुजमालिख्य मंत्रमालिख्य तं
पुनः। दशाक्षरमित्यर्थः। तत्र षडादिकं कुर्यान्नमः शीर्षवायेति च। यत्तु तेनैकादशाक्षरस्थापनमु
क्तं तत्र रुद्रपूजनं स्तुतैश्चाभिमंत्रणमुक्तं। तत्काम्यं प्रयोगांतरं न तु रुद्रांगं। तच्च वक्ष्यामः। मानो
महांतमिति च सिद्धमंत्रं स्मरेद्द्विजः। दशाक्षरेण मंत्रेण दद्यात्पाद्यार्घ्यके द्विजः। न्यासमंत्रैश्च सोंकारै

शीलि॰

र्मान स्तोक इति तथापि। शंभवायेति मंत्रेण दद्यादर्घ्यं पाद्यादिकं। धूपनैवेद्यदीपादीन्यथा लाभं निवेद्य
च। दशगक्षरेणाते नैव नमस्कुर्यात्पुनर्द्विजः। शिखा तस्य तु रुद्रस्योत्तरनारायणं स्मृतं। शिरः पुरुषसू
क्तं च शिवसंकल्पकं च हृत्। कवचं चैवा प्रोतरथं नेत्रं विभ्राड्बृहत्स्मृतं। शतरुद्रियमस्त्रं च देवस्यास्त्रं प्रक
ल्पयेत्। शतरुद्रियं रुद्राध्यायः अथातः शतरुद्रियं जुहोतीति तस्यैव शतरुद्रियशब्देनाभिधाना
त्। एवं तैत्तिरीयारण्यमपि। महार्णवस्तु त्वमग्ने रुद्र इति शतरुद्रियं वदन्भ्रांतः एवा रूपशब्देन साद्य
श्यवाचिनाग्नेरुक्तेः। पंचांगानि स्मरेदष्ट प्रणवं च जपेद्द्विजः। पंचांगानि सद्योजातादीनि हेमा
द्रेश्चैवं। उद्धृत्य प्रणवेनैव विकिरेण विसर्जयेत्। एवं पूजां कृत्वा जपं कुर्यात्। तत्रैकादशिन्यां नमकं
विनैव रुद्राध्यायमात्रस्यैकादशधावृत्तिः। एकादशगुणान्रुद्रान्जपित्वा रुद्रलोकं व्रजेदिति बृहत्पराशर
राम
शर्येः रुद्रमात्रजपोक्तेः। नमकानां रुद्रशब्दवाच्यत्वाभावादिति केचित्। तन्न। अस्य प्रयोगांतरत्वात्॥२४९॥

दत्रसद्रैकादशिनीमसारुद्रादिप्रयोगानुक्तेः। जपमात्रोत्स्या होमेतदप्रसंगात्सर्वेपिसंहारेणप्रा
संबंधकाभावात्॥ अन्येतुसर्वचमकानांप्रत्यावृत्तिंजपमाहुः। तत्तुनिर्मूलं॥ तेनबौधायनहेमाद्र्या
दिसंवादात्काएवानांचाष्टोच मकानेकादशधाकृत्वाप्रत्यावृत्त्येकैकंभागंयोजयेदित्येवसाधु।
एवंहोमेपि-चमकविभागस्तु। आदौचत्वारोनुवाकाः। तेचवाजश्चमेइतिचतस्रः। सत्यंचमइतिच
तस्रः। ऊर्क्चमइतिचतस्रः। अश्माचमइतिचतस्रः॥ इतिप्रथमः॥ अग्निश्चमइंद्रश्चमेइतितिस्रः
कंडिकाः॥ इतिद्वितीयः॥ अंशुश्चमेइतितिस्रः॥ इतितृतीयः॥ अग्निश्चमेघर्मश्चमे॥ इतिचतुर्थः।
एकाचमेतिस्रश्चमइत्येका॥ इतिपंचमः॥ चतस्रश्चमेष्टोचमइत्येका॥ इतिषष्ठः॥ त्र्यविश्चमेत्र्यवीच
मेइतिद्वे। इतिसप्तमः॥ वाजायस्वाहेत्येका॥ इत्यष्टमः। अयंतेराडितिनवमः॥ आयुर्यज्ञेनकल्पता
मितिद्वे॥ इतिदशमः। सोमश्चयजुश्चेत्येका। इत्येकादशः। इति॥ अत्रमूलंतु। अथवसोर्धारांजुहो

ती.त्युपक्रम्य इदं च म इदं च म इति चमकानुक्त्वा। अथार्धेंद्राणि जुहोति। अथ ग्रहान् जुहोति। अथैता
न्यज्ञक्रतून् जुहोति। अथायुजस्तोमान् जुहोति। अथ युग्मतो जुहोति। अथ वयांसि जुहोति। अथ
नामग्राहं जुहोति। अथाहेयंतेराट्। अथ कल्पान् जुहोति। अथाह स्तोमश्च यजुश्चेत्यादय ऋतयो
ऽस्यती.तिदिक्। अयं हि ऋताविकादशधा विभागस्तद्विषय एव। विषयांतराभावात्। तत्वं तु
भावे स्यनुवाकत्वाभावात् चमकानुवाके ध्येकमेकं योजयेदिति बोधायनसूत्रे हेमाध्यादावनुवाका
नुषंगेण भागहारयोगाद्दृष्टमानुवाकस्यैव प्रयाजैकादशत्वकपालमंत्रस्यां त्यस्य नवकपाले इवा
भ्यासः। अत एव दशमेध्याये एकविंशे नातिरात्रे एते त्यादिस्तोमविकृडोच यदन्यस्य त्वादावामेन सं
ख्यापूरणमुक्तं। यत्वन्यत्राप्रसिद्धप्रयाजादिनवाभ्यासेनैव पूरणमुक्तं। आपस्तंबसूत्रेप्यं नाक्लो
पो विरुद्धिर्वैत्यकं। अंत्यस्यैव चमकानुवाकस्य त्रिरभ्यासो युक्तः। अष्टाकपालस्यैंद्राग्नेइवसा। ॥२५०॥

राम

मिधेनी रक्षोघ्नस्तोमयजुश्चैकविंशतिमनुब्रूया इतिवदन्यत्रचमकानुवाकाप्रसिद्धा गम
वाधेप्रऊथैकादशत्वदभ्यासस्यैवप्राधान्येरं नालोपोपिवद्भिवेत्यापस्तंबोक्तेश्चाय नुकातीयाः।
काएवाश्वपरस्तुरामीयंपठंति। सांगमाद्यंजपेद्रुद्रंकेवलानिनवांतरे। सांगंसशीर्षकंवांत्यं नि
रंगमितिकेचनेति। अंत्यरूपंपठित्वांगानीतिकेचित्। अन्येतुसंपुटेमानाभावात्सप्रथमावृत्तिव
दाद्यावंगानितत्तोरुद्रइत्याहुः। वयंसोमेत्यष्टावचःशीर्षं उग्रश्चेत्यादिसप्तरुद्रजटाश्चेत्याहुः। तद
वनाभावान्निर्मूलमंधपरंपरामात्रमित्युपेक्ष्यं। तथा। शिवसंकल्पंहृदयंसूक्तस्यात्पौरुषंशिरः।
प्राहुर्नारायणीयंशिखांतस्योत्तराभिधं। अप्रः संभृतइत्युत्तरनारायणमित्यर्थः। आशुःशिशा
नःकवचंनेत्रंविभ्राड्बृहत्स्मृतं। शतरुद्रियमस्त्रंस्यात्षडंगकमहीरितः। हृच्छिरस्तत्शिखावर्मने
त्रंवास्त्रंमहामते। प्राहुर्विधिज्ञारुद्रस्यषडंगानिस्वशास्त्रतः। अत्रमूलंबहुस्वराशरोक्तंप्रागुक्तं॥

एषामृषिर्दैवतछंदांसितेनैवोक्तानि। बृहस्पतिरांगिरः। अक्षतान्वातिलान्वाप्रियंगवान्वासमिधोपि
वाशंभवायेतिजुहुयात्सर्वांस्तानाज्यसिक्तकान्। पंचपंचाथषड्वाथाअष्टावथैवदशापिवा। दशादशै
कादशवाजुहुयात्साधकोद्विजः। जपतर्पणहोमादौरतोयावत्सरंयजेत्॥ अथप्रयोगांतराण्याह।
अथातःसिद्धिकामःसन्कंदमूलफलाशनः। गोमूत्रयावकक्षीरदधिशर्कराज्यभोजनः। हविष्यभोजं
नोवासोविप्रोमुन्यन्नभोजनः। जपहोमादिकुर्वाणोयथोक्तफलभाग्भवेत्। शिरसासहरुद्राणांज
पेत्कांक्षितानीकृर्वे। सर्वेमंत्राभवंत्यस्यब्राह्मणस्योक्तकारिणः। एकादशसुभान्कुंभान्नाहृत्यविधि
वत्कृतान्। सहिरण्यान्सवस्त्रांश्चफलपुष्पोपशोभितान्। गंधोदकाक्षतैर्युक्तान्पूजयेद्रुद्रसंस्थितः॥
अथैकादशभीरुद्रैरेकैकमभिमंत्रयेत्। एवंसंपूज्यतान्कुंभान्नमस्कृत्याभिमंत्र्यच। एकादशाह राम
मात्मानमन्यंवाहितकाम्यया। विनायकोपसृष्टंवास्नापयेत्काकपक्षतं। मृतवत्सांकाकवंध्यां। ॥२५१॥

स्नापयेच्च तथातुरं। अनग्नाहं च वस्त्रं च रस्याद्धेनुं च दक्षिणां। भोजयेद्विदुषो विप्रान्समाप्तो कर्मणो
द्विजः। नमो गणेभ्य इत्यस्य मंत्रस्य ब्राह्मणे युतं। जप्त्वा च श्रीफलैर्हुत्वा सर्वकार्येषु सिद्धिभाक्। न
मोस्तु नीलग्रीवायेत्येतन्मंत्रेण स स च। आचार्योदकमामंत्र्य विषार्तं श्रवणे जपेत्। विषेण मुच्यते
सद्यः कालदष्टोपि जीवति। यह ग्रस्तं तथा प्रेतरक्षःशाकिनिदूषितं। प्रमुंच धन्वन इति भस्मना सर्ष
पैस्तथा। ताडयेल्लुचमुं चेति शीघ्रमेव विमुंचति। नमः शंभवे इत्यस्य मंत्रस्येवायुतं द्विजः। जप्त्वा रव
दिरसमिधां हुत्वा विप्रः सहस्रकं। कटुतैलप्लुतं सम्यग्धंत्रां तेनामुकं हन। फट्कारेण च जुहुयात् क्षपो
रे:अ३ रैरचिराद्भवेत्। जलमध्ये शतावृत्या स घोरर्षिर्निगद्यते। नाभिमात्रे जले विप्रः प्रविश्य जुहुया
ज्जलं। कुर्यादेकार्णवां पृथ्वीं मंत्रमाहात्म्यतो भृशं। इत्यादि ज्ञेयं॥ ॥अथ प्रयोगः॥ ॥कर्ता
देशकालौ स्मृत्वामुककामनयामुकरुद्रजपं होमम् अभिषेकं वा स्वयं ब्राह्मणद्वारा वा करिष्ये इति

संकल्प्य गणेशपूजापुण्याहवाचनमातृपूजानांदीश्राद्धानि कृत्वाचार्यं ब्रह्माणमृत्विजश्च वृणु
यात्। ततो ऋत्विजो देशकालौ स्मृत्वामुकरुद्रजपं करिष्य इत्युक्त्वा न्यासान्कुर्युः। तत्र बोधायनोक्ताः
पंच न्यासाः सर्वेषां समानाः। कात्यायनपरिशिष्टे त्वन्ये न्यासा उक्ताः। ब्रह्मप्रज्ञारंभे यथाविधिस्त्वा
त्वा छंदः पुरुषं शरीरे न्यसेदित्युक्ता तिर्यग्बिलश्चमसऊर्ध्वबुध्नस्तस्य चक्षुषी गोतमभरद्वाजौ॥
श्रोत्रे विश्वामित्रजमदग्नी नासिके। वसिष्ठकश्यपौ वागत्रिर्गायत्री छंदोग्निर्देवतां शिरसि विन्यसे
त्। उष्णिहं सवितारं ग्रीवास्वनूके। बृहतीं बृहस्पतिं बाह्वोर्बृहद्रथंतरे द्यावापृथिवी मध्ये त्रिष्टुभमिं
द्रं श्रोण्योः जगतीमादित्यं मेढ्रे। अतिछंदः प्रजापतिं पायौ। यज्ञायज्ञियं वैश्वानरमूर्वोरनुष्टुभं वि
श्वान्देवानष्ठीवतोः पंक्तिं मरुतः पादयोर्द्विपदां विष्णुं प्राणेषु विछंदसं वायुं न्यूनातिरिक्ते सर्वांगेषु॥ राम
न्यूनाक्षरं छंद आपो देवता इत्येवं सर्वांगेषु योजयित्वा वेदमयः संपद्यते। शापानुग्रहसमर्थो भवति ॥२५२॥

ब्राह्मंतेजः प्रवर्द्धते। नकुलश्चिद्रयं विंदते। ऋग्मयो यजुर्मयः साममयो भवति तस्मादेतन्नाब्रह्म
चारिणे नातपस्विने नासंवत्सरोषितायनाप्रवक्रेनुब्रूयादित्यादि। तदेतद्ब्रह्मयज्ञे सर्वजपेषु चो
क्तमनुक्रमण्यां। अस्य रुद्रजपमात्रांगत्वे किंमानमिति नविद्मः॥ तथा जातवेदसेति पुरश्चरणं॥
चतुःस्रक्तिरित्यासनं। मनोज्योतिरितिहृदयं। अबोध्यग्निरिति शिरसि। मूर्द्धानंदिवइतिशिखायां।
मर्माणितइतिकवचं। विश्वतश्चक्षुरितिनेत्रं। मानस्तोकइत्यस्त्रं॥ ॥अथन्यासाः। तत्र पंचांगन्या
सेषु शिखाद्यस्त्रांतमेकधांरुद्रांगन्यासः प्रथमः। मूर्द्धाक्षिपादांतं रुद्रांगन्यासो द्वितीयः। पादादिमूर्द्धां
तंपंचांगन्यासस्तृतीयः। गुह्यादिमस्तकांतं पंचांगश्चतुर्थः। हृदयाद्यस्त्रांतं पंचांगः पंचमः। षडंगन्या
सपक्षे प्रजननादिषोडशांगन्यासः षष्ठः। हेमाद्रौ महार्णवे चबोधायनः॥ ॥अथातः पंचांगरुद्रा
णांन्यासपूर्वकं जपहोमार्चनविधिंव्याख्यास्यामोयातेरुद्रशिवा तनूरितिशिखायाम स्मिन्म

हृत्यर्णवइतिशिरसि।सहस्राक्षीतिललाटे।हंसःशुचिषदितिभ्रुवोर्मध्ये।त्र्यंबकमितिनेत्रयोः।अत्र
कातीयानामग्निर्ज्योतिरितिनेत्रं।नमःस्रुत्यायच०वैशंतायचेतिकर्णयोः।मानस्तोकइतिनासिका
यामवतत्येतिमुखे।नीलग्रीवेतिकंठे।नमस्तेऽअस्त्वायुधेतिबाह्वोः।यातेहेतिरित्युपबाह्वोर्ये
तीर्थानिहस्तयोर्येपथामितिपाद्योःसद्योजातमितिपंचानुवाकान्पंचस्वंगुलीषु।नमोवःकिरि
केभ्यइतिहृदयेयेवक्षेषृदरे।नमःशंभवइतिकुक्ष्योः।नमो गंभ्यइतिपृष्ठे।नमोहिरण्यबाहवइ शा०५
तिपार्श्वयोर्विन्यस्य।विज्यंधनुरितिजठरे।हिरण्यगर्भइतिनाभौ।नमोमीढुष्टमेतिकट्यां।येभू
तानामधिपतयइतिगुह्ये।सशिराजातवेदसइत्यपाने।मानोमहांतमित्यूर्वोः।एषतइतिजान्वोः।।
संसृष्टजिदितिजंघयोः।विश्वंभूतमितिगुल्फयोर्येपथामितिपाद्योरध्यवोचेतिकवचं।नमोवि राम
ल्मिनइत्युपकवचं।नमोअस्तुनीलग्रीवायेतितृतीयंनेत्रं।प्रमुंचधन्वनइत्यस्त्रं।यएतावंतश्चे २५।३।१

तिदिग्बंधः॥इतिप्रथमोन्यासः॥ॐनमोभगवतेरुद्रायेतिनमस्कारंन्यसेत्॥ॐकारंमूर्ध्निविन्य
स्यनकारंनासिकायतः।मोकारंतुललाटेवैभकारंमुखमध्यतः।भकारंकंठदेशेतुवकारंहृदिवि
न्यसेत्।तेकारंदक्षिणेहस्तेरुंकारंवामतोन्यसेत्।द्राकारंनाभिदेशेतुयकारंपादयोन्यसेत्॥इ
तिद्वितीयः॥अत्रकातीयास्तृतीयंन्यासांतरमाहुः॥यथा॥शीर्षेतुविन्यसेद्रुद्रंललाटेचंद्रशेख
रं।नेत्रेत्रिलोचनंदेवंभैरवंश्रोत्रयोन्यसेत्।घ्राणेतुशंकरंदेवंमुखेपशुपतिंतथा।नीलकंठंकंठ
देशेहृदयेव्यापकंन्यसेत्।करेगंगाधरंदेवंशिवंनाभौतुविन्यसेत्।महादेवंतथागुह्येजंघयोस्त्र्यं
बकंन्यसेत्।सर्वज्ञंविन्यसेत्पादेशिवंसर्वत्रविन्यसेत्॥तन्निर्मूले॥बौधायनः॥सद्यंचपादयो
र्न्यस्यवामंन्यस्योरुमध्यतः।अघोरंहृदिविन्यस्यमुखेतत्पुरुषंन्यसेत्।ईशानंमूर्ध्निविन्य
स्यहंसोनामसदाशिवः।हंसहंसेतियोब्रूयाद्धंसोनामसदाशिवः।एवंन्यासविधिंकृत्वाततःसं

पुरमारमेत॥ इति तृतीयः॥ त्रातारमिंद्रं· त्वन्नो अग्ने· सुगंनः पंथां· असुन्वंतं· तत्त्वायामि· आनो
नियुद्भिः· वयंसोम· तमीशानं· अस्मेरुद्रा· स्योनापृथिवी त्येत त्संपुटमिंद्रादीन्दिक्षु विन्यस्यैव
मात्मनिरोद्रीकरणं कृत्वा त्वग स्थिगतैः पापैः प्रमुच्यते सर्वभूतेषु पराजितो भवति। यक्षगंधर्व
भूतप्रेतपिशाचब्रह्मराक्षसयमदूतशाकिनीडाकिनीसर्पश्वापदतस्करा धूपद्रवाः सर्वे ज्वल
तं पश्यंतु मां रक्षंतु। मनोज्योतिरबोध्यग्निमूर्द्धानंमर्माणि जातवेदा इति गुह्योदर हृदयमुखशि
रः स्वग्निमं त्र्यात्मरक्षां कृत्वा। इति चतुर्थः॥ शिवसंकल्पं हृदयं· पुरुषसूक्तं शिरः· उत्तरनारायणं शि
खा· अप्रतिरथं कवचं· शतरुद्रियमस्त्रं· पंचांगं सहजपेत्। अष्टांगे प्रणम्याहिरण्यगर्भो यः प्रा
णतो निमिषतो महीत्यं तानूचो जपेत्। ब्रह्मजज्ञानं· मही द्यौः· उपश्वासय· इमं यमप्रस्तरमा
हिसीदः· यातेअग्ने यज्ञियातनूः· सक्षयस्हीत्यं तः यथा वः स्वाहाग्नये दाशेमेति· निपाहीति॥ ७॥ २५४॥

राम

अथात्मानं रुद्ररूपं ध्यायेत्॥ अत्र कश्चिदर्थ उच्यते। सर्वत्र तैत्तिरीयः पाठः। उपबाहुः प्रकोष्ठः।
सद्योजातादीन्यं चस्वंगुलीषंगुष्ठतर्जन्यादिषु। नमो वः किरिकेभ्य इत्यादौ देवानां हृदयेभ्य इत्य
स्योत्तरे धनुषंगः। नमो हिरण्येत्यादौ नमोंतं यजुः। सशिरा जातवेदस इत्ययपान इति। अस्यार्थः।
जातवेदसे सुनवाम सोममित्यस्याक् च अयेतनं। तामग्निवर्णां अग्ने त्वं पारया। विश्वानि नो दुर्गहा। प
तनाजितं सहमानमुग्रमिति ऋक्चतुष्टयं शिर इत्युच्यते। तेन जातवेदस इत्याद्याः पंचर्चः अ
पाने न्यसेदिति। द्वितीये न्यासे। ॐ नम इत्यादिनान्नमस्कृत्य ॐ मूर्ध्ने नमः। ॐ नं नासिकायै नमः।
मों ललाटाय नम इत्यादि न्यसेत्। तृतीये सद्योजातं प्रपद्यामि इत्यादि पंचमंत्रान्पंच स्थानेषु न्यसे
त्। तत्र ईशानः सर्वविद्यानामित्यंते स ऋ शिवोहं स इति मूर्ध्नि न्यसेत्। अत्र कातीयाः हेमाद्युक्तैः स
द्योजातादिपंचभिः पंचवक्त्रन्यासे प्रालेयामलबिंदुकुंदधवलमित्यादिपंचश्लोकैस्तत्ध्यानं कृत्वा

शांति॰

षट्त्रिंशत्कलान्यासं वा कुर्यात् प्रतिष्ठायामुक्तं। अन्यत्र तु यजमानप्रतारतामात्रं तन्निर्मूलं वेत्युपेक्ष्यं। चतुर्थे त्रातारमित्यादिदश मंत्रैः इंद्रायनमः इत्याद्यैश्च पूर्वादिदिक्ष्विंद्रादिभ्योंजलिं कुर्यात्। संपुटोंजलिः॥ एतैः संपुटं कृत्वा पुनरेतैरावृत्या नमस्कुर्यादिति महार्णवः। मनो ज्योतिर्जुषतामिति गुह्यं। अबोध्यग्निः उदरं। मूर्धानं दिवः। हृदयं। मर्माणि ते देवाः। इति मुखं। जातवेदाय दिवा पावको सि॰ दध्यावव त्वेति शिरसि। रूपमेवमात्मरक्षेत्युच्यते। पंचमन्यासे तु यज्ञा यत इति षडृचः पठित्वा हृदयाय नमः। सहस्रशीर्षेति षोडशर्चं सूक्तं पठित्वा शिरसे स्वाहेति शिरसि। तत्र तथा लोकाँ अकल्पयन्नित्यंते। वेदाहमेतं पुरुषं महांतं। धाता पुरस्ताद्यमुदाजहारेति ऋग्द्वयमुपांत्यमधिकं। ततः अद्भ्यः संभृतः पृथिव्यै रसाच्चेत्यादि सर्वमनीषाणेत्यंतमुत्तरनारायणं पठित्वा शिखायै वषट्। आशुः शिशान इति पंचदशर्चं सूक्तमुक्त्वा कवचाय हुं। इति कवचं। कात्यायास्तु विभ्राडिति स

अष्टादशार्चं

नि॰४

राम

॥२५५॥

सहस्राभिर्नेत्रमत्राऊः।ततः त्वमग्नेरुद्रइत्यनुवाकेनशतरुद्रियेण भूर्भुवः स्वः स्वाहेत्यंतेनास्त्रा
यफट्इत्यस्त्रमितिमहार्णवः।तन्न।वपनेशतरुद्रियंजुहोतीत्यादौशतरुद्रियशब्देनरुद्राध्या
यस्यैवोक्तेः।यत्तुसावित्रवपनेश्रुतौ त्वमग्नेरुद्रइतिशतरुद्रियस्यरूपमित्युक्तं।तद्रूपमित्युक्ते
र्गौणं।नचात्रगौणग्रहणेमानमस्ति।तेनरुद्राध्यायेनैवास्त्रंयुक्तं।महार्णवस्तुभ्रांतएव।अत्र
भे९ न्यासांगमंत्राणां ऋषिदेवतंबहुसंस्त्रिपाठेश्चमहार्णवेज्ञेयः।विस्तरान्नोच्यते।।कातीयास्तु।न
मस्तेरुद्रेतिषोडशर्चेशतरुद्रियमाऊः।ततोहिरण्यगर्भइत्याद्यैरष्टांगंप्रणम्यध्यानं।।यथा।।
शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकं।गंगाधरंदशभुजंसर्वाभरणभूषितं।नीलग्रीवंशशां
कांकंनागयज्ञोपवीतिनं।व्याघ्रचर्मोत्तरीयंचवरेण्यमभयप्रदं।कमंडल्वक्षसूत्राभ्यामन्वितं
शूलपाणिनं।ज्वलंतंपिंगलजटाशिखामुद्योतकारिणं।अमृतेनाप्लुतंहृष्टमुमादेहार्धधारिणं।

शांति॰

दिव्यसिंहासनासीनं दिव्यभोगसमन्वितं ॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतं । नित्यं च शा
श्वतं शुद्धं ध्रुवमक्षरमव्ययं । सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणं । एवं ध्यात्वा द्विजः सम्यक्
ततो यजनमारभेत् ॥ इति पंचांगन्यासाः ॥ शातातपमते षडंगन्यासाः ॥ तत्र पंचोक्ताः ॥ षष्ठस्तु ।
प्रजनने ब्रह्मा तिष्ठतु । तिष्ठतु॰ तिष्ठेतां॰ तिष्ठंति यथार्थं सर्वत्र पठेत् । पादयोर्विष्णुः । हस्तयोर्हरः ॥ बाह्वोरिंद्र
जठरे अग्निः । हृदये शिवः । कंठे शार्वः । वक्त्रे सरस्वती । नासिकयोर्वायुः । नयनयोः सूर्यचंद्रमसौ ।
कर्णयोरश्विनौ । ललाटे रुद्रः । मूर्ध्न्यादित्याः । शिरसि शिवः । पृष्ठे पिनाकी । पुरतः शूली । पार्श्वयोः शि॰ वासुदे
शिवाशंकरौ । सर्वत्र वायुः । बहिः सर्वतोऽग्निर्ज्वालामालायुतस्तिष्ठतु । सर्वेष्वंगेषु सर्वदेवता यथा
स्थानं तिष्ठंतु मां रक्षंतु । ततः अग्निर्मे [illegible] वाचि श्रित इत्याद्यैर्यथा लिंगमंगानि संस्पृशेत् । राम
यथा । अग्निर्मे वाचि श्रितः । वाग्घृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । इति ज्ञेयाः ॥ २५६ ॥

प्राणोहृदये· हृ· अहं· अमृ· इति प्राणस्थाने हृदये· १

वाग्मे प्राणे श्रितः। नासयोः। सूर्यो मे चक्षुषि श्रितः। चक्षुर्हृदये त्यादि। इति चक्षुषी। चंद्रमा मे मनसि श्रितः। मनो हृदये इति वक्षः। दिशो मे श्रोत्रे श्रिताः। श्रोत्रं हृदये। इति श्रोत्रे। आपो मे रेतसि श्रिताः। गुह्ये। पृथिवी मे शरीरे श्रिता। शरीरं हृदये· इति शरीरं। ओषधिवनस्पतयो मे लोमसु श्रिताः। लोमानि हृदये। इति हृदयं। आत्मा म आत्मनि श्रितः। आत्मा हृदये हृदयं मयि। तदेव। पुनर्म आत्मा पुनरायुरागात्पुनः प्राणः पुनराकूतमागात्। वैश्वानरो रश्मिभिर्वावृधानः। अंतस्तिष्ठत्वमृतस्य गोपाः। इति सर्वांगं॥ ॥ इति षडंगः॥ ॥ हिमाद्रौ कौशिकस्तु। संकल्पजपहोमादिष्वुक्तान्न्यासद्वयमाह। तद्यथा। न्यासं भवादिभिः कुर्यान्नमोंतैः प्रणवान्वितैः। भवं च पादयोर्न्यस्य शर्वं न्यस्योरुमध्यतः। ईशानं गुह्यदेशे तु नाभौ पशुपतिं न्यसेत्। रुद्रं च हृदये न्यस्य मुखे चोग्रं तु विन्यसेत्। भीमं ललाटपट्टे च महांतं शीर्ष्णि विन्यसेत्। तथैवात्यानुवाकस्य मंत्रैर्द्वादशभिः शुचिः। न्यासं

इति रोमकूपेषु· इंद्रो मे बले श्रितः। बलं हृ· सर्वांगे· पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृ· मस्तके· ईशानो मे मन्यौ श्रितः। मन्युर्हृ· ६

रेतो हृ· मआ

इति तस्थाने वक्षः

कृत्वानुलोम्येन वर्जयित्वाभिचारकं। आद्यं तु पादयोर्न्यस्य द्वितीयं जानुदेशतः। पंचमं नाभिदेशे तु षष्ठं च हृदये न्यसेत्। सप्तमं कंठदेशे तु मुखे चाष्टममुत्तमं। नवमं नासिकायां तु दशमं नेत्रयोर्द्वयोः। एकादशं ललाटे तु द्वादशं शीर्ष्णि विन्यसेत्। त्रयोदशं तु क[illegible]र्वं कृत्वास्त्रेण लुप्तं तदिति॥ ।अथ सामान्यतो रुद्रस्यर्ष्यादि। तत्र सर्वेषामग्निर्भगवान्[illegible]षिः। रुद्रः शंभुर्वा देवता। महाविराट् छंदः। चमकानुवाकानामग्निः कौंडऋषिः। आद्या गायत्र्यग्निर्देवता। शिष्टं यजुः वा ऊर्ध्वयोन्यादि विशेषा देवताः। जपे विनियोगः॥ अथ विशेषः॥ यथा। आद्यायाः कश्यप ऋषिः आत्रेयस्ततः कश्यपस्ततो द्वयोर्गौतमो भूमतस्ततः कण्वस्ततो द्वयोः काश्यपो मरुत्वांस्ततो भृगुर्वा स्ततस्ति सहस्राणि भगवान् द्वितीयानुवाके मंडूकस्तृतीये भगवांश्चतुर्थे दुर्वासाः पंचमषष्ठयोर्भगवान् सप्तमानुके हेमकोशो राम षष्ठमे नवमे च नमो वः किरिकाणां तं भगवान् वशिष्ठस्याग्निर्दशमानुवाके द्रापेति पुलहः। इमा रुद्राय ॥२५७॥

तिद्व्योमंडिव्यः ततोदेवराट्। मानस्तोकेतिभगवान्नारात्तइत्यत्रिः। स्तुहिश्रुतमितिवैयाघ्रः
परिणोरुद्रस्येतिभगवान्। ततोवैराजः ततःपुलहस्ततोनारदस्ततश्चतुर्णांदुर्वासास्ततआ
सुमास्तेदेवलइत्यृषयः॥अथदेवताः॥असौयस्ताम्रइतिद्व्योरादित्यास्तमायातेरुद्रेतिस्कंदात्मा
मरनोमहांतमितिनंदीश्वरात्मायातइषुरध्यवोचनमोअस्तुनीलग्रीवायेत्यासांचतुर्थपंचम
षष्ठानुवाकानामारात्तेमीढुष्टमेतिद्वयोश्चशंभुर्यातेहेतिरित्ति[illegible]मोष्टमानुवाकेनवमेचनमोवः
किरिकांतंमानस्तोकेपरिणइत्येतेषांचभगवान् अवशिष्टानां[illegible]रुद्रइतिदेवताः॥अथछंदांस्य
सौयस्ताम्रअवलत्येत्यनयोरास्तारपंक्तिरसौयोवसर्पतीतिषट्पदाजगती।इमारुद्रायेतिच
तस्रोअगात्यआरात्तइतितिस्रस्त्रिष्टुभः।मीढु[illegible]तिपंचपदात्रिष्टुप्।शिष्टाअनुष्टुभः।यातेरु
द्रेतिस्वराडनुष्टुप्।यामिषुंगिरिचदनुष्टुप्।अध्यवोचदित्यनुष्टुप्।द्वितीयानुवाकेमहागायत्री।

तृतीयेबृहती॥चतुर्थेउष्णिक्पंचमषष्ठयोर्महाविराट्॥सप्तमेष्टमेपङ्क्तिरष्टमनवमयोर्महात्रि
ष्टुप्॥शिष्टानियजूंषीलिंगंदृष्टिः॥जपेविनि॰॥ ॥अथाभिषेकः॥तत्रपंचांगरुद्राणांजपहोमार्चनवि
धिमितिबोधायनोक्तेःप्रागुक्ताःपंचन्यासाभवंत्येव॥अथातोरुद्रस्नानार्चनविधिंव्याख्यास्या
मइतितेनैवोक्ताप्रजननेब्रह्मातिष्ठत्वित्यादिषष्ठन्यासोक्तेःषष्ठोपिभवति।ततश्चसमुच्चयः॥ने
नाग्निर्मेवाचीत्याद्येयथा।लिंगमंगानिसंमृश्येत्यंतेप्रागुक्तंन्यासषट्कंकृत्वा।आराधितोमनुष्यै
स्त्वंसिद्धैर्देवासुरादिभिः।आराधयामिभक्त्यात्वांमांगृहाणमहेश्वरेतिमनस्यावाह्यगंधाद्यैःपं
चोपचारैःसंपूज्यत्र्यंबकंयजामहइत्यनेनमाराधयेत्।आवाहनभिन्नान्पंचषड्वात्र्यंबकमित्य
नेनकुर्यादित्यर्थः॥आत्वावहंतुहरयःसचेतसःश्वेतैरश्वैःसहकेतुमद्भिः॥वाताजवैर्बलवद्भि
र्मनोजवैरायाहिशीघ्रंममहव्यायशर्वोमितिदक्षिणनासाग्रेपुष्पेणपीठस्थेलिंगेसंयोज्या ॥२५८॥

राम

र्घ्यं·वामदेवायनमइतिमधुपर्कं·रुद्रायेत्याचमनं·अ २

वात्यसद्योजातंप्रपद्यामीत्यावाहनंदद्यात्।त्र्यंबकंसद्योजातायवैनमोनमइत्यासनं।त्र्यंब
कंभवेभवेनातिभवेभवस्वमामितिपाद्यं।त्र्यंबकं·भवोद्भवायनमइत्यंबिंगाभिश्चस्नानं।आ
पोहिष्ठायाभिः॥अथाभिस्तर्पयति।भवंदेवंतर्पयामि।शर्वंदेवं·ईशानंदेवंत·पशुपतिंदेवंत·
रुद्रंदेवंत·उग्रंदेवंत·भीमंदेवंत·महांतंदेवंत·।त्र्यंबकं·ज्येष्ठायनमइत्याचमनीयं।त्र्यंबकं·
श्रेष्ठायनमइतिमधुपर्कं।त्र्यंबकंकालायनमइतिगंधं।कलविकरणायनमइतिपुष्पं।सर्वभू
नमः८ तदमनायइतिधूपं।मनोन्मनायनमइतिदीपं।भवोद्भवायनमइतिनैवेद्यं॥अथाष्टोपुष्पा
णि।भवायदेवायनमः।शर्वाय·ईशानाय·पशुपतये·रुद्राय·उग्राय·भीमाय·महतेदेवा
यनमइति।अघोरेभ्यइतित्रिभिःसद्यशिवोमित्येतेरघोरतनूरुपतिष्ठते।अथैतस्यहिरण्म
त१ येनमूर्ध्नि्कलशेनसंतत्धारांनिषिंचेन्मधुनासहसर्पिषापयसाचेक्षुरसेन नालिकेरेण

वस्त्रं·रुद्रायनमइत्याचमनं·कालायनमइत्युपवीतं·कलविकरणायनमइत्यलं
लंकारं·बलविकरणायनमइत्यर्चनं·

न

वाऽभ्ररसेनवातद्दलाभेउदकेनवानमस्तेरुद्रमन्यवइत्येकादशनामनुवाकानामेकमेकंज
पेत्सर्वेषांपारेपुनराराधयेदुत्तमाराधनेतद्देतद्विधानमुक्तंपत्ररुद्राभिषेकउक्तस्तत्रेतद्विधा
नंज्ञेयमित्यर्थः।तेनाभिषिक्तेनोदकेनाक्षीभ्यामित्यनुवाकेनाद्भिंगाभिश्चापाद्यासंमृज्यात्मा
पक्षयाथरिव्याधिविमोचनार्थीजीवनार्थश्रीकामःशांतिकामःपुष्टिकामोमोक्षोकुर्यादेवं
कुर्वन्सिद्धिमाप्नोत्याचार्यायदक्षिणांदत्तातिदशगाःसवत्साःसुवर्णभूषितावृषभैकादशांस्त
द्दलाभेएकांगांदद्यादित्याहभगवान्बौधायनः॥ ॥अथमहास्नानं॥हेमाद्रौलैंगे॥स्नानंप
लशतंज्ञेयमभ्यंगःपंचविंशतिः।पलानांद्वेसहस्रेतुमहास्नानंप्रकीर्त्तितम्॥स्थाप्यलिंगंमही
पंचगव्येनैवघृतेनच।विरोध्यसर्वद्रव्यैस्तुवराद्भिरभिषिंचति।महास्नानेप्रसक्तेतुस्नानमष्ट

गुणंस्मृतं।जलेनकेवलेनैवगंधतोयेनशक्तितः।अनुलेपनंचतत्सर्वंपंचविंशत्पलेनवै।शामी॥२५६॥

राम

१

पत्रंचविधिनाबिल्वपत्रंचपंचकं।दशाद्रोणेस्तुनैवेद्यमष्टद्रोणैरथापिवा।दशाद्रोणसमंपुण्यमा
ढकेतुविधीयतेवित्तहीनस्यभक्तस्यनात्रकार्याविचारणा।जागरंकारयेत्तत्रप्रार्थयेत्तुयथाक्रमं।
भक्त्यैःप्रदक्षिणंसार्द्धंप्रार्थ्येलिंगंमहेश्वरं।द्रव्यहीनेमंत्रहीनेःश्रद्धाहीनेःसुरेश्वर।कृतंचाप्यकृतंवा
पिक्षंतुमर्हसिशंकर।विशेषोव्रतकमलाकरेज्ञेयः॥ ॥इतिमहास्नानं॥ ॥अथरुद्रहोमः॥ ॥
सद्वेधा।समग्रोहोमःप्रधानभूतोजपांगभूतश्चेति॥तत्राद्यंमूलंजपहोमार्चनविधिंव्याख्या
स्यामः।रुद्रहोमःपराशंतिःपायसेनघृतेनवेत्यादिबौधायनविष्णुधर्मादिवचनंप्रागुक्तं।
अंगभूतस्तुदशांशहोमशतांशश्चा।सचतिलाद्यैःकार्यइतिमहार्णवः।अत्रयद्यपितेनमूलंनो
क्तं।तथापिअन्यमंत्रजपसामान्येत्रतेनोक्तं।तन्निर्मूलं।भवन्नपिआज्यंद्रव्यमनादेशेजुहोति
षुविधीयतेइतिसामान्यवचनाद्राज्येनस्यात्।नतुतिलद्रव्यत्वेमानमस्ति।अतएवहेमाद्रिणा

रुद्रजपांगहोमोवाचनिक एवोक्तो न तु दशांशादिः। यथाह तत्रैव बोधायनः। ततो होमं प्रकुर्वीत
नमः शंभवमंत्रतः। रुद्रैकादशिनीजप्ये त्रयस्त्रिंशद्यथाहुतीः। रुद्रे शतत्रयं प्रोक्तं षष्ट्याप्यधिक
यायुतं। रुद्रे लघुरुद्रे। चत्वारश्च महारुद्रे सहस्राः सप्तवर्जिताः। चत्वारिंशत्सहस्राश्च कर्त्तव्या
श्चतुरुत्तराः। ऊनाश्च सप्तसप्तत्या ह्यतिरुद्रे विनिश्चयः। स च होमो नमः शंभवे ति मंत्रेण कार्य
इति हेमाद्रिः। स च पूर्वोक्तविष्णुधर्मोक्तेः। पायसेन घृतेन वा कार्य इति युक्तं प्रतिभाति। तेन हेमा
द्रिमते मंत्रविभाग एव नास्ति। अयं च जपांगहोम एव। जप्ये इति सप्तम्या मंत्रप्रापणीयायामि
ति वदं गित्वागतेः। प्रधानभूतसमग्रहोमे तु अस्याः संभवात्। रामहार्णवोक्तः श्रुतिकल्पसूत्रादि
षु चयनप्रकरणोक्त एव मंत्रविभागो ग्राह्यः। महार्णवेन तु प्रधाने समग्रमंत्रविभागस्यावश्य   राम
कत्वाज्जपांगे यमेव ग्राह्यः। क्लृप्तत्वादपेक्षितत्वाच्चेत्युक्तं। शिष्टैश्चायमेवादृतः। इत्तानी मु ॥२६७॥

च्यते। तत्र मंत्रविभागः पंचधा त्रेधा षोढा षोडशधा अष्टाचत्वारिंशत्पक्षे एकोनसप्तत्युत्तरशतप
क्षश्चेति। अन्यः प्रतिमंत्रपक्ष इत्युच्यते। तत्राद्यश्चरमायामिष्टकायां जुहोति इत्युक्त्वा त्रेधा विभ
क्तं जुहोति त्रय इमे लोका इति श्रुत्योक्तः। बोधायनोपि। नमस्ते रुद्र मन्यव इत्येतानऽनुवाकांस्त्रेधा
विभज्येति। अत्र पक्षो। आद्यानुवाकचतुष्कमेको विभागः। अपरं चतुष्कं द्वितीयो विभागः। अं
त्यानुवाकत्रयं तृतीयो विभाग इत्येकः पक्षः। पक्षा। नमस्ते रुद्रेत्यारभ्य सभापतिभ्यश्च वो नम इ
त्यंत एको भागः। नमो अश्वेभ्य इत्यादिवार्याय चेत्यंतो द्वितीयः। नमः प्रतरणाय चेत्यादिरास
मा प्तेस्तृतीयः। षोढाभागस्तु। तिस्र उत्तरा आहुतीर्जुहोति षट् संपद्यंते षड्वा ऋतव इति श्रुत्योक्तः।
शतपथेपि। स चाशीत्यां चाशीत्यां च स्वाहाकरोतीत्यादिना षोढा विभाग उक्तः। यथापि वा
प्रथमादुपक्रम्य नमस्तक्षभ्य इति ज्वानुदग्धे जुहोति। रथकारेभ्यश्च व इत्युपक्रम्य नमः

स्वायुधायेत्तिनाभिद घ्नेषीण्याग्वतानेभ्यआस्यदघ्नेकृत्वासहस्राणिसहस्रशइतिदशगव
दानानिकृत्वाऽन्वारोहान्जुहोति।नमोरुद्रेभ्योयेपृथिव्यामितिजानुदघ्नेधारयमाणो।०नमोरुद्रे
भ्योयेंतरिक्षइतिनाभिदघ्नेनमोरुद्रेभ्योयेदिवीत्यास्यदघ्नेकृत्वेति।एतेत्रयःपक्षाःप्रचरंति॥ ॥
अथोध्यांचत्वारिंशत्सक्षः॥ तत्राद्येनुवाकेपंचदशमंत्राः।ततोष्टावनुवाके अष्टौयजूंषीतिकाश्च
कृत्स्नोक्तेनवमांतत्रयोविंशतिः।दशमेकादशेतिपंचत्रिंशत्।एकादशेदशर्चस्त्रीणियजूंषी
तित्रयोदशोऽयष्टाचत्वारिंशत्॥ तदयंसंग्रहः॥ आद्येपंचदशाप्रोक्तादशमेक्षदश स्मृताः।एका
दशोग्निभूम्यःस्युरष्टौशिष्टयजूंषिच॥ प्रतिमंत्रपक्षेत्वेकोनसप्तत्यधिकशतंमंत्राः।तत्राद्ये
नुवाकेपंचदशमंत्राः।द्वितीयेत्रयोदशाततीयचतुर्थयोःप्रत्येकंसप्तदशमंत्राः।एतेद्वितीयादिच
तुर्थांतमुभयतोनमस्कारामंत्राः।पंच षष्ठयोःप्रत्येकंपंचदशमंत्राः।सप्तमेषोडश।अष्टमे ॥२६१॥

राम

सप्तदश॥ नवमे एकोविंशतिः। एषु पंचमादिनवमांतेषु पुरस्तान्नमस्कारा मंत्राः। तत्र देवानां हृदये
भ्य इत्यस्येत्तरमंत्रचतुष्टयेऽनुषंगः। अयं च होमादावेव विभज्य प्रयोगः॥ अपामभिषेकादौ तु विभा
गाभावाद्यथाध्ययनं पाठः। एवमन्यत्राप्यनुषंगो ज्ञेयः॥ दशमे द्वादश मंत्राः। एकादशे त्रयोदश॥ ति
॥ यत्तु रुद्रकल्पद्रुमे द्वितीयादिनवमांतानुवाकेषु नमस्कारादि नमस्कारान्तमेकं यजुरित्याह।
तत्रोभयतो नमस्कारेषु स्पष्टो विभागः। अन्यत्र त्वेको नमःशब्दः। यथा नमो भवाय च रुद्राय च न
मः शर्वाय चेत्यादौ। तत्र द्वितीयो नमःशब्दः पूर्वस्यांतत्वेन द्वितीयस्यादित्वेन तस्य द्वादशशत
मितिवत्काकाक्षिवदुभयत्र संबध्यते। यद्वा द्वितीयतृतीयचतुर्थानुवाकपरं। यत्र त्रयास्कः॥
नमस्काराद्येकं यजुरिति। तत्पंचमादिनवमांतमिति महार्णवः॥ तदयं संग्रहः॥ बाणेंदवो १५
वह्निभुवो १३ श्वभूम्यो १७ नगेंदवः १७ पंचदशो १५ श्रुभूमयः॥ नपा १६ श्वभूम्यं १७ कृभुवो १९

यभास्करा१२विश्वे१३समस्ताग्रहभूमिपाः स्मृताः॥१९६॥ एते विभागा न मकेष्वेव। चमकेषु त्वा
ह बौधायनः॥ अग्नाविष्णूसजोषसइतिचतुर्ग्रहीतं कृत्वेत्यक्त्वा। वाजश्चमेप्रसवश्चमइतिसंततां
वसोर्धारां जुहोत्यामंत्रसमापनादिति। मंत्रः सर्वे चमकाः आद्योनुवाकोवा। तेन आद्यर्चा कृत्वा स
र्वैश्चमकैरेकाहुतिः। प्रत्यनुवाकांतमेकादशाहुतयोवा। ते न द्वे आहुती। द्वादशवाइदं वसोर्धारोक्त
मप्यपेक्षितत्वाद्धोमेपि ज्ञेयं। यद्वा एकादशानामनुवाकानामेकमेकं जपेदिति बौधायनोक्तेर्यथा ज
पे एकैकस्य न मकस्यावृत्तिस्तथा होमेपि। तेनाद्यचमकेन सर्वैर्वा कृत्वाऽन्यैः प्रत्येकमेकादशा
हुतइति पक्षत्रयं महार्णवोक्तं। अथ त्रेधाविभागादिभाषा तांशेन होमद्रव्यस्य प्रचाराभावाद्दशां
शहोमे समग्रहोमे चाष्टाचत्वारिंशत्पक्षे प्रतिमंत्रपक्षेवाहुतिसंख्या च्यते॥ तत्रैकरूपे दशांशहो
मो नाशक्य एव। विभागाभावात्। एकादशिन्यां त्वेन रूपेणाहोमः। शिष्टैकरूपे विभागो ग्रहान्मद

कां४

राम

१ गा॥ २१६२।

२ीशहोमः।एवंमहारुद्रावपीतिमहार्णवः॥अस्मद्गुरवस्त्वत्रचत्वारिंशत्पक्षेपंचाहुतयः।प्रति
मंत्रपक्षेचसप्तदशाहुतयः।आद्येमंत्रैःकार्याः।अंत्याल्लोपोविवृद्धिर्वैत्यापस्तंबोक्तेरित्याहुः।पशु
पत्रत्रिकपालोनवकपालइतिसंख्याङ्कतातत्रैव।अत्रतदभावान्नतथोक्तं।अतएवसमविभा
गाभावान्मूलाभावाच्चहेमाद्युक्तोवाचनिकएव।नमःशंभवेतिमूलमंत्रेणहोमोनतुदशांशेनेति
वयं।महार्णवसंगीकृत्यलिख्यते।अत्रमामकाःश्लोकाः॥रुद्राद्दशांशोष्टाचत्वारिंशत्सहस्रकंकवे
दका४८॥समग्रहोमेतत्रैवखवेदशरसंख्यका५४०॥प्रतिमंत्रेदशांशेतुखाब्धिचंद्राहुतीर्जनेत्।
१४०॥प्रतिमंत्रेसर्वहोमेशराद्रिवसुचंद्रकाः१८७५॥इतिरुद्रैकादशिन्याःसंख्या॥लघुरुद्रेदशांशे
तुखांकबाणाहुतीर्जनेत्५९०॥समग्रहोमेतत्रैवखाग्न्यंकखशराःस्मृताः।५०९३०॥प्रतिमं
त्रेदशांशेतुलघोरुद्रेप्रकीर्त्तिताः।चंद्रवेदखखायुग्माः२००४१सर्वहोमेवदाम्यहं।चंद्राद्रिश

शांति

रखायुग्मा २०५७३ लघुरुद्रे त्विदं स्मृतं । इति लघुरुद्रे । महारुद्रेष्टाचत्वारिंशल्लक्षे त्वाहुती र्जनेत्‌ । ष
ट् सहस्री शरशती चत्वारिंशद्दशांशके । ६०५४० तत्रैव सर्वहोमे तु खवेदाग्निशरार्त्तवः । ६५३४० प्र
तिमंत्रे महारुद्रे दशांशे त्वाहुती र्जनेत्‌ । द्वाविंशति सहस्राणि षट्शतानि दशैव च । २२६१० प्रतिमंत्रं म
हारुद्रे सर्वहोमे वदाम्यहं । लक्षद्वयं सहस्राणि षड्विंशति तथैव च । द्विशते सप्ततिश्चैकाधिकासंख्य
यमीरिता । २२६२७१ इति महारुद्रे होमसंख्या ॥ अथातिरुद्रेष्टाचत्वारिंशल्लक्षे दशांशके एकसप्त
ति साहस्रमशीत्यं ताष्टशत्यपि । ७१८८० प्रतिमंत्रं दशांशे तु सार्द्धलक्षद्वयं स्मृतं । सहस्रोनं सर्वहोमे
त्वतिरुद्रे वदाम्यहं । अष्टाचत्वारिंशभागे सप्तलक्षाणि चैव हि । सहस्राणि तथा सप्त दशसार्द्धच
तुःशती । प्रतिमंत्रं सर्वहोमे पंचविंशति लक्षकाः एकादश सहस्रोना स्त्वतिरुद्रे समीरिताः । क्र
विकल्पांतरं त्वत्र न गण्यं सूरिभिर्मम । इदं तैत्तिरीयशाखयोक्तं वाजसनेयिका एव दिशाखायां तु ॥२६३॥ राम.

प्रतिमंत्रेषष्ट्युत्तरशतविभागान्न्यूनसंख्या। नमः शंभवायेति वा होमो ज्ञेयः। इयं च वसोर्द्धारा
सहिताहुति संख्यां घृतकुंभवसोर्द्धारीं पालयेदनलोपरि। औदुंबरीमथार्द्रीं च ऋज्वीं कोटरवर्जि
तां। बाहुमात्रं स्रुचं कृत्वा ततस्तां भद्रयोपरि। घृतधारां तया चाज्यमग्नेरुपरि पालयेत्॥ श्रावयेत्सू
क्तमाग्नेयं वैष्णवं रौद्रमैंद्रं। महावैश्वानरं साम ज्येष्ठसाम च पाठयेत् इति मात्स्योक्तेः। आग्नेय
सूक्तादि प्रागुक्तबौधायनोक्तेः सर्वसमकीतिज्ञेयं। इयं च वसोर्धारा यद्यपि मात्स्ये लक्षहोम एवो
क्ता तथापि चयने दृष्टत्वात्फलहेतुत्वाच्च रुद्रे कार्येति महार्णवः। सा च पूर्णाहुत्यनंतरं कार्या॥
शौनकोपि। अयाश्चेत्यादिभिर्हुत्वा समुद्रादूर्मिसूक्ततः। संततामाज्यधारां तां पूर्णाहुतिमथा
चरेत्। अत्र पूर्णाहुतेरुपर्याज्यधारा तूष्णीं देयेति केचित्। वसोर्द्धारापरमिति तु युक्तं॥ अत एव हेमा
द्रौ मदनरत्ने च शांतिकांडे देवीपुराणे वसोर्धारोत्पत्तिमुक्त्वा सर्वत्र सोक्ता। अत्र होमसंख्यावशात्कुं

डंकार्यं। तद्वत्कं स्यविष्ये। रत्निमात्रं शतार्धे तु शते चारत्निमात्रकं। सहस्रे तु यथा होतव्ये कुर्यात्कुंडं करा
त्मिकं। द्विहस्तमयुते नवलक्षहोमे चतुःकरं। दशलक्षमिते होमे षट्करं संप्रचक्षते॥ पचुमात्स्ये॥
द्विहस्तविस्ततं तद्वच्चतुर्हस्तायतं पुनः। लक्षहोमे कुंडं योनिव क्रं त्रिमेखलं। तत्र शीघ्रदा हि घृता
दौ द्विहस्तं लक्षहोमे ज्ञेयं। यवचवर्दी चतुर्हस्तं ज्ञेयं। सिद्धांतशेखरे। लक्षार्धे त्रिकरं कुं लक्षहो
मे चतुःकरं। कुंडं पंचकरं प्रोक्तं दशलक्षाहुतौ क्रमात्। षड्ढस्तं लक्षविंशत्यां कोट्यर्धे हस्तसप्तक
मिति। अत्र न्यूनसंख्योदिते कुंडे धिकोहोमो विधीयते। इति कुंडरत्नाकरोक्ते रांतरालिको होमो
न्यूनसंख्योक्ते कुंडे कार्यः। तत्र कुंडमैशान्यां मंडपमध्ये च वेदी। तत्रैका वेदिका कार्या यज्ञमंड
पमध्यतः। मध्यस्तंभांतरं याव त्तावन्माना करोच्छ्रयेति परशुरामोक्तेरिति केचित्। प्रागुत्तरं स
मासाद्य प्राहेशं मंडपस्य तु। शोभनं कारयेत्कुंडं यथावल्लक्षणान्वितमिति अयुतहोमे मात्स्यो ॥२६४॥

भवेर
डं४

राम

क्तेर्हेमाद्र्यादिलिखनाच्चैवमाभाति॥ अस्मद्गुरवस्तु परशुरामोक्तेर्निर्मूलत्वान्मध्ये च मंडस्यापि
कुंडं कुर्याद्विचक्षण इति वृद्धवसिष्ठोक्तेः। मात्स्ये च प्राक्पूर्वं मंडपस्योत्तर मुत्कृष्टं मध्यमे प्रादेशे
प्राप्येत्यर्थान्मध्ये कुंडं। अन्यथा गर्त्तस्योत्तरपूर्वेण वितस्त्युच्छ्रायसंमिते। पूर्वोत्तरे हस्तमिता थवे
दी गृहादिदेवेश्वरपूजनायेति मात्स्यबाधापत्तेश्च लक्षहोमवन्मध्ये कुंडं तद्विकृतत्वादित्याहुः।
मध्ये वेदी श्च दीक्षातुलादानेषु। नात्र उपयोगाभावात्। रुद्रवेदिश्चैशान्ये ग्रहवेदिर्भिन्नाचार
प्रासादतांत्रिकीवास्तु। रुद्रस्य काम्यत्वेपि ग्रहमखविकृतित्वेन क्षतिः। यत्तु परशुरामः। मंडपोपृ
गुणः कुंडलकुंडं होमानुसारतः इति सचतुर्हस्ते कुंडे द्वात्रिंशद्धस्तस्य मंडपस्य काप्यनुक्तेर्निर्मूलो
मूर्खश्चेत्युपेक्ष्यः। अत्र केचिद्द्विधा रुद्रपीठमप्याहुः। यथोक्तं स्कांदे। प्रणम्य जगतामीशमुमा
देहार्द्धधारिणी। पं यंत्रोद्धारमहं वक्ष्ये रुद्रकल्पानुसारतः। मध्ये वृत्तं समालिख्य तन्मध्ये च दश

क्षरं। बहिरष्टदलं पद्मं ततः षोडशपत्रकं। चतुर्विंशतिपत्राब्जं द्वात्रिंशत्पत्रकं तथा। चत्वारिंश
त्पत्रकं तु वृत्तं सूर्यसमप्रभं। पंचप[illegible]शात्मकं वृत्तं चतुरस्रं च भूगृहं। सत्वं रजस्तमश्चेति त्रिगुणैः
परितो वृत्तं। चतुर्द्वारं द्वारदेशे बहिर्नागसमावृतं। चत्वारिंशच्छतं चैकं देवतानां तु विन्यसेत्। कर्णि
कामध्यदेशे तु रुद्ररूपं चास्य मालिखेत्। ॐ नमो भगवते रुद्रायेति तारादिकं न्यसेत्। सोयं दशाक्ष
रो मंत्रः सर्वकामार्थसिद्धिदः। प्रणवादिनमोंतानि पंचास्यानि ततः परं। सद्योजातं वाम देव
मघोरं तदनंतरं। ततस्तत्पुरुषं प्रोक्तमीशानं पंचमं क्रमात्। दलेष्वष्टसु नंद्यादीन् पूर्वादिक्रमतो
न्यसेत्। पूज्यपूजकयोर्मध्ये प्राचीस्याद्यंत्रलेखने। आदौ नंदी महाकाल गणेशं वृषभं क्रमात्।
अनंतरं भृंगिरीटिस्कंदोमाचंडसंज्ञकाः। षोडशारे ततः पश्चाद्द्वितीयावरणे यजेत्। अनंतं च तथा
सूक्ष्मं शिवं चैकपदं तथा। एकरुद्रं त्रिमूर्त्तिं च श्रीकंठं वामदेवकं। ज्येष्ठं श्रेष्ठं तथा रुद्रं कालं च कल ॥२६५॥

राम

विकरणी। बलं च बलविकरणी बलप्रमथनं तथा। ततो यावरणे पद्मे चतुर्विंशद्दले तथा। अणिमा
महिमा चेति लघिमा गरिमा तथा। प्राप्तिः कौं प्राम्यमीशित्वं वशित्वं चाष्टसिद्धयः। ब्राह्मी माहेश्वरी
चैव कौमारी वैष्णवी तथा। वाराही चेंद्री च चामुंडा चंडिका वेति ताः क्रमात्। असितांगो रुरुश्चंडः क्रो
धउन्मत्तभैरवः। कालभीषणसंहारा भैरवाश्चाष्टकीर्त्तिताः। द्वात्रिंशत्पत्रके पूर्वं भवाष्टकमुदाहृ
तं। भवः शर्वेशानपशुपति रुद्रो यभीमकाः। महांश्चैवेति विख्याता भवाद्यष्टौ प्रकीर्त्तिताः। ततोनं
तो वासुकिश्च तक्षकश्च कुलीरकः। कर्कोटकः शंखपालः कंबलोश्वतरस्तथा। ततोष्टसु न्यसेद्धे
न्यं पृथुं हैहयमर्जुनं। शकुंतलेयं भरतं नलं राममिति क्रमात्। ततः कुलाचलानष्टौ दलेष्वष्टसु वि
न्यसेत्। हिमवान्निषधो विंध्यो माल्यवान्पारियात्रकः। मलयो हेमकूटश्च गंधमादनसंज्ञकौ।
चत्वारिंशद्दले पद्मे पंचमावरणे न्यसेत्। इंद्राद्यष्टौ लोकपालानष्टसु क्रमशो लिखेत्। इंद्रमग्निं

२ शां.ति.

यमंचैवनिर्ऋतिंवरुणंतथा।वायुंकुबेरमीशानंदलेष्वष्टसुविन्यसेत्।इंद्रादिलोकपालांश्चाष्टौशक्ती ना१
स्ततोन्यसेत्।शचीस्वाहाचवाराहीखड्गिनीवारुणीतथा।मृगारूढाचकौबेरीशूलिनीचतथाष्टमी॥
वज्रंशक्तिर्दंडखड्गौपाशंकुशगदाअपि।त्रिशूलंलोकपालानामायुधानिक्रमाल्लिखेत्।ततोष्टौ
वाहनान्येषामष्टसुक्रमशोलिखेत्।ऐरावतंतथामेषंमहिषंप्रेतसंज्ञितं।मकरंचमृगंचैवनरंच
वृषभंतथा।ऐरावताद्योथाष्टदिग्गजास्तदनंतरं।ऐरावतःपुंडरीकोवामनःकुमुदोंजनः।पुष्प
दंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः।इंद्राद्योष्टौदिक्पालाःपंचपद्मात्मकाबहिः।विरूपाक्षंवि
न्यसेदाग्नेयामग्निपोगतः।नैर्ऋत्यांविश्वरूपंचवायव्यांपशुपतिंतथा।ईशान्यामूर्ध्वलिंगंच
न्यसेदीशानयोगतः।प्रागादिक्रमतोलेख्याःशेषाद्याभुजगाबहिः।शेषंविन्यस्यपूर्वस्यांसह राम
स्रफणमंडितं।आग्नेय्यांतक्षकंचैवयुतंपंचशतैःफणैः।सहस्रफणसंयुक्तमनंतंदक्षिणे य॥२६६॥

जेत्॥ नैर्ऋत्यां वासुकिं नागं युतं सप्तशतैः फणैः॥ शंखपालं च वारुण्यां युतं सप्तशतैः फणैः॥
महापद्मं च वायव्यां युतं पंचशतैः फणैः॥ कंबलं चैव कौबेर्यां कृष्णं त्रिंशत्फणैर्युतं॥ कर्कोटकं त
थेशान्यां श्वेतं त्रिंशत्फणायुतं॥ रुद्रपीठमिदं सर्वं रुद्रसूक्तेषु विश्रुतं॥ शंभुना स्वयमाख्यातं
भक्तानुग्रहकाम्यया॥ कुंकुमागरुकर्पूरैर्भूर्जपत्रेऽथवा पटे॥ विलिखितं पूजितं भक्त्या सर्वका
मार्थसिद्धिदं॥ एता देवताश्चतुर्थ्यंतं नमोंतं तत्तन्नाममंत्रेणावाह्य पूजयेत्॥ अत्र मूलं चिंत्यं॥
तदैशान्यां रुद्रकलशं संस्थाप्य तत्र वरुणं संपूज्य रुद्रैकादशिनीजपार्थं विप्रं वृणुयादिति
वृद्धाः॥ ततो यजमानेन त्यागे कृते ग्रहेभ्यः सांगेभ्यो ग्रहयज्ञवद्धुत्वा रुद्रहोमे कृते रुद्रपीठदेव
ताभ्य आज्यं हुत्वा स्विष्टकृदादि प्रायश्चित्तहोमांते दिक्पालेभ्यो नवग्रहादिभ्यश्च माषभक्त
बलीन्दत्वा समुद्रादूर्मिरित्रिति तृचेन मूर्द्धानं पुनस्त्वादित्याः पूर्णा दर्वि सप्त ते धामंतेति पूर्णा

इतिं कृत्वा एवं च मंत्रेणाग्निमीळेनवभिर्विप्रोनुकं षड्भिरातेपितः पंचदशभिः स्वादिष्ठयेति दश
भिर्महावैश्वानरज्येष्ठसामभ्यां च वसोर्धारां कृत्वा पूर्णपात्रविमोकादिशेषं समाप्य त्विग्भ्यो द
क्षिणां दद्यात्। तत्र तु रुद्रदक्षिणोक्ता बोधायनसूत्रे॥ सोवर्णं शतं सुवर्णं प[illegible]धानं वा दद्याद्
षभोरुद्रस्य दक्षिणा। एकादशगा दद्यादिति शालिकिः। उपधानं हैमतं तु रुक्मुपबर्हणं। सो
वर्णशतं। शतद्विद्वं। रुद्रोलघुरुद्रः। प्रकारांतमाह महार्णवः। तत्र सोवर्णनिष्काणां दशसा
हस्त्रिकोत्तमा। तदर्धं मध्यमा प्रोक्ता ततीया त्रिसहस्त्रिका। उत्तमा त्रिशती वास्या द्विशती म
ध्यमा स्मृता। शतमाधमा ज्ञेया प्रकारः कीर्त्यते परः। उत्तमा तु चतुःषष्टिस्तदर्द्धं मध्यमा स्मृता।
चतुर्विंशतिरन्या स्यात्तथान्यो विधिरुच्यते। सहस्त्रं दक्षिणां देया दशपूरुषकर्त्तृके। शतानि पं
च देयानि कृत्विक्पंचककर्त्तृके। अथैककर्त्तृके देयं शतत्रयमिति स्थितिः॥ ततो ग्रहादिक ॥२६७॥

२ आ

राम

लशोदकेनाभिषिक्तोयजमानोथहादीनामुत्तरपूजांकृत्वाविसृज्यश्रीरुद्रप्रतिमांस्वर्णमयीं
वस्त्रयुगान्वितां।श्रीरुद्रप्रीतयेवापिपापानिष्टनिवृत्तये।प्रार्थितामीप्ससंसिध्यैतुभ्यंश्रीरुद्र
रूपिणे।संप्रदद्याद्विधानेनयथोक्तफलमश्नुतइतिरुद्रप्रतिमामाचार्यायदत्वाग्निंसंपूज्य
विसृज्यविप्रान्रुद्रैकादशिन्यांत्रीनेकंवेतिसंभोज्यकर्मेश्वरार्पणंकुर्यादिति।पुत्रार्थमहा
रुद्रेविशेषंत्वनपत्यत्वहरेकर्मविपाकेवक्ष्यामः।इतरमंत्रप्रयोगाभाष्योक्ताभट्टभास्करो
क्ताश्चमहार्णवेज्ञेयाः।प्रचाराभावान्नोच्यंते॥ ॥इतिश्रीमन्नारायणभट्टसूनुरामकृ
ष्णभट्टात्मजकमलाकरभट्टकृतेशांतिरत्नेरुद्रविधानंसमाप्तम्॥ ॥अथवेदपारायणं॥
तत्रादौकलशस्थापनाक्रमोमहार्णवे।तीर्थेदेवालयेगेहेप्रशस्तेसुपरिष्कृते।कलशंसुदृढं
तत्रसुनिर्णिक्तंसुभूषितं।पुष्पपल्लवमालाभिश्चंदनैःकुसुमादिभिः।मृत्तिकायवसंमिश्रंवे

दिमध्येन्यसेत्ततः। पंचाशद्भिः कुशैः कार्यो ब्रह्मा पश्चान्मुखः स्थितः। स्थापितः स्थापितः कुंभे च
तुर्वक्त्रश्चतुर्मुखः। वत्सजान्वाकृतिर्वेद्यामुत्तराग्रैः कुशैः कृतं। ब्रह्मोपधाने दत्वा ततं ततः स्वस्त्ययनं
पठेत्। प्रतिष्ठां कारयेत्पश्चात्तज्ञाद्दृष्यमथोच्यते। यज्ञोपवीतनैवेद्यवस्त्रचंदनकुंकुमैः। स्रग्धूप
दीपतांबूलैरर्तैश्चापि पितामहं। ब्रह्मज्ञाननिमित्तवागायत्र्यावाप्रपूजयेत्। उपाध्यायश्च संपू
ज्य यथापाठं पठेत्ततः। ततो वक्ष्यमाणहोमादि कृत्वा पठेदित्यर्थः॥ तत्रैव बोधायनः॥ स्थंडिलं क
ल्पयित्वाग्निमुपसमाधाय संपरिस्तीर्याज्येनैताभ्यो जुहोत्यग्नये सोमाय विश्वेभ्यो देवेभ्यो
ब्रह्मणे ऋषिभ्यः ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै धारणायै श्रियै ह्रियै सावित्र्यै सवि
त्रे प्रजापतये कांडऋषये विश्वेभ्यो देवेभ्यः कांडऋषिभ्यः सांहितीभ्यो देवताभ्य उपनिषद्भ्यो वारु
णीभ्यो देवताभ्यः उपनिषद्भ्यो हव्यवाहाय विश्वेभ्यो देवेभ्य ः अनुमत्यै स्विष्टकृते च पृथक्स्वाहा

राम

कारेणकृत्वाव्याहृतिभिश्चकृत्वापुनःपरिषिंचतिसमासिंचेतायजुषातर्पयति।एवमृग्वेदस्यकांड
ऋष्यादिवर्जमास्विष्टकृतस्तेषांस्थानेशतर्चिभ्योमाध्यमेभ्योगृत्समदायविश्वामित्रायवामदे
वायअत्रयेभरद्वाजायजामदग्न्यायवसिष्ठायप्रगाथेभ्यःपावमानीभ्यःक्षुद्रसूक्तेभ्योमहासू
क्तेभ्योमहानाम्नीभ्यइति।ततोवेदादिमारभ्यसंततमधीयीतेत्याहभगवान्बोधायनः॥अथातः
पारायणविधिंव्याख्यास्यामःआसमाप्तेर्नाश्नीयाद्यथाशक्तिवापयःफलान्योदनंवाहविष्यमा
त्रमल्पंभुक्त्वातदशेषमधीयीतग्रामात्प्राचीमुदीचींवादिशमुपनिष्क्रम्याग्निमुपसमाधायप
रिस्तीर्येध्मंप्रस्तायाज्येनैताभ्योदेवताभ्योजुहोतिअग्नयेसोमायेंद्रायप्रजापतयेविश्वेभ्योदेवेभ्यो
ब्रह्मणेऋषिभ्योऋग्भ्योयजुर्भ्यःसामभ्यःश्रद्धायैमेधायैप्रज्ञायैधारणायैसदसस्पतयेनुमत
येश्रियैह्रियैसावित्र्यैसवित्रेप्रजापतयेसोमायकांडऋषयेविश्वेभ्योदेवेभ्यःकांडऋषिभ्यःसांहि

शांतिर०

परि० ३

तिकीभ्योदेवताभ्यः उपनिषद्भ्योयाज्ञिकीभ्योदेवताभ्युउपनिषद्भ्योवारुणीभ्योदेवताभ्यउपनि
षद्भ्योहव्यवाहायविश्वेभ्योवाहणेभ्योनुमत्यैस्विष्टकृतेचपृथक्स्वाहाकारेणकृत्वाव्याहृतिभि
श्चपुनःषिंचतिसमासेचैतायजुषातर्पयति॰ अंतेएताः अग्निसोमाद्याःयजुषायजुर्वेदेन
सहतर्प्पयित्वा।यद्वाभू देवांस्तर्पयामीत्यादियजुषातर्प यित्वाग्न्यादींस्तर्पयेदित्यर्थमाह॰
महार्णवः।एवमृग्वेदिनांकांडऋष्यादिस्विष्टकृतस्तर्पयांस्थानेशतर्चिभ्यइत्यादिमहानाम्नीभ्यइत्यं
तंआश्वला।ततोवेदादिमारभ्यसंततमधीयीत।नास्यांतरानध्यायो।नास्यांतराजननमरणेअशु
चिः।आशौचंनेहेत्यर्थः।नांतराव्यवहरेन्नविरमेद्यावदंतमधीयीत।यावत्पर्यंतंपठेत्तावन्मध्ये
नविरमेन्नान्यच्चवदेदित्यर्थः।यदंतराविरमेत्त्रीन्प्राणानायम्यप्रणवंवाप्रविधाययावत्काल
मधीयीत।ततःसर्वनिशांनिशांतरसंग्रामारण्यसलिलंलोप्यपरिदध्यात्।निशांतरंसंध्या।।२६९।।

राम

२९

निशादीन्लोध्य विहाय समापयेदित्यर्थः।आदावंते च ब्राह्मणभोजनं दक्षिणां च दद्यात्॥य
एतेन विधिनामधीयीत स ततः पूतो वेदो भवति। मनःशुद्धिश्च भवति। वेदरूपो भवतीत्यर्थः।
द्वाभ्यां पारायणाभ्यामग्निर्वा भोजनं इहाधीतेन तेभ्यः प्रमुच्यते। त्रिभिः पतनीयेभ्यः शूद्रापारे
तः सिक्ता गंगाप्सु निमज्जश्च भवति। चतुर्भ्यः शूद्रान्नभोजनात्स्त्रीसेवनाच्च पंचभिरयाज्यया
जनादग्राह्यसंग्रहात् षड्भिर्ब्राह्मणतत्क्रोलोहितकरणात्पशुहननात्सुवर्णस्तेयात्सप्तिसंयो
गाच्च सप्तभिः प्राजापत्यस्य हीनाचरणायज्ञोपवंधनाच्चाष्टभिश्चांद्रायणस्य गुरुतल्पगमना
द्रजस्वलागमनाच्च नवभिः सुरापानाद्दशभिरसोमपानादेकादशभिर्ब्राह्मणहननाद्द्वादशभिः
पुनर्जन्मेहज न्मकृतैः सर्वैः पापैः प्रमुच्यते स्वर्गलोकं गच्छति पितृन्स्वर्गलोकं गमयति अग्नि
ष्टोमादिक्रतुभिरिष्टं भवति। वेदाध्यायी सदैव स्यादपापो सत्यवाक् शुचिः।यं यं कामयते को

मीतं तं वेदेन साधयेत्। असाध्यं

नास्ति यत्किंचिद्ब्रह्मणो हि फलं महदिति॥ ॥ऋग्विधाने॥ आदावंते च सावित्र्या कर्म कुर्वीत शांतये। पुष्ट्ये पशुलाभाय धनलाभाय भूतये। एषा हि संहिता देवैः सर्वब्रह्ममयी निचृत्। उग्रेण तपसा दृष्टा विश्वामित्रेण धीमता। होमांश्च जपयज्ञांश्च नित्यं कुर्वीत चैतया। सर्वकामसमृद्ध्यर्थं परं ब्रह्मैतदमुच्यते। एषैव प्रतिलोमोक्ता पद्धः शत्रुविनाशिनी। अक्षरप्रतिलोमेषु मभिचारेषु शस्यते। सर्वसंहितायाः प्रत्यृचं होमश्चाज्येन तिलैर्वा। आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते इति आश्वलायनोक्तेः। सर्वपापहरो होमस्तिलैः सर्वत्र शस्यते इति विष्णुधर्मोत्तराच्च। शातातपः। रुद्रश्चेदव्युतं चैव वेदपारायणं तथा। तिलहोमसहस्रं च सममेतच्चतुष्टयं। इदं केवलं त्वेचांद्रमसं॥ ॥ राम

इति कमलाकरभट्टकृतो वेदपारायणं॥ ॥शौनकः॥ ॥जातवेदस ऋच्येतत्सूक्तं सर्वार्थसा॥२१०॥

धनं।आयुरारोग्यसुखदंभूमिदंशत्रुनाशनं।यद्यद्वांछतिधाविप्रस्तत्तदाप्नोत्यसंशयं।सूक्तेनाने
नजुहुयात्शुक्लांबरधरःशुचिः।जपेद्वानियतोमंत्रंहविष्याशीजितेंद्रियः।पशुपुत्रधनाद्यर्थीप्र
त्येकंलक्षमभ्यसेत्।कुंडेवास्थंडिलेवापिहोमंकुर्यादतंद्रितः।चतुरस्त्रंभवेत्कुंडंमेखलाद्यसंयु
तं।स्थंडिलाद्याज्यभागांतंयज्ञतंत्रंप्रकल्पयेत्।दुर्गामावाहयेत्कुंभेसायुधाष्टमहाभुजां।नीलो
त्पलदलश्यामांकिरीटाद्यैर्विभूषितां।ततश्चाराध्यतांदेवींतस्मिंस्तीर्थोदकान्विते।आवाहने
नहविषासमिद्भिश्चपृथक्पृथक्।मंत्रेणानेनजुहुयादष्टोत्तरशताहुतीः।ततःस्विष्टकृतंचैव
होमशेषंसमापयेत्।उत्थायायजपेन्मंत्रमेतंश्रद्धासमन्वितः॥ ॥ऋग्विधाने।जातवेदसइ
त्यादिसद्यःस्वस्त्ययनंजपेत्।दुर्गेपथिप्रयातस्यनतस्यारिभ्योभयंभवेत्।राजकार्येस्वप्नेवा
अभिशस्तोप्यनेकधा।अशक्येप्रतिमाकार्याभयेप्राणांतिकेपिवा।जातवेदसइत्येतांजपंस्ते

भ्यः प्रमुच्यते॥ सिसाधयिषुरर्थं च प्रस्थितो मनसा जपेत्॥ सिद्धार्थः स्वस्तिमानेति चौरैर्बाध्येत नाध्वनि॥ कृतार्थः स्वगृहानागच्छन्नेतामेव समभ्यसेत्॥ उदिते सवितर्येतां जपेदस्तंगते तथा॥ अहः स्वस्त्ययनं प्रातरात्रौ स्वस्त्ययनं निशि॥ व्युष्टायां च जपेन्नित्यमेतां दुःस्वप्ननाशिनीं॥ ॥इति जातवेदाकल्पः॥ ॥अथ त्वरितरुद्रः॥ ॥शिवपूजां विधाय संकल्प्य मूलेन प्राणानायम्य॥ अस्य त्वरितरुद्रमंत्रस्य आथर्वण ऋषिः॥ अनुष्टुप्छंदः॥ त्वरितरुद्रो देवता॥ नम इति बीजं॥ अस्त्विति शक्तिः॥ अथ मूलेन करशुद्धिं कृत्वा प्रणवं करतलयोर्न्यस्य षडंगं कुर्यात्॥ तद्यथा॥ ॐ यो रुद्रः अंगुष्ठाभ्यां नमः॥ ॐ अग्नौ तर्जनीभ्यां नमः॥ ॐ यो अप्सु मध्यमाभ्यां॰॥ ॐ य ओषधीषु अनामिकाभ्यां॰॥ ॐ यो रुद्रो विश्वा भुवनाविवेश कनिष्ठिकाभ्यां नमः॥ ॐ तस्मै रुद्राय नमो अस्तु करतलकरपृष्ठाभ्यां॰॥ एवं हृदयादिन्यासः॥ ॐ यो रुद्रो हृदयाय नमः॥ ॐ यो अग्नौ शिरसे स्वाहा॥ ॐ यो अ

राम

॥२७१॥

क्षः शिखायै वषट्। ॐ य ओषधीषु कवचाय हुं। ॐ यो रुद्रो विश्वा भुवना विवेश नेत्रत्रयाय वौषट्। ॐ तस्मै रुद्राय नमो अस्तु। अस्त्राय फट्। इत्यस्त्रेण दिग्बंधः॥ अथ पदन्यासः। ॐ यः पादाभ्यां नमः। रुद्रः जंघाभ्यां। अग्नौ जानुभ्यां। यः ऊरुभ्यां। अप्सु गुल्फाभ्यां। यः मेढ्राय। ओषधीषु नाभ्यै। यः उदराय। रुद्रः हृदयाय। विश्वा कंठाय। भुवना मुखाय। विवेश नासिकायै। तस्मै नेत्रत्रयाय। रुद्राय नमः ललाटाय। अस्तु शिरसे नमः॥ अथ ध्यानं॥ रुद्रं चतुर्भुजं देवं त्रिनेत्रं वरदाभयं। दधानमूर्ध्वहस्ताभ्यां शूलं डमरुमेव च। अंकसंस्थामुमां पद्मं दधानां च करद्वये। अधः करद्वये कुंभं मातुलिंगं च बिभ्रती॥ एवं ध्यात्वा देवं मूलमंत्रेणावाहनादिषोडशोपचारैरभ्यर्च्य नित्यमष्टोत्तरशतं जपेत्। एष ते रुद्रभाग इति मुद्रा॥ ॥ अथ होमविधिः॥ लिंगाभिमुख उपविश्य घृताहुती र्जुहुयात्। एवं कृत पुरश्चरणो भवति। घृताक्तैर्मुक्तिकामः। दूर्वाभिरायुष्यका

मः।कन्याकामोलाजैः।मधुपुष्पैर्वश्यकामः।अपामार्गैरर्थकामः।श्रीफलैर्लक्ष्मीकामः।सिद्धार्थैःपु
ष्टिकामः।खादिरैस्तेजस्कामः।औदुंबरैःपुत्रकामः।पलाशैःसर्वकामः।गुडूचीखंडैर्ज्वरनिवृत्तिर्भ
वति।उत्पलैर्दधिमधुघृतैरष्टसहस्रंजुहुयात्।यथेष्टाश्रीर्भवति।बिल्वपत्रैर्दधिमधुघृताक्तैःस
हस्रहोमाज्ज्वरंनाशयति।शाल्मलीसमिद्भिःशशरुधिराक्तैरष्टसहस्रंजुहुयाछत्रूणांसद्योमर
णंभवति।आर्द्रक्लिन्नवासाअर्काभिमुखःसहस्रंमासैकमात्रंजप्त्वायक्षराक्षसगंधर्वादीन्नाशम
यति।मासद्वयेनवेतालादीन्वशयति।मासेनब्रह्मादिदेवाःसमागच्छंति।सनरोविरूपाक्षोभूत
गणैःपरिवृतोमहादेवइत्याहभगवान्बोधायनः॥ ॥हेमाद्रौशांति कांडेभीष्मउवाच॥
अथत्वरितरुद्रस्यन्यासमुद्राःक्रमेणतु।जपहोमादिकंसर्वंकथ्यतेसर्वसिद्धये।यस्यकुक्षौजग राम
त्सर्वंस्थावरंजंगमंचयत्।दुःखच्छिदेनमस्तस्मैब्रह्मविष्णुशिवात्मने।छंदोनुष्टुबथर्वाचऋषिस्त्व॥२७२॥

रितसंज्ञके।देवतास्त्वरितोरुद्रोबीजंशक्तिनमोस्त्विति।देवागारेनदीतीरेसुचौदेशेथवाग्यतः।
उपविश्यनियम्यासन्संकल्प्यहृदिसंस्थितं।करयोस्तूभयोश्चैवमूलमंत्रेणविन्यसेत्।क्रमेणतु
षडंगानांन्यासःस्याद्धृदयादिभिः।न्यासमंत्रपदैःकुर्यात्संचभिर्हृदयादिकं।योरुद्रोग्नोहृदिन्यस्य
शीर्षिर्यो॥स्वितिविन्यसेत्।यःओषधीषुशिखायांयोरुद्रःकवचंन्यसेत्।विश्वाभुवनाविवेशे
तिनेत्रंवैसमुदाहृतं।तस्मैरुद्रायइत्यस्त्रंन्यासएवमुदाहृतः।अंगुल्यग्राणिमूलेनकृत्वांगुष्ठे
नपीडयेत्।सामुद्रास्तुसगात्रोक्ता।ततोध्यानंसमाचरेत्।एषतेरुद्रभागेतिलिंगमुद्राप्रदर्शनी।
श्रीकामःशीर्षिकुर्वीतितेजस्कामस्तुनेत्रयोः।मुखेत्वन्नाद्यकामस्तुग्रीवायांरोगनाशनं।हृदये
सुखकामस्तुनाभोज्ञानप्रदंभवेत्।प्रजाकामस्तुगुह्येवैपशुकामस्तुजंघयोः।जानुभ्यांग्राम
कामस्तुसर्वकामस्तुगुह्ययोः।वशीकरणकामस्तुवामबाहौप्रदर्शयेत्।पापक्षयेभिचारेवाप्या

घेरपगमेनतथा। बहिःशरीरात्कुर्वीत शिवस्याग्रेतु विन्यसेत्। चतुर्भुजंत्रिनेत्रंच शुद्धस्फटिकसंनिभं। अ
मृतेनचपूर्णौ द्वौकलशौहस्तयोर्द्वयोः। हस्तद्वयेन योगस्यकृतमुद्रं स्थिरासनं। सर्वकामप्रदंशांतं
शंकरंकल्याणकरं। उग्रकर्मणिचैवोग्रमूर्तिं ध्यायेदुमापतिं। द्विभुजंनगपाशांचशूलपाणिंजटाधरं।
एवंध्यात्वामहादेवंसमभ्यर्च्यासुभक्तितः। अधःशाय्येकभक्ताशीब्रह्मचारीहविष्यभुक्। अयुतं
द्विजपेत्सूर्वंप्रत्यहंपूजयेत् शिवं। जुहुयात्तद्दशांशेन तद्दशांशेन तर्पणं। मार्जनंतद्दशांशेन ततो
ब्राह्मणभोजनं। पुरश्चरणमेवंच कृत्वासंपूज्य शंकरं। जपेत्त्वरितरुद्रंतु सर्वकामफलप्रदं। श्री
कामः शांतिकामोवा जपेल्लक्षमतंद्रितः। बिल्वसमिद्भिः श्रीकामः शांतिकामः शमीमयैः। जुहु
याद्वाज्यसंमिश्रैस्तर्पणंमार्जनंतथा। एवंसर्वेषुकामेषु होमांतेजुहुयाद्धवेः। जुहुयात्लक्षंतुपुत्रार्थं राम
पायसंजुहुयात्ततः। वित्तार्थंश्रीफलैर्होमं आयुर्वृद्ध्यैचदूर्वया। तिलैरप्याज्यसंमिश्रैस्तेज ॥२७३॥

कामो घृतेनैव ।व्रीहिभिः पशुकामस्य राष्ट्रकामस्तु वैणवैः ।पायसैः सर्वकामेन होतव्यं शर्करान्वि-
तं ।मधक्तान्याश्वपर्णानि तीव्रज्वरविनाशने ।महाभूतज्वरे चैव गुडूचीभिर्हुनेद्ध्रुवं ।सर्वरोगवि-
नाशाय सूर्यस्याभिमुखं जपेत् ।अयुते द्वे जपेद्धोमः कार्योर्कसमिधैः शुभैः ।औदुंबरैरन्नकाम-
स्तेजःकामस्तु खादिरैः ।अपामार्गसमिद्धोमाद्भूतबाधा विनश्यति ।ग्रहबाधाविनाशाय जपेद-
श्वत्थसंनिधौ ।लवणासिततीक्ष्णाग्राः समिधोश्वत्थसंभवाः ।दध्यक्ताः समिधः शुष्काः स्वा-
हांतैर्मंत्रमुच्चरेत् ।दशार्पवाहुतीर्हुत्वा गछ्रा छेत्कदीरयेत् ।याबद्धोमं बलिर्दद्यः पुरुषाहारसंमि-
तः ।एवं कृते विमुच्येत पुमान्स्त्री वा महायहात् ।यजेतु मिच्छेत्पुरुषं तत्स्थानाभिमुखो जपेत् ।गुडू-
याश्चत्रपत्राणि सदुग्धैः क्षयमाप्नुयात् ।लाजाहोमेन कन्यार्थी कन्यां प्राप्नोति रूपिणीं ।लाजाश्च म-
धुसंयुक्ताः श्वेतपुष्पाणि वा पुनः ।हूयंते हरितेर्दरैस्तस्य विश्वं वशी भवेत् ।वामांगमुक्तं तं हुत्वा स्त्री

वशिष्ठेविचक्षणः॥हस्तात्रधामात्यथांत्यर्थंतिलैश्चाज्येनसंयुतैः॥होमस्थानेतुसंस्थाप्यकुंभमेकंजला
न्वितं।मंत्रयित्वाष्टसाहस्रंक्षतशस्त्वंतु निक्षिपेत्॥अभिषेकश्चतेस्तेषांशाखाप्रोक्तैःप्रदक्षिणं॥ग
ह्यामादिशांतिश्चसर्वैःकार्यातुपूर्ववत्॥वास्तुपूजाचकर्त्तव्याएकाशीतिपदैःशुभैः॥ईशानायबलिः
कार्योभूतानांपतयेतथा॥एवंकृतेपश्चनीचप्रजानांशांतिमाप्नुयात्॥अद्भुतेषुचसर्वेषुनिशायांग्रा
मबाह्यतः॥उपविश्यजपेद्रुद्रंवरितंबलिभिःसह॥होमःपालाशसमिधैःकर्त्तव्योघृतसंयुतैः॥ईशा
नायबलिःकार्योयस्यांदिशित दद्भुतं॥तदाशापतयेतद्वत्पशूनांपतयेतथा॥वृद्धिकामोजपेल्लक्षं
तिलैर्होमोघृतान्वितैः॥बलिःपूजाप्रकर्त्तव्याशिवस्यवरुणस्यच॥सर्वकामेषुचैवार्यत्वरितस्यजपो
भवेत्॥अयुतद्वयमल्पेतुयावल्लक्षंतुनोधिकम्॥एवंकृतेतुसिद्धिःस्यान्निष्कामःप्राप्नुयाच्छिवं॥ऐ राम
हिकामुष्मिकान्सर्वान्भुक्त्वासायुज्य मान्पुयात्॥इतिहेमाद्रौशांतिकांडेगंगासुतप्रोक्तस्तव ॥२७४॥

रितरुद्रविधिः॥ ॥अथस्वप्नाः॥तत्रैदेवज्ञादीन्देवंचसंपूज्येत्युक्त्वाद्भुतसागरेपराशरः॥अभ्यर्च्य
मंत्रैस्तुपुरोहितस्तुसंयम्यतस्यांभुविसंयतायां।ब्राह्मीशापूर्वापरभागेपुष्पैःकृत्वोपधानंशिरसक्षि
तीशः॥तयेकुशुर्दक्षिणपार्श्वशायीस्वप्नंपरीक्षेतयथोपदेशं।नमःशंभोस्त्रिनेत्रायरुद्रायवरदायच।
वामनायविरूपायस्वप्नाधिपतयेनमः।भगवन्देवदेवेशशूलभृद्वृषवाहन।इष्टानिष्टेममाचक्ष्व
स्वप्नेसुप्तस्यशाश्वत।एकवस्त्रेकुशास्तीर्णेसुप्तःप्रयतमानसः।निशांतेपश्यतेस्वप्नंशुभंवायदिवा
शुभं।शुभस्वप्नानाशावहद्यात्रायांविरहः॥शैलप्रासादनागाश्ववृषभारोहणंहितं।चंद्रतारार्क

९ ग्रसैनंपरिमार्गणमेवच।भूम्यंबुधानीयसनंशत्रूणांचवधक्रिया।जयोविवादद्यूतेषुसंग्रामेच
तथाजयः।भक्षणंचैवमांसानांमत्स्यानांपयसांतथा।दर्शनंरुधिरस्यापिस्नानंवारुधिरेणच।
सुरारुधिरमद्यानांपानंक्षीरस्यपायसः।आंत्रेणवेष्टितंभूमौनिर्मलंगगनंतथा।सुखेनदोहनं

शांति·

शस्तं महिषीणां तथा गवी। सिंहानां हस्तिनीं चैव वडवानां तथैव च। प्रसादो देवविप्रेभ्यो गुरुभ्यश्च
तथा शुभः। अंभसा त्वभिषेकश्च ज्ञेयं राज्यप्रदं हि तत्। राज्याभिषेकश्च तथा छेदनं शिरसोपि च। मर
णं वह्निलाभश्च वह्निदाहो गृहादिषु। तथोदकानां तरणं तथा विषमलंघनं। हस्तिनीवडवानां च ग
वां च प्रसवो गृहे। आरोहणं गजेंद्राणां रोदनं च तथा शुभं। परस्त्रीणां तथा लाभस्तथा लिंगनमेव
च। निगडैर्बंधनं धन्यं तथा विष्ठानुलेपनं। बीजानां भूमिपालानां सुहृदामपि दर्शनं। शुभान्येतानि
प्रोक्तानि राज्यलाभकराणि च॥ ॥अद्भुतसागरे पराशरः॥ बद्धो वा निगडैर्ग्रसेच्चंद्रदहनं ताराशितौ ॥शां नं ४
बाजुना छत्रं च छिद्रं सिंहाधिरोहणं गवि धिग्द्विधोपि च ब्राह्मणः। दिनकरशशिताराभक्षणस्पर्शनानि
विशरणमपि मूर्ध्नः सर्षपं च त्रिधा वा। वृषसगहनरं ध्वेतसिंहाधिरोहाग्रसनमुदधिभूम्योर्भू
मि राज्यप्रदानि। विपुलरणविमर्दे भूतवाद्ये जयश्च पशुमगमनुज्ञानां लब्धिरध्यासनं वा। विडशा ॥२७५॥ राम

नपरिलेपोऽगम्यनारीगमो वास्वमरणशिखिलाभः सस्यसंदर्शनं च। सितसुरभिमनोज्ञालेप
माल्यांबराणां द्विजसुरगुरुराज्ञां दर्शनान्याशिषश्च। मणिरजतसुवर्णं भोजपात्रेषु भुंक्ते घृतदधिप
रमान्नं सर्वमेतच्छुभं च॥ ॥बृहस्पतिसंहितायां॥ यस्तु श्वेतेन सर्पेन दंशितो दक्षिणे भुजे। सहस्रलाभ
मस्तस्य स्यात् पूर्णे तु दशमे दिने॥ उरगो वृश्चिको वापि जलूका दंशिते यदि। विजयं चार्थसिद्धिं च पुत्रं त
स्य विनिर्दिशेत्। बलाकां कुक्कुटीं क्रौंचीं लब्ध्वा यः प्रतिबुध्यते। को शंतां लभते भूमिं भार्यां च प्रिय
वादिनीं। रुधिरं पिबति स्वप्ने सुरां वा पिबति क्वचित्। ब्राह्मणो लभते विद्यामितरस्तु धनं लभेत्॥
क्षीरं पिबति यः स्वप्ने व्यसनं मे हननं कृतं। सोमपानं भवेत्तस्य धनं वा बहुधा दिशेत्। दधिलाभे धनं तु स्या
द्घृतलाभे ध्रुवं यशः। घृतप्राशे महान्क्लेशो यशस्तु दधिभक्षणे। गोधूमे वीयवे वा पिलाभः सिद्धा
र्थवस्तुषु। पुष्पे प्राप्ते धनं विद्यात् फले वृद्धिरनुत्तमा। आसने शयने याने शरीरे वाहने तथा॥ ॥

वराहः॥वृश्चिकादिदंशनमणिरत्नकांचनशाकुंडलेदीपकिशोराः॥वत्सहंसशारंगद्योरर्भकलाभः पुत्रलाभाय॥विष्णुधर्मे॥एकस्यांयदिवारात्रौशुभंवायदिवाशुभं॥पश्चाद्दृष्टस्तथातत्रतस्यपाकंविनिर्दिशेत्॥ ॥अथदुःस्वप्नाः॥अद्भुतसागरेदेवलः॥रक्तगंधांबरस्रग्वीगच्छेद्यादक्षिणामुखः॥खरोष्ट्रमहिषारोहेत्रिमासान्नहिजीवति॥श्वभ्रेयोनिपतेत्स्वप्नेद्वारंवास्यापिधीयते॥नचोत्तिष्ठतियस्तस्मात्तदंतंतस्यजीवितं॥मार्कंडेयः॥वांत्यांमूत्रंपुरीषंतुसुवर्णंरजतंतथा॥प्रत्यक्षमथवास्वप्नेजीवेतदशमासिकं॥केशांगारंतथाभस्मउरगंनिर्जलांनदीं॥दृष्ट्वास्वप्नेदशाहात्तुमृत्युरेकादशेदिने॥करालैर्विकटैःकृष्णैःपुरुषैरुद्यतायुधैः॥पाषाणैस्ताड्यतेस्वप्नेसद्योमृत्युर्भवेन्नरः॥रक्तकृष्णांबरधरागायतिचहसंतिच॥दक्षिणांशांनयेन्नारीस्वप्नेसोपिनजीवति॥वराहः॥हरिणारोहेभ्रमणे मृत्युर्नचिरेणसूकरारोहे॥उष्ट्रारोहेव्याधिर्वृद्धिःस्यात्कुंजरारोहे॥मात्स्ये॥विष्णुधर्मेच॥मलिनांब॥२७६॥ राम

रधारित्वमभ्यंगः पंचदिग्धता। उच्चात्प्रपतनंचैवदोलारोहणमेवच। शक्रध्वजस्यपतनंपतनं
शशिसूर्ययोः। द्वेषवृद्धिर्ज्ञातिभूपानां प्रजानांक्रोधएवच। आलिंगनंकुमारीणांवि
धवानांचमैथुनं। हानिश्चैवस्वगात्राणांवीरकंठेनमःप्रिया। दक्षिणाभिगमनंव्याधिभूर्वस्तथा। नाभि २
फलापहारश्चतथाशष्कुलानांविशोधनं। गृहाणांचैवभंगश्चगृहसंमार्जनंतथा। क्रीडापिशाच
क्रव्यादवानराश्वतरैरपि। काषायवस्त्रधारित्वंतद्वत्क्रीडनकंतथा। तैलपानावगाहोचरक्तमा
ल्यानुलेपनं। एवमादीनिचान्यानिदुःस्वप्नानिविनिर्दिशेत्। पराशरः। कायस्यालेपनंवाकलुष
जलमशीगोमयस्नेहपंकैर्दृकूडिक्वादंतवाळूप्रपतनमथवानर्थकोशप्रदानि। लैंगे। मुक्तकेशेग
हसंश्चैवगायतेनृत्यतेनरः। याम्यांदिशमितोगच्छेत्तदंतंतस्यजीवितं। अन्येषुयोगर्भीष्मद्रोण
कर्णपुहुकांडदेभारतरामायणश्रेष्ठेयाः। [illegible]मात्स्येविष्णुधर्मे। स्वप्नस्तुप्रथमेयामेसंवत्सरफलो

भवेत्॥ षड्भिर्मासैर्द्वितीये न त्रिभिर्यामैस्त्रिमासकः॥ चतुर्थे मासमात्रेण फलं भवति नान्यथा॥ पराशरः॥ पादद्विपादोत्तरपादवध्या वर्षार्धमासत्रयमासकालाः॥ निशाविभागेषु चतुर्षु दृष्टाः स्वप्ना अनिष्टेष्टफलप्रदाः स्युः॥ वराहः॥ आद्ये वर्षाद्वत्सरार्धाद्द्वितीये पाको वत्सरार्धार्धभागे तृतीये मासात्साकः पश्चिमे तीति भवेत्तत्तलः॥ ऐतरेयोपनिषदि॥ अथ स्वप्नः पुरुषं कृष्णं दंतं पश्यति स एनं हंति वराह एनं हंति मार्कंडमेनमास्कंदत्याशु वायुरेनं प्रवहति सुवर्णं खादित्वापगिरति मधश्नाति बिसानि भक्षयत्येकपुंडरीकं धारयति खरैर्वराहैर्युक्तैर्याति कृष्णां धेनुं कृष्णवत्सां नलदमाली दक्षिणामुखो व्राजयति सं पद्येतेषां किंचित्पश्येदुपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्री सूक्तेन प्रत्यृचं कृत्वान्येनान्नेन ब्राह्मणान्भोजयित्वा चरुं स्वयं प्राश्नीयादिति॥ अत्र लक्षहोमः कार्यः॥ दुःस्वप्नाद्भुतदर्शने द्युतिपूर्वोक्तेः॥ तथा चंडीपाठोपि॥ शांतिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने॥ ग्रहपीडासु

राम

॥२७७॥

वोग्यास्तुमाहात्म्यं शृणुयान्मम दुःस्वप्नं वनभिर्दृष्टं सुस्वप्नमुपजायते इत्यादि मार्कंडेयपुराणा
त् । पराशरः । देवद्विजाग्निप्रतिपूजनानि मंत्रोपवासादि च विप्रसेवा । तिलान्नगोभूमिहिरण्यदा
नं दुःस्वप्नहंतॄणि पयश्च गौरी । तिला नाम घृतं तत्र जुहुयात्तु समाहितः । तिसीलो तिच मंत्रेण धे
नुं दद्याच्च दक्षिणां । ब्राह्मणांस्तर्पयेत्तत्र दक्षिणाभोजनादिना । दानं च विविधं देयमस्वप्नानां वि
नाशनं । षड्भिर्मासैस्तु संपूर्णैरन्यथा विफलं भवेत् । स्तुतिश्च वासुदेवस्य तथा तस्य च पूजनं । ग
जेंद्रमोक्षश्रवणं ज्ञेयं दुःस्वप्ननाशनं । स्तुतिः हृष्ट सहस्रपाठः । पुण्यो दुःस्वप्ननाशन इत्युक्तेः । प्रयो
गपारिजाते शौनकः । स्वप्नोत्पातेषु चैतेषु कालरात्र्यधिदेवता । पूजाविधानं पूर्वोक्तं कुर्यात्स्त्रापिय
त्नतः । होमं कुर्यात्प्रयत्नेन रात्रावेव द्विजोत्तमः । प्रत्यृचं पायसं हुत्वा रात्री व्यख्यादिति क्रमात् । अ
ष्टोत्तरशतं हुत्वा सूक्तेनानेन यत्नतः । सूक्तेनोक्ते प्रत्यृचं होमः । प्रत्यृचं हुत्वेति श्रुतेः । स्वप्नाधि ना ।

पतिर्मंत्रेणकूनेदृष्टोत्तरंशतं॥ कालरात्रिर्मंत्रेणेत्यर्थः॥ गुरवेदक्षिणांदद्याद्धस्तहेमपञ्जनपायसु
क्रदक्षिणादानेप्यशक्तोहोमकर्मणि॥ हिरण्यंदक्षिणांदद्यात्तदानीमेववाबुधः॥ वस्त्रकुंभादिस
कलंतद्धोत्रेप्रतिपादयेत्॥ सएव॥ यथानिष्टफलंस्वप्नंपश्येत्तस्यो च्यतेविधिः॥ अद्या
नोदेवसवितरित्यृचापूर्वमेकया॥ ततःपरंपरंयच्चगोषुदुःस्वप्नपंचभिः॥ ऋग्भिःपरंततो
यामेराजन्पूज्यइतित्यृचा॥ ऋग्भिःसर्वाभिरेताभिरुपतिष्ठेत्तुभास्करं॥ एवंकृतेतुदुःस्वप्न
दर्शनेनिष्फलंभवेत्॥ अथस्वप्नंस्येतिजपन्प्रातःप्रातर्दिनेदुःस्वप्नंनुदते कृत्स्नंनतस्माद्धि
तेभयं॥ अत्रश्राद्धमपिकार्यं॥ श्राद्धार्हद्रव्यसंपत्तौतथादुःस्वप्नदर्शने॥ जन्मर्क्षेग्रहपी
पीडासुश्राद्धंकुर्वीतचेछ्छयेतिपथ्वीचंद्रोदयमार्कंडेयपुराणात्॥ एतदस्माभिर्निर्णयसिं ॥ राम
धावुक्तम्॥ ॥छ॥ ॥इतिकमलाकरभट्टकृतेशांतिरत्नेदुःस्वप्नशांतिः॥ ॥छ॥ ॥२७८॥

॥ ॥अथवास्तुशांतिः॥ ॥तत्कालोस्माभिर्निर्णीयतेधाउवसिः॥कश्चित्तदुच्यते॥ ॥नारदः॥ ॥
सौम्यफाल्गुनवैशाखमाघश्रावणकार्त्तिकाः॥मासाःस्युर्गृहनिर्माणेपुत्रारोग्यधनप्रदाः॥बादरा
यणः॥वैशाखेफाल्गुनेपौषेश्रावणेमार्गशीर्षके।सूत्रारंभःशिलान्यासस्तंभारंभःप्रशस्यते॥दै
वज्ञवल्लभः॥कोशोधान्यंपंचतांनिःपशुत्वंस्वाप्तिर्नैस्वंसंगरंभृत्यनाशौ।स्वंश्रीप्राप्तिंवह्निभीतिं
चलक्ष्मींकुर्युश्चैत्राद्यागृहारंभकाले॥रत्नधान्यमितिकालादर्शपाठः॥मात्स्येतु॥आषाढेभृत्य
रत्नानिपशुवर्गमवाप्नुयात्।मार्गशीर्षेतथाधान्यंपौषेतस्करतोभयमित्याषाढःशुभः पौष
श्चाशुभउक्तः रत्नमालायां।कर्क्यनक्रहरिकुंभगतेर्केपूर्वपश्चिममुखानिगृहाणि।तौलिमे
षवृषवृश्चिकयातेदक्षिणोत्तरमुखानिवदंति।गर्गः॥ध्रुवोत्तरामृगरोहिण्यांपुष्येमैत्रेकरत्रये।
धनिष्ठाद्वितयेपौष्णेगृहारंभःप्रशस्यते।मात्स्ये॥अंत्यभौमवर्जंतुसर्वेवाराःशुभावहाः। [illegible]

चंद्रादित्यबलैर्लब्धा लग्ने शुभनिरीक्षिते। स्तंभोच्छ्रायादिकर्त्तव्यमन्यत्र परिवर्जयेत्॥ प्रासादेष्वेव
मेव स्यात् कूप वापीषु चैव हि॥ भूपरीक्षोक्ता तत्रैव। अरत्निमात्रे गर्त्ते च स्वनुलिप्ते तु सर्वतः। घृतमा
नशरावस्थं कृत्वा वर्त्तिचतुष्टयं। ज्वालयेद्भूपरीक्षार्थं पूर्णं तत्सर्वदिङ्मुखं। दीप्तौ पूर्णादिगं स्त्रीया
द्वर्णानामानुपूर्वशः॥ अरत्निमात्रं गर्त्तं तु कृत्वा तत्रवातपूरणे। अधिके श्रियमाप्नोति न्यूने हानिः
समे समं। फालकृष्टे थवा देशे सर्वबीजानि वापयेत्। त्रिपंच सप्तरात्रेण यत्र रोहंति तान्येपि॥
ज्येष्ठोत्तमकनिष्ठा भूर्वर्ज्जनीयेतरा मता॥ वराहः॥ दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्
प्रथमां। शेषाः प्रदक्षिणेन स्तंभाः समुत्थाप्याः॥ रुद्रः॥ स्नानं च पाकं शयनं चे सोज्यं गजालयं
वाजिगृहं धनस्य। देवस्य पूजादि दिशिक्रमेण मध्ये सभा भूपनिवेशनाय॥ आश्वलायनसू
त्रे। यत्रापः सर्वतो मध्ये समेत्य च प्रदक्षिणं। शायनीयं परीत्य प्राच्यः स्यंदेरन्तत्सर्वसमृद्धं॥ ॥२७४॥

श्रीवं॰२

राम

वसिष्ठः॥ स्वगृहात्पश्चिमे भागे पितृस्वाग्रजमंदिरं॥ गर्गः॥ परकोणैः परद्वारैः परस्तंभैः परद्रुमैः।
कूपरक्षादिभिश्चैव हतं गेहं निरर्थकं॥ नारदः॥ प्रवेशो मध्यमो ज्ञेयः सौम्यकार्त्तिकमासयोः॥ मा
घफाल्गुनवैशाखज्येष्ठमासेषु शोभनः॥ रत्नकोशे॥ पुष्ये धनिष्ठामृदुवारुणेषु स्वातीयं भुवक्षेत्रि
षु चोत्तरासु॥ अक्षीणचंद्रे शुभसेन पुस्यरिक्तावरिक्ते च गृहप्रवेशः॥ वसिष्ठः॥ कृत्वाथ शुक्लं प्र
ष्ठतो वामतोर्कं विप्रान् पूज्यानग्रतः पूर्णकुंभं। रम्यं हर्म्यं तोरणस्रग्वितानैः स्त्रीभिः स्रग्वी गीत
वाद्यैर्विशेच्च॥ लग्नात्सागंदितो दिक्षु द्वौ द्वौ राशीन्निवेशयेत्॥ एकमेकं न्यसेत्कोणे वामं शुक्रं
विचिंतयेत्॥ नारदः॥ अकपाटमनाच्छन्नमदत्तबलिभोजनं॥ गृहं न प्रविशेद्धीमानापदामाकरो
हि तत्॥ मसेष्टिकौ स्वर्णरत्नधान्यशैवलसंयुतौ॥ गृहमध्ये हस्तमात्रगर्त्ते वास्तुं च विन्यसेत्॥
हेमाद्रौ मात्स्ये॥ एकाशीतिपदं कृत्वा रेणुभिः कनकेन तु॥ पश्चात्पिष्टेनानुलिप्य सूत्रेणालोच्य

शांति

सर्वतः।दशापूर्वायतारेखादशाचैवोत्तरायताः।सर्ववास्तुविभागेषुविज्ञेयानवकानवा।ए
काशीतिपदंकृत्वावास्तुवित्सर्ववास्तुषु।पदस्थान्पूजयेद्देवान्चत्वारिंशच्चपंचच।द्वात्रिंशद्बा
ह्यतस्तेषुपूज्याश्चांतस्त्रयोदश।मध्येनवपदोब्रह्माचत्वारस्त्रिपदाःस्मृताः।विंशतिर्द्वेकप
दिकास्तावंतोद्विपदाःस्मृताः।नामतस्तान्प्रवक्ष्यामिस्थानानिचनिबोधत।ईशानकोणा
दिषुसुरान्पूजयेत्क्रमशोनव।शिखीचैवाथपर्जन्योजयंतःकुलिशायुधः।सूर्यसत्योभृशश्चै
वआकाशोवायुरेवच।पूषाचवितथश्चैवगृहक्षतयमावुभौ।गंधर्वोभृंगराजश्चमृगःपि
तृगणास्तथा।दौवारिकोथसुग्रीवःपुष्पदंतोजलाधिपः।असुरःशोषपापौचरोगोहिर्मुख्य
एवच।भल्लाटःसोमसर्पौचअदितिश्चदितिस्तथा।बहिर्द्वात्रिंशदेतेतुतदंतश्चतुरःशृणु।ईशा राम
नादिचतुष्कोणसंस्थितान्पूजयेद्बुधः।आपश्चैवाथसावित्रोजयोरुद्रस्तथैवच।मध्येनवपदो॥२९०॥

ब्रह्मातस्मादष्टौसमीपगाः।अर्यमासविताचैवविवस्वान्विबुधाधिपः।मित्रोथराजयक्ष्माच
तथापृथ्वीधरःस्मृतः।अष्टमश्चापवत्सस्तुपरितोब्रह्मणःस्मृताः।आपश्चैवापवत्सश्चप
र्जन्योग्निर्दितिस्तथा।पद्दिकानांतुवर्गोयमेवंकोणेष्वशेषतः।तन्मध्येतुबहिर्विंशद्द्विपदास्ते
तुसर्वतः।अर्यमाचविवस्वांश्चमित्रःपृथ्वीधरस्तथा।ब्रह्मणःपरितोदिक्षुत्रिपदास्तेतुसर्वतः।
शीर्षेशिखीसमादिष्टोमुखेचापःसमाश्रिताः।पृथ्वीधरोर्यमाचैवस्तनदेशेलुधिष्ठितौ।वक्ष
स्थलेचापवत्सःपूजनीयःप्रयत्नतः।नेत्रयोर्दितिपर्जन्यौत्रोदितिजयंतकौ।सर्पेंद्रावंससंस्थौ श्रो ८
तुपूजनीयौप्रयत्नतः।सत्यरोगादयस्तद्वद्बाह्वोःपंचचपंचच।रुद्रश्चराजयक्ष्माचवामहस्ते
समोस्थितौ।सावित्रःसवितातद्वद्धस्तंदक्षिणमाश्रितौ।विवस्वानथमित्रश्चजठरेसर्वतस्थि
तौ।पूषाचपापयक्ष्माचहस्तयोर्मणिबंधने।तथैवासुरशोषौचवामपार्श्वेसमास्थितौ।

पार्श्वेतु दक्षिणे तद्वदितयः सगृहक्षतः। उर्वोर्यमांबुपौ ज्ञेयौ जान्वोर्गंधर्वपुष्पकौ। जंघयोर्भृ
ग सुग्रीवौ स्फिक्स्थौ दौवारिकोमृगः। जयशक्रौ तथा मेढ्रे पादयोः पितरस्तथा। मध्ये नवपदो
ब्रह्मा हृदये स तु पूज्यते। चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः। ब्रह्मा चतुष्पदस्तत्र कोणे
षु कपदास्तथा। बहिःकोष्ठेषु चाष्टौ तु सार्धाश्चोभयसंस्थिताः। विंशतिर्द्विपदाश्चैव चतुःषष्टि
पदे स्मृताः। पूजामाह नारदः। वास्तुमंत्रेण वास्तुज्ञो दूर्वादध्यक्षतादिभिः। मात्स्ये। होमस्त्रि
मेखलः कार्यः कुंडे हस्तप्रमाणके। यवैः कृष्णतिलैश्चैव समिद्भिः क्षीरवृक्षजैः। पालाशैः खादि
रैश्चापामार्गोदुंबरसंभवैः। कुशदूर्वाभिर्वैर्वापि मधुसर्पिःसमन्वितैः। कार्यस्तु पंचभिर्बिल्वै
र्बिल्वबीजैरथापि वा। होमांते भक्ष्यभोज्यैस्तु वास्तुदेवो बलिं हरेत्। तद्विशेषेण नैवेद्यमिदं द
द्यात् क्रमेण तु। ईशकोणे घृताक्तानं शिखिने विनिवेदयेत्। ओदनं सोत्पलं दद्यात्पर्जन्याय घृ

तान्वितं। जयंताय ध्वजं पीतं पैष्टं कूर्मं च संत्यजेत्। इंद्राय पंचरत्नानि पैष्टं च कुलिशं तथा। वि
तानकं च सूर्याय पूपं सक्तुं तथैव च। सत्याय घृतगोधूमं मत्स्यान्दद्याद्भृशाय च। शष्कुलीं चांत
रिक्षाय दद्यात्सक्तूंश्च वायवे। लाजाः पूष्णे षुरा तव्याः वितथे चणकौदनं। गृहक्षताय मध्वन्नं यमा
य पिशितौदनं। गंधौदनं च गंधर्वे भृंगे मेषस्य जिह्विकां। मृगाय यावकं दद्यात् पितृभ्यः कृसरं तथा।
दौवारिके दंतकाष्ठं पैष्टं गृहबलिं तथा। सुग्रीवे पूपकान्दद्यात् पुष्पदंताय पायसं। कुशस्तंबेन
संयुक्तं तथा पद्मं च वारुणे। पिष्टं हिरण्मयं दद्यादसुराय सुरामतः। घृतौदनं च शोषाय गो
धूमं वै पापयक्ष्मणे। घृतलड्डुकां स्तु रोगाय नागे पुष्पफलान्वितं। भक्ष्यं मुख्याय दातव्यं मुद्गौ
दनमतः परं। भल्लाटस्य छानकं दद्यात् सोमाय मधुपायसं। सर्पाय शालिजं पिष्टं अदित्यै पोलि
कास्तथा। दितेस्तु पूरिकां दद्यादित्येवं बाह्यतो बलिः। क्षीरं आपाय दातव्यमापवत्साय वैद

धिासे विश्वेलङ्डुकान्दद्यात्समरीचंकुशोदकं।सोवित्रेगुडपूपांश्चअयायघृतचंदनं।क्षिवस्वतेपु
नर्दद्याद्भक्तंचंदनेनपायसं।हरितालोदनंदद्यादिंद्रायघृतसंयुतं।गुडौदनंतुमित्रायरुद्रायघृत
पायसं।आमंपक्वंतथामांसंदेयंस्याद्राजयक्ष्मणे।पृथ्वीधरायमांसानिकूष्मांडानिचदापयेत्‌।
शर्करापायसंदद्यादर्यम्णेपानमेवच।पंचगव्यंयवाब्राह्मेतिलाक्षतहविश्चरुं।भक्ष्यंभोज्यंच
विविधंब्रह्मणेविनिवेदयेत्।सर्वेषांकांचनंदद्याद्बह्मणेगांपयस्विनीं।मांसोदनंघृतंपद्मकेस
रंहविषाचितं।ईशानभागमाश्रित्यचरक्यैविनिवेदयेत्।मांसोदनंसरुधिरंहरिद्रोदनमेवच।
आग्नेयींदिशमाश्रित्यविदार्यैविनिवेदयेत्।दध्योदनंसरुधिरंमत्स्यखंडैश्चसंयुतं।पीतर
क्तबलिंदद्यात्पूतनायास्तुदृष्टितं।वायव्येपापराक्षस्यैमत्स्यमांसंसुरासवं।पायसंवापिदातव्यं
स्वनाम्नासर्वतःक्रमात्‌।नमस्कारानुयुक्तेनप्रणवाद्येनसर्वतः।ततःसर्वौषधिस्नानंयजमान।।२९७।।

राम प॰

स्यकारयेत्। द्विजांस्तु पूजयेद्भक्त्या पे चान्ये गृहमागताः। एतद्वास्तूपशमनं कृत्वा कर्म समाचरेत्।
प्रासादभवनोद्यानप्रारंभे परिवर्त्तते। जीर्णोद्धारे तथोत्थाने तथा गृहनिवेशने। द्वाराभिवर्त्तने तद्व
त्प्रासादपरिवर्त्तने। पुरवेश्मप्रवेशे च सर्वदोषोपशांतये। वास्तूपशमनं कुर्यात्प्रतिसंवत्सरं बुधः।
गृहे वायतने कुर्यान्न स दुःखमवाप्नुयात्। तत्रैव॥ गृह्योक्तहोमविधिना बलिकर्म कुर्यात् प्रासाद
वास्तुशमने च विधिर्य उक्तः। गृह्योक्तशांते रस्याश्च समुच्चय इत्यर्थः। संतर्पयेद्द्विजवरानथ भक्ष्य
भोज्यैः शुक्लांबरः स्वभवनं प्रविशेत्स्वरूपं। कृत्वाग्रतो द्विजवरानथ पूर्णकुंभं दध्यक्षता म्रद
लपुष्पफलोपशोभनं। दत्वा हिरण्यवसनानि तथा द्विजेभ्यो मांगल्यशांतिनिलयः स्वगृहं विशेच्च।
आश्वलायनः। वीजवतो गृहान्प्रपद्येत। वसिष्ठसंहितायामप्येवमेव शांतिरुक्ता किंचिद्विशेषयुक्ता॥
तत्रैव। वास्तुपूजामकृत्वा यः प्रविशेन्नवमंदिरं। रोगान्नानाविधान्क्लेशान् अश्नुते सर्वसंकरान्॥ ११

श॰ति॰

इतिवास्तुशांतिः॥ ~ ॥अथास्मत्पितृकृतोवास्तुशांतिप्रयोगः॥ ॥प्रागुक्तगृहप्रवेशदिनात्स
र्वेशुभेपूर्वाह्णेसस्त्रीकःशुचिःप्राङ्मुखःप्राणानायम्यदेशकालौस्मृत्वागृहारंभादौअस्यवास्तोः
शुभतासिध्यर्थंसग्रहमखांवास्तुशांतिंकरिष्यइतिसंकल्प्यतदंगत्वेनगणेशपूजनपुण्या
हवाचननांदीश्राद्धादीनिकरिष्यइतिसंकल्प्यतानिकृत्वाचार्यादीन्वृत्वालंकारवस्त्रादिभिःप्र
कर्म५ पूजयेत्॥ततऋत्विजश्चत्वारः॥ततआचार्यःकरिष्यइतिसंकल्प्यसर्षपान्विकिरेदेभिर्मंत्रैः॥
यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा॥स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु॥अपक्रामंतु
भूतानिपिशाचाःसर्वतोदिशं॥सर्वेषामविरोधेनब्रह्मकर्मसमारभे॥भूतप्रेतपिशाचाद्या
अपक्रामंतुराक्षसाः॥स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमिभुवंत्विमामिति॥ततोगायत्र्यागो राम
मूत्रंगंधद्वारेतिगोमयमाप्यायस्वेतिक्षीरंदधिक्राव्णइतिदधिघृतंमिमिक्षइतिघृतं॥आ॥ ॥२८३॥

५२

पोहिष्ठेतिकुशोदकंचैकत्रास्यप्राग्वेनालोड्यकुशैःभुवीवोहव्येतितच्चेनसर्वंगृहादिप्रो
क्षेत्।ततोगृहादौयजमानेकहस्तमितंचतुरस्रंसयोनित्रिमेखलंकुंडंचतुरंगुलोत्सेधंस्थं
डिलंवाविधायतत्सर्वतश्चतुरंगुलोन्नतंहस्तमितंवेदिद्वयंविधायतत्तरवेदौईशान्यादिको
णचतुष्केचतुरःशंकून्।ॐविशंतुभूतलेनागालोकपालाश्चसर्वतः।अस्मिन्गृहेवतिष्ठंतुआ
युर्बलकराःसदेतिमंत्रेणरोपयेत्।प्रतिरोपणंमंत्रावृत्तिरेवमग्रेपि।प्रासादेतुगृहपदे
तत्तन्नामोहनीयं।एवंप्रासादेपीतिसर्वत्रातिदेशात्।ततोरोपणक्रमेणशंकुपार्श्वेमाष
भक्तबलीन्।ॐअग्निभ्योप्यथसर्पेभ्योयेचान्येतत्समाश्रिताः।तेभ्योबलिंप्रयच्छामिपुण्य
मोदनमुत्तमम्इतिदद्यात्।ततोवेधकपरिवस्त्रेकुंकुमादिनासुवर्णरजतादिशलाकयाशं
तायशोवतीकांताविशालाप्राणवाहिनी।सतीचसुमतीनंदासुभद्रासुरथा।इत्योंकारा

स्तिनमो तैर्नामभिः पश्चादारंभाः प्रागंताः उदक्संस्थाः समा अंगुलद्वयांतराला दशरेखाः कृत्वा
पुनः। हिरण्या सुव्रता लक्ष्मी विभूतिर्विमलाः प्रियाः। जयाज्वाला विशोकाः इडा इति नामभिस्त
थैव दक्षिणारंभा उदगंताः प्राक्संस्थाः प्राग्वद्दशरेखाः कृत्वा कुंडे स्थंडिले वा भुवं संस्कृत्या
ग्निं प्रतिष्ठाप्य दक्षिणवेद्यां वस्त्रेन ग्रहमंडलं वि लिख्य तत्र ग्रहादीन्संस्थाप्य षोडशोपचारैः
संपूज्य तदीशान्यां कलशं संस्थाप्य वास्तुमंडलं गत्वा तत्र ईशानकोणपदादारभ्य प्रतिमासु तंडु
लपुंजेषु वा शिख्यादिदेवताः प्रणवादिनमोंताः नाममंत्रैरावाहयेत्। तत्र ईशानकोणपदे
वास्तोः शिरसि ॐ शिखिने नमः। शिखिनमावाहयामीति स्थापयेत्। एवमग्रेपि। तद्दक्षिणै
कपदे दक्षिणनेत्रे पर्जन्यं। तद्दक्षिणपदे तत्पश्चिमपदे च दक्षिणश्रोत्रे जयंतं। तद्दक्षिणद्वये
दक्षिणांसे कुलिशायुधं। तद्दक्षिणपदद्वये दक्षिणबाहो सूर्यं। तद्दक्षिणपदद्वये दक्षिणबा

हावेववसत्यं। तद्दक्षिणपदद्वये दक्षिणकूर्परे मृशं। तद्दक्षिणोपरिस्थिते कपदे तद्दक्षिणप्रबा
हावाकाशं। तद्दक्षिणकोणपदे दक्षिणप्रबाहावेववायुं। तत्पश्चिमैकपदे दक्षिणप्रबाहावे
वगीमम मणिबंधे पूषणं। तत्पश्चिमपदे तदुत्तरपदे च दक्षिणपार्श्वे वितथं। तत्पश्चिमपद
द्वये दक्षिणपार्श्वे एवगृहक्षतं। तत्पश्चिमपदद्वये दक्षिणोरौ यमं। तत्पश्चिमपदद्वये दक्षिण
जानौ गंधर्वं। तत्पश्चिमपदद्वये दक्षिणजंघायां भृंगराजं। तत्पश्चिमोपरिस्थैकपदे दक्षिण
स्फिचि मृगं। तत्पश्चिमनैर्ऋत्यकोणपदे पादयोः पितॄन्। तदुत्तरैकपदे वामस्फिचि दौवारिकं
तदुत्तरपदे तत्समापदे च वामजंघायां सुग्रीवं। तदुत्तरपदद्वये वामजानौ पुष्पदंतं। तदुत्तरप
दद्वये वामोरौ वरुणं। तदुत्तरपदद्वये वामपार्श्वे असुरं। तदुत्तरपदद्वये वामपार्श्वे शोषं॥ एवर
तदुत्तरोपरिस्थैकपदे वाममणिबंधे पापं। तदुत्तरवायव्यकोणपदे वामप्रबाहो रोगं। तत्पा

२तस्याक्पदद्वये वामबाहावेवसोमं।२

गेकपदे वाम अग्र बाहावेवाहिं।तस्याक्पदे तद्दक्षिणपदे वाम कूर्परि मुख्यी।तस्याक्पदद्वये वाम बाहौ भ
ल्लाटं तस्याक्पदद्वये वामांसे सर्पं।तस्याक्पदद्वये वाम श्रोत्रे अदितिं।तस्यायुपरिस्थैकपदे वाम नेत्रे
दितिं।तद्दक्षिणपदे शिखिपदाधःकोणपदे मुखे आपं।आग्नेये वायुपदाधःकोणपदे दक्षिणहस्ते
सावित्रं।नैर्ऋत्ये पितृपदाधःकोणपदे मेढ्रे जयं।वायव्ये रोगपदाधःकोणपदे वामहस्ते रुद्रं।म
ध्यमपदे श्रीशानकोणपदाद्दक्षिणपदत्रये दक्षिणस्तने अर्यमणं।तद्दक्षिणकोणपदे दक्षिण
हस्ते सवितारं।तत्पश्चिमपदत्रये जठर दक्षिणे विवस्वंतं।तत्पश्चिमनैर्ऋत्यकोणपदे वरुणयोर्बि
बुधाधिपं।तदुत्तरपदत्रये जठर वाम भागे मित्रं।तदुत्तर वायव्यकोणपदे वामहस्ते राजयक्ष्माणं।
तस्याक्पदत्रये वामस्तने पृथ्वीधरं।तस्याग्नीशानकोणपदे उरसि आपवत्सं।मध्ये नवपदेषु हृन्नाभि राम
ध्ये ब्रह्माणं।तत उत्तरे वृषवास्तुं।वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप्।वास्तोष्पते त्रति जानी।२८५।

यस्मान्निति मंत्रेणस्थापयेत्।सचसुवर्णस्यरूपस्यवा।ततोमंडलस्यबहिरैशानाग्नेयनैर्ऋ
त्यवायव्यकोणेषुक्रमेण।चरकीं।विदारीं।पूतनां।पापराक्षसीं।पूर्वदक्षिणपश्चिमोत्तरदिक्षु
चक्रमेणस्कंदं।अर्यमणं।जंभकं।पिलिपिछंचप्राग्वन्नाममंत्रैःसंस्थाप्यप्रागाद्यष्टदिक्षुइंद्रा
दींस्तत्तन्मंत्रैर्नामभिर्वासंस्थाप्यतदस्त्वित्यावाह्यासनाद्युपचारैःप्रत्येकमेकत्रवापदार्थानुसम
येनवाभ्यर्च्यमंडलादीशान्यामकालकमव्रणंकलशंसंस्थाप्यतत्रगंधौषधियवदूर्वापंचपल्ल
वससमृत्सर्वरत्नानिप्रक्षिप्यवस्त्रेणाभिवेष्ट्ययवपूर्णंपूर्णपात्रंनिधायवरुणमावाह्यतत्रती
र्थान्यावाहयेत्।ततआचार्योन्वाधानंकुर्यात्।तत्रचक्षुषीआज्येनेत्यंतमुक्त्वानवग्रहानमु
कसंख्याभिःअर्कादिसमिद्भिस्तिलाज्याहुतिभिश्चअधिदेवताःप्रत्यधिदेवताःविनायकादी
नमुकसंख्याभिःसमित्तिलाज्याहुतिभिःशिख्यादिपंचचत्वारिंशद्देवताअमुकसंख्याभिः

समित्तिलयवपायसाज्याहुतिभिर्वास्तोष्पतिं वास्तोष्पत इति चतसृभिर्ऋग्भिः क्रमेण प्रतिद्र
व्यममुकसंख्याभिः समित्तिलयवपायसाज्याहुतिभिः वास्तोष्पतिं वास्तोष्पत इति पंचभिर्ऋ
ग्भिः क्रमेणामुकसंख्याबिल्वैस्तद्बीजैर्वा चरक्यादीनमुकसंख्यसमिदादिचतुराहुतिभिरिति
प्रधानदेवताः संकीर्त्य शेषेण स्विष्टकृतमित्याद्युक्त्वा समिधो जुहुयात्। ततः प्रणीताप्रणय
नांतं कृत्वा शि ख्यादिदेवताभ्यः प्रत्येकममुष्मै त्वेति पायसं निरूप्याग्न्यर्चनांतं कुर्यात्। ततो य
जमानोग्नेर्दक्षिणत उपविष्टः सर्वदेवताद्रव्याणि च संकीर्त्यैताभ्य एतान्युत्सृजे न ममेति प्रत्येकं दे
वत्यागं कुर्यात्॥ बहुत्विक्कर्तृके होमे प्रत्याहुति त्यागस्य कर्तुमशक्यत्वात्। तत आचार्य इध्माधा
नादि कृत्वा प्रधानहोमं सस्रुत्विक् कुर्यात्। तत्र द्रव्याणि तत्संख्या चोच्यते। नवग्रहेभ्यः क्रमेणार्क
पलाशखदिरापामार्गपिप्पलोदुंबरशमीदूर्वाकुशाख्याः समिधः प्रत्येकमष्टशतमष्टावि

राम

२।२९६।

शतिरष्टोवाआदेशमात्रास्तत्संख्याश्च तिलाज्याहुतीर्जुहुयात्तन्मंत्रैः॥ यदातेभ्यश्चरुर
पितदाप्याहुतिसंख्यासैव। केचित्तेकैकाचर्वाहुतिरित्याहुः॥ ततोधिदेवताप्रत्यधिदेवताविना
यकादिभ्यस्तन्न्यूनसंख्ययातथैवतत्तद्ग्रहाधिदेवताभ्यस्तत्तद्ग्रहसमिधः पालाश्योवाग्रहाणा दि
मष्टपक्षेएताभ्यश्चतस्त्रश्शतिशिष्टाः॥ अत्रातिस्तभिर्दूर्वाभिरेकाहुतिरितिसंख्याकार्या। कुशे
षुत्रिपत्रेरौकेतिततः शिख्यादिभ्यः प्रागुक्तप्रणवादिस्वाहांतनामभिः प्रत्येकमष्टसहस्रम
ष्टशतमष्टाविंशतिरष्टोवाहुतीः समित्तिलयवपायसाज्यंजुहुयात्। अत्रसमिधउदुंबरस्य
मुख्यास्तदलाभेश्वत्थादीनामपि। सर्वाः समिधोमधुघृतदधि भिर्मधुघृतक्षीरैर्वाभ्यक्ता
होतव्याः। तिलाकृष्णाएव। पयोगोरेव। केचित्तिलेषुयवानाहुः। ततोवास्तवेवास्तोष्पतइति
चतसृभिः समित्तिलयवपायसाज्याहुतिभिः प्रतिद्रव्यंपूर्वोक्तसंख्याभिर्हुत्वापुनर्वास्तो

ष्पते श्रुवेति च प्रत्यृचं पंच एकैकं वा घृताक्तं बिल्वं जुहुयात्। वास्तोष्पत इति च तस्य द्वाणं वसिष्ठो वा
स्तोष्पतिस्त्रिष्टुभो यागो गायत्री। होमे वि॰। वास्तोष्पते ध्रुवा स्थूणामिति तिरिरिंबिठिर्वास्तोष्पतिर्बृ
हती। होमे वि॰। ततश्चरुकया दिभ्यो मुख्यत्न्यून संख्यया चत्वारि द्रव्याणि जुहुयात्। मुख्येभ्यो ऽ
ष्टसंख्यायामत्र चतुःसंख्यत्वमिति शिष्टाः। एतानि सर्वाणि द्रव्याणि हस्तेनैव होतव्यानि। ततः स्वि
ष्टकृदादि प्रायश्चित्तहोमांतं कृत्वेंद्रादि दिक्पालेभ्यो ग्रहेभ्यश्च सदीपमाषभक्तबलीन्दत्वा स्क
च्याज्यं द्वादश गृहीतं वा कृत्वा नारिकेलादि फलं तत्र संस्थाप्य मूर्द्धानमिति पूर्णाहुतिं जुहुयात्।
मूर्द्धानं दिवो भरद्वाजो वैश्वानरस्त्रिष्टुप्। ततः प्राणीतानिनयनादि कर्मशेषं समाप्य वास्तुमंड
लपश्चिमदेशे शिखिने एष पायसबलिर्नम इत्येवं शिख्यादिभ्यो बलीन्दद्यात्। तांश्च विप्रे घृत
युत पायसेन क्षत्रियादौ वक्ष्यमाणैः पक्वेस्तत्स्थापेपायसेनेति। ततः सर्वेषां कांचनं दद्या

राम॰

॥२६७॥

द्भ्रह्मणे गौपयस्विनी॥ ततश्चरक्याद्भ्यिस्तथैव माषभक्तबलीन्दद्यात्॥ ततआचार्यादयः समुद्र
ज्येष्ठाइत्यादिवैदिकैः सुरास्त्वेत्यादिपौराणैश्च मंत्रैर्यजमानं सपत्नीकं शांतिकलशोदकेनाभि
षिच्य सर्वौषधीभिरनुलिप्य स्नापयेयुः॥ ततआचार्योब्रह्मणे सुरूपीभूषितां स्त्रीरूपीं पृथ्वीं
ध्यात्वा॥ ॐ धरायैनमइति संपूज्य प्रार्थयेत्॥ सर्वदेवमयं वास्तु वास्तुदेवमयं परमिति॥ ततोगृहं
प्रागादितस्त्रिसंध्यापावमानेन सूक्तेन रक्षोघ्नेन च वेष्टयेच्छेत्तैः छिन्नेसूत्रे ऽशुभं॥ ततोदुग्धपूर्ण
यासत्तनकुंभ्याजलपूर्णयाच सत्तनकुंभ्या तथैव सूक्तद्वयेन धाराद्वयमविछिन्नं कुर्यात्॥
अथ यजमानो गृहस्याग्नेयेआकाशपदेजानुदघ्नमवटं खनित्वा तं गोमयेनोपलिप्य शुक्ल
चंदनपुष्पाक्षतादिभिरलंकृत्य शाल्यादि सप्तबीजानि दध्योदनं च प्रक्षिप्य नवकुंभं जलपू
र्णं शुक्लैकपुष्पयुतं गंधादिभिरर्चितं हस्तद्वयेनादाय जानुभ्यामवनीं गत्वा॥ ॐ नमोवारुणा

येतितज्जलेनगर्त्तंपूरयेत्। तत्रावर्त्तेत्रिदक्षिणेपुष्येचोर्ध्वमुखेशुभं। ततोमन्निर्मितपेटिकायां
स्वर्णपंचरत्नसप्तबीजदध्योदनशैवालफलपुष्पाणिप्रक्षिप्यपूर्वस्थापितंरूपवास्तुंतूर्यमंग
लघोषेणानीयतस्यांसंस्थाप्यगंधादिभिःसंपूज्यप्रार्थयेद्द्वाभ्यां। पूजितोसिमयावास्तोहो
माद्यैरर्चनैःशुभैः। प्रसीदपाहिविश्वेशदेहिमेगृहजंसुखं। वास्तुपुरुषनमस्तेस्तुभूशय्याभि
रतप्रभो। मद्गृहंधनधान्यादिसमृद्धंकुरुसर्वदेति।। ततःपेटिकामाछाद्यतस्मिन्गर्त्तेशनैर्नि
क्षिपेदनेन। सशैलसागरांपृथ्वींयथावहसिमूर्द्धनि। तथामांवहकल्याणसंपत्संततिभिःस
हेति। गर्त्तेचतयेवमृदापूरितेमृद्आधिक्येउत्तमंसाम्येमध्यमंन्यूनत्वेत्वधमंफलंविद्यात्।
गर्त्तोपरिभूमिंगोमयेनोपलिप्यशुक्लगंधपुष्पाक्षतैरर्चयेत्। ततोग्नेःपश्चिमतआचार्य
संपूज्यालंकृतांसवत्सांगांवासोयुगंचदक्षिणांदत्वाब्रह्मर्त्विग्भ्योयथाशक्तिदत्वाग्रहाणीशि

रव्यादिवास्तुदेवतानांचपूजांकृत्वाक्षमाप्य।उत्तिष्ठयांतुदेवेतिविसृज्याचार्यहस्तेप्रतिपाद्या
ग्निंसंपूज्यब्राह्मणैःशांतिंपाठयित्वागृहादीनांशिख्यादीनांचप्रीत्यर्थंप्रत्येकंत्रींस्त्रीनेकैकं
यथाशक्तिवाब्राह्मणान्संभोज्याशिषोगृहीत्वासुहृद्युतोभुंजीत।एवंप्रथमेह्निवास्तुशांतिं
विधायद्वितीयेह्निगृहप्रवेशंकुर्यात्॥सचेत्थं।नवंजलपूर्णंपल्लवोपेतंदूर्वायुतंसुधालिप्तं
वस्त्रवेष्टितंसपूर्णपात्रंसफलंकलशमंजलिनागृहीत्वायजमानोब्राह्मणान्वितःसदार
पुत्रस्तूर्यघोषेणस्वस्तिसूक्तेनकनिक्रददितिचगृहंप्रविश्यप्रधानगृहमध्येधान्योपरि
तंकलशंस्थापयेत्।ततोगृहेस्थैर्यार्थंपुण्याहंवाचयित्वाब्राह्मणान्संपूज्यब्राह्मणान्भोज
यित्वाशिषोगृहीत्वासुहृद्युतोभुंजीत॥ ॥इतिवास्तुशांतिप्रयोगः॥ ॥केचित्त्वेकाशीति
पदेएवंमंडलस्थापनपूजनहोमबलिदानेषुब्रह्मादिपूर्वत्वमिच्छंति।यथामध्यनवपदेषुवा

स्तोर्हन्नाभ्योर्ब्रह्मा। तस्या कर्क्संलग्नपदत्रये दक्षिणस्तने र्यमा। ब्रह्मपदसंलग्नदक्षिणपदत्रये ज
ठरदक्षिणभागे विवस्वान्। तस्यैव पश्चिसंलग्नपदत्रये जठरवामभागे मित्रो। तस्यैवोदक्संलग्न
पदत्रये वामस्तने पृथ्वीधरः। ब्रह्मपदसंलग्ने ईशानपदे उत्तरस्यापवत्सः। आग्नेयपदे दक्षिणह
स्ते सविता। नैर्ऋत्यपदे दक्षिणपादे विबुधाधिपः। वायव्यपदे वामहस्ते राजयक्ष्मा। आपवत्ससं
लग्ने ईशानपदे मुखे आपः। सवितृपदसंलग्नाग्नेयपदे दक्षिणहस्ते सावित्रः। विबुधाधिपसंल
ग्ननैर्ऋत्यपदे मेढ्रे जयः। यक्ष्मपदसंलग्नवायव्यपदे वामहस्ते रुद्रः। मंड लेशानकोणपद
त्र शिख्यादी दित्यंतान्प्राग्वत्संस्थाप्य चरक्यादीन्प्राग्वत्स्थाप्य तेनैव क्रमेण पूजनहोमादिकु
र्यात्। इतरत्सर्वं वदिति॥ ॥इति गृहवास्तुशांतिप्रयोगः॥ ॥प्रासादारामादौ तु चतुःषष्टिप
दमंडलं कुर्यात्। तत्र लक्ष्मीः। यशोवती। कांता। सुप्रिया। विमला। शिवा। सुभगा। सुमतिः। राम २९६॥

इडा।एतैर्नमोंतनामभिःप्रागग्राउदक्संस्थानवरेखाःकृत्वा।धन्या।प्ररणा।विशाला।स्थिरा।
भद्रा।ऊया।निशा।विरजा।विभवा।एतैर्नमोंतैर्नामभिरुदग्राःप्राक्संस्थानवरेखाःकृत्वामध्य
गंपदचतुष्टयमेकीकृत्यतत्कोणचतुष्टयाद्बहिःकोणचतुष्टयगतरेखाभिःपदान्यर्धीकृत्यशिखा
दीन्स्थापयेत्।तत्रईशानपदेदक्षिणार्धेशिरसिशिखिनं।तद्दक्षिणसार्धपदेदक्षिणनेत्रेपर्जन्यं।
तद्दक्षिणपदद्वयेदक्षिणश्रोत्रेजयंतं।तद्दक्षिणपदद्वयेदक्षिणांसेकुलिशायुधं।तद्दक्षिणपद
द्वयेदक्षिणबाहौसूर्यं।तद्दक्षिणपदद्वयेदक्षिणबाहावेवसत्यं।तद्दक्षिणसार्द्धपदद्वयेदक्षिणकू
र्परेभृशं।तद्दक्षिणाग्नेयपदार्धेदक्षिणप्रबाहावाकाशं।तत्पश्चिमार्धेदक्षिणप्रबाहावेववायुं।
तत्पश्चिमसार्द्धपदेदक्षिणमणिबंधेपूषणं।तत्पश्चिमपदद्वयेदक्षिणपार्श्वेवितथं।तत्पश्चि
मपदद्वयेदक्षिणपार्श्वेएवगृहक्षतं।तत्पश्चिमपदद्वयेदक्षिणोरौयमं।तत्पश्चिमपदद्वयेदक्षि

पूर्वयास्समुच्चीयते॥ तत्राश्वलायनीयगृह्योक्तायाः प्रयोगः॥ ॥काष्ठादिनिर्मितं संपन्नं गृहं व्रीह्या
दिबीजसंयुतं शोभने मुहूर्ते ब्राह्मणैः सह तूर्यघोषं प्रविश्य शुचिदेशे च तस्त्रः शिलाः संस्थाप्य ता
सु दूर्वा निधाय तत्र मणिकसंज्ञं मृद्भांडं स्थापयेदनेन। पृथिव्या अधिसंभवेति॥ ॥अरंगरो वाव
दीति त्रिधा बद्धो वरत्रया। इरामुह प्रशंसंत्यनिरामयबाधतामिति वा। ततो मणिके जलमासिंचेदने
न। एतु राजा वरुणो रेवतीभिरस्मिंस्थाने तिष्ठतु मोदमानः। इरां वहंतो घृतमुक्षमाणा मित्रेण सा
कं सह संविशंत्विति। ततस्तज्जलं पात्रांतरे आदाय तत्र गंधदूर्वाः शमीशाखां उदुंबरशाखां व्रीहीन्य
वान्फलं हिरण्यं च क्षिप्त्वा दूर्वाभिः शाखाभ्यां च सर्वं गृहं प्रागादितः प्रदक्षिणं व्रजन् त्रिः प्रोक्षेद
नेन सूक्तेन। सूक्तांते व्रजनारंभः। शन्न इंद्राग्नी इति पंचदशर्चस्य वसिष्ठो विश्वे देवास्त्रिष्टुप्। प्रो राम
क्षणे वि॰। त्रिः सूक्तपाठः। ततः प्रागादितस्त्रिरविच्छिन्नामुदकधारां दद्यादनेन तृचेन। आपो॥२९१॥

हिषेतिऋचस्यांबरीषः सिंधुद्वीपआपोगायत्री ॥ धारायां वि० अत्रापि धारावृत्तिस्तत्त्वावृत्तिश्च
पूर्ववत् । तच्चांते अज्ञानारंभः ॥ ततो ग[illegible]हमध्ये गृह्यमग्निं प्रतिष्ठाप्य वास्तोष्पतिं चतुर्वारमिति प्रधा
नं संकीर्त्यान्वाधाय पूर्णपात्रनिधानांतं कृत्वा वास्तोष्पतये षोडशकृत्वः सूक्ते निरूप्य तथैव प्रोक्ष्या
ज्यभागांतं कृत्वाऽवदानधर्मेणावदायावदाय वास्तोष्पत इति चतुर्भिर्मंत्रैः स्वाहांतैर्जुहुयात् ।
वास्तोष्पत इति चतसृणां वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् सोंत्यागायत्री ॥ होमे वि० वास्तोष्पतय इदं न
नममेति सर्वत्र त्यागः ॥ ततः स्विष्टकृदादिहोमशेषं समाप्य शिष्टेन चरुणान्येनवान्नेन शतं त
दर्धं तदर्धं सामान्यपरिभाषया बहुवचनादस्तोकस्त्रीन्वा ब्राह्मणान्भोजयेत् । चरोः पूर्वं तत्रान्यः
पाको न कार्यः ॥ ततः शिवं वास्तु शिवं वास्त्विति भवंतो ब्रुवंत्विति ब्राह्मणान्ब्रूयात् । तैः शिवं वास्तु
शिवं वास्त्वित्युक्तः सुहृद्युक्तो भुंजीतेति विशीर्णगृहसंस्करणेऽप्येतदिष्यते साधारणत्वांति

वत्॥ ॥इतिश्रीसहरामकृष्णविरचितःआश्वलायनगृह्योक्तवास्तुशांतिप्रयोगः॥ ॥प्रासादवास्तु
शांतिर्दुर्गप्रतिष्ठाराज्ञाभिषेकादिकंतुमत्कृतेपूर्त्तकमलाकरेज्ञेयं॥ ॥बोधायनसूत्रे॥अथातोगृहवृद्धि
मिश्रन्भासिमासृतावृतोसंवत्सरेसंवत्सरेवापूर्वपक्षेपुण्येनक्षत्रेगृहशांतिमारभेतापामा
र्गपलाशोदुंबरसदासद्यम्ततत्रणाभिंद्रवध्यांबधागृहंसंमार्ष्टिमानस्तोकइतिपंचगव्येनदर्भमु
ष्टिनावासंप्रोक्षतियतइंद्रस्वस्तिदाविशस्पातिरितिद्वाभ्यांकृणुष्वपाजइत्येकेनानुवाकेनसि
द्धार्थान्संप्रकीर्यवास्तुमध्येअग्निमुखान्कृत्वापक्वान्जुहोतिवास्तोष्पतेवास्तोष्पतइतिद्वाभ्या
मथाज्याहुतीरुपजुहोतिवास्तोष्पतेध्रुवास्थूणामितिषड्भिरनुछंदसंसावित्र्यासहस्रेणजुहुया
त्स्विष्टकृदाद्याधेनुर्वरदानाद्ब्राह्मणाननन्नेनपरिविष्यपुण्याहस्वस्तिऋद्धिमितिवाचयित्वाएवं

प्रयुंजानोमहीतेपोषंपुष्यतिबहवःपुत्राभवंतिनैवबालाःप्रमीयंतेनग्रहाव्याधयोगृहस्थं॥इतिगृ॥२९॥२॥

नोर

राम

नरदक्षिणेनोपघातयेयुर्नतस्करसर्पराक्षसपिशाचाबाधंते। यदिगावः अतप्येरन्गवांमध्येआ
ऊतिसहस्त्रंजुहुयादवांशांतिरित्याचक्षते। द्विपञ्चतुष्पदांवैतदेवव्याख्यातं। वासोदक्षिणेत्याह
भगवान्बोधायनः॥ ॥इतिबौधायनोक्तग्रहादिशांतिः॥ ॥अथदुष्टरजोदर्शनशांतिः॥
तत्फलमाहमदनरत्नेनारदः॥ अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि। परिघस्यतुपूर्वा
र्द्धेव्यतीपातेचवैधृतौ। संध्यासूपप्लवेविष्टामशुभंप्रथमार्त्तवं। उपप्लवोग्रहणं। रोगीपति
व्रतादुःखीपुत्रिणीभोगभागिनी। पतिव्रताक्लेशभागीसूर्यवारादिषुक्रमात्। वैधव्यंसुतला
भश्चमैत्र्यंशत्रुविनाशनं। मित्रलाभःशत्रुहानिःकुमतिर्बंधुनाशनं। मरणंवंशवृद्धिश्चनि
शाहारःकुलक्षयः। तिलश्चसुतनाशश्चकुलहानिस्तिथिक्रमात्॥ गर्गः॥ सुभगाचेवद्दुःशी
लावंध्यापुत्रसमन्विता। धर्मयुक्ताव्रतघ्नीचपरसंतानमोदिनी। सुपुत्राचैवदुःपुत्रापितृवेश्म

रतासदा॥ दीना प्रजावती चैव पुत्राद्या चित्रकारिणी। स्वकर्मनिरता हिंस्रा पुरुष्यपुत्रादि संयुता॥ नि
त्यं धनचया सक्ता पुत्रधान्यसमन्विता। मूर्खा चाशौ पुण्यवती दस्त्रक्षादेः क्रमात्फलं॥ नारदः॥ कुली
रवृषचापांत्यनृयुक्कन्यातुलाधराः॥ राशयः शुभदाः स्युर्या नारीणां प्रथमार्त्तवे॥ गर्गः॥ शुभगा श्वेत
वस्त्रा स्याद्दृढवस्त्रा पतिव्रता॥ क्षौमवस्त्रा क्षितीशस्या नववस्त्रा सुखान्विता॥ दुर्भगा जीर्णवस्त्रा
स्याद्रोगिणी रक्तवाससा॥ नीलांबरधरा नारी पुष्पिता विधवा ततः॥ वस्त्रे स्युर्विषमा रक्तबिंदवः पुत्र
माप्नुयात्॥ समाश्चेत्कन्यकाश्चेति फलं स्यात्प्रथमार्त्तवे॥ अत्र स्त्रीसंगवर्जनमाह वसिष्ठः॥ प्रभूतदोषो
यदि दृश्यते तत्तु ष्यंतदा शांतिककर्म कार्यं॥ विवर्जयेद्देवलथैकशय्यां यावद्द्विजो दर्शनमुत्तमेह्नि॥ ज्यो
तिर्निबंधे वसिष्ठः॥ आर्द्रत्तौ पौषशुक्रोर्जमधुशुचिनभस्याश्वयुक्यापवारा रिक्ता पर्वाष्टषष्ठ्यः पि
तृपरसदने रात्रिसंध्यापराह्ने॥ मिश्रोग्रमूलतीक्ष्णीविवरम नरुएणल्याधिका स्त्रं चराष्ट्रो त्यात्तः पा॥२९३॥ राम

पस्यलग्नेनसदृशाजन्मनिरक्तांबरंच। आद्यत्तौदुर्भगानारीविधवासेचेद्रस्वला। वंध्याचैवा
तिगंडेचशूलेस्रुतवतीभवेत्। गंडेतुपुंश्चलीनारीव्याघातेचात्मघातिनी। वज्रेचस्वैरिणीप्रोक्ता
पा तेचपतिनाशिनी। परिघेमृतवंध्याचवैधृतौपतिमारिणी। शेषाःशुभावहायोगायदानाम
फलप्रदाः॥ वसिष्ठः॥ प्रसूतदोषोयदिदृश्यतेतुरजस्तदाशांतिककर्मकार्यं। विसर्जयेद्देवतदेकशय्यां
यावद्रजोदर्शनमुत्तमेह्नि। शांतौकृतायामपीत्यर्थः॥ शांतिमाहप्रयोगपारिजातेशौनकः। सार्त्त
वानांतुनारीणांशांतिंवक्ष्यामिशौनकः। पंचमेह्निचतुर्थेवाग्रहातिथ्यपुरःसरं। द्रोणप्रमाणधान्ये
नव्रीहिराशित्रयंभवेत्। कुंभत्रयंसंप्रशस्तंतंतुवस्त्रादिवेष्टितं। पूरयेत्तीर्थसलिलैःप्रतिकुंभंपृथक्
पृथक्। सूक्तेनाथनवर्चेनप्रसुवआपस्त्वपथः। ऋचायाःप्रवतस्ताहुआयच्चाचततःक्रमात्। मध्यकुं
२१ भेन्यसेद्धान्यमोषधानिहिमंच। उदुंबरःकुशगह्वरीराजीवटबिल्ववटाः॥ विष्णुक्रांताचतुलसीबर्हि

षीरीखपुष्पिका।श्वेतावर्यश्वगंधाचनिर्गुंडीसर्षपद्वयी।अपामार्गःपलाशश्चपनसोऽजीवकस्त
था।प्रियंगवश्चगोधूमाव्रीहयोऽश्वत्थएवच।क्षीरंदधिचसर्पिश्चपद्मपत्रंतथोत्पलं।कुरंटकत्र
यंगुंजाश्वचाम्रकमुस्तकाः।द्वात्रिंशदोषधानीहयथासंभवमाहरेत्।मृत्तिकाश्चौषधादीनितन्मं
त्रेणक्षिपेत्क्रमात्।कुंभोपरिन्यसेत्पात्रंकांस्यंमृद्वेणुताम्रजं।भुवनेश्वरींन्यसेत्तत्रइंद्राणींचपुरंद
रं।आचार्यःपूजयेद्धान्योगायत्र्यामंत्रसारया।इंद्राणींपूजयेद्देवीमिंद्राणीमास्तुनारिषु।इंद्रत्वा
वृषभंविंद्रमुपचारैःप्रपूजयेत्।मध्येतुसंस्पृशेत्कुंभंमंत्रेणभुवनेश्वरीं।जपेद्गायत्रीमाहेमाद्री
सूक्तंचजपेत्ततः।स्पृशन्वैदक्षिणंकुंभमृत्विगेकोजपेदृचा।चत्वारिरुद्रसूक्तानिचतुर्भिश्चोत्तराणि
च।संस्पृश्यानुत्तरंकुंभंश्रीरुद्रंरुद्रसंख्यया।शान्तइंद्राग्नीसूक्तंचतत्रवैसंस्पृशञ्जपेत्।कुंभस्य रामृ
पश्चिमेदेशेरोगंतिहोमंसमाचरेत्।दूर्वाभिस्तिलगोधूमैःपायसेनघृतेनच।तिसृभिश्चैवदूर्वा॥२९४॥

भिरेकैकावाहुतिर्भवेत् । अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा । गायत्र्यैव तु होतव्यं हविरत्र च
तुष्टयं । ततः स्विष्टकृतं हुत्वा समुद्रादूर्मिसूक्ततः । संततामाज्यधारां तां पूर्णाहुतिमथाचरेत् । अ
थाभिषेकं कुर्वीत प्रतिकुंभस्थितोदकैः । आपो हिष्ठेति नवभिः सूक्तेन च ततः परं । इंद्रो अंग तत्वे ने
वपावमानैः क्रमेण तु । उभयं शृणवच्च न स्वस्तिदा विश एकया । त्रैयंबकेन मंत्रेण जातवेदस एकया ·
समुद्रज्येष्ठा इत्यादि त्रायंतां च त्रिभिः क्रमात् । इमा आपस्तवे नैव देवस्य त्वेति मंत्रतः । मंत्रेणाथ त
मीशानं त्वमग्ने रुद्र इत्यथ । तमुष्टुहीति मंत्रेण भुवनस्य पितरं तथा । या ते रुद्रेति मंत्रेण शिवसंक
ल्पमंत्रतः । इंद्रत्वा वृषभं पंचमंत्रैश्चैवाभिषेचयेत् । धेनुं पयस्विनीं दद्यात्स्वात्मार्थाय च भूषणैः
। सदक्षिणमनड्वाहं प्रदद्यात्कुंडजापिने । महाशांतिं प्रजप्याथ ब्राह्मणान्भोजयेत्ततः ॥ ॥अथास्म
त्पितृकृतः प्रयोगः ॥ ॥कर्त्ता मम पत्न्याः प्रथमरजोदर्शने दुष्टमासादिसूचितसर्वारिष्टशांत्य

र्थंसग्रहमखांरंऊोदर्शनिशंभतिंकरिष्य इतिसंकल्प्य गणेशपूजामातृकापूजानांदीश्राद्धानिकृत्वा
चार्यमृत्विजश्चवृणुयात्।अर्थचार्यईशानेमध्येदक्षिणोत्तरयोश्चमहीद्यौरितिभूमिंस्पृष्ट्वौषधयः
समितिद्रोणप्रमाणव्रीहिराशित्रयेआकलशेष्विति कुंभत्रयंमंत्रावृत्त्यासंस्थाप्यप्रस्तुवेआपइति
नयानांप्रियमेधानयोऊगती।पाःप्रवतोवासिष्ठोनद्यःशक्करी।आभ्यांजलेनापूर्यगंधद्वारामि
तिगंधंयाओषधीरितिसर्वौषधीओषधयःसमितियवांश्चत्रिषुक्षिप्त्वामध्यकुंभेयवव्रीहितिल
माषकंगुश्यामाकमुद्गान्क्षिप्त्वागायत्र्योदुंबरंकुशांदूर्वाःरक्तोत्पलंचंपकबिल्वविष्णुक्रांतातुलसी
बर्हिषशंखपुष्पीशतावर्यश्चगंधानिर्गुंडीरक्तपीतसर्षपापामार्गपलाशपनसबंधूकप्रियंगु
गोधूमव्रीह्यश्चत्थदधिदुग्धघृतपद्मपत्रनीलोत्पलसितपीतरक्तकुरंटकगुंजावचाभद्रकमुस्ता राम
ख्यानिद्वात्रिंशद्यथासंभवंवाक्षिपेत्।ततस्त्रिषुकांडात्कांडादितिदूर्वाअश्वत्थेवइतिपंचपल्लु॥२९५॥

वान्स्योनेतिसप्तमृदोयाःफलिनी।इतिफलैःसहिरत्नानि।इतिपंचरत्नानिहिरण्यरूपइतिहिरण्यंच
क्षिप्त्वायुवासुवासाइतिवस्त्रेणवेष्टयपूर्णादर्वीतिपवादिपूर्णपात्राणिसवस्त्राणिनिधाय
तत्राष्टदलानिकृत्वामध्येगायत्र्याभुवनेश्वरीमावाह्यदक्षिणकुंभेइंद्राणीवृषाकपिरिंद्राणीपं
क्तिः।इतींद्राणी।उत्तरकुंभेइंद्रत्वाविश्वामित्रइंद्रोगायत्री।इतींद्रमावाह्य।तन्मंत्रैःषोडशोपचारैः
पूजयेत्।ततोमध्यकुंभेस्रष्टागायत्रीमष्टसहस्रमष्टशतंवाजपेत्।ततोहिरण्यवर्णामिति
पंचदशानांकर्दमानंदचिक्लीतेंदिरासुताऋषयःश्रीर्देवतातिस्रोनुष्टुभएकाप्रस्तारपंक्तिःहेत्रि
ष्टुभावष्टावनुष्टुभौसाप्रस्तारपंक्तिःजपेदि॰।१८क ऋत्विग्दक्षिणकुंभे कद्रुद्रायेतिनवानांघोरः
कण्वोरुद्रोगायत्री।इमारुद्रायतवसइत्येकादशानांकुत्सोरुद्रोजगत्यौंत्यौत्रिष्टुभौ।आतेपित
रितिपंचदशानांगृत्समदोरुद्रस्त्रिष्टुप्।आवोराजानंवामदेवोरुद्रस्त्रिष्टुप्।भुवनस्यपितरंकं
तमुष्टुहि॰

शांति.

ॐ आशुः इत्यस्य अग्निस्त्रिष्टुप्। त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्। अथान्यः उत्तरकुंभे रुद्रैकादशिनीं जपेत्। ततः शन्नइंद्राग्नी इति पंचदशानां वसिष्ठो विश्वेदेवास्त्रिष्टुप्। इति जपेत्॥ अथाग्निं प्रतिष्ठाप्येशान्यां महान्तु ओमास्कंद विष्णु ब्रह्मेंद्र यम काल चित्रगुप्तान् अधिदेवान् अन्य पूर्वभूमिं विष्णु इंद्राणी प्रजापति सर्प ब्रह्माणः प्रत्यधिदेवान् विनायकादीन् पंचलोकपालांश्चावाह्य संपूज्येशान्यां कुंभे वरुणं संपूज्यान्वादध्यात्। चक्षुष्यं तेन नवग्रहान् प्रत्येकममुकसंख्याभिः समिच्चर्वाज्याहुतिभिः समिन्तिलाज्यैर्वा अधिदेवादीनेकैकयाहुत्या भुवनेश्वरीं प्रत्येकं दूर्वातिलमिश्रगोधूमपायसाज्यानामष्टशताष्टाविंशत्यन्यतराहुतिभिरिंद्राणीमिंद्रं च प्रत्येकममुकद्रव्येणाष्टाविंशत्यष्टान्यतराहुतिभिः शेषेणास्विष्टकृतमित्यादि उक्तदेवेभ्यो मुखे त्वेति मनसा तत्क्षीरे निरूप्य क्षीरे चरुं कृत्वा ज्यभागांते यजमानेन त्यागे कृते उक्तसंख्यया होमं कुर्यात्। तत्र तिसृभिर्दूर्वाभिर्दधिमध्वाज्याक्ताभिरेकाहुतिः। एवं सर्वत्र॥२६॥

राम

धोभ्यक्तः। ततः स्विष्टकृदादि प्रायश्चित्तहोमांते दिक्पालेभ्यो नवग्रहेभ्यो भुवनेश्वरीं प्राणी
द्रभ्यश्वसदीपमाषभक्तबलीन्दत्वा समुद्रादूर्मिरिति तत्त्वस्य वामदेवोग्निस्त्रिष्टुप्। पूर्णाहुतिं
हुत्वा प्रणीता विमोकादि शेषं समाप्तो यजमानमभिषिंचेत्। आपो हिष्ठेति नवभिः। येत एकह
हृदयतेगौतमइंद्रस्त्रिष्टुप्। त्रिभिष्ट्वंदेवेति सप्तानां वसिष्ठस्त्रयाणामग्निस्ततो विश्वेदेवा आद्या
गायत्री ततोनुष्टुप् प्रतिस्त्रो गायत्र्यो त्र्येनुष्टुभौ। उभयं शृणवच्चन इति भर्ग इंद्रो बृहती। स्वस्तिदा वि
शायमइंद्रोनुष्टुप्। त्र्यंबकं। जातवेदसे कश्यपो दुर्गा त्रिष्टुप्। समुद्रज्येष्ठा श्चत्तसृणां वसिष्ठ आपस्त्रि
ष्टुप्। त्रायंतां इमा आप इति बातिस्रुणां सप्तर्षय आपोनुष्टुप्। देवस्य त्वेत्यापस्तंब शाखी ये स्त्रि
भिः। तमीशानं गौतम ईशानो जगती। त्वमग्ने रुद्रो। तमुष्टुहि। त्यांगिरसस्तिस्त्री रुद्रस्त्रिष्टुप्।
भुवनस्य पितरं ऋजीश्वा रुद्रस्त्रिष्टुप्। यातेरुद्रः कश्यपो रुद्रः स्वराडनुष्टुप्। यज्ञाग्यत इति षण्णां

प्रजापतिर्मनस्त्रिष्टुप्।इंद्रत्वावृषभस्य पंचानां विश्वामित्र इंद्रो गायत्री।ततः सुरास्त्वेत्याद्यैरभिषिक्तो
ग्निं संपूज्याचार्याय धेनुं रुद्रजापिने नश्वाहं सदक्षिणां दत्वा देवानामुत्तरपूजां कृत्वा विसृज्याचार्य ह
स्ते दत्वाग्निं संपूज्य गच्छ गच्छेति विसृज्य महाशांतिं पठित्वा विप्रान्संभोज्य भुंजीत॥ ॥इति कमला
करभट्टकृते शांतिरत्ने रजोदर्शनशांतिः॥ ॥मदनरत्ने ऋषिपुत्रसंहितायां त्वन्यथोक्तं।अथम
तविशेषाणां शांतिं कुर्यादनंतरं।तिथिनक्षत्रवारादिदेवानां पूजनं पृथक्।स्थंडिले कारयेत्तत्र
चतुराढकशालिभिः।आढकं तंडुलाश्चैव आढकौ तिलयावकौ।आढकस्तु पलैश्च कुडवः प्रस्थ
आढको द्रोण एव च।धान्यमानेषु बोद्धव्याः क्रमशो मी चतुर्गुणाद्रुत्कृतकः।उपर्युपरि संस्तीर्णं
तन्मध्ये नलिनीं लिखेत्।दर्भैराच्छाद्य तन्मध्ये कर्णिकायां न्यसेद्घटं।पुण्योदकेन संपूर्णं मौषधा राम
दिसमन्वितं।सहदेव्येकपत्रा च विष्णुक्रांता सपसद्रिका।बिल्वपत्रैः सहितानि चूर्णयित्वा न्यसेद्घ॥२६७॥

२। कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचंदनं। वचा कचोरमुस्ता ख्याः सर्वौषध्यो दश स्मृताः। गजाश्व
रथ्यावल्मीकसंगमाद्ध्रदगोकुलात्। राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत्। पंचगव्यं च कुमुदं तथा
मुक्ताफलानि च। वज्रवैडूर्यमाणिक्यविद्रुमानि विनिक्षिपेत्। एवं कुंभं समासाद्य अर्चयेद्गंधादिभिः
शुभैः। सावित्र्या च जपेत्कुंभं संस्पृश्य दशधा शतं द्विजः। एवं प्रदोषकाले तु तोयैस्तान्स्नापयेत्ततः। स्वगृह्यो
क्तविधानेन होमं कुर्यात्प्रयत्नतः। दूर्वाज्येन तिलैः कृत्वा सावित्र्या चैव मंत्रितः। अष्टोत्तरसहस्रं वा
शतमष्टाधिकं तथा। तत्संख्यया त्रिधा कृत्वा दूर्वाज्येन तिलैः समं। ब्राह्मणान्भोजयित्वा तु देवं संपूज्य
यत्नतः। एवं समासतः प्रोक्तं नारीणां प्रथमार्तवे। तत्रैव नारदः। तत्र शांतिं प्रकुर्वीत घृतदूर्वातिला
क्षतैः। प्रत्येकाष्टशतं चैव गायत्र्या जुहुयात्ततः। स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये इति शि
ष्टैः प्रयोगपारिजाताद्येश्च शौनकोक्तैव दत्ता॥ ॥इति कमलाकरभट्टकृतो रजोदर्शनशांतिः॥

॥ ॥अथनागबलिः॥ ॥शौनकः॥ ॥अथवक्ष्यामि सर्पस्य संस्कारविधिमुत्तमं॥ सिनीवाल्यां
पौर्णमास्यांपंचम्यांवापिकारयेत्॥ हतसर्पवधोविप्रः पूर्वजन्मनिवायदि॥ वधंप्रख्यापयेत्पापी
चरेत्कृच्छ्रांश्चतुर्दश॥ विप्रायलोहदंडंच तन्मूल्यंवापिदापयेत्॥ याज्ञवल्क्योप्याह॥ उरगेघाय
सोदंडइति॥ मूल्यमाह॥ निष्कत्रयंद्विनिष्कंवा॥ निष्कमेकंकनीयसि॥ अनुमत्यादिकर्तृणांनिष्कमर्द्धं
तदर्धकं॥ इदंस्वर्णरौप्ययोःशक्त्याज्ञेयं॥ वधेऽन्यजन्मनिकृतेलोहदंडंद्विजातये॥ दद्यात्पापवि
शुध्यर्थंश्रोत्रियायकुटुंबिने॥ साक्षाद्वधात्कर्मकर्त्तुरितदेवप्रदापयेत्॥ तथा॥ प्रियंगुव्रीहिगो
धूमातिलपिष्टेनवापुनः॥ कृत्वासर्पाकृतिंभूपेनिधायप्रार्थयेद्दहि॥ एहिपूर्वंमृतःसर्पअस्मि
न्पिष्टेसमाविश॥ संस्कारार्थमहंभक्त्याप्रार्थयामिसमासतः॥ वस्त्रोपवीतगंधाद्यैःसंपूज्यचह राम
रेद्बलिः॥ कुर्यात्संस्कारसंकल्पंप्राणायामपुरःसरं॥ यज्ञोपवीतिनाकार्यंसर्पसंस्कारकर्मतु॥ ॥२९८॥

लौकिकाग्निं प्रतिष्ठाप्य समिदाधानमाचरेत्। ततोग्नेरग्निदिग्भागे भूमिं संप्रोक्ष्य वारिभिः॥ वि
तिं कृत्वाथ संस्तीर्य कुशैराग्नेयकाग्रकैः। पर्युक्ष्याग्निं परिस्तीर्य परिषिच्य समर्चयेत्। कृत्वेधमा
धानमाघारौ चक्षुषी च यथाविधि॥ सर्पं गृहीत्वा यत्नेन चितिमारोपयेत्सुधीः। स्रुवेण जुहुया
दाज्यमग्नौ व्याहृतिभिस्त्रिभिः। सर्पास्ये जुहुयादाज्यं व्याहृत्या च समग्रया। आज्यशेषं स्रुवेणैव
सर्पदेहे निषेचयेत्। चमसस्थैर्जलैः सर्पं व्याहृत्याभ्युक्ष्य पाणिना। अग्ने रक्षाण इत्यनया सर्प
याग्निं प्रदापयेत्। अग्ने रक्षाणो अंहसः प्रतिष्म देव रीषतः। तपिष्ठैरजरो दहेत्यनयर्चेत्यर्थः। उप
तिष्ठेद्दह्यमानं नमोस्तु सर्प मंत्रतः। ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो मया। पूर्वजन्मनि वा सर्प
तत्सर्वं क्षंतुमर्हसि। क्षीराज्येन ततश्चाग्निं प्रोक्ष्य व्याहृतिभिर्जलैः। नास्थिसंचयनं कुर्यात्स्नात्वा
चम्य गृहं व्रजेत्। ब्रह्मचर्यपरिकर्मकार्यं त्रिरात्राशौचमिष्यते। सचैलं तु चतुर्थेह्नि स्नात्वा विप्रान्सम

र्चयेत्॥ सर्पनिंतस्तथाशेषः कपिलोनागएवच॥ कालियः शंखपालश्च भूधरश्चेतिनामभिः॥
गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान्॥ घृतपायसभक्ष्यैश्च द्विजानष्टौचभोजयेत्॥ ॥ एवंकृ
तेविधानेनसर्पसंस्कारकर्मणि॥ सर्पहिंसाकृतात्पापान्मुच्यतेनात्रसंशयः॥ ॥ ॥ इतिनागबलिः
॥ ॥ अथकन्यायावैधव्ययोगेशांतिः॥ ॥ मार्कंडेयः॥ बालवैधव्ययोगेतुकुंभद्रुप्रतिमादिभिः॥
कृत्वालग्नंततः पश्चात्कन्योद्वाहेतिचापरे॥ तत्रपुनर्भूत्वाभाववउक्तोविधानखंडे॥ स्वर्णांबुपिप्प
लानांतुप्रतिमाविष्णुरूपिणी॥ तयासहविवाहेतुपुनर्भूत्वंनजायते॥ सूर्यारुणसंवादे॥ विवाहा
त्सर्वकालेचचंद्रताराबलान्विते॥ विवाहोक्तेचमैथुन्याः कुंभेनसहचोद्वहेत्॥ सूत्रेणवेष्टयेत्पश्चा
द्दशतंतुविधानतः॥ कुंकुमालंकृतंदेहंतयोरेकांतमीद्रिरे॥ ततःकुंभंचनिःसार्यप्रभज्यसलिलाशा रामः
ये॥ ततोभिषेचनंकुर्यात्सिंचपल्लववारिभिः॥ कुंभप्रार्थनातत्रैव॥ वरुणांगिस्वरूपायजीवनानां॥ २९९॥

समाश्रय।पतिंजीवयकन्यापाश्चिरंपुत्रसुखंकुरु।देहिविष्णोवरंदेवकन्यांपालयदुःखतः।
ततोलंकारवस्त्राद्यांस्तांयप्रतिपादयेत्।मूर्तिदानमपितत्रैवोक्तं।ब्राह्मणंसाधुमामंत्र्यसंपू
ज्यविधिवार्हणैः।तस्मैदद्याद्विधानेनविष्णोर्मूर्तिंचतुर्भुजां।शुद्धवर्णसुवर्णेनवित्तशक्त्याथ
वापुनः।निर्मितांरुचिरांशंखगदाचक्राब्जसंयुतां।दधानांवाससीपीतेकुमुदोत्पलमालिनीं।
सदक्षिणांचतांदद्यामंत्रमेतमुदीरयेत्।यन्मयाप्राचिजन्मनिविघ्नंत्यापतिसमागमं।विषोपवि
षशस्त्राद्यैर्हतोवापिविरक्तया।प्राप्यमानंमहाघोरंयशःसौख्यधनापहं।वैधव्याद्यतिदुःखौ
घनाशायसुखलब्धये।बहुसौभाग्यलब्ध्यैचमहाविष्णोरिमांतनुं।सौवर्णींनिर्मितांशक्त्या
तुभ्यंसंप्रददेद्विज।अनघाद्याहमस्मीतित्रिवारंप्रजपेदिति।एवमस्त्वितितस्योक्तिंगृहीत्वास्व
गृहंविशेत्।ततोवैवाहिकंकुर्याद्विधिंदत्तामगोदशः।इत्यादिनिर्णयसिंधौज्ञेयं॥ ॥७॥

॥ ॥इतिवैधव्ययोगेशांतिः॥ ॥अथतृतीयमानुषीविवाहनिषेधात्तदर्थमर्कविवाहउच्यते॥
प्रयोगपारिजातेमात्स्ये॥उद्वहेइतिसिध्यर्थंतृतीयांनकदाचन॥मोहादज्ञानतोवापियदिगच्छेत्तु
मानुषीं॥नश्यत्येवनसंदेहोगर्गस्यवचनंयथा॥संग्रहे॥चतुर्थादिविवाहार्थंतृतीयेर्कंसमुद्वहेत्॥आ
दित्यदिवसेवापिहस्तर्क्षेवाशनैश्चरे॥शुभेदिनेवापूर्वाह्णेकुर्यादर्कविवाहकं॥ब्राह्मे॥यामात्सा
च्यामुदीच्यांवासपुष्पफलसंयुतं॥कृत्वार्कंपुरतस्तिष्ठन्प्रार्थयेत्तद्द्विजोत्तमः॥त्रिलोकवासिन्सप्ता
श्वच्छायायासहितोरवे॥तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु॥तत्रोध्यारोप्यदेवेशंछाययास
हितंरविं॥वस्त्रैर्माल्यैस्तथागंधैस्तन्मंत्रेणैवपूजयेत्॥चतुर्थेदिवसेतीतेपूर्ववत्तौप्रपूज्यच॥विसृ
ज्यहोममग्निंचउद्वहेन्मानुषींपरां॥व्यासः॥सपुष्पफलशाखेकमर्कंमूलेसमाश्रयेत्॥अर्ककन्याप्रदानार्थमाचार्यंकल्पयेत्पुरा॥अर्कसंनिधिमागत्यतत्रस्वस्त्यादिवाचयेत्॥नांदीश्राद्धंहि॥२०॥

राम

रण्येनअर्घवर्गान्श्चपूजयेत।पूजयेन्मधुपर्केणवरंविप्रस्यहस्ततः।यज्ञोपवीतवस्त्रादिवराया
स्मैप्रदापयेत।अर्कंप्रदक्षिणंकुर्वन्जपेन्मंत्रमिमंबुधः।ममप्रीतिकरायेयंमयासृष्टापुरातनी।अ
र्कजाब्रह्मणासृष्टाअस्माकंपरिरक्षतु।पुनःप्रदक्षिणींकुर्यान्मंत्रेणानेनमंत्रवित।नमस्तेमंगले
देविनमःसवितुरात्मजे।त्राहिमांकृपयादेविपत्नित्वंमइहागता।अर्कत्वंब्रह्मणासृष्टःसर्वप्राणि
हितायच।वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्द्धनः।ततीयोद्वाहजंपापंमत्यंचाशुविनाशय।
ततश्चकन्यावरणंत्रिपुरुषं [illegible] कुलमुच्चरेत।आदित्यःसविताचार्यःपुत्रीपौत्रीचनप्त्रिका।गो
त्रंकाश्यपमित्येवंलोकेलौकिकमाचरेत।मुहूर्त्तेकेनिरीक्षेतस्वस्तिसूक्तमुदीरयेत।अथाचार्यं
समाहूयविधिनातन्मुखाच्चतां।प्रतिगृह्यततोहोमंगृह्योक्तविधिनाचरेत।अर्ककन्यामिमांवि
प्रयथाशक्तिविभूषितां।गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रय।अंजल्यक्षतकर्माणिकृत्वा

वेष्टनपूर्वकं। यावत्संख्यं चावृतं सूत्रं तावदर्कं प्रवेष्टयेत्। स्वशाखोक्तेन मंत्रेण गायत्र्या वाथवा ज
पेत्। पंचीकृत्य पुनः सूत्रं स्कंधे बध्नाति मंत्रतः। बृहत्सामेति मंत्रेण सूत्ररक्षां प्रकल्पयेत्। अर्कस्य
पुरतः पश्चाद्दक्षिणोत्तरतस्तथा। कुंभांश्च निक्षिपेत्पश्चादाग्नेयादिचतुष्टये। प्रतिकुंभे महावि
ष्णुं संपूज्य परमेश्वरं। पुनः प्रदक्षिणीकृत्वा मंत्रमेतमुदीरयेत्। मया कृतमिदं कर्म स्थावरेषु जरायु
णा। अर्कापत्यानि नो देहि तत्सर्वं क्षंतुमर्हसि। इत्युक्त्वा शांतिसूक्तानि जप्त्वा तं विसृजेत्पुनः। गोयु
ग्मं दक्षिणां दद्याद्दंपतीपुण्याहमाचरेत्॥ ॥शौनकः॥ ततीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु। अर्क
विवाहं वक्ष्यामि शौनकोहं विधानतः। अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत्। नांदीश्राद्धं प्र
कुर्वीत स्थंडिलं च प्रकल्पयेत्। अर्कमभ्यर्च्य सौर्यचिगंधपुष्पाक्षतादिभिः। अर्कस्योत्तरदेशे तु
समन्वारब्धएतया। उल्लेखनादिकं कुर्यादाघारांतमतः परं। आज्यभागं च जुहुयात्संगोभिरन॥३०३॥

प४

राम

ज्या१

येकयायस्मै त्वाकामकामायेत्येतयर्चाततःपरं।चस्ताभिश्चसमस्ताभिस्ततस्तुस्विष्टकृद्भवे
वेत्।परिषेचनपर्यंतमयाश्चेत्यादिकंक्रमात्।अत्रप्रयोगोमत्कृतेनिर्णयसिंधौज्ञेयः॥ ॥
इतिरामकृष्णभट्टात्मजभट्टकमलाकरकृतेशांतिरत्नेर्कविवाहः॥ ॥अथद्वादशगृहदर्शमि
लनविधिः॥ ॥सूर्यारुणसंवादे॥दंपतीपितृपुत्रौचस्वसारौभ्रातरौतथा॥पितृव्योमातुलो
चैवदौहित्रोभागिनेयकः॥१॥पुत्रिकापितरौचैवभगिनीभ्रातरौतथा।द्वादशाब्दव्यतीतेतु
दूरदेशगतेयदि॥२॥एतेषामेकमेकोपिनान्योन्यमवलोकयेत्।इच्छंतिकेचिदाचार्याअन्यो
न्यमवलोकनं॥३॥शिवालयेथवातीर्थेस्नात्वाप्रज्वाल्यदीपकौ।शिवंसंपूज्यविधिवदुभौ
तौदेवमध्यतः॥४॥धृत्वाकांस्यमयंपात्रंसजलैरत्नपूरितं।शांतिदंमंत्रघोषेश्चसद्द्विजैरव
लोकयेत्॥५॥आननंचैकमेकस्यदृष्ट्वासम्यक्शिवंभवेत्।ब्राह्मणेभ्योयथाशक्त्यादद्या

सात्रंसदक्षिणं॥६॥अन्येभ्यश्चाथविप्रेभ्योयथावित्तानुसारतः॥तेभ्योपिदक्षिणांदत्वापू
जयेच्चपुनःशिवं॥७॥नत्वादेवंद्विजान्सर्वमागत्याथस्वमंदिरं।ततोव्याहृतिभिर्होमंशतमष्टो
त्तरंतिलैः॥८॥कृत्वाथभोजयेद्विप्रान्यथावित्तानुसारतः॥बांधवैःसहभुंजीतसर्वारिष्टप्र
शांतये॥९॥इत्थंयःकुरुतेमर्त्यस्तस्यारिष्टंनविद्यते आयुष्कामोनरश्चैवमकृत्वानावलो
कयेत्॥१०॥पूर्वावलोकितानांतुविधिरेषउदाहृतः।नचेवापूर्वदृष्टानामितिमाऊर्मनीषिणः
॥११॥ ॥ग्रंथांतरे॥द्वादशाद्वेव्यतीतेतुनकुर्याज्ज्ञातदर्शनं॥पित्रोःपुत्रस्यनेत्राऊर्महाहानि
करंभवेत्॥१२॥दर्शनेतुप्रकुर्वीतशिवंपूज्यशिवालये॥कांस्यपात्रंस्फोटयित्वाअं
तःपटंविधानतः॥१३॥मुखावलोकनंपश्चात्समालिंग्यविपर्ययात्॥एवंकृतेविधा राम
नेतुदोषशांतिर्भविष्यति॥१४॥ ॥इतिकमलाकरभट्टकृतेशां॰द्वादशाद्वादूर्ध्वंमिलनविधिः॥३०२॥

॥ ॥अथास्मसितकृतोरुद्रस्नानप्रयोगोलिख्यते॥ ॥उदगयनादौगुरुशुक्रास्तादिरहिते
शुभेमासिशुक्लपक्षेकृतौविशेषेणचतुर्थ्यांहि अष्टम्यांचतुर्दश्यांवारविशेषसरेवाशुभनक्षत्रेचंद्रता
राद्यानुकूल्येतत्कर्त्तव्यं।इदंचतुर्विधवंध्यात्वेविशेषतोमृतापत्यत्वेभवति।एतन्महानदीन
द्योर्वाऽशोष्यसंगमेसंगममात्रेवाकार्यं।इदंचोदगयनासंभवेसर्वमासेषुदक्षिणायनेचका
र्यं।सर्वेष्वपिचमासेषुब्राह्मणानुमतेषुच।तस्मादवश्यंकर्त्तव्यंपुत्रंस्त्रीसुखमृच्छतीतिहे
माद्रौभविष्योत्तरोक्तेः॥तत्रपूर्वंकर्त्तासभार्यःदीर्घायुःसुपुत्राद्युत्पत्तिप्रतिबंधकदुरितनि
रासार्थंयथाशक्तिप्रायश्चित्तमनुतापयुक्तःकुर्यात्॥तत्रफलतारतम्यावगतदुरिततारत
म्येचषडब्दंत्र्यब्दंसार्द्धाब्दिकरूपंचांद्रायणकृच्छ्रातिरूपंवाजपहोमतीर्थब्राह्मणभोजनादिप्रत्या
म्नायैःकार्यंसत्योपदिष्टं॥ततःश्रीरुद्रप्रीत्यर्थंकल्लामेकांधेनुंशास्त्रेयोपस्करयुतांदद्यात्

तः तत्राशक्तौ लक्षं तदर्धं तदर्धमितं अयुतमितं वा। गायत्रीजपं तद्दशांशेन तिलहोमं च कुर्यात्। एवं कृते रुद्रस्नाने ऽधिकारी भवति। ततः प्रागुक्ते काले देशे च कर्त्ता सभार्यः कृतस्नानः शुद्धः शुद्धे वाससी परिधाय आसनोपविष्ट आचांतः भूमिशुद्धिपूर्वकं प्राणानायम्य देशकालौ स्मृत्वा। मम भार्यस्य दीर्घायुःसुपुत्रादिसंततिप्रतिबंधकेन इहजन्म अन्यजन्म निवाहतेनाष्टकापवर्दिपैतृकनिमित्तिकाकरणेन वा परद्वेषेण वा गुरुद्वेषेण वा मृगरणवसक्षणेन वा बालघातेन वा मातुर्वत्सविरोजनेन वा गोवत्सवियोजनेन वा रत्नापहरणेन वा पितृमातृद्वेषणे वा अन्येन वा कर्मणा सन्न चतुर्विधवंध्यात्वान्यतरवंध्यात्वदोषनिरासद्वारा तथा स्त्रियाः कुक्षिस्थ पश्चाताज्ञातान्यदुष्टस्त्रीचेलांचलस्पर्शदोषतदेकासनाशनशय्यादिजनितदोषादिसर्वसं तति प्रतिबंधकनिरासद्वारा उमासहितरुद्रप्रीत्या दीर्घायुष्मत्सुपुत्रादिसंतत्यवाप्त्यर्थं बोधायन॥३०॥२१॥

राम

नोक्तविधिनारुद्रकलशस्थानाख्यं कर्म करिष्ये इति संकल्प्य गणेशपूजनं पुण्याहवाचनं मा
तृकापूजनं नांदीश्राद्धं च करिष्ये इति संकल्पपूर्वकं कुर्यात्। एतानि कृत्वा वा प्रधानसंकल्पः। ततः
आचार्यब्रह्मर्त्विग्वरणं कु[illegible]र्तुं ब्राह्मणान्प्रार्थयेत्। ब्राह्मणाः संतु मे शांताः पापात्संतु समाहि
ताः। वेदानां चैव दातारस्त्रातारः सर्वदेहिनां। जपैर्यज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः। दे
वानां च पितॄणां च तृप्त्यर्थं याजकाः स्मृताः। येषां देहे स्थिता वेदाः पावयंति जगत्त्रयं। ते मां रक्षंतु
सततं जपयज्ञे व्यवस्थिताः। ततः आहिताग्निं द्विजं शांतं धर्मज्ञं सत्यवादिनं। स्नानार्थं प्रार्थये
द्वैनिपुणं रुद्रकर्मणि इति लक्षणयुतमाचार्यं वृणुयात्। ततो ब्रह्माणमृत्विजश्चैकादश वृणु
यात्। ततः सर्वान्मधुपर्कवस्त्रालंकारादिभिः पूजयेद्यथाशक्ति। तत आचार्यादिसहितो मंड
पं प्रविशेत्। ततः सर्त्विगाचार्यः संकल्पपूर्वकं सलक्षणे कूटे वा मंडपे वा ईशान्यां सर्वतोभद्रं

लिंगतोभद्रमष्टदलं वा प्रत्येकं एवं द्वादशसंख्यानि कृत्वा नत्समीपे परितः सप्तधान्यानि मंगला
र्थं निधाय रक्षोहणमित्याद्यैर्यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा स्थानं त्यक्त्वा तु तत्सर्वं यत्र
स्थं तत्र गच्छतु। अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं। सर्वेषामविरोधेन ब्रह्मकर्म समारभे इ
ति च सर्षपान्विकीर्य पंचगव्येन शुचीवो हव्येति ऋचेनाभ्युक्ष्य स्वस्त्ययनं तार्क्ष्यमिति प्रोक्ष्य। मंडप
श्चेन्मंडपपूजां विधायासने उपविश्य भूतशुद्ध्यादिकमात्मरक्षां कृत्वा श्रीरुद्रं ध्यायन् आराधितो
मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः। आराधयामि भक्त्यात्वां मां गृहाण महेश्वरेति प्रार्थयेत्। ततः
त्रातारमिंद्रं। त्वन्नो अग्ने। सुगन्नः पंथा। ऋतुन्वंतं। तत्त्वायामि। आ नो नियुद्भिः। वयं सोम। तमीशानं
इमा रुद्राय। स्योना पृथिवीति संपुटीकरणेन प्रत्येकं इंद्रादिदिक्पालानावाहयेत् इन्द्राय नमः इत्यादिनाममंत्रैः पूजयेत् तत्तन्नाम राम
त्रैर्वनित्वा महीद्यौरिति भूमिं स्पृष्ट्वा ॐ पयः पृथिव्यामिति यवान्क्षिप्त्वा आकलशेष्विति क्षालितान् क॰ ॥३०४॥

लशान्यवेषु निधायइमंमेगंगइतितीर्थजलेनापूर्यतत्रगंधद्वारामितिगंधं ओषधयःसमितिय
वान्यावओषधीरितिसर्वौषधीः कांडात्कांडादितिदूर्वाःयाःफलिनीरितिफलंस्योनेतिसप्तमृदःअश्व
त्थेवइतिपंचपल्लवान्सहिरत्नानीतिपंचरत्नानिहिरण्यरूपइतिहिरण्यंक्षिप्त्वायुवंवस्त्राणीति
वस्त्रेणरक्तसूत्रेणचवेष्टयित्वापूर्णदर्वीतिवंशमयानिपूर्णपात्राणिनिधायकलशस्यमुखेविष्णु
रित्यादिनाकलशेषुदेवतीर्थान्यावाह्यदेवदानवसंवादेइत्यादिनाकलशांसंप्रार्थ्यत्र्यंबकमितिकुं
भमध्येश्रीरुद्रमावाहयेत्। ततःसमुद्राद्द्रूर्मिरितिसमुद्रंकलशजलेभावयित्वाकलशस्यमूलेब्रह्म
जज्ञानमितिब्रह्माणं। मध्येइदंविष्णुरितिविष्णुं। कंठेनमःशंभवेइतिरुद्रं। मुखेइंद्राग्नीआगतमि
तिइंद्राग्नी। यमेनदत्तमितियमं। व०सर्वतइषेत्वेतिदेवान्। आदित्यप्रत्नस्येतिसूर्यं। विश्वतश्चक्षु
रितिपरमेष्ठिनंचापार्श्वयोर्नमोस्तुसर्पेइतिसर्पान्। पूर्वेअग्निमीळइतिऋग्वेदं। दक्षिणतइषेत्वेतियजुः

शांति·

पश्चिमे अग्न आयाहीति सामवेदं। उत्तरे शन्नो देवीरित्यथर्ववेदं। मध्ये तत्सवितुरिति गायत्रीं न्यसे
त्। पूर्वाद्यष्टदिक्षु तत्तन्मंत्रैर्नामभिर्वाइंद्राग्नीन्यष्टौ न्यस्य। कांडात्कांडादिति दूर्वाः शिरसि निक्षिपेत्।
ततो वंशपात्रेष्वष्टसु तानि वस्त्राणि संस्थाप्य तत्र निष्कतदर्धतदर्धस्य वर्णेन निर्मिता अशक्तौ
वल्लावरसुवर्णेन निर्मिताः श्रीरुद्रप्रतिमाः अग्न्युत्तारणपंचामृताभिषेकपूर्वकं संस्थाप्य ता स्वा
त्वावहं खितिउमा सहितं श्रीरुद्रमावाहयेत्। एवमावाह्य [illegible] सद्योजातं प्रपद्यामीत्यासनं। स
द्योजाताय वै नमो नम इति पाद्यं। भवे भवे नाति भवे भवस्व मामित्यर्घ्यं। भवोद्भवाय नम इत्याचम
नीयं। वामदेवाय नम इति आपो हिष्ठेत्यादिभिः स्नानं दत्वा पंचामृतं दत्वाष्टभिस्तर्पयेत्। भवं देवं तर्प
शर्वं देवं त· रुद्रं देवं त· पशुपतिं देवं त· उग्रं देवं· ईशानं देवं· भीमं देवं त· महांतं देवं तर्पयामि। ततो ज्ये राम
ष्ठाय नम इति वस्त्रं। तद्दीमाचमनं। श्रेष्ठाय नम इत्युपवीतं। रुद्राय नम इत्यलंकारं। कालाय नम ॥३०५॥

इतिगंधं।कलविकरणाय नमइतिपुष्पं।बलविकरणायनमइतिधूपं।बलायनमइतिदीपं।ब
लप्रमथनायनमइतिनैवेद्यं।तूष्णीमाचमनं।सर्वभूतदमनायनमइतितांबूलं।मनोन्मनायनम
इतिदक्षिणांदद्यात्॥ ॥ॐचितुसद्योजातमितिप्रतिष्ठाप्यसद्योजातायवैनमोनमइत्यासनं।भवे
भवेइतिपाद्यं।भवोद्भवायनमइत्यर्घ्यं।वामदेवायेतिस्नानं।तर्पणमष्टभिः।ज्येष्ठायेत्याचमनं।श्रेष्ठा
येतिमधुपर्कं।कालायेतिगंधं।कलविकरणायेतिपुष्पं।सर्वभूतेतिधूपं।मनोन्मनायेतिदीपं।भवो
द्भवायेतिनैवेद्यं।त्र्यंबकमितिवस्त्रादीनिदद्यादित्यादिः।अथाष्टौपुष्पांजलीन्दद्यात्॥भवायदेवा
यनमः।शर्वायदेवायनमः।रुद्राय।पशुपतये।उग्राय।ईशानाय।भीमाय।महतेदेवायनमइति।
शिवो अथास्याघोरतनूरघोरेभ्यइत्यकपतिष्ठेत्।ततोनमस्कारः।विश्वेश्वरविरूपाक्षविश्वरूपसदाशिव।
शरणंभवभूतेशकरुणाकरशंकर।हरशंभोमहादेवविश्वेशममरवल्लभ।शिवशंकरसर्वात्मन्

नीलकंठनमोस्तुते। मृत्युंजयाय रुद्राय नीलकंठाय शंभवे। अमृतेशाय शर्वाय महादेवाय ते नमः इति।
ततः प्रार्थना। राजसेन स्वयं ब्रह्मा सात्विकेन स्वयं हरिः। तामसेन स्वयं रुद्रस्त्रितयं त्वयि संस्थितं। नमा
मि त्वां विरूपाक्ष नीलग्रीव नमोस्तु ते। त्रिनेत्राय नमस्तुभ्यमुमादेहार्धधारिणे। त्रिशूलधारिणे तुभ्यं
भूतानां पतये नमः। पिनाकिने नमस्तुभ्यं मीढुष्टमाय ते नमः। नमामि त्वां महादेव पतये त्वां नमाम्यहं।
भोक्ता भोज्यस्त्वमेवेश भक्तानां शर्म्मदः स्वयं। सूर्यरूपं समासाद्य देहिनां देहधारक। मुनीनां मुक्तिदा
ता च भक्तानां भुक्तिदः स्वयं। यद्दृश्यासर्वमिदं त्वामध्येति च याति च। नान्यस्य विजयं दातुं शक्ति
रस्ति त्वया विनेति। ततो यज्ञमानः आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः। आराधयामि
भक्त्या त्वां मां गृहाण महेश्वर। आत्मानं निवेदयेत्। ततः पूर्वोक्ताष्टकमलेषु इंद्राद्यष्टदिक्पालान्सं
पूज्या ऽऽज्यादि बलिमुपहृत्य प्रार्थयेत्। इंद्राद्याश्च सुराः सर्वे लोकपालास्तथैव च। आदित्या वसवो॥ २९६॥ राम

देवाविश्वेदेवाश्चमरुद्गणाः। ते सर्वे पूजिताः शांतिं प्रयच्छंतु सुखानि च। बलिदानादिना तुष्टाः प्रय
च्छंतु यथेप्सितमिति। ततः सर्वे ब्राह्मणा नायकस्य देशकालौ स्मृत्वा यजमानस्यायुष्मत्सुपुत्रादिसंतत्य
वाप्त्यर्थं रुद्रैकादशिनीजपसंकल्पस्य साधारण्यात्संकल्पं विशेषं कुर्युः। सद्योजातमिति पंचभिः प्राणा
न्व्याहृतिपूर्वकं व्याहृतिप्रणवान्ते हृदयशिरःशिखाकवचनेत्राणि स्वस्मिन्विन्यस्यैवमेव कलशे
ऽप्यन्यसेदिति। ततो राजसेन स्वयं ब्रह्मेति स्तुतिपूर्वकं स्वस्वकलशं स्पृष्ट्वा यजमानस्य शुभं ध्यायंतः
प्रत्येकं रुद्रैकादशिनीजपं कृत्वा राजसेन स्वयं ब्रह्मेति स्तुत्वा क्षमापयेयुः। हीनो विभक्तिवर्णैश्च व्यंज
नैश्च स्वरैस्तथा। जपो मे क्षम्यतां देव प्रसादं कुरु किंकरे। महारुद्रजपो योऽभून्न्यूनश्चैवाधिकश्च यः।
सर्वः संपूर्णतां यातु त्वत्प्रसादात्सदाशिव। यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्। तत्सर्वं क्षम्यतां देव
प्रसीद परमेश्वरेति॥ ततः आचार्यः कुंडे स्थंडिले वा स्वशाखोक्तविधिनाग्निं प्रतिष्ठाप्य तूष्णीं निर्वा

पादिनाचरुं पक्वाज्यभागांतं कृत्वा सभित्तिलचवर्ज्यैः प्रतिद्रव्यं ऊपदशांशेन होमं कुर्याद्विप्रैः
सह। अत्र सर्वेषां द्वादशैकादशिनी ऊपरूपाणि मातं द्वात्रिंशच्चतद्दशांशास्त्रयोदशरूपाणि तद्दशांश
तयोष्टाचत्वारिंशत्लक्षेषट्शतानि चतुर्विंशतिश्च शिष्टरूपद्वयेदशांशंकृतयोदश। चमकाकृत
यश्चतुर्दश। सर्वाः द्वय न्यूनसार्द्धषट्शतानि। तावान्प्रतिद्रव्यं होमः। तत एकादशशतसंख्यैरर्क
पत्रैर्मूलमंत्रेण होमः कार्यः। सर्वोपि होमो मूलमंत्रेणैव वा कार्यः। मूलमंत्रस्य परमेष्ठी ऋषिः। रु
द्रो देवता पङ्क्तिश्छंदः। होमादौ वि॰॥ अस्य न्यासः॥ परमेष्ठिने ऋषये नमः शिरसि। पंक्तये छंदसे
नमः मुखे। रुद्राय देवतायै नमः हृदये। नम इति शिखायां। शंभव इति शिरसि। चेति ललाटे। मय
इति नेत्रयोः। भव इति श्रोत्रयोः। चेति नासिकायां। नम इति मुखे। शंकराय इति ग्रीवायां। चेति ह राम
 दये। मय इति जठरे। स्कराय इति नाभौ। चेति श्रोण्योः। नम इति कक्ष्यां। शिवाय इत्यूर्वोः। शिवतराय इति॥ ३०॥

ऊरुनोः। चेतिपादयोः। नमः शंभवे चेति हृदये। मयोभवे चेति शिरसि। नमः शंकराय चेति शिखा
यां। मयस्कराय चेति कवचाय हुं। नमः शिवाय चेति नेत्रत्रयाय वौषट्। शिवतराय चेत्यस्त्राय
फट्॥ एवं होमं कृत्वा स्विष्टकृदादि पूर्णाहुति प्राक्तनं होमशेषं समाप्याचार्यादयोगेधाध्वकपचारै
रुद्रस्योत्तरपूजां कृत्वाभिषेकार्थं रुद्रस्य साधाग्नेरुत्तरतश्चतुरस्रं स्वस्तिकोपेतं मंडलं कृत्वा तत्रोदुं
बरकाष्ठपीठद्वयोपरिपरिहितान्हतस्ते तवस्त्रोदंपती प्राङ्मुखावुपवेश्य स्वयमुदङ्मुखाश्च
तुरधिकसप्तशतार्कपत्रै रुद्रैकादशिन्याम्मूलमंत्रेण वाभिषिंचेयुः॥ अत्र माध्यंदिनशाखायां
रुद्राध्यायगतानां चतुःषष्टिमंत्राणामेकादशिन्यां चतुरधिकसप्तशतसंख्या भवति तेनैके
कैनार्कपत्रेणाभिषिच्य पत्राणि त्यजेत्। अन्येषां तु शाखिनां मूलमंत्रेणैव तावद्धारावृत्तेन त
थैवाभिषेक इति बोधायनसंप्रदायः॥ ततः पल्लवैः आशुः शिशान इति सूक्तेनाप्यायस्वेति सो
नमंत्रेणैकैकेर

शांति॰

मसूक्तेन यदंतिय इत्यादिपावमानीभिरापो हिष्ठेत्यादिभिः समुद्रज्येष्ठा इत्यादिभिः सहस्राक्षमि
ति तत्वेन सुरास्त्वामित्यादि पौराणैश्चाभिषिंच्य शिवं शिवमिति वदेयुः। इह चाचार्योप्यभिषेके प
त्राणि गृह्णीयादित्येके। ऋत्विज एवार्कपत्रैरेका दशिन्याचार्यस्तु पंचपल्लवैः सूक्तैरभिषिंचेदित्य
न्ये॥ ततः सर्वौषधीभिः सप्तमृद्भिर्नद्याउभयकूलमृद्भिश्च सर्वांगेष्वनुलिप्तौ दंपती विशेषतः
कुक्षिदेशेनुलिप्तां स्त्रियं शिष्टेनोद्धृतेन सर्वकलशोदकेन स्नापयेयुः। तत्रस्त्रौ शरीरस्याश्च ये दो
षा ये दोषा गर्भबीजयोः। सर्वे ते नाशमायांतु कर्मणानेन शोधिताः। इति मंत्रमुच्चार्याभिषेकवा
ससी त्यक्त्वा शुद्धे वाससी परिधाय स्रक्चंदनमाला लंकृतौ भवेतां। ततः आचार्यो यजमाना
भ्यामन्वारब्धः समुद्रादूर्मिरित्यादि मंत्रैः पूर्णाहुतिं कुर्वीत सोमौ रसिं कुर्यात्। तत्र श्रावयेत्सू राम
क्तमाग्नेयं वैष्णवं रौद्रमैंद्रं। महावैश्वानरं साम ज्येष्ठसाम च पाठयेत्। ततो यजमानः सपत्नीकः ॥२०८॥

कृतस्याभुषकरणः पूजापूर्वकमाचार्याय पयस्विनीं धेनुं सुवर्णं च दक्षिणां दत्वा ब्रह्मणे वृषभ
मृत्विग्भ्यो धेनुं सुवर्णं वा यथाशक्ति दत्वा क्षमाप्य श्रीरुद्राद्यावाहितदेवता विसृज्य श्रीरुद्रप्रीत्य
र्थं शतं तदर्धं तदर्धं वा ब्राह्मणान्भोजयित्वा तैः संपूर्णतां वाचयित्वा ऽऽशीर्वत्सपतिपुत्राभिर्वन्द्यापना
दिकृतमंगलो ब्राह्मणाशिषो गृह्णीयात् ॥ अनेन विधिना कार्यो रुद्रः कलशसंज्ञकः ॥ भुक्तेस
सकलान्भोगान्प्रसादाच्छंकरस्य चेत्याह भगवान्बोधायनः ॥ भट्टरामेश्वरसुतो भट्टनारायणा
त्मजः ॥ रामकृष्णस्त्विमां चक्रे श्रीरुद्रस्नानपद्धतिं ॥ ॥ इति श्रीमन्नारायणभट्टसूरिसूनुराम
कृष्णभट्टकृतो रुद्रस्नानविधिः ॥ ॥ अथ हेमाद्रौ भविष्योक्तं रुद्रस्नानं ॥ ॥ युधिष्ठिर उवाच ॥
रुद्रस्नानं विधानेन कथयस्व जनार्दन ॥ सर्वारिष्टप्रशमनं सर्वशांतिप्रदं नृणां ॥ कृष्ण उ० ॥ देवसे
नापतिं स्कंदं रुद्रपुत्रं षडाननं ॥ अगस्त्यो मुनिशार्दूलः सुखासीनमुवाच ह ॥ सर्वज्ञोसि कुमार

त्वं प्रसादाच्छंकरस्य वै । स्नानं रुद्रविधानेन स्त्रीणां रुद्रकथं भवेत् । स्कंद उवाच ॥ मृतवत्सा तु या नारी दुर्भगा फलवर्जिता । यास्ते कन्यका वंध्या स्नानमासां विधीयते । अष्टम्यां च चतुर्दश्यामुपवासपरायणा ॥ अश्लेषासु च चतुर्थे हि प्राप्ते सूर्यदिने ऽथवा ॥ न द्योस्तु संगमे कुर्यान्महानद्यो विशेषतः ॥ शिवालये ऽथवा गोष्ठे विविक्ते वा गृहांगणे । आहिताग्निं द्विजं शांतं धर्मज्ञं सत्यवादिनं । स्नानार्थं प्रार्थयेदेनं निपुणं रुद्रकर्मणि । ततस्तु मंडपं कुर्याच्चतुरस्रं मुदकप्लवं । वस्त्रचंदनमालैश्च गोमयेनानुलेपितं ॥ तन्मध्ये श्वेतरजसा संपूर्णं पद्ममालिखेत् । तस्य मध्ये महादेवीं स्थापयेत्कर्णिकोपरि । दद्याद्दलेषु न द्यादीन् चतुर्षु विधिपूर्वकं । इंद्रादिलोकपालांश्च दलेष्वष्टसु विन्यसेत् ॥ देवीं विनायकं चैव स्थापयेत्तत्र पार्थिव ॥ दत्वार्घ्यं गंध धूपं च पुष्पं दीपमु ओदनं । भक्त्या नानाविधान्दद्यात्सलानि विविधानि च ॥ चतुः कोणेषु भृंगारमश्वत्थदल

राम

॥ ३०९ ॥ ८

पूरितं। एकैकं विन्यसेत्कुम्भं सर्वौषधिसमन्वितं। मंडपस्य चतुर्दिक्षु दद्याद्भूतबलिं ततः। आग्नेय्यां दिशि कर्त्तव्यं मंडपस्य समीपतः॥ अग्निकार्यं शुभे कुंडे पत्रपुष्पैरलंकृते। लवणीपायसा पायुक्तं घृतेन मधुना सह। मानस्तोकेन जुहुयात्कृते होमे नवग्रहे॥ द्वितीयस्याग्निकार्यस्य कर्त्ता च ब्राह्मणो भवेत्। रुद्रजप्यकृताचार्यं सितचंदनचर्चितं॥ सितवस्त्रपरीधानं सितमाल्यविभूषितं॥ शोभयेत्कंकणै रुक्मकर्णवेष्टां गुलीयकैः। पूर्ववत्मंडलं कार्यं द्वितीयं मंडलं शुभं॥ तस्य मध्ये तु सा नारी श्वेतपुष्पैरलंकृता। श्वेतवस्त्रपरीधाना श्वेतगंधानुलेपना॥ सुखासनोपविष्टस्या आचार्यो रुद्रजापकः। अभिषिंचेत्ततः श्वेनामर्कपत्रपुटांबुना। चतुःषष्टिकृचैनेव रुद्रैनैकादशोन तु। शतानि सप्तपर्णानां चतुर्भिरधिकानि तु। पर्णेनाभिषिंचेत्। तासां चतुःषष्टिसंख्यानामेकादशकृत्वः पठितानामियं संख्या। अच्छिद्रेणेति मंत्रेण स्नानार्थं वि

निवेशयेत्।अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्।वेश्यांगणाद्राजगृहाद्गोष्ठाद्दानी
यवेम्मृदं।सर्वौषधीरोचनां च नदीतीर्थोदकानि च।एतत्संक्षिप्य कलशे कुशलाकाचिदंगना।रुद्र
भिजप्तेन ततः स्नापयेत्कलशेन तां।तोयपूर्णादिकलशैरश्वत्थदलपूरितैः।सर्वदिक्संस्थितैः प
श्चात्स्नापयेत्कलशाक्षतैः।एवं स्नात्वा स्नापकाय दद्याद्गां कांचनं तथा।होतुरेवात्र निर्दिष्टा द
क्षिणा गौः पयस्विनी।ब्राह्मणनामथान्येषां स्वशक्त्या मुनिपुंगव।स्रग्वस्त्रकांचनादीनि
दत्वा सर्वान्क्षमापयेत्।कृतेनानेन विप्रेंद्र रुद्रस्नानेन शाम्यति।सुभगा कीर्तिसंयुक्ता बहुपु
त्रा प्रजायते।सर्वेष्वपि हि मासेषु ब्राह्मणानुमतेन च।तस्माद्दवश्यं कर्त्तव्यं पुत्रस्त्रीसुखमिच्छ
ता।यास्नानमाचरति रुद्रमिति प्रसिद्धं श्रद्धान्विता द्विजवरानुमतेन नारी।दोषान्निहंत्य सकलो राम
स्वशरीरसाजो भर्त्तुः प्रिया भवति भारत जीववत्सा॥ ॥इति हेमाद्रौ भविष्योत्तरे वंध्यात्वहरणं॥३१०॥

द्रुस्नानं॥ ॥अथहेमाद्रावन्यथास्नानं॥ ॥पार्वत्यु॰॥येनप्रजाऽप्रजावापिस्त्रीप्रजावापिजा
यते।ग्रहरोगान्वितावापिकुलात्यजतिवापतिं।वददेवकथंतस्याःसर्वमेतद्विनश्यति।जायते
चतथाभीष्टमतःपृच्छामिशंकर॥ईश्वरउवाच।शृणुयेनप्रणश्यंतिदोषास्त्रीणांत्वयोदितांजा
यतेचतथाभीष्टंयथावत्कथयामिते।गोमूत्रगोमयाभ्यांचभूशुद्धिंपरिकल्पयेत्।आवृतेवि
ततेदेशेयत्रनान्यःप्रपश्यति।कुंभान्समानयेत्तद्वद्दशैकंचतथाद्विजान्।आहूयप्रार्थयेत्स
र्वान्निर्विघ्नेस्त्वियज्ञक्रिया।प्रक्षाल्यस्थापयेत्कुंभान्पूरयेत्तीर्थवारिणा।कृत्वात्मरक्षाविधिवत्स्व
स्तिकंचतथासनं।यजेमांसर्वकामेशींप्राणानायम्यवाग्यतः॥संकल्प्यावाह्यकुंभेषुमा
मेवात्वावहंतितिस्ति।आसादितैंसमग्रंतुतत्रैवपरिकल्पयेत्॥कुंभस्यबाह्यदेशेतुलो
कपालान्प्रपूजयेत्।बोधायनोक्तविधिनागंगामी।स्नानसंनिधौ।त्वरितश्चततोन

त्वाइंद्रादीन्मूलमंत्रतः।प्रणवश्चादितःकार्योनमश्चांतेतथैवच।देवतापदमध्यस्तुमूलमंत्रः
प्रकीर्त्तितः॥रुद्रैकादशिनीमेकांस्पृष्टाकुंभोदकंजपेत्॥पुनःसंपूज्यविधिवन्मपीठादींस्तथै
वच।एवंसर्वेषुकुंभेषुसर्वंकार्यंद्विजोत्तमाः॥ततःकुंभान्समादायक्रमान्नमफ्टूंविसर्जये
त्॥एतदेकादशगुणंकर्त्तव्यंद्विजसत्तमैः॥एकादशोद्दिष्टविधिवत्कर्त्तव्यंद्विजतर्पणं।द
त्वाचदक्षिणांतेभ्योनमस्कृत्यविसर्जयेत्॥एवंदोषाःप्रशमंयांतिजायतेतुयथेप्सितं।

~~[struck through]~~ ।पु
रुषस्यापिकर्त्तव्यंग्रहरोगान्वितस्यच।पुष्पाप्रबलकामानांक्षत्रियस्यजयार्थिनः।प्रतिसं
वत्सरंयस्तुचैत्रशुक्लेशुभेदिने॥करोतिश्रद्धयायुक्तःअनेकाद्याप्यनुत्तये॥ ॥इतिरुद्र राम
स्नानं॥ ॥अथशतचंडीसहस्रचंडीच॥ ॥वाराहीतंत्रे॥चंडीपाठफलंदेविशृणुष्वग॥३९१॥

दतोमम॥एकावृत्त्यादिपाठानीं यथावत्कथयाम्यिते॥संकल्पपूर्वसंपूज्यन्यस्यांगेषुमनून्स
सूक्त।पठनाद्धलिदानाद्धिसिद्धिमाप्नोतिसाधकः॥उपसर्गोपशांत्यर्थेत्रिरावृत्तिंपठेन्नरः।ग्रहो
पशांतौकर्त्तव्यापंचावृत्तिर्वरानने॥महाभयेसमुत्पन्नेसप्तावृत्तिंसमुन्नयेत्॥नवावृत्त्याद्भ
वेच्छांतिर्वाजिपेयफलंलभेत्॥राजवश्यादिभृत्येचरुद्रावृत्तमुदीरयेत्॥अर्कावृत्तेःका
म्यसिद्धिर्वैरिहानिश्चजायते॥मन्वावृत्त्याद्वैरिनाशस्तथास्त्रीवश्यताभिपात्।सौख्यंपं
चदशावृत्तेश्रियमाप्नोतिमानवः।कलावृत्तौपुत्रपौत्रधनधान्यागमंविदुः।राजभीतिवि
मोक्षायवैरस्योच्चाटनायच।कुर्यात्सप्तदशावृत्तंतथाष्टादशाकंप्रिये॥महारणविमोक्षा
यविंशावृत्तंपठेत्सुधीः॥पंचविंशावर्त्तनात्तुभवेद्बंधविमोक्षणं।संकटेसमनुप्राप्तेदु
श्चिकित्सामयेतथा।जातिध्वंसेकुलोच्छेदेआयुषोनाशआगते॥वैरिवृद्धौव्याधिवृद्धौध

ननाशोतथाक्षये।तथैवत्रिविधोत्पातेतथाचैवातिपातके।कुर्याद्यत्नाच्छतावृत्तीततःसंपश्यतेशु
भे।श्रेयोवृद्धिःशतावृत्तात्राज्यवृद्धिस्तथापरे।मनसाचिंतितंदेविसिध्येदष्टोत्तराच्छतात्।शता
श्वमेधयज्ञानांफलमाप्नोतिसुव्रते॥सहस्रावृत्तिनालक्ष्मीरावृणोतिस्वयंस्थिरा।भुक्त्वा
मनोरथान्कामान्नरोमोक्षमवाप्नुयात्।यथाश्वमेधःक्रतुराट्देवानांचयथाहरिः।स्तवानाम
पिसर्वेषांतथासप्तशतीस्तवः।अथवाबहुनोक्तेनकिमेतेनवरानने।चंड्याःशतावृत्तपाठात्स
र्वाःसिध्यंतिसिद्धयः इति॥ततॐनारायणायनमः॥नरायनमः।नरोत्तमायनमः।देव्यैनमः।
सरस्वत्यैनमः॥व्यासायनमः।इतिनत्वापठेत्॥विधिवाक्यपाठस्त्वमूलोभ्रांतानां।अध्याये
प्राप्यविरमेन्नतुमध्येकदाचन॥कृतेविरामेमध्येतुअध्यायादिपठेन्नरः॥तथा।देवी राम
पामयतःकृत्वाब्राह्मणानांविशेषतः॥ग्रंथिंचशिथिलंकुर्याद्वाचंचकुरुनंदन॥ ॥७॥ ॥३१२॥

॥ ॥अथ शतचंडीसहस्रचंडीप्रयोगः॥ ॥नत्वा गणेश्वरं देवं पितरौ राघवं शिवं। रामकृ
ष्णतनूजेन कमलाकरशर्मणा॥ डामरं यामलं चैव योगिनीतंत्रमेव च। वाराहीतंत्रमन्यांश्च
ग्रंथानालोक्य यत्नतः। सहस्रचंडिकायाश्च शतचंड्यास्तथैव च। न्यासविधिना प्रयो
गः प्रोच्यतेधुना। तत्र यजमानः शुभदेशे मंडपं चिकीर्षुर्गणेशकूर्मशेषवसुधानीपूजनं कृत्वा
शतचंड्यां षोडशहस्तं सहस्रचंड्यां विंशतिहस्तं मंडपं प्रसाध्य तदाग्नेय्यां स्तंभावटे वा पूर्वोक्तदे
वानां पूजां कृत्वा ताम्रपात्रेर्घ्यमादाय जानुभ्यामवनिं गत्वा। आगच्छ सर्वकल्याणि वसुधे लो
कधारिणि। उद्धृतासि वराहेण ससैलवनकानना। मंडपं कारयाम्यद्य लक्षं धेनु शुभलक्षणे॥
गृहाणार्घ्यं मया दत्तं प्रसन्ना शुभदा भवेति भूम्यै अर्घ्यं दत्वा मंडपं विधाय तन्मध्ये ईशान्यां ह
स्तमात्रां द्व्यंगुलवप्रां ग्रहवेदीं कृत्वा पश्चिमे शतचंड्यां द्विहस्तं सहस्रचंड्यां चतुर्हस्तं षड्ढस्तं

शांतिरत्न॰

वा चतुरस्रं पद्मकुंडं वा कुर्यात्॥ तत्राष्टाचत्वारिंशदंगुलानि चतुर्हस्ते करणी॥ अष्टपंचाशदंगुला
नि सप्तवाय्वकाद्यं च षड्हस्ते करणी॥ एवं कुंडं कृत्वा मंडपमध्ये ऽष्टकोणां वेदीं कुर्यात्॥ तद्यथा॥ म
ध्यस्तंभचतुष्कमध्यसमं चतुरस्रं कृत्वा षोडशहस्तमंडपे षोडशांगुले विंशतिहस्ते च विंशत्यं
गुलाधिकहस्तेन कोणेषु भ्रमयित्वा ऽर्धं कथयित्वा ष्टसूत्रदानाद् दशास्राभिति राघवभट्टोक्तः प्रकारः॥
अथवा षोडशांगुलाधिकहस्तमात्रं मध्ये चतुरस्रं कृत्वा तत्संलग्नानि चतुर्दिक्षु तन्मानानि चत्वा
रि चतुरस्राणि कृत्वा बाह्यचतुरस्राणां कोणे पक्षगयासूत्राणि दत्वा दिक्षु चतुरस्रचतुर्थांशांस्त्य
जेदित्यष्टास्रिः॥ एवमष्टकोणां हस्तोच्छ्रायां वेदिं कृत्वा तदुपरि वारुणमंडलं सर्वतोभद्रं वा कृत्वो
परि वितानकिंकिणीचामरादियुतं बध्वा शतपंचाशत्पलेन तदर्धेन तदर्धेन वा सहस्रचंडी राम
तुपलपंचकेन तदर्धेन तदर्धेन वा देवीमूर्त्तिमष्टादशभुजीं कुर्यात्॥ ॥अथ प्रयोगः॥ ॥ ॥२६३॥

॥शुभेह्नि कर्त्ता सपत्नीकः तिलतैलेन कृताभ्यंगो भूषितः संपूर्णकलशहस्तो भद्रकर्णेभिरिति
मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्योपविश्य देशकालौ स्मृत्वा मम इह जन्मनि दुर्गाप्री
तिद्वारा सर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकी
र्तिलाभशत्रुपराजयसदभीष्टसिध्यर्थं ममामुककार्यसिध्यर्थं वा सनवग्रहमखां शतचंडीं स
हस्रचंडीं वा स्वयं ब्राह्मणद्वारा वा करिष्ये। तदंगतया गणेशपूजनं पुण्याहवाचनं मातृकापूज
नं नांदीश्राद्धं च कृत्वाचार्यं वृत्वा प्रार्थयेत्॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः। तथा त्वं म
म यज्ञेस्मिन्नाचार्यो भव सुव्रतेति। ततो ब्रह्माणं वृत्वा। यथा चतुर्मुखो ब्रह्मा स्वर्गे लोकपिता
महः। तथा त्वं मम यज्ञेस्मिन्ब्रह्माणं त्वामहं वृणे इति प्रार्थयेत्। ततः सदस्यं गणराजपार्थं च वृत्वा
स्मिन्कर्मणि ऋत्विक्त्वेन त्वामहं वृणे इति शतचंड्यां नव ऋत्विजो वृणुयात्। सहस्रचंड्यां शतं।

ततोऽष्टौ द्वारपालान्वृत्वा संभवे सर्वेषां मधुपर्कपूजां कृत्वांगुलीयककर्णभूषणगवस्त्रद्वयजलपात्रा
सनार्घ्यपात्राणि दद्यात्। द्विगुणमाचार्याय। अथाचार्यो यदत्र संस्थितं भूतमिति सर्षपान्विकीर्य
पंचगव्येन कुशैः शुचीवोहव्येति तिलचेनापोहिष्ठेति तिलचेन मंडपं प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमिति मंत्रद्व
यं पठेत्। ततो मत्स्यसूक्तलुलापद्धतिमार्गेण मंडपपूजां वास्तुग्निस्थापनां कुर्यात्। ततः पूर्वे कादंबरिग
ऊरूढे वज्रहस्ते एह्येहि आगच्छ गंधपुष्पसहितमिमं क्षीरान्नबलिं गृहाण ममेप्सितं कुरु २ स्वाहेति
बलिं दत्वा द्वारशाखयोर्ब्राह्मीं माहेश्वरीं चिच्चत्त्यै मायाशक्त्यै धात्रे विधात्रे शंखनिधये पद्मनिध
ये द्वारश्रियै नम इति संपूज्याधः वास्तुपुरुषमसितांगभैरवं च पूजयेत्। तत आग्नेये उल्के अ
ऊरूढे शक्तिहस्ते एह्येहीत्यादि। रुरुभैरवश्चाद्दक्षिणे करालि महिषारूढे दंडहस्ते एह्येहीत्या राम
दि। द्वारशाखयोः कौमारी वैष्णवी चर्चिकत्यादीन्संपूज्य चंडभैरवं पूजयेत्। ततो नैर्ऋत्यां रक्ता ॥३१४॥

क्षि प्रेतारूढे खड्गहस्ते एह्येहीत्यादि। क्रोधभैरवश्च। ततः पश्चिमे कौबेरि अश्वारूढे पाशहस्ते ए
ह्येहीत्यादि। द्वारशाखयोः वाराहीमिंद्राणीं चेत्युक्त्यादौ श्च संपूज्य उन्मत्तभैरवं पूजयेत्। ततो वा
यव्ये मृगवाहने अंकुशहस्ते एह्येहीत्यादि। कपालभैरवश्च। ततउत्तरे यक्षिणि सिंहवाहिनि गदाह
स्ते एह्येहीत्यादि। द्वारशाखयोः चामुंडां महालक्ष्मीं चेत्युक्त्यादौ संपूज्य भीषणभैरवं पूजयेत्।
ईशान्यां कालि वृषभारूढे शूलहस्ते एह्येहीत्यादि। संहारभैरवश्च। ईशानपूर्वयोर्मध्ये सर्वराज्ये
श्रि हिवाहने चक्रहस्ते एह्येहीत्यादि। भूमिं पूजां च। पश्चिमनिर्ऋतिमध्ये सुरश्रेष्ठे हयवाहने अक्षस्र
ज्कमंडलुहस्ते एह्येहीत्यादि। अंतरिक्षपूजां च। ततो वेद्या मागतेयेविह्वचे पूर्वे रुद्राय ऐशान्यां ब्र
ह्मणे पश्चिमे गणेशाय मध्ये महाकाल्यै महालक्ष्म्यै महासरस्वत्यै च ध्वजपताकोच्छ्रयणं कृत्वा पू
जयेत्। अथाचार्यस्त्विहवेद्याग्यहान्संस्थाप्य संपूज्य मध्यवेद्यां पीठे उपविश्य। गुंगुरवे। गं गणपत

ये। द्वारश्रियै। ऊं दुर्गायै॰। क्षं क्षेत्रपालाय। ऊं ऱ्हः अस्त्राय फट् इति वास्तुपुरुषाय महालक्ष्म्यै नमः इति न
त्वा ततो पृथ्वीत्या आसनं कृत्वा। अनंतासनाय॰। विमलासनाय॰। पद्मासनाय नमः इति नत्वा। अपस
र्पंतु भूतानि। अपसर्पंतु ते भूता इति द्वाभ्यां वामपाद घातत्रयं कृत्वा ऊं ऱ्हः अस्त्राय फट् इति तालत्रयं कृ
त्वा गणपति सरस्वती क्षेत्रपालान् नत्वा रः फट् इत्यग्निप्राकारं विचिंत्य समंताज्जलधारां दत्वा मूले
नाचम्य प्राणानायम्य देशकालौ स्मृत्वा स्मिन्नात चंडीकर्मणि श्री महालक्ष्म्याः नवार्णवविधानेन
न्यासपूजादि करिष्ये इति भूतशुद्धिं कुर्यात्। स्वबीजं ऊं हं सः सोहमिति शिरः स्थित परमात्मनि सं
योज्य पादाद्याजानु लं पृथिवीमप्सु संहरामीति सर्वत्रानुषंगः। जान्वादिनाभिवं अपस्तेजसि। ना
भेराकंठं रं तेजो वायौ। कंठाद्याभ्रूमध्यं यं वायुमाकाशे। भ्रूमध्याद्ब्रह्मरंध्रं हं आकाशमहंकारे।
अहंकारं महति महांतं प्रकृतौ प्रकृतिं पुरुषे पुरुषं परमात्मनि महालक्ष्मी संज्ञे ब्रह्मणि संहरामी। ॥ ३१५ ॥ राम

त्यनुषंगेण भूतानि संहृत्य वामकुक्षावंगुष्ठमात्रं पापपुरुषं यमिति पूरकेणाकैः षोडशैः संशोष्य रमिति
अग्निबीजेन कुंभकेन ६४ दग्ध्वा वमिति रेचकेण ३२ निःसार्य वमित्यमृतबीजेनाप्लाव्य लमिति
समेत्य ग्लौमिति घनीकृत्य हमिति व्योमबीजेन देहावयवान् ध्यात्वा जीवं हंसः सोहं हंस इति तत्र सं
योज्य ब्रह्मणः प्रकृतिः प्रकृतेर्महान् महतोऽहंकारो ऽहंकारादाकाशः आकाशाद्वायुः वायोरग्नि
रग्नेरापोऽद्भ्यः पृथिवी पृथिव्या ओषधय ओषधीभ्योऽन्नमन्नाद्रेतो रेतसः पुरुष इति देहोत्पत्तिं
विभाव्य प्राणप्रतिष्ठां कुर्यात्। प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानि छं
दांसि चैतन्यरूपिणी जगत्सृष्टिकर्त्री प्राणशक्तिर्देवता। आंबीजं ह्रींशक्तिः। क्रौंकीलकं। प्राण
प्रतिष्ठायां विनियोगः। ॐ आं ह्रीं क्रौं अं कं ङं पृथिव्यप्तेजोवाय्वाकाशात्मने आं अंगुष्ठाभ्यां न
मः। ॐ इं चं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां। ॐ उं टं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्म

नेउंमध्यमाभ्यां॰।एंतंवाक्पाणिपादपायूपस्थात्मनेऐंअनामिकाभ्यां॰।ॐपं॰वचनादानविहर
णोत्सर्गानंदात्मनेओंकनिष्ठिकाभ्यां॰।ॐअंयंक्षंमनोबुध्यहंकारचित्तात्मनेअः करतलकरपृष्ठा
भ्यांनमः।एवंषडंगः॥आंह्रींक्रौंयंरंलंवंशंषंसंहंॐसोहंक्रौंह्रींआंममप्राणाइहप्राणाः।पुनरेवं
ममजीवइहस्थितः।पुनरेवंममसर्वेंद्रियाणि।पुनरेवंममवाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा
इहागत्यस्वस्तयेसुखेनसुचिरंतिष्ठंतुस्वाहेतिशिरसिहृदिवाकरंदत्वाचिःसप्तकृत्वापंचदश
वारंप्रणवंजपेत्।१५संस्कारान्भावयेत्॥अथमातृकान्यासः॥अस्यमातृकामंत्रस्यब्रह्माऋ
षिः।गायत्रीछंदः।मातृकासरस्वतीदेवता।हलोबीजानि।स्वराःशक्तयः।क्षंकीलकं।न्यासेविनि॰।
अंकं५आंअंगुष्ठांनमः।इंचं५ईंतर्जनीभ्यां॰।उंटं५ऊंमध्यमाभ्यां॰।एंतं५ऐंअनामिकाभ्यां॰।ॐपं५ ॰ राम
औंकनिष्ठिभ्यां॰।अंयं॰क्षंअः करतलकरपृष्ठाभ्यां॰।एवंहृदयादिषडंगः॥ ततःकंठस्थपो॥३१६॥

उशादलेपद्मेअकारादिषोडशस्वरान्न्यसेत्।अंनमः।आंनमइत्यादि।हृदि द्वादशदलेकादिठांतान्।नाभौदशदलेडादिफांतान्।तदधःषड्दलेबादिलांतान्।आधारेचतुर्दलेवादिसांतान्।ललाटेद्विदलेहंक्षंइत्यंतर्मातृकाः॥ ॥अथबहिर्मातृकान्यासः॥ऋष्यादिषडंगांतंपूर्ववत्।अंनमः शिरसि।आंनमःमुखवृत्ते।नेत्रकर्णनासापुटकपोलदंतपंक्त्योष्ठद्वंद्वेषुइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔं इतिन्यसेत्।अंजिह्वायां।अः कंठे।दक्षकरसंध्यग्रेषुकवर्गं।वामकरेचवर्गं।दक्षिणवामपादयोः टतवर्गौ।कुक्षिद्वयपृष्ठनाभ्युदरेषुपवर्गं।यंहृदि।रंकंठे।लंककुदि।वंस्कंधयोः।शंहृदादिदक्षकरे।षंहृदादिवामकरे।संहृदादिदक्षपादे।हंहृदादिवामकरे।लंक्षमिति व्यापकं॥ ॥अथनिवृत्यादिकलान्यासः।अंनिवृत्त्यैनमः शिरसि।आंप्रतिष्ठायैमुखे।इंविद्यायैनमः।ईंशांत्यै नेत्रयोः।उंइंधिकायै।ऊंदीपिकायैकर्णयोः।ऋंरेचिकायै।ॠंमोचिकायै नासयोः।ऌंपरायै।ॡंसूक्ष्मायै।क

पोलयोः।ऐंसरक्ष्मामृतायै·ऐंज्ञानामृतायै·दंतपंक्त्योः।ओंसावित्र्यै·औंव्यापिन्यै·ओष्ठयोः॥
अंधुरूपायैजिह्वायां।अःअनंतायैकंठे।अथदक्षिणकरे।कंसृष्ट्यै।खंऋध्यै·।गंस्मृत्यै।घंमेधायै।
ङंकांत्यै।इति॥वामकरेचंलक्ष्म्यै·।छंद्युत्यै।जंस्थिरायै।झंस्थित्यै।ञंसिध्यै॥दक्षपादे।टंजरायै·।
ठंपालिन्यै।डंशांत्यै।ढंऐश्वर्यै।णंरत्यै।इति।वामपादे।तंकामिकायै।थंवरदायै।दंह्लादिन्यै·।धंप्री
त्यै।नंदीर्घायै।इति।पंतीक्ष्णायै।फंरौद्रायै·कुक्ष्योः।बंअभयायैपृष्ठे।भंनिद्रायैनाभौ।मंतंद्र्यै
उदरे।यंक्षुधायैहृदि।रंक्रोधिन्यैकंठे।लंकृपायैककुदि।वंउदरायैस्कंधयोः।शंमृत्यवेदक्षक
रे।षंपीतायैवामे।सश्वेतायैदक्षपादे।हंअरुणायैवामपादे।ळंअसितायैमूर्द्धादिपादांतं।क्षं
अनंतायैपादादिमूर्द्धांतं॥इतिकलान्यासः॥ ॥ततोमूलेनत्रिःप्राणानायम्यअस्यश्रीनवार्णम
र्णमंत्रस्यब्रह्मविष्णुरुद्राऋषयः।महाकालीमहालक्ष्मीमहासरस्वतीदेवताः।गायत्र्युष्णिग॥२३७॥

नुष्टुप्छंदांसि। नंदजाशाकंभरीभीमाः शक्तयः। रक्तदंतिकादुर्गाभ्रामरीति बीजानि। अग्निवा
युःसूर्यस्तत्वानि। पूजादौविं०॥ अथैकादशन्यासाः॥ ह्रीं बीजयुक्तान् अकारादिक्षकारांतान्वर्णा
न्बहिर्मातृकास्थानेषुन्यसेत् ह्रीं अं नमः शिरसीत्यादि। इति प्रथमः॥ ॐ ऐं ह्रीं क्लीं बीजानिकरद्व
येकनिष्ठिकाद्यंगुष्ठांतं करतलकरपृष्ठमणिबंधेषु च न्यसेत्। ॐ ऐं ह्रीं क्लीं नमः कनिष्ठिकाभ्यांनमः
इत्यादि। एवं हृदयादिषडंगः॥ एवं दशदिक्षु च॥ इति द्वितीयः॥ ॐ ऐं ह्रीं ऐं ब्राह्म्यै नमः। पूर्वे। ह्रीं मा
हेश्वर्यै आग्नेय्यां। ॐ ह्रीं क्लीं कौमार्यै दक्षिणे। ॐ ह्रीं श्रीं वैष्णव्यै नैर्ऋत्यां। ॐ ह्रीं ह्रूं वाराह्यै प
श्चिमायां। ॐ ह्रीं लौं इंद्राण्यै वायव्ये। ॐ ह्रां क्लौं नारसिंह्यै उत्तरे। ॐ ह्रीं रः ॐ चामुंडायै ऐशान्यां।
ॐ ह्रीं व्योमेश्वर्यै ऊर्ध्वं। ॐ ह्रीं सप्तद्वीपेश्वर्यै भुवि। ॐ ह्रीं नागेश्वर्यै पाताले। इति तृतीयः। सर्वत्रा
दौ प्रणवः। ओं नंदजायै पूर्वे। रक्तदंतिकायै दक्षिणांगे ह्रीं शाकंभर्यै पश्चिमांगे। ह्रूं दुर्गायै वा

मांगे।ॐ ह्रीं भीमायै मस्तकादिपादांतं। श्रीं भ्रामर्यै पादादिशिरोंतं॥ इति चतुर्थः।ॐ ह्रीं ऐं ब्रह्मणे नमः।
पादाद्यानाभि।ॐ ह्रीं श्रीं विष्णवे नाभेराहृदयं।ॐ ह्रीं ह्रौं हृदयाय हृदाद्याशिखं।ॐ ह्रीं हंसाय पाद
द्वये।ॐ ह्रीं वैनतेयाय करद्वये।ॐ ह्रीं वृषभाय चक्षुषोः।ॐ ह्रीं गजाननाय सर्वांगे।ॐ ह्रीं हरये
व्यापकं। इति पंचमः॥ ॐ ह्रीं महालक्ष्म्यै मध्यदेहे।ॐ ऐं सरस्वत्यै ऊर्ध्वदेहे।ॐ क्लीं महाकाल्यै अधो
देहे।ॐ ह्रीं क्ष्रौं सिंहाय हस्तयोः।ॐ ह्रीं हंसाय नेत्रयोः।ॐ ह्रीं ह्रूं क्रूर महिषप्रेताभ्यां नमः पादयोः।
ॐ ह्रीं चंडिकायै सर्वांगे। इति षष्ठः॥ ॐ ऐं नमः मूर्द्ध्नि।ॐ ह्रीं नमः दक्षनेत्रे।ॐ क्लीं नमः वामनेत्रे।ॐ
चां दक्षिणकर्णे।ॐ मुं वामकर्णे।ॐ डां नासिकायां।ॐ यै नमः मुखे।ॐ विं लिंगे।ॐ च्चे पायौ। इति स
प्तमः।ॐ च्चे पायौ।ॐ विं लिंगे।ॐ यै मुखे।ॐ डां नासिकायां।ॐ मुं वामकर्णे।ॐ चां दक्षिणकर्णे। राम
ॐ क्लीं वामनेत्रे।ॐ ह्रीं दक्षिणे।ॐ ऐं मूर्द्ध्नि॥ इत्यष्टमः॥ ऐं ह्रीं क्लीं चामुंडायै विच्चे स्वाहेति मूलमं॥ ३१८॥

त्रैस्वाये दक्षिणपश्चिमवामांगेषु। आरोहावरोहाभ्यां शिरस्तः पादांतं पादादिशिरोंतं च न्यसेत्॥ ॥
इति नवमः॥ पूर्वोक्तिसमयमूलमंत्रेण हृदयादिषडंगः॥ इति दशमः॥ ततः खड्गिनी शूलिनी घोरे
त्येकं श्लोकमुक्त्वा कृष्णवर्णं ध्यात्वा हृदयायनमः। शूलेन पाहि नो देवीति श्लोकचतुष्टयं पठित्वा रक्त
वर्णं ध्यात्वा शिरसे स्वाहा। सर्वस्वरूपे सर्वेशे इति श्लोकपंचकं पठित्वा श्वेतवर्णं ध्यात्वा शिखायै व
षट्। इत्येकादशन्यासाः॥ ततो योनिमुद्रां दर्शयेत्। सा चैवं। दक्षिणकरस्य तर्जन्या वामस्याना
मिकां वामतर्जन्या दक्षिणस्यानामिकां बध्वा ये मध्यमांगुली द्वयं तदग्रे कनिष्ठिद्वयं तदग्रेंगुष्ठ का ४
द्वयमिति॥ ॥अथ ध्यानं॥ श्वेताननां नीलभुजां सुश्वेतस्तनमंडलां। रक्तमध्यां रक्तपादां नी
लजंघोरुरुन्मदां सुचित्रजघनां चित्रमाल्यांबरविभूषणां। चित्रानुलेपनां कांतिरूपसौभा
ग्यशालिनीं। अष्टादशभुजां पूज्यां सासहस्रभुजां सतीं। आयुधान्यथ वक्ष्यंते दक्षिणाधः

करक्रमात्। अक्षमाला च कमलं बाणोसिः कुलिशं गदा। चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः।
शक्तिर्दंडश्चर्म चापं पानपात्रं कमंडलुमिति। ततो वेद्यां सर्वतोभद्रं कृत्वा तत्र देवताः स्थापयेत्॥
मध्ये ब्रह्माणं। उत्तरादि सोमादीन्। वायुसोममध्याद्दिक्षु क्रमेण मध्यादिवसून्। आ रुद्रास इति
रुद्रान्। त्यान्नु क्षत्रियानिति द्वादशादित्यान्। अश्विनावर्त्तिरित्यश्विनौ। अभि त्यं देवमिति सप्त
यक्षान्। आयं गौरिति सर्पान्। अप्सरसां गंधर्वाणामिति गंधर्वाप्सरसः। ब्रह्मसोममध्ये कुमार
मातेति कुमारं। ऋषभं मेत्यृषभं। अदितिर्ह्यजनिष्टेति दक्षं च। ब्रह्मेंद्रमध्ये तामग्निवर्णामिति दुर्गां।
इदं विष्णुरिति विष्णुं च। ब्रह्माग्निमध्ये उदीरतामिति स्वधां। ब्रह्मयममध्ये परं मृत्यो इति मृत्युरोगान्।
ब्रह्मनिर्ऋतिमध्ये गणानां त्वेति गणपतिं। ब्रह्मवरुणमध्ये शन्नो देवीरित्यापः। ब्रह्मवायुमध्ये म
रुतो यस्येति मरुतः। ब्रह्मणः पादमूले स्योनेति भूमिं। तत्रैव। इमं मे गंगे इति गंगादिसप्तनद्यः॥

राम
॥३३९॥

धाम्नोधाम्न इतिसप्तसागरांश्च। बहिः सोमादिसन्निधौक्रमेण गदांत्रिशूलंवज्रंशक्तिंदंडं खड्गं
पाशंअंकुशंच। पुनरुत्तरादि। गौतमंभरद्वाजंविश्वामित्रंकश्यपंजमदग्निंवसिष्ठमत्रिमरुंधतीं
च। पूर्वादि। ऐंद्रींकौमारींब्राह्मींवाराहींचामुंडांवैष्णवींमाहेश्वरींवैनायकीं। ततस्तदस्तुइत्यावा
ह्यसंपूज्यबलिंदत्वातन्म ध्येमहीद्यौरितिभूमिंस्पृष्ट्वा। ओषधयः समितिसप्तधान्यानिक्षिप्त्वाक
लशोषीतिहेमंराजतंताम्रमयंमृन्मयंवाकलशंसंस्थाप्यइमंमेगंगइत्युदकेनापूर्यगंधद्वारा
मितिगंधं। याओषधीरितिसर्वौषधीः। कांडात्कांडादितिदूर्वाः। अश्वत्थेवइतिपंचपल्लवान्॥
स्योनेतिसप्तमृदः। याः फलिनीरितिफलं। सहिरत्नानीतिपंचरत्नानिहिरण्यंचक्षिप्त्वायुवासु
वेष्ट वासाइतिरक्तवस्त्रेणसंवेष्ट्यपूर्णादर्वीतिपूर्णपात्रंनिधायतत्ररक्तवस्त्रेयंत्रंलिखेत्॥ यथा।
चतुर्द्वारंचतुरस्रत्रयंकृत्वातन्मध्येत्रिकोणंकृत्वातन्मध्येमायां(?)त्रिकोणेकलापर्वस्यप

त्रिभूरवासंलग्नमन्यत्रिकोणंकृत्वातत्संलग्नंन्यत्रिकोणंकुर्यात् तेनबहिरष्टौकोणामध्येचषट्

कोणाःसंपद्यंते।तन्मध्येचान्यत्रिकोण [illegible] मिति।उक्तारोयथा॥मध्येत्रिकोणंतद्बहिःषट्कोणंतद्बा

ह्येवृत्तंतद्बाह्येष्टौदलानितद्बाह्येचतुर्द्वारंचतुरस्त्रत्रयमिति।एवंयंत्रंविलिख्यतत्रशातकुंभीहेम

पलेनतदर्धेनतदर्धेनतदर्धेनवाकृतांसहस्त्रचंद्रांतुविंशतिदशपंचान्यतमसुवर्णकृतांध्याना

त्कामष्टादशभुजांरहस्योक्तामष्टभुजां [illegible] वामहिषासुरहंत्रींसिंहस्थांदेवींमूर्तिंरक्तपट्टदुकू

लयुगछन्नांसंस्थाप्यपूजयेत्।तद्यथा॥स्ववामेस्त्रायफडितिक्षालितंमूलेनजलपूरितंकुंभं

निधायपुष्पाक्षतगंधादिभिर्मूलेनतत्पात्रमाप्याप्यदेवदक्षिणेन्यसेत्।ततोमत्स्यमुद्रयात्रि

कोणंतद्बहिःषट्कोणंतद्बहिश्चतुरस्त्रंतद्बाह्येवृत्तंगोमयेनजलेनवाविलिख्यशंखमुद्रया।

वक्ष्यवह्न्येदशकलात्मने धूम्रायै ऊष्मायै ज्वलिन्यै ज्वालिन्यै विस्फुलिंगिन्यै सुश्रियै ॥३२०॥

सुरूपायै॰कपिलायै॰हव्यवाहायै॰कव्यवाहायैनमइत्यभ्यर्च्यषडंगेणाग्नीशासुरवायुको
णेषुहृदयायनमः॥शिरसेस्वाहा॥शिखायैवषट्कवचायहुमिति॥अग्नेनेत्रत्रयायवौषट्॥स
र्वतःअस्त्रायफडितिअक्षतैःसंपूज्यअस्त्रक्षालितशंखंसंस्थाप्यहंसूर्यमंडलायद्वादशकला
त्मनेनमः॥तापिन्यै॥धूम्रायै॥मरीच्यै॥ज्वालिन्यै॥रुच्यै॥सुषुम्नायै॥भोगदायै॥विश्वायै॥बोधिन्यै॥
धारिण्यै॥क्षमायै॥इतिशंखेऽक्षतैःसंपूज्यतत्रगंधपुष्पाणिहृदयमंत्रेणक्षिप्त्वाक्षंनमः॥लंन
मः॥हंनमः॥इत्यादिविलोममातृकाभिःशिरोमंत्रेणचजलेनापूर्यॐसोममंडलायषोड
शकलात्मने॥अमृतायै॥मानदायै॥पूषायै॥तुष्ट्यै॥पुष्ट्यै॥रत्यै॥शशिन्यै॥चंद्रिकायै॥कां
त्यै॥ज्योत्स्नायै॥श्रियै॥प्रीत्यै॥अंगनायै॥पूर्णायै॥पूर्णामृतायै॥कामदायिन्यै॥इत्यभि
मंत्र्यांकुशमुद्रयासूर्यमंडलात्तीर्थमाकृष्यावाहन्यादिमुद्राःप्रदर्श्यशिखामंत्रेणधेनुमुद्रां

मालिनीमुद्रांगरुडमुद्राकरद्वयांगुष्ठतर्जन्ययुसंयोगेमालिनीमुद्रा।करद्वयस्यपृष्ठसंयोज्य
कनिष्ठिकान्मध्यिकेवद्भ्याधोंगुष्ठोपुरतस्तर्जन्योचसंयोज्यमध्यमानामिकयोर्मुक्तयोःपक्ष
तुल्यत्वेगरुडमुद्रांचदर्शयेत्।नेत्रमंत्रेणसंवीक्ष्यकवचमंत्रेणसंकलीकृत्यतत्रषडंगानिविन्य
स्यास्त्रेणरक्षांकृत्वामूलेनगंधपुष्पैरभ्यर्च्यहस्तेनाच्छाद्यमूलेनसप्तवारमभिमंत्र्यचक्रमुद्र
यासंरक्ष्यतज्जलंकिंचित्कुंभेक्षिप्त्वास्त्रमंत्रेणात्मानपूजा द्रव्याणिचसंप्रोक्ष्यमूलेनषड
गंकृत्वात्मानंगंधपुष्पैरभ्यर्च्यमूलेनत्रिःस्वशिरसिपुष्पांजलिंदत्वाधूपदीपनैवेद्यानिमनसा
निवेद्यदेवरूपःसमूलंजप्त्वादेवायजपनिवेद्यपुष्पमाघ्रायकुंभोदरायनमइतिवामेक्षिप्त्वा
हस्तौप्रक्षाल्यपीठंपूजयेत्॥ यथा॥देवीदक्षिणेगुंगुरुभ्यःपंपरमगुरुभ्यःपंपरापरगुरुभ्यः
पंपरमेष्ठिगुरुभ्यःइतिसंपूज्य।वामेगंगणपतये।डुंदुर्गायै।क्षेत्रपालाय।मध्ये।आधारश॥

राम

त्त्यै॰मूलप्रकृत्यै॰कालाग्निरुद्राय॰महामंडपाय॰कल्पतरवे॰रत्नसिंहासनायनमइतिसंपूज्या
ग्नेयादिकोणेषु॥धर्माय॰ज्ञानाय॰वैराग्याय॰अणिमैश्वर्यायेतिसंपूज्यपूर्वादिदिक्षु॰अधर्माय॰
अज्ञानाय॰अवैराग्याय॰अनैश्वर्यायेति।ऊर्ध्वंब्रह्मणे।अधोनंताय॰मध्येवास्तुपुरुषायेति
संपूज्यपूर्णगिरिपीठायपूर्वादिषट्दिक्षु।उड्डाणपीठेश्वरसहितामुड्डाणपीठैश्वर्यंवापादुकांपू
जयामि।ॐमांमातृकापीठेश्वरसहितांमातृकापीठैश्वर्यंवापादुकांपू॰।ॐजांजालंधरपीठेश्वर
सहितांजालंधरपीठैश्वर्यंवापा॰।ॐकोंकोल्हागिरिपीठेश्वरसहितांकोल्हागिरिपीठैश्वर्यं
वापादु॰।ॐपूंपूर्णगिरिपीठेश्वरसहितांपूर्णगिरिपीठैश्वर्यंवापा॰।ॐसंसंहारगिरिपीठेश्वरसहि
तांसंहारगिरिपीठैश्वर्यंवापा॰।ॐकांकामरूपपीठेश्वरसहितांकामरूपपीठैश्वर्यंवापा॰।पुनः
पूर्वादिस्वबीजनमोंतैः सर्वत्रगणेशाय॰क्षेत्रपालाय॰पादुकेभ्यः बटुकेभ्यः।आग्नेयादि।छ

जयायै विजयायै जयंत्यै अपराजितायै ॥ तत्रैव ॥ अग्निमुखवेतालाय प्रेतवाहनवेतालाय ज्वालामुखवेतालाय धूम्राक्षवेतालाय कंदाय नालाय दलेभ्यः केसरेभ्यः कर्णिकायै अं सूर्यमंडलाय उंसोममंडलाय मंवह्निमंडलाय अंआत्मने उंअंतरात्मने पंपरमात्मने उंज्ञानात्मने ततः विंविष्णुमायायै चेंचेतनायै बुंबुध्यै निंनिद्रायै क्षुंक्षुधायै ॥ इतिपूर्वे ॥ छांछायायै शंशक्त्यै तंतृष्णायै क्षांक्षांत्यै जांजात्यै लंलज्जायै इतिदक्षिणे ॥ शांशांत्यै श्रंश्रद्धायै कांकांत्यै लंलक्ष्म्यै धृंधृत्यै वृंवृत्यै इतिपश्चिमे ॥ स्मंस्मृत्यै दंदयायै तुंतुष्ट्यै पुंपुष्ट्यै मांमातृकायै भ्रांभ्रांत्यै इत्युत्तरे ॥ ॐ ह्रीं सर्वशक्तिकमलासनायनमः सर्वात्मसंयोगयोगपीठात्मनेनमः ॥ ॥ इतिपीठपूजा ॥ ॥ ततो हृदिस्थांज्योतिर्मयींसपरिवारांमहालक्ष्मीं ध्यात्वा आगच्छवरदेदेविदैत्यदर्पनिषूदनि पूजांगृहाणसुमुखिनमस्तेशंकरप्रिये दुर्गेदेवि ॥ २२ ॥ राम

समागच्छसांनिध्यमिहकल्पय।बलिंपूजांगृहाणत्वमष्टाभिःशक्तिभिःसहेतिमंत्रंपठित्वादक्षि
णनासारंध्रेणपुष्पांजलावानीयमूलेनमूर्त्तावावाह्यावाहनादिमुद्राःयोनिमुद्रांचप्रदर्श्यमि
त्रैःषडंगंकृत्वामूलेनजयंतीमंगलाकालीत्यनेनचासनपाद्यार्घ्याचमनमधुपर्कान्निवेदयेत्।
तत्रपात्रचतुष्टयमस्त्रेणप्रक्षाल्यगंधादिनिक्षिपेत्।तत्रपाद्येदूर्वाविष्णुक्रांताश्यामाकपत्राणि।।
अर्घ्येगंधपुष्पाक्षतकुशाग्रसर्षपयवदूर्वाः।आचमनीयेजातीफलकंकोललवंगानि।मधु
पर्केदधिमधुघृत।ततःसुगंधतैलपंचामृतोष्णोदकतीर्थोदकैःश्रीसूक्तदेवीसूक्तसरस्वतीसूक्तै
रभिषिच्यपुनराचमनंदत्वापट्टकूलयुगकंचुकाभरणाष्टगंधबिल्वपत्रनानापुष्पहरिद्राकुं
कुमसिंदूरालक्तकपरिमलद्रव्याणिसमर्प्यपंचविंशतिद्वादशशत्रीणिसहस्राणिएकंवासहस्रं
पुष्पाणिसमर्पयेत्॥ ॥अथावरणपूजा॥दक्षिणेऐंमहाकाल्यैविघ्नेनमः।वामेक्लींसरस्वत्यै

विघ्नेनमः॥वामेह्रूं महिषाय॥दक्षिणेक्ष्रौंसिंहाय॥पुरः गंगणपतये॥ॐकालायपश्चात्॥ॐमत्य
वे॥फ्रइलेपुल्के॥रुद्राय॥ह्रूंगौर्यै॥श्रीविष्णवे॥श्रीलक्ष्म्यै॥ऐंब्रह्मणे॥ऐंसरस्वत्यै॥तत्रैव॥ह्रीहृदयायनमः
ह्रींशिरसेस्वाहा॥ह्रूंशिखायैवषट्॥ह्रैं कवचायहुं॥ह्रौंनेत्रत्रयायवौषट्॥ह्रः अस्त्रायफट्॥तत्रै
व॥गुंगुरुभ्यः॥पंपरमगुरुभ्यः॥पंपरमेष्ठी॥हरये॥हराय॥गणेशाये॥दिक्षु॥श्रींभ्रामर्यै॥ह्रौंइंद्रा
ण्यै॥क्ष्रौंनारसिंह्यै॥क्रैंचामुंडायै॥दिक्षु॥अंअसितांगभैरवाय॥रुंरुद्रभैरवाय॥चंचंडभैरवाय॥
क्रौंक्रोधभैरवाय॥उंउन्मत्तभैरवाय॥कंकपालिभैरवाय॥भिंभीषणभैरवाय॥संसंहारभैर
वाय॥पूर्वादि॥लंइंद्राय॥रंअग्नये॥यंयमाय॥क्षंनिर्ऋतये॥वंवरुणाय॥यंवायवे॥संसोमाय॥
हंईशानाय॥बहिः॥वज्राय॥शक्त्यै॥दंडाय॥खड्गाय॥पाशाय॥अंकुशाय॥गदायै॥त्रिशूलाय॥ राम
ततोमूलेनधूपदीपौदत्वानैवेद्यमस्त्रेणाभिमंत्र्यमूलेनप्रोक्ष्यकवचेनावगुंठ्यपुष्पंदत्वा॥३३॥

धेनुमुद्रयामृती।कृत्य मूलेन निवेद्य ग्रासमुद्रां प्रदर्श्य मध्येपानीयमुत्तराचमनं च दत्वा करोद्वर्त्त
न फलतांबूल दक्षिणा नीराजनछत्र चामर दर्पण गीतवाद्यादि निवेद्यास्मत्कुल नवरात्र निर्ण
योक्त विधिना माषभक्त कूष्मांडादि बलिं दत्वा पूजां समर्पयेत्।अथ चतुःषष्टियोगिनीपूजा।
तत्र देव्यग्रे रक्तवस्त्रे अष्टौ अस्त्राणीत्येकापंक्तिः।एवमष्टौ अस्त्रपंक्तीः कृत्वा वक्ष्यमाणनामभि
रावाह्य संपूज्य पायसबलीन्दद्यात्।शुक्लवर्णे शूलडमरुपाशासिधरे सर्वालंकारभूषिते सर्वसे
न्ये जये एह्येहि आगच्छागच्छ मे पायसबलिं गृहाण गृहाण मम मेप्सितं कुरु कुरु स्वाहा।एवं विजये·ज
यंति·अपराजिते·दिव्ययोगिनि·महायोगिनि·।सिद्धयोगिनि·।गणेश्वरि·।ततः गौरवर्णे अक्षमा
लांकुशपुस्तकवीणाधरे प्रेताशिनी एह्येहीत्यादि पूर्ववत्।एवं डाकिनिकालिः।कालरात्रि नि
शाचरि टंकारिणि।रुद्रवेतालि।फट्कारिणि।वीरभद्रे।धूम्रांगि।कलहप्रिये·।ततो विद्युत्सं

निभे ध्वजबाणधनुःपाशयुते राक्षसि एह्येहीत्यादि। एवं रक्ताक्षि विश्वरूपे भयंकरि वीरकौमारि
चंडिके वाराहि मुंडधारिणि। ततः आदित्यवर्णे कमलाक्षमालांभयवरदकरे भैरवि एह्येहीत्यादि। ए
वं धाक्षिणि। धूम्रांगि· प्रेतवाहिनि· खड्गिनि· दीर्घलंबोष्ठि· मालिनि· मंत्रयोगिनि· ततः सुनीलशं
खचक्रगदाभयकरे कालिनि एह्येहीत्यादि। एवं चक्रिणि। कंकालिनि। भुवनेश्वरि· ज्वालिकि· महामा
रि· यमदूति। करालिनि। ततः पुंजनिभे· खड्गखेटपट्टिशपरशुहस्ते केशिनि एह्येहीत्यादि। एवं मर्द्द
नि रोमजये· निवारिणि· विशालि· कार्मुकि· लोलि· अधोमुखि मनन·धूम्रवर्णे कुंतखेटभिंडिपाल
मालाकरे मुंडाग्रधारिणि एह्येहीत्यादि। एवं व्याघ्रि· कांक्षिणि· प्रेतरूपिणि· धूर्जटि· घोरि· करालि·
विषलंबिनि· ॥इति योगिनीपूजा॥ ॥ततो गंगणपतये· बंबटुकाय पिंगलेसासुरनेत्राय बलिं राम
रहस्य रक्षरक्ष हनर फ्रांह्रींहूं स्वाहेति बटुकाय क्षेत्रपालाय च दत्वा प्रसूतं बलिं दद्यात्। तत्र मंत्रः॥ ३२४॥

सर्वपीठोपपीठनिक्षारोपस्तारणेपिच। क्षेत्रक्षेत्रज्ञसंदोहः सर्वेदिग्भागसंस्थिताः। योगिनीयो
गवीरेंद्राः सर्वेयेत्रसमागताः। नगरेवाथवाग्रामेअटव्यांसरितस्तटे। वापीकूपेषुवृक्षेचश्मशा
नेचचतुष्पथे। नानारूपधरायेच बहुरूपधराश्चये। तेसर्वेचैवसंतुष्टाः बलिंगृह्ण
सु४ तुसत्वराः। शरणागतोस्म्यहंतेषां तेसर्वेममप्रदाः। बलिदानेनसंतुष्टाः प्रयच्छंतुममेप्सितं। सर्वेका
र्याणिकुर्वंतुदोषांश्चघ्नंतुसर्वदेति॥ ॥अथकुमारीपूजा॥ तास्वप्रत्यहंशतंनववापूज्याः। ब्रा
ह्मणींसर्वकार्येषुजयार्थेनृपवंशजां। लाभार्थेवैश्यवंशोत्थां सुतार्थेशूद्रवंशजां। दारुणेचांत्य
धि३ जातानांपूजयेद्धिनानरश्शक्रकायाह्याः। तथा। नवभिर्लभतेभूमिमैश्वर्यंद्विगुणेनतु। एकवध्या
लभेल्क्षात्रौश्चैकेकेनश्रियंलभेत्। वर्ज्यास्तु। एकवर्षातुयाकन्यापूजार्थेतांविवर्जयेत्। ग्रंथिस्फुटि
तशीर्णांगीरक्तपूयव्रणांकितां। जात्यंधांकेकरांकाणींकुरूपांतनुरोमशां। वर्जयेत्सर्वकार्येषु

दासीगर्भसमुद्भवामिति। विशेषस्तु मतांतरे निर्णयसिंधौ ज्ञेयः। तत्र सुगंधतैलेनाभ्यंगं कारयित्वा
लंकृतां पीठे उपविश्य देशकालौ स्मृत्वा ऽमुकफलसिध्यर्थं अमुककर्मणि कुमारी पूजनं करिष्ये इति सं
कल्प्य मूलेन षडंगं कृत्वा मूलमंत्रमुच्चार्य मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं। नवदुर्गात्मि
कां साक्षात्कन्यामावाहयाम्यहमित्यावाह्यासनं पाद्यं च दत्वोष्णोदकेन पादौ प्रक्षाल्यार्घ्याचमन स्ना
न पट्टकूलवस्त्र कंचुकालंकारादि दत्वा सुगंधेनानुलिप्य हरिद्रा कुंकुम सिंदूरालक्तक कांचनपुष्पमा
लाभिरभ्यर्च्य धूपदीपौ दत्वा पायस नानाभक्ष्यैर्भोजयेत्। भोजनकाले च मूलमंत्रं सप्तशतीं वा
पठेत्। ततो नानाफल तांबूल दक्षिणा नीराजन पुष्पांजलीन्दद्यात्। एवमन्याः पूजयेत्। आवाहने
तु मंत्रभेदः। मंत्राक्षरमयीमिति सर्वत्र। कौमारीजगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि। पूजां गृहाण रम
कौमारी जगन्मातर्नमोस्तु ते इति प्रथमां॥ त्रिपुरां त्रिगुणाधारां ज्ञानमार्गस्वरूपिणीं। त्रैलो ॥३२५॥

कथवंदितां देवीं त्रिपुरां पूजयाम्यहमिति द्वितीयां। कालिकां तु कलातीतां कारुण्यैकपरां शिवां।
कल्याणजननीं नित्यां कल्याणीं पूजयाम्यहमिति तृतीयां॥ अणिमादिगुणाधारामकाराद्यक्षरात्मि
कां। अनंतशक्तिसहितां कामाक्षीं पूजयाम्यहमिति चतुर्थी॥ कामचारां महामायां कारुण्यहृदयां
शिवां। कामदां करुणोदारां रोहिणीं पूजयाम्यहमिति पंचमीं। चंडवीरां चंडमायां चंडमुंडप्रभंजनीं।
ब्रह्मेशविष्णुनमितां चंडिकां पूजयाम्यहमिति षष्ठीं॥ सुखानंदकरीं शांतां सर्वदेवनमस्कृतां। सर्व
भूतात्मिकां देवीं शांभवीं पूजयाम्यहमिति सप्तमीं॥ सुंदरीं स्वर्णवर्णांगीं सुखसौभाग्यदायिनीं।
संतोषजननीं देवीं सुभद्रां पूजयाम्यहमित्यष्टमीं॥ दुर्गमे दुस्तरे कार्ये भयशोकविनाशिनीं। पू
जयामि सदा भक्त्या दुर्गां दुर्गार्त्तिहारिणीमिति नवमीं। ततो ब्राह्मणसुवासिनीपूजा॥ एवं
देवीकुमार्यादिपूजा नवरात्रेपि प्रत्यहं कार्या। इयं शरत्वंध्यां दिनचतुष्टये द्विगुणादिरध्याका

या। सहस्रचंड्यां दशोत्तरवृद्धिः। ततः पूजां देव्यै समर्प्य सर्वे विप्राः कृतांगन्यासाः शतं नवार्णव
मंत्रं जप्त्वा कवचार्गलाकीलकानि सकृज्जप्त्वा सप्तशतीं जप्त्वांते रहस्यं नवार्णवशतं जपेत्। कव
चादीनां प्रत्यावृत्तिनावृत्तिः। एवं ऋत्विजः प्रथमे एकं द्वितीये द्वे तृतीये त्रीणि च तुर्थे चत्वारि
पाणीत्येवं जपं कुर्युः। ऋत्विजां कर्तुश्च क्षीरमात्राशनमशक्तो हविष्याशनं वा प्रत्यहं सहस्रैश
तं वा ब्राह्मणान् भोजयेत्। पंचमेऽह्नि होमः। नवरात्रे तु नवम्यामेव होमः॥ ॥अथ होमः॥ तत्र स्व
गृह्योक्तस्य आगमोक्तत्रस्य च समुच्चयः। गृह्योक्तं कृत्वा आगमोक्तं कुर्यात्। यथा॥ देशका
लौ स्मृत्वा ब्राह्मणद्वारा कृतस्य नवचंडी शतचंडी सहस्रचंडीनामन्यतमस्य संपूर्णतासिध्य जपरु
र्थं दशांशेन तिलमिश्रपायसद्रव्येण होमं करिष्ये तदंगं कुंडसंस्काराग्निस्थापनादि करिष्ये राम
इति संकल्प्य मूलेन कुंडं वीक्ष्यास्त्रेण संप्रोक्ष्य तेनैव दर्भैः संताड्य कवचेनाभ्युक्ष्याश्वत्थसमि॥ २६॥

धाम्मूलेनप्रागग्राउदगग्राश्चतिस्रोरेखाःकृत्वाप्रागग्रासुविष्णुरीशशक्रान्तुउदगग्रासुब्रह्मयम
चंद्रानभ्यर्च्यमध्येत्रस्रषट्कोणाष्टदलंध्यात्वामूलेनाभिमंत्र्यधेनुमुद्रांप्रदर्श्यास्त्रेणसंरक्ष्यकव
चेनावगुंठ्यगंधाद्यैःसंपूज्यमूलेनप्रतिष्ठाप्यॐचित्पिंगलहन२पच२दह२सर्वाज्ञांज्ञापयस्वाहा
इतिज्वालिनीमुद्रांप्र दर्श्येंधनैःसमिध्यास्त्रेणरक्ष्यांःकंकणंबध्वाग्नेर्गर्भाधानादिसंस्का
रान्कुर्यात्।प्रतिसंस्कारंमूलेनाज्येनत्रिर्जुहुयात्।नामकर्मणिलुशातमंगलनामासित्वंहुता
शनेतिनामकृत्वाजुहुयात्॥अथस्वदेहेन्यासः।ॐस्रंपद्मरागायैअग्निजिह्वायैनमःलिंगे।
ॐष्रूंस्फवर्णायैहृदये।ॐस्रूंभद्रलोहितायै·शिरसि।ॐय्रूंलोहितायै·मुखे।ॐल्रूंश्वेतायै·घ्रा
णे।ॐश्रृंधूम्रिन्यै·नेत्रयोः।ॐकराल्यै·सर्वांगे।सहस्रार्चिषेहृदयायनमः।स्वस्तिपूर्णायशिरसे
स्वाहा।उत्तिष्ठपुरुषायशिखायैवषट्।धूमव्यापिनेकवचायहुं।सप्तजिह्वायनेत्रत्रयायवौ॰

धनुर्धरायअस्त्रायफः।अग्नयेजातवेदसेनमः मूर्ध्नि।अग्नयेसप्तजिह्वांदक्षकरे।अग्नयेहव्यवाहना
यदक्षकधां।अग्नयेश्वोदरायलिंगे।अग्नयेवैश्वानरायवामकधां।अग्नयेकौमारतेजसेवामपा
र्श्वे।अग्नयेविश्वमुखायप्रायासे।अग्नयेदेवमुखायशिखायां।ततोग्निंध्यात्वापरिसमुह्यपरि
स्तीर्यपरिधीन्निक्षिप्योपरिमेखलाक्रमेणब्रह्मविष्णुरुद्रान्।योन्यांगौरींचसंपूज्यवह्नौयंत्रंविचिंत्य
षट्दलेषुआग्नेयादिकोणेषुपुरतःपश्चान्मध्येचस्त्रंपभरागायेइत्यादिप्र वौक्तसप्तजिह्वाःसं
पूज्याग्नेयादिकोणेषुपुरतःपश्चाच्चसहस्रार्चिषेइत्यादिषडंगानिसंपूज्याष्टदलेषुपूर्वोक्तादिक्षु
अग्नयेजातवेदसेइत्याद्यष्टौमूर्तीसंपूज्यचतुरस्रेइत्या दीन्सायुधान्संपूज्यकुंडनवसप्त्यासंवेश्य
पात्रासादनादिस्वगृह्योक्तंकृत्वानिर्वापादिनाप्रभूतपायसंश्रपयित्वाज्यंचरुंवह्नीमित्यस्तिमंत्र्य राम
धेनुमुद्रांदर्शयेत्।ततस्तिष्ठमोनीवह्नौतिस्रःसमिधोभ्याधायपाम्यदक्षिणयोरिडापिंगलेमध्ये।।२८७।।

सुषुम्नां च ध्यात्वा चक्षुषी कृत्वा ऽग्नीषोमाभ्यां मध्ये ऽग्नये स्विष्टकृते च कृत्वा पूर्वोक्त सौजिह्वादिमू
र्तिभ्यस्तन्मंत्रैरेकामाज्याहुतिं कृत्वा मर्त्येभ्यः पितृभ्यो यक्षेभ्यो नागेभ्यश्च कृत्वा च चतुर्गृहीत्वा
वैश्वानर जातवेदः इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा वौषट् इति कृत्वा गणेशमंत्रे
ण जुहुयात्। ततः पूर्वोक्तन्यासान्कृत्वा वह्नौ पीठपूजां कृत्वा देवीमावाह्यावाहनादिमुद्राः प्रदर्श्य
षडंगं कृत्वा षोडशोपचारैः संपूज्य मूलेन शतमेकादशाधिकमाज्याहुतीः कृत्वा नवग्रहेभ्यो लोक
पालेभ्यश्च तन्मंत्रैः समिदाज्यचरून्हुत्वा पायसतिलपलाशपुष्पसर्षपपूगीफललाजादूर्वांकु
रयवबिल्वफलरक्तचंदनगुग्गुलुद्रव्याणि तिलमिश्रं पायसमेव वा। कवचार्गलकीलकरहस्यैः
प्रतिश्लोकं कृत्वा कृतस्य जपस्य दशांशेन प्रतिश्लोकं सप्तशतीमंत्रेणोक्तद्रव्याणि तिलपायसं वा
जुहुयात्। अध्यायसमाप्तौ ऽवावस्थले च पत्रपुष्पफलैर्होमः। यद्दानमोदेथा इत्यनेन नवार्णेन

वाज पदस्थानं ग्रहहोमः।एवं प्रधानहोमं कृत्वा नामभिः स्रुवेणाज्यं पायसं च जुहुयात्॥ यथा॥ कादंब
र्यै स्वाहा।उल्कायै·करालायै·रक्षायै·श्वेतकोबेर्यै·हरितायै·पक्षिण्यै·।कंकाल्यै·।सुरश्रेष्ठायै·सर्वराज्यै·
ब्राह्म्यै·माहेश्वर्यै·कौमार्यै·वैष्णव्यै·वाराह्यै·ऐंद्र्यै·नारसिंह्यै·चामुंडायै·धात्रे·विधात्रे·।शंखनिध
ये·पद्मनिधये·द्वारश्रियै·वास्तुपुरुषाय·ऐरावताय·पुंडरीकाय·वामनाय·कुमुदाय·अंजनाय·
पुष्पदंताय·सार्वभौमाय·सुप्रतीकाय·स्मनकाय·पुंडरीकाय·गुग्गुलाय·कुरंटकाय·ऋग्वेदाय·
यजुर्वेदाय·सामवेदाय·अथर्ववेदाय·नवग्रहाणां च दिक्पालानां च नामभिः।असितांगभैरवा
य·रुरुभैरवाय·चंडभै·क्रोधभै·उन्मत्तभै·कपालभैरवाय·भीषणभैरवाय।संहारभैरवाय·ततः
पूर्वोक्त आधारशक्त्यादिपीठदेवताभ्य आवरणदेवताभ्यश्च हुत्वा स्विष्टकृतं कृत्वा ॐ क्लीं माहे
श्वरी वैष्णवी वाराही नारसिंही ह्रीं चामुंडायै विच्चे स्विष्टकृते स्वाहेति स्विष्टकृतं कृत्वाज्यं जुहुयात्॥ ॥३२॥

राम

ॐह्रींनंदायैविघ्नेस्वाहा।ॐह्रींरक्तदंतिकायैविघ्ने·।ॐह्रींशाकंभर्यैविघ्ने·।ॐह्रींदुर्गायैविघ्ने·।ॐह्रीं
भीमायैविघ्नेस्वाहा।ॐह्रींभ्रामर्यैविघ्ने·।ॐह्रींकालिकायैविघ्ने·।ॐह्रींशिवदूत्यै·विघ्ने·।ॐह्रींप्रजा
पतयेस्वाहेतिकृत्वाप्रायश्चित्तहोमांतेदिक्पालनवग्रहविनायकादिक्षेत्रपालादिभ्योमाष
भक्तबलीन्दत्वाद्वादशगृहीतेनसमुद्रादूर्मिरितितत्वेनमूर्द्धानंदिवःपुनस्त्वादित्याःपूर्णादर्वि·
सप्तते·धामंतइत्येतैर्मूलेनचपूर्णाहुतिंकृत्वाइदमग्नयेवैश्वानरायवसुरुद्रादित्येभ्यःशतक्र
तवेसप्तवतेऽग्नयेमहालक्ष्म्यैचनममेतित्यजेत्।ततोवसोर्द्धारांकृत्वासंस्रवान्प्राश्यप्रणीतावि
मोकादिकर्मशेषंसमाप्यमूलमंत्रेणहोमदशांशेनदुग्धेनजलेनवातर्पयित्वातद्दशांशेनमार्ज
येत्।ततःश्रेयःसपाद्याचार्यादीन्वस्त्राद्यैःसंपूज्याचार्यायशतंतदर्धंतदर्धंअष्टौवागोमिथुना
निसुवर्णंचतुष्टयंचदद्यात्।ब्रह्मणेनिष्कद्वयंगोद्वयंच।ऋत्विग्भ्यःप्रत्येकंनिष्कत्रयंगोमिथुनंच।

इदंसहस्रचंद्री। तदर्धंशतचंद्री। तदर्धंनवचंद्री। अशक्तोसर्वेभ्यः सुवर्णं। ततोदानान्याचार्यादि
भ्योऽन्येभ्योवादद्यात्। यथा। विप्रंसंपूज्यकपिलांगांस्वर्णशृंगींरौप्यखुरींताम्रपृष्ठींकांस्यदोहनीं
सवस्त्रांसंपूज्य। कपिलेसर्वभूतानांपूजनीयासिरोहिणि। तीर्थदेवमयीयस्मादतःशांतिंप्रयछमे
इतिमंत्रेणदद्यात्। यथारत्नेषुसर्वेषुसर्वेदेवाव्यवस्थिताः। तथाशांतिंप्रयछंतुरत्न दानेनमेसुरा
इतिनीलमणिं। अथश्वेताश्वदानं। विप्रंसंपूज्यअश्वंहेमपल्याणंरौप्यकंठकंगजदंतवज्रनेत्रता
म्रमयक्षुरक्षौमपुछस्वर्णललाटपट्टसुकक्षास्वायुधग्रैवेयसुवस्त्रयुतंधान्यरत्नोपरिस्थंकृत्वा॥
मार्तंडायुधवेगायकाश्यपायात्रिमूर्तये॥जगद्दीपायसूर्यायत्रिवेदायनमोनमः॥त्यकृतामुकश
र्मणोऽमुकशाखाध्यायिनेसूर्यलोकनिवासकामनयादेवीप्रीतिकामनयावाइमंश्वेताश्वंतुभ्यमहं राम
संप्रददेनममेत्यकृत्वाकर्णंविप्रहस्तेदत्वामंत्रंपठेत्। महार्णवेसमुत्पन्नउच्चैःश्रवसपुत्रक। मया॥३२९॥

त्वं विप्रमुख्याय दत्तो हय सुखी भव। इमं विप्र नमस्तुभ्यं मया वैते प्रतिपादितं। प्रतिगृह्णीष्व विप्रेंद्र मया दत्तं सुशोभनमिति। ततः सुवर्णं दक्षिणां दद्यात्। इहामुत्रातपत्राणां कुरु के शावमे प्रभो॥ छत्रं तस्मात्त्वयेदत्तं ब्राह्मणाय मया सहोतिष्ठ त्वं॥ शशांककरसंकाश हिमडिंडीरपांडुर॥ प्रोत्सारयाशु दुरितं चामरामरवल्लभेति चामरं॥ सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता। अनंतसस्यफलदा अतः शांतिं प्रयच्छतु इति भूमिं॥ यथा न लक्ष्मीशयनं शून्यं सागरजातया। शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि॥ इति शय्यां॥ तुष्टिं करोति भूतानामिह लोके परत्र च। तस्मात्प्रदीयते धान्यमतः शांतिं प्रयच्छ मे॥ इति सप्तधान्यानि च दद्यात्। ते नोद्धारजापकेभ्यो न्येभ्यश्च दक्षिणां दद्यात्॥ ततः सर्वकलशोदकेन सामात्यं यजमानं सुमंगलैः वेदघोषैः सुरास्त्वामभि त्यादि पौराणैश्चाभिषिंचेयुः॥ ततो यजमानो नवग्रहाणामुत्तरपूजां कृत्वा विसृज्याचार्यहस्ते दत्वा देवीं संपूज्य व

लिंदद्यात्॥तत्रक्षत्रियादीनांचमेषछागमहिषाणामन्यतरंदेयं॥विप्रेणतुकूष्मांडंविल्वमि
क्षवश्चदेयाः॥यथा॥देवींक्षेत्रपुष्पबिल्वाम्रदलजातीचंपकैःसंपूज्यउदङ्मुखःकृत्वापूर्व
मुखंदेवींमुखंवाबलिंगंधादिनाभ्यर्च्य॥पशुस्त्वंबलिरूपेणममभाग्यादुपस्थितः॥प्रणमा
मिततःसर्वरूपिणंबलिरूपिणं॥चंडिकाप्रीतिदायेनदातुर्वापाद्विनाशनं॥चामुंडाबलिरूपाय
बलेतुभ्यंनमोस्तुते॥यज्ञार्थंबलयःसृष्टाःस्वयमेवस्वयंभुवा॥अतस्त्वांघातयाम्यद्यतस्मा
द्यज्ञेवधोवधःइत्यभिमंत्र्यऐंह्रींश्रीमितितत्रपुष्पंक्षिप्त्वा·रसनात्वंचंडिकायाःसुरलोकप्रसा
धकः॥ह्रींह्रींखड्गश्रींहुंफडितिखड्गमन्यद्वाशस्त्रंसंपूज्यॐकालिकालियज्ञेश्वरिलोहदंडायैन
मःइतिछेदयित्वाॐह्रींऐंह्रींकौशिकीरुधिरेणाप्यायतामितिदेव्यैनिवेद्यशेषंगृहीत्वा·पूतना
यैचरक्यैविदार्यैपापराक्षस्यैचनिवेद्यमाषपिष्टमयंशत्रुंकृत्वाखड्गेनछेदयित्वास्कंदायवि

४ जंभकाः सिद्धगंधर्वमालविद्याधरानगाः। दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः। जगतां शांतिकर्तारो ब्र
ह्माद्याश्च महर्षयः। माविघ्नं मा च मे पापं मा संतु परिपंथिनः। सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः इति। ४४

विशारवायचवलिशेषं रक्षोभ्यो हरेत्। ओं ह्रीं स्फुर २ कुंभ २ सृनु २ गुलु २ धनु २ मारय २ विद्रावय २ कं
पय २ कंतापय २ पूरय २ ओं ह्रीं ओं ओं फट् २ ओं मर्दय २ ओं इति। ततः शेषेण बहिर्दद्यात्। तत्र मंत्रः। बलिं
गृह्णंत्विमं देवा आदित्या वसवस्तथा। मरुतोथाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः। असुरा या
तुधानाश्च पिशाचोरगराक्षसाः। डाकिन्यो यक्षवेतालाः योगिन्यः पूतनाः शिवाः। ततः स्नात्वा
तिलकं धृत्वा खड्गिनी शूलिनी त्येन शूलेन पाहि नो देवीति चतुष्टयेन नमो देव्या इति पंचकेन प्रा
र्थयेत्। रूपं देहि यशो देहि भगं भगवति देहि मे। पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे। महिष
घ्नि महामाये चामुंडे मुंडमालिनि। आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते। ततः गुह्यातिगुह्य
गोप्त्री त्वं गृहाणास्मत्कृतं जपं। सिद्धिर्भवतु मे देवि प्रसादात्तव सुंदरीति देव्यै निवेद्य मूलेन पुष्पे
ण देवीं मुद्धास्य नासया हृदि प्रविष्टां विभाव्य षडंगं कृत्वा उत्तिष्ठ अभ्यारमिति विसृज्याचार्यं

यदत्वामंत्रंपठेत।त्रैलोक्यमातर्देवित्वंसर्वभूतदयान्विते।दानेनानेनसंतुष्टासुप्रीतावरदाभवेति।
नवरात्रेतुविशेषः।दशम्यांदेवींविसृजेत्।उत्तिष्ठदेविचंडेशिशुभांपूजांप्रगृह्यच।कुरुष्वममकल्या
णमष्टाभिःशक्तिभिःसहेत्यत्थाप्यगच्छगच्छपरंस्थानंस्वस्थानंदेविचंडिके।व्रजस्रोतोजलंवृध्यै
स्थीयतांचजलेत्विह।दुर्गेदेविजगन्मातःस्वस्थानंगच्छपूजिते।संवत्सरेव्यतीतेतुपुनरागमनायवै।
इमांपूजांमयादेवियथाशक्त्योपपादितां।रक्षार्थंत्वंसमादायव्रजस्वस्थानमुत्तमम्।इतिजलेप्रवा
हयेत्।ततोग्निंसंपूज्यविप्रहुतिंधृत्वागच्छगच्छेतिविसृज्यसहस्रंचंडीपाठंसहस्रं॰अन्यत्रशतंयथा
शक्तिवाविप्रान्संभोज्ययस्यस्मृत्या॰प्रमादात्कुर्वतामितिजपित्वापूर्णतांवाचयित्वाकर्मेश्वरार्प
णंकृत्वासुहृद्युक्तोभुंजीत।इदमेवपूजाहोमबल्यादिविधानंनवरात्रेपिज्ञेयं।विशेषस्तुमत्कृत राम
तेनिर्णयसिंधौनवरात्रनिर्णयेज्ञेयः॥ ॥श्रीमन्नारायणाख्यान्समजनिविबुधोरामकृ॥३३१॥

ख्याभिधानस्तत्सूनुः सर्वविद्यांबुधिनिजचुलकीकारतः कुंभजन्मा ॥ दृष्ट्वा नानानिबंधान्वि
स्वयदतुलं ग्रंथरत्नाकराख्यः पित्रोः पादाब्जभृंगो रघुपतिपदयोः स्वोश्रमं प्रापयच्च ॥ ॥
॥ ॥ इति शतचंडीसहस्रचंडीप्रयोगः ॥ ॥ यो भाट्टतंत्रगहनार्णवकर्णधारः शास्त्रांतरेषु
निखिलेष्वपि मर्मवेत्ता ॥ पोत्रः श्रमोस्ति विहितः कमलाकरेण प्रीतो मुना स्तु सुकृती बुधरा
मकृष्णः ॥ ॥ इति श्रीमत्सद्वाक्यप्रमाणपारावारधुरीणरामेश्वरभट्टसूरिसूनुनारायण
भट्टसुतमीमांसकरामकृष्णभट्टात्मजकमलाकरभट्टकृतशांतिरत्नं समाप्तं ॥ ॥ ७ ॥
॥ ॥ संवत् १७७७ फाल्गुनशुद्धदशम्यां पुणतामकरोपनामकगंगाधरेणालेखि ॥ ॥
इदं पुस्तकं भट्टोपनामकपुराणिकाख्यमहादेवेन क्रयेण संपादितं ॥ ॥

राम

॥ शांतिकुमतगकर समाप्तः ॥

[OrderDescription]
,CREATED=20.07.20 11:26
,TRANSFERRED=2020/07/20 at 12:30:32
,PAGES=671
,TYPE=STD
,NAME=S0003341
,Book Name=M-2495-SHANTI KAMLAKAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF

FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF

FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF

FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF

FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF

FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF

FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF

FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF

FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF

FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF

FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF

FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF

FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF

FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF

FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF

FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF

FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF

FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF

FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF

FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF

FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF

FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF

FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF

FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF

FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF

FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF

FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF

FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
,FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF

FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF
,FILE440=00000440.TIF
,FILE441=00000441.TIF
,FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF

FILE448=00000448.TIF
,FILE449=00000449.TIF
,FILE450=00000450.TIF
,FILE451=00000451.TIF
,FILE452=00000452.TIF
,FILE453=00000453.TIF
,FILE454=00000454.TIF
,FILE455=00000455.TIF
,FILE456=00000456.TIF
,FILE457=00000457.TIF
,FILE458=00000458.TIF
,FILE459=00000459.TIF

FILE460=00000460.TIF
,FILE461=00000461.TIF
,FILE462=00000462.TIF
,FILE463=00000463.TIF
,FILE464=00000464.TIF
,FILE465=00000465.TIF
,FILE466=00000466.TIF
,FILE467=00000467.TIF
,FILE468=00000468.TIF
,FILE469=00000469.TIF
,FILE470=00000470.TIF
,FILE471=00000471.TIF

FILE472=00000472.TIF
,FILE473=00000473.TIF
,FILE474=00000474.TIF
,FILE475=00000475.TIF
,FILE476=00000476.TIF
,FILE477=00000477.TIF
,FILE478=00000478.TIF
,FILE479=00000479.TIF
,FILE480=00000480.TIF
,FILE481=00000481.TIF
,FILE482=00000482.TIF
,FILE483=00000483.TIF

FILE484=00000484.TIF
,FILE485=00000485.TIF
,FILE486=00000486.TIF
,FILE487=00000487.TIF
,FILE488=00000488.TIF
,FILE489=00000489.TIF
,FILE490=00000490.TIF
,FILE491=00000491.TIF
,FILE492=00000492.TIF
,FILE493=00000493.TIF
,FILE494=00000494.TIF
,FILE495=00000495.TIF

FILE496=00000496.TIF
,FILE497=00000497.TIF
,FILE498=00000498.TIF
,FILE499=00000499.TIF
,FILE500=00000500.TIF
,FILE501=00000501.TIF
,FILE502=00000502.TIF
,FILE503=00000503.TIF
,FILE504=00000504.TIF
,FILE505=00000505.TIF
,FILE506=00000506.TIF
,FILE507=00000507.TIF

FILE508=00000508.TIF
,FILE509=00000509.TIF
,FILE510=00000510.TIF
,FILE511=00000511.TIF
,FILE512=00000512.TIF
,FILE513=00000513.TIF
,FILE514=00000514.TIF
,FILE515=00000515.TIF
,FILE516=00000516.TIF
,FILE517=00000517.TIF
,FILE518=00000518.TIF
,FILE519=00000519.TIF

FILE520=00000520.TIF
,FILE521=00000521.TIF
,FILE522=00000522.TIF
,FILE523=00000523.TIF
,FILE524=00000524.TIF
,FILE525=00000525.TIF
,FILE526=00000526.TIF
,FILE527=00000527.TIF
,FILE528=00000528.TIF
,FILE529=00000529.TIF
,FILE530=00000530.TIF
,FILE531=00000531.TIF

FILE532=00000532.TIF
,FILE533=00000533.TIF
,FILE534=00000534.TIF
,FILE535=00000535.TIF
,FILE536=00000536.TIF
,FILE537=00000537.TIF
,FILE538=00000538.TIF
,FILE539=00000539.TIF
,FILE540=00000540.TIF
,FILE541=00000541.TIF
,FILE542=00000542.TIF
,FILE543=00000543.TIF

FILE544=00000544.TIF
,FILE545=00000545.TIF
,FILE546=00000546.TIF
,FILE547=00000547.TIF
,FILE548=00000548.TIF
,FILE549=00000549.TIF
,FILE550=00000550.TIF
,FILE551=00000551.TIF
,FILE552=00000552.TIF
,FILE553=00000553.TIF
,FILE554=00000554.TIF
,FILE555=00000555.TIF

FILE556=00000556.TIF
,FILE557=00000557.TIF
,FILE558=00000558.TIF
,FILE559=00000559.TIF
,FILE560=00000560.TIF
,FILE561=00000561.TIF
,FILE562=00000562.TIF
,FILE563=00000563.TIF
,FILE564=00000564.TIF
,FILE565=00000565.TIF
,FILE566=00000566.TIF
,FILE567=00000567.TIF

FILE568=00000568.TIF
,FILE569=00000569.TIF
,FILE570=00000570.TIF
,FILE571=00000571.TIF
,FILE572=00000572.TIF
,FILE573=00000573.TIF
,FILE574=00000574.TIF
,FILE575=00000575.TIF
,FILE576=00000576.TIF
,FILE577=00000577.TIF
,FILE578=00000578.TIF
,FILE579=00000579.TIF

FILE580=00000580.TIF
,FILE581=00000581.TIF
,FILE582=00000582.TIF
,FILE583=00000583.TIF
,FILE584=00000584.TIF
,FILE585=00000585.TIF
,FILE586=00000586.TIF
,FILE587=00000587.TIF
,FILE588=00000588.TIF
,FILE589=00000589.TIF
,FILE590=00000590.TIF
,FILE591=00000591.TIF

FILE592=00000592.TIF
,FILE593=00000593.TIF
,FILE594=00000594.TIF
,FILE595=00000595.TIF
,FILE596=00000596.TIF
,FILE597=00000597.TIF
,FILE598=00000598.TIF
,FILE599=00000599.TIF
,FILE600=00000600.TIF
,FILE601=00000601.TIF
,FILE602=00000602.TIF
,FILE603=00000603.TIF

FILE604=00000604.TIF
,FILE605=00000605.TIF
,FILE606=00000606.TIF
,FILE607=00000607.TIF
,FILE608=00000608.TIF
,FILE609=00000609.TIF
,FILE610=00000610.TIF
,FILE611=00000611.TIF
,FILE612=00000612.TIF
,FILE613=00000613.TIF
,FILE614=00000614.TIF
,FILE615=00000615.TIF

FILE616=00000616.TIF
,FILE617=00000617.TIF
,FILE618=00000618.TIF
,FILE619=00000619.TIF
,FILE620=00000620.TIF
,FILE621=00000621.TIF
,FILE622=00000622.TIF
,FILE623=00000623.TIF
,FILE624=00000624.TIF
,FILE625=00000625.TIF
,FILE626=00000626.TIF
,FILE627=00000627.TIF

FILE628=00000628.TIF
,FILE629=00000629.TIF
,FILE630=00000630.TIF
,FILE631=00000631.TIF
,FILE632=00000632.TIF
,FILE633=00000633.TIF
,FILE634=00000634.TIF
,FILE635=00000635.TIF
,FILE636=00000636.TIF
,FILE637=00000637.TIF
,FILE638=00000638.TIF
,FILE639=00000639.TIF

FILE640=00000640.TIF
,FILE641=00000641.TIF
,FILE642=00000642.TIF
,FILE643=00000643.TIF
,FILE644=00000644.TIF
,FILE645=00000645.TIF
,FILE646=00000646.TIF
,FILE647=00000647.TIF
,FILE648=00000648.TIF
,FILE649=00000649.TIF
,FILE650=00000650.TIF
,FILE651=00000651.TIF

FILE652=00000652.TIF
,FILE653=00000653.TIF
,FILE654=00000654.TIF
,FILE655=00000655.TIF
,FILE656=00000656.TIF
,FILE657=00000657.TIF
,FILE658=00000658.TIF
,FILE659=00000659.TIF
,FILE660=00000660.TIF
,FILE661=00000661.TIF
,FILE662=00000662.TIF
,FILE663=00000663.TIF

FILE664=00000664.TIF
,FILE665=00000665.TIF
,FILE666=00000666.TIF
,FILE667=00000667.TIF
,FILE668=00000668.TIF
,FILE669=00000669.TIF
,FILE670=00000670.TIF
,FILE671=00000671.TIF
,